॥ श्रीः ॥

महामहोपाध्यायकृष्णमिश्रकृतं

कालसर्वस्वम्

डॉ० विश्वनाथस्वाईं

MAHĀMAHOPĀDHYĀYA KṚṢṆA MIŚRA'S

KĀLASARVASVAM

Edited with note "Mañjūṣā" and introduction

by

Dr. Biswanath Swain

Department of Dharmaśāstra

Śrī Jagannātha Veda Karmakāṇḍa Mahāvidyālaya

Puri, Orissa, India.

Mahāmahopādhyāya Kṛṣṇa Miśra's

KĀLASARVASVAM

(with MAÑJŪṢĀ Tippaṇī)

Published with the financial assistance from the
Rashtriya Sanskrit Sansthan, New Delhi

First Edition - 1997
1000 copies

Available at :
SAMVIDI
15, Mahodadhi Market
Puri - 752001

Price -

Printed by : Rama Press, North Gate, Puri-752001

PREFACE

Many works on 'Time' are available in manuscript forms. The present work Kālasarvasvaṃ is an exception in a sense that it deals with Universal time Nitya Kāla and its diffent paradigms The Universal time is one but it becomes manifold due to different conditions (Upādhi). The condition is described as the oscillation of the Sun (Sūrya-Parispanda). Further, the time is experienced in two major ways. At the first level, it is Sthūla Kāla which is also termed as Mahā Kāla. This stands all-pervasive and is realised as Iśvara When the time is experienced with different conditions it is called Khaṇḍa Kāla at the second level of experience. Thus the whole text covers various doctrines relating to time.

I have critically edited the work with my original note "Mañjūṣā" for ready reference and scholastic perusal

In preparing this text I owe a great debt to different persons and agencies First cf all, I express my deep sense of gratitude to Dr. K K. Mishra, Director, Rashtriya Sanskrit Sansthan, New Delhi

for his magnanimous attitude of providing financial assistance to bring this work to limelight. This is an opportunity for me to acknowledge my debt of gratitude to the following persons whose inspirations are at the root of the present shape of this work. They are : Late Pt. Kulamani Mishra, Puri, Pt. Somanath Dash, Puri, Dr Harihar Jha, Darbhanga, Dr Herambanath Chatterjee, Calcutta, Dr. V. S. Tripathy, Darbhanga, Pt. Nilamani Mishra, Bhubaneswar, Dr. Keshab Chandra Dash, Puri. Śaṃ.

Biswanath Swain

Puri, dt. 14-1-97 Sri J.V.K. Mahavidyalaya

CONTENTS

—o—

भूमिका

धर्मशास्त्रस्य परिचयः

"धर्मशास्त्रं नाम सकलशास्त्रपुरस्कृतं निखिललोकसुरक्षकं कृत्याकृत्यप्रतिपादकत्वेन नित्यनियतोपादेयं साक्षाद्वेदार्थानुमापकत्वेन वेदवत्प्रमाणं तपःस्वाध्यायपूतचरित्राणां यमनियमानुष्ठानप्रयतात्मनां सकलसंस्कारसंस्कृतानामात्मगुणविद्योतितान्तःकरणानां ब्रह्मादिस्तम्बपर्यन्तसकलभूतहिताकाङ्क्षिणां रागद्वेषरहितानां मनुगौतमवसिष्ठादिमहर्षीणां निरतस्वाध्यायाध्ययनपूतकण्ठोद्गीर्णत्वेन सर्वजनग्रहणीयं गुणिगणसमादरणीयं प्राचीनतमं शास्त्रम्।"[1] इति अस्मदाचार्याणामुक्तिं पुरस्कृत्योपस्थापयितुमिदं युज्यते यत् सरलातिसरलेन धर्मप्रतिपादकं शास्त्रं धर्मशास्त्रम्। तस्यैव धर्मशास्त्रस्य स्मृतिरित्यपरा संज्ञा[2]। यद्यपि शिक्षाकल्पव्याकरणनिरुक्तच्छन्दोज्योतिषानि वेदाङ्गान्यपराणि पुराणादीनि तर्कशास्त्राणि वेदार्थानुमापकत्वेन गुरुपरम्परया वा स्मृतिसंज्ञकानि भवितुमर्हन्ति तथापि धर्मशास्त्रस्य तु स्मृतिसंज्ञा योगरूढा[3]।

अखिलो वेदो धर्ममूलम्[4]। वेदानां वैभिन्न्याद्वेदज्ञानानां कालक्रमेण विपर्ययाच्च कृत्याकृत्यज्ञानाय नरसाधारणेन वेदज्ञानामनुशासनान्याश्रितानि। तेषु कानिचित् साक्षाद्वेदमूलकानि, कानिचिच्चाष्टकाश्राद्धादीनि प्रत्यक्षमूलवेदप्रमाणरहितत्वेऽपि प्रत्यक्षेषु परोक्षेषु च नानावेदेषु विप्रकीर्णस्यानुष्ठेयार्थस्यैकत्र सङ्क्षिप्यमाणत्वादनुमेयानि स्मृतिप्रामाण्याधिकरणसिद्धान्तितानि[5]।

1- "धर्मशास्त्रस्य गौरवम्"-ले०-कुलमणिमिश्राः—श्रीदेवयानः-1974-75।
2- "श्रुतिस्तु वेदो विज्ञ यो धर्मशास्त्रं तु वै स्मृतिः।"-मनु० 2/10।
3- "यद्यपि वेदार्थानुमापकत्वेन व्याकरणगृह्यसूत्रपुराणादीनां शास्त्रान्तराणामपि स्मृतिसंज्ञा यौगिकी तथापि धर्मशास्त्राणां पङ्कजादिशब्दवत् सा योगरूढा।"—धर्मशास्त्रस्य गौरवम्-श्रीदेवयानः-1974-75।
4- "वेदोऽखिलो धर्ममूलम्"—मनु० 2/6।
5- "अष्टकादिस्मृतेर्धर्मे न मात्वं मानताऽथवा।
निर्मूलत्वान्न मानं सा वेदार्थोक्तौ निरर्थता॥ 1॥
वैदिकैः स्मर्यमाणत्वात् संभाव्या वेदमूलता।
विप्रकीर्णार्थसङ्क्षेपात् सार्थत्वादस्ति मानता॥ 2॥"
—जैमिनीयन्यायमाला-1/3/1/1,2।

अत एव वेदेष्वितस्ततोऽसम्बद्धरूपेणोपलब्धानां धार्मिकविधीनां वेदप्रणीताचारव्यवहारप्रायश्चित्तात्मकानुशासनानां वा प्रसङ्गनिर्देशपुरःसरं सर्वसाधारण्येनैकत्र स्फुटीकरणार्थमेव कालान्तरे धर्मशास्त्रस्योत्पत्तिः[6] ।

जगत्यस्मिन् जीवनयात्रानिर्वाहोपयोगित्वेनाचरणदृष्ट्या धर्मार्थकामानां त्रयाणां पुरुषार्थानां मुख्यत्वेन ग्रहणम् । तत्तद्विषयकसिद्धान्तानां प्रतिपादकं तत्तच्छास्त्रम् । यद्यप्यर्थकामयोरेतस्मिन् धर्मशास्त्रे प्रभुतमिश्रणमस्ति तथापि तुरीयपुरुषार्थमोक्षसिद्ध्यर्थं तयोः सर्वथाऽनुपयोगितया प्रतिबन्धकतया च गौणत्वं प्रतिपादितम्[7] । धर्मस्य साक्षान्मोक्षं प्रति हेतुत्वाभावेऽपि

6- a) The Vedas do not contain positive precepts (vidhis) or matters of Dharma in a connected form; but they contain incidental references to various topics that fall under the domain of Dharmashastra as conceived in latter times. Such information to be gathered from the vedic literature is not quite as meagre as is commonly supposed.

—History of Dharmashastra—by P.V. Kane-Vol-I-PP. 6-7.

b) The word Smrti primarily means the recollections of the individual vedic texts forming the basis of ancient customs and usages and secondarily the particular class of texts which record these customs and usages. X X X X X The primary source of Dharma was the Veda. But with the separation and settlement of different Vedic schools in remote areas and with the progress of time there was a gradual decrease in the knowledge of the people about the relivant Vedic texts which formed the basis of their Dharma. Then the people were forced to depend more on the recollection of the Vedic schools for the validity of their own duties, rites and customs. Thus Smrti came to mean not only those recollections of rites and customs etc., for which Vedic texts were available but also the recollection of other rites and customs etc., for which no Vedic proof could be made readily available.

—Dharmashastra is Mithila—by J. Ganguly. PP. 305-306.

7- "तत्र यद्यपि धर्मार्थकाममोक्षाः शास्त्रेणानेन प्रतिपाद्यन्ते तथापि धर्मस्य प्राधान्याद्धर्मग्रहणम् । प्राधान्यञ्च धर्ममूलत्वादितरेषाम् ।"

—मिताक्षराकारो विज्ञानेश्वरः—याज्ञ० - 1/1 ।

पारम्परिकत्वेन हेतुत्वमस्त्येव । अतोऽर्थकामयोर्भावन्यूनत्वं धर्मशास्त्रस्य व्यञ्जकत्वम् । उपादेयत्वप्रतिपादनावसरे प्रमुखतयेदमेव सिद्धान्तितम्[8] । शास्त्रान्तरेषु बहूपलभ्यमानानि कादाचित्कतया विरोधमूलकवचनानि यथा सन्ति तथा धर्मशास्त्रे नोपलभ्यन्ते कदाचिद्वा देशजातिकुलपरम्परानुसारं तेषां व्यवस्थापनं भवति कदाचिच्च तुल्यबलयोर्विकल्पः परिकल्प्यते इति धर्मशास्त्राणां परस्परसद्भाव इति धर्मशास्त्रस्य गौरवम्[9] ।

धर्मशास्त्रे निबन्धसाहित्यम्

स्मृतिग्रन्थसूत्रग्रन्थानां विरचनानन्तरं तत्तत्प्रतिपादितविषयाणामधिक-स्फुटीकरणाय स्थलविशेषेषु सरलीकरणायैकमुनिप्रदर्शितानां विभिन्नमुनि-प्रदर्शितानाञ्च वचनानां विरोधपरिहारपूर्वकं समाधानायाकाङ्क्षितोद्देश्य-परिपूरणाय च व्याख्यानानामावश्यकता समुत्पन्ना । स एव भावः इत्थं सङ्क्रमितः संवर्द्धितश्च येन परवर्त्तिनि काले प्रायः निखिलमूलग्रन्थानां व्याख्यानात्मककलेवरः वर्द्धितः । स एव व्याख्यानात्मकः समृद्धपरिसरो भाष्यत्वेन संज्ञितः । कालक्रमेण तस्मिन्नेव भाष्ये विरोधिमतानां व्याख्या-कारस्य स्वमतानाञ्च सन्निवेशो जातः । तस्मात् कारणादेव स्थलविशेषेषु तस्य वृद्धिः ह्रासश्च जातः ।

मूलवचनानां सुखबोधनाय कठिनशब्दानां स्थाने सरलशब्दाः प्रमाणानि च संशयवारकाणि यत्रोपस्थापितानि सा व्याख्या टीकेत्यपरसंज्ञा-विशेषा । यत्र चोदाहृतवचनानामपि व्याख्या क्रियते तद्भाष्यम् । यस्मिन् भाष्ये पूर्वोत्तरपक्षौ, स्वमतप्रदानपुरःसरमपरेषां प्रामाणिकवचनानि च सन्निवेशितानि स एव निबन्धः । व्याख्याभाष्ये मूलग्रन्थमनुसृत्य प्रवर्त्तेते । तत्र व्याख्याकृतां भाष्यकृतां च पराधीनतैव । निबन्धग्रन्थेषु निबन्धकाराणां स्वतन्त्रताऽप्रतिहतैव । तत्र ते स्वेच्छया विषयवस्तु यथाक्रमं सज्जयन्ति,

---

8- "अर्थकामेष्वसक्तानां धर्मज्ञानं विधीयते ॥" —मनु० 2/13 ।

9- "एतत् धर्मशास्त्राणां सुमहद् गौरवं यत् परस्परं संप्रतिपन्नानि विप्रति-पन्नान्यपि शास्त्राणि धर्मशास्त्रप्रशंसायां संवदन्तीति ।"

—धर्मशास्त्रस्य गौरवम्—श्रीदेवयानः-1974-75 ।

प्रकरणोचितानि वचनानि सन्निवेशयन्ति च । पूर्वोत्तरपक्षविन्यासः स्वमत-स्थापनं परपक्षविमर्दश्च सर्वत्र निबन्धेषु समानतया संस्थाप्यत इति टीका-भाष्यनिबन्धानां पारस्परिको विशेषः ।

धर्मशास्त्रनिबन्धकारेषु महामहोपाध्यायकृष्णमिश्रः

उत्कलीयस्मृतिनिबन्धकारेषु भूयोभूयः प्रशंसितेषु महामहोपाध्याय-कृष्णमिश्रः प्रमुखतमं स्थानं धत्त इति नास्ति काचिद्विप्रतिपत्तिः । कौत्स-कुलसम्भूतोऽयं न्यायवैशेषिकमीमांसाज्योतिषादिशास्त्रेषु निष्णात आसीदिति 'कालसर्वस्व'-ग्रन्थस्यास्य प्रकरणद्वयान्तिमभागोपन्यासात् ज्ञायते ।

महामहोपाध्यायकृष्णमिश्रस्य देशनिर्णयः

यद्यप्यसौ कृष्णमिश्रः न कुत्रचित् साक्षादात्मानमुत्कलीयत्वेन परिचाय-यति तथापि कालसर्वस्वे शुद्धिसर्वस्वे चोभयत्रान्यूनतया वारदशकमुत्कल-शब्दस्य अस्मद्देशशब्दस्य च प्रयोगादयमुत्कलीय इति ज्ञायते । अस्योत्कली-यत्वनिश्चयार्थं 'साहित्यरत्नाकर'स्य 'अलङ्कारसुधाकर'-टीकायाः "नाना-शास्त्रविशारद" इति प्रस्तावनामुत्थाप्य केदारनाथमहापात्रै[10]र्यन्मतमुपस्थाप्यते तत्तु प्रायतः समीचीनं न मन्यते यतः 'अलङ्कारसुधाकर'-टीकायाः प्रस्ताव-नायां दत्तवंशावली कालसर्वस्वकारस्य सद्यः लब्धवंशावलीतः पृथक् भवति । तस्मात् स एव कृष्णमिश्रः कालसर्वस्वकाराद्भिन्नो भवति । तथापि उत्कलीय-पूजाव्रतपर्वणां विशेषतो मार्गशीर्षकृष्णप्रथमाष्टमीबलदेवपूजोत्कलवैष्णव-तप्तमुद्राधारणविधीनां ग्रन्थेऽस्मिन् सुस्पष्टमुपन्यासोऽस्तीत्यतो महामहोपाध्या-यकृष्णमिश्र उत्कलीय इति दृढं निश्चीयते । वस्तुगत्या उत्कलेषु श्रीजगन्नाथ-पुरीक्षेत्रस्य पश्चिमभागे जगन्नाथविद्याधरपुर-ब्राह्मणशासनग्रामे कृष्णमिश्रस्य जन्म । ततः पाण्डित्यलाभावसरे कृष्णमिश्रः नवदुर्गनगरनिवासी जातः ।

कालसर्वस्वकारस्य वंशचरितम्

आनन्ददीक्षितनामा कौत्सवंशीयः कश्चन पण्डितः श्रीजगन्नाथपुरीक्षेत्रे वीरनरसिंहपुरे आसीत् । तस्य पुत्रः देवानन्दमिश्रः जगन्नाथविद्याधरपुर-शासनग्रामे निवसति स्म । देवानन्दमिश्रस्य द्वौ पुत्रावास्ताम्, हरिहरो

10-A Descriptive Cat. of Sans. Mss. of Orissa-Vol-I-Int.P.XXXV.

बलभद्रश्च । हरिहरः सन्तानविहीनः । बलभद्रस्य कृष्णः, दक्षेश्वरः, त्रिलोचनः, नारायणः, भुवनेश्वरः, वनमाली, सिद्धेश्वरः, भगवान् चेत्यष्टौ पुत्राः, दुर्गा सरस्वती चेति पुत्र्यौ चासन् । त्रिलोचनस्यैकपुत्रोऽनन्त-नामधेयः । अनन्तस्य पुत्रो लोकनाथः, तत्पुत्र उमेशः । अधुना नयागड-इति नगरान्तर्गतब्राह्मण-जनपदनिवासिन उमेशमिश्रस्य गृहे कालसर्वस्वकर्त्तुराराध्या सिद्धेश्वरी-देवी-प्रतिमा विराजते । नारायणस्य पुत्रो मृत्युञ्जयः, तत्पुत्रो लिङ्गराजः, तत्पुत्रौ दीनबन्धुः विश्वनाथश्च । दीनबन्धोः पुत्रौ चन्द्रशेखरो गङ्गाधरश्च । विश्वनाथस्य पुत्रः प्रसन्नमिश्रोऽधुना नवदुर्ग (नयागड)-नगरसमीप-लङ्केश्वरपुरब्राह्मणशासनग्रामनिवासी ।

महामहोपाध्यायकृष्णमिश्रस्य कालनिर्णयः

महामहोपाध्यायकृष्णमिश्रस्य कालनिर्णये विद्वज्जनकृतमालोचनमुपलभ्यते । तत्र केदारनाथमहापात्रैः[11] कृष्णमिश्रः कालसर्वस्वे वारत्रयं गोपीनाथवाजपेयिनं स्मरति योऽसौ उत्कलगजपतिद्वितीयरामचन्द्रदेवस्य राजगुरुरासीत्, अपि च प्रथमतः रघुनाथदाश-प्रतिपादित-राधाष्टमी-ललिता-सप्तम्यादि द्वितीयतः कालसर्वस्वे सन्निवेशितमितिकृत्वा कालसर्वस्वकार-

11- "The time of Krsna Mishra, author of Kalasarvasva can be fixed tentatively because he refers thrice to a Smrti-writer of Orissa named Gopinath Vajapeyi, who was the Rajguru of Gajapati Ramachandra Dev—II (1726-1736 A.D.) of Khurda as stated in the introductory portion of the unpublished Sanskrit drama named Madhuraniruddha Natakam by Chayani Chandra sekhar, son of Gopinath. X X X The reference to Gopinath Vajapeyi with respect places Krsna Mishra after C 1736 A.D. in the middle of 18th century. X X X X X X As such the time fixed for him above is quite tenable. X X X X X The most important point deserving mention here is the discussion about Lalitastami and Radhastami for the second time in the Kalasarvasva, which are first mentioned in the "Kalanirnaya" by Raghunath Dash." —A Descriptive Cat. of Sanskrit Mss. of Orissa—Vol-I, Intro. page-XXXVI-XXXVII.

कृष्णमिश्रस्य कालः 1736 खीष्टाब्दात् परमष्टादशशतकमध्यभागे इत्यनु-मन्यते । अन्यैरप्यनुरूपकालः स्वीक्रियते । वस्तुतः रघुनाथदाशेन सह महामहोपाध्यायकृष्णमिश्रस्य न कथञ्चिन् सम्पर्कः आसीत् , न वा रघुनाथ-दाशस्य प्रभावेन कृष्णमिश्रेण राधाष्टमी-ललितासप्तम्यादि लिखितं यतः कालसर्वस्वे ग्रन्थकारेण न कुत्रचित् रघुनाथदाशस्य नामोट्टङ्कितम् । अतः रघुनाथदाशात् परं कालसर्वस्वकारः कृष्णमिश्र इति सूचयन्तीं महापात्र-महोदयानां युक्तिं प्रति गुरुत्वं दातुं न शक्यते ।

कृष्णमिश्रवंशीयेभ्यः लब्धसूचनानुसारं कृष्णमिश्रस्य तिरोभावः 1826 खीष्टसंवत्सरात्पूर्वमभवत् । नानाशास्त्रेषु पारदर्शितालाभात् परमन्यूनतया तेन षष्टिवर्षवयसि महामहोपाध्याय इत्युपाधिर्लब्धा स्यात् । ततः परं दशकद्वयं यावद्यदि तस्य जीवनस्यावशिष्टकालः स्यात्तर्हि तस्य सम्पूर्णजीवन-कालः 1826 खीष्टसंवत्सरतः अशीतिवर्षेभ्यः प्रागारब्धः स्यात् । अतः कालसर्वस्वकार-कृष्णमिश्रस्य जन्म 1746 खीष्टाब्देऽभवदिति कथयितुं शक्यते ।

महामहोपाध्यायकृष्णमिश्रस्य कृतयः

कालसर्वस्वाभिधग्रन्थरत्नस्य मङ्गलाचरणादनुमीयते यत् कृष्णमिश्रः कालसर्वस्वलिखनात् प्राक् ग्रहणादिज्योतिःशास्त्रसम्बन्धीयं कञ्चन ग्रन्थं रचितवान् । तदाधाररूपेण कालसर्वस्व-ग्रन्थेऽपि ग्रहणसाधनावसरे भाविच-न्द्रसूर्यग्रह-वारुण्यादियोगानां विस्तृतालोचनमाध्यमेन कृष्णमिश्रस्य ज्योतिः-शास्त्रे अगाधप्रवेशः आसीदिति स्पष्टं परिलक्ष्यते । वस्तुगत्या किंनामकोऽसौ ग्रन्थः, तस्य स्वरूपञ्च कीदृशम् , तत्तु इदानीं यावत् जनसम्मुखं नागतम् । सोऽयं ग्रन्थः "नक्षत्रचूडामणिः" भवितुमर्हति । अस्य नक्षत्रचूडामणि-ग्रन्थ-स्यैका तालपत्रमातृका मद्रपुरीनगरस्थसर्वकारीयप्राच्यविद्यामातृकालये संरक्षिता वर्त्तते । किन्तु तद् ग्रन्थकृतो नाम तत्र नास्ति । कालसर्वस्वातिरिक्तः "शुद्धिसर्वस्वम्"इत्यभिधेयएकोग्रन्थःकृष्णमिश्रेणरचितः । शुद्धिसर्वस्वं बोधिनी-टिप्पनीसहितं मया सम्पादितम् । 1993 खीष्टाब्दे शुद्धिसर्वस्वं बोधिनीसहितं प्रकाशितम् । अपरं भक्तिसर्वस्वाभिधं ग्रन्थरत्नं कृष्णमिश्रेण विरचितमिति

"रामकृष्णादीनामुत्पत्तिनाशवचनानामाविर्भावतिरोभावपर्यवसानान्नित्यत्व-मित्याद्यधिकं "भक्तिसर्वस्वे" निर्णीतम्" इत्यादि कालसर्वस्वे (पृ-378) "एतत् साङ्गाह्निकं पद्यं यच्चास्मद्भक्तिसर्वस्वे" इत्यादि शुद्धिसर्वस्वे (पृ-88) च प्रतिपादितत्वात् । न केवलमेतदपि च कालसर्वस्वे वैष्णवप्रकरणमिति स्वतन्त्ररूपेणैकविभागस्योपस्थापनात् ग्रन्थमध्ये (पृ-436) च "वैष्णव-सर्वस्वमि" ति ग्रन्थस्योट्टङ्कनात् "वैष्णवसर्वस्वा"-भिधग्रन्थोऽपि कृष्ण-मिश्रेण रचित इति ज्ञायते ।

महामहोपाध्यायकृष्णमिश्रेणैतदतिरिक्तं "कृष्णमिश्रप्रक्रिया", "विद्या-पद्धतिः" चेति ग्रन्थद्वयं विरचितमिति नीलमणिमिश्रमहोदयानां[12] मतम् । अधिकन्तु कृष्णमिश्रेण "कल्पसूत्रम्" "सिद्धेश्वरीप्रकाशः" चेति ग्रन्थद्वयं विरचितमिति ग्रन्थकारवंशीय-दीनबन्धुमिश्रस्य मतम् । अतोऽन्येऽपि ग्रन्थाः कृष्णमिश्रेण रचिता इति कथयितुं युज्यते ।

कालसर्वस्वस्य परिचयः

कालविषयमाधारीकृत्य यद्यपि बहवः स्मृतिनिबन्धा उत्कलीयैर्विरचिता-स्तथापि तेषां सर्वेषां मतानामाकलनपुरःसरं न्यायमीमांसादिशैल्या स्थान-विशेषे आधुनिकमतमपरित्यज्य तथा ज्योतिःशास्त्रस्य सिद्धान्तानुररीकृत्य म० कृष्णमिश्रेण कालसर्वस्वे ग्रन्थेऽस्मिन् नानाविधं नूतनवस्तु सन्निवेशितम् । यद्यप्ययं धर्मशास्त्रीयनिबन्धस्तथाप्यत्र पञ्चाङ्गलक्षणभाविचन्द्रसूर्यग्रहज्ञाना-दिविषयाः युक्तिपुरःसरं प्रतिपादिताः । "इदं ज्योतिर्विदो न मन्यन्ते" इति तत्रत्यवचनादपि ग्रन्थोऽयं बहुधा ज्योतिःशास्त्रं पुरस्करोतीति ज्ञायते । एतस्मिन् प्रसङ्गेऽयं ज्योतिषशास्त्रोपाश्लिष्टधर्मशास्त्रनिबन्धरूपेण सुपरिचितः । ग्रन्थस्यास्य मङ्गलाचरणे इष्टदेवरूपेण रामचन्द्रस्याभिधानात् ग्रन्थकारः कृष्णमिश्रः रामोपासकः इति ज्ञायते । ग्रन्थेऽस्मिन् वैष्णवप्रकरणे रामकृष्ण-योरुभयोः पूर्णत्वं सूचयन्नपि तत्र स्वल्पभक्त्या रामचन्द्रात् फलाधिक्य-प्राप्तिरिति रामोपासनार्थं जनान् प्रचोदयति ग्रन्थोऽयम् ।

12- ओडिशार संस्कृतलेखा ओ लेखक (उत्कलभाषानिबद्धग्रन्थः)-पृ. 79 ।

कालसर्वस्वोद्धृता ग्रन्था ग्रन्थकाराश्च

कालसर्वस्वे प्रकरणद्वये उद्धृतानां ग्रन्थानां ग्रन्थकाराणाञ्च नामसङ्कलनावसरे भागद्वयं कल्पितं मया । तत्र प्रथमभागे वैदिकसंहितास्मृतिपुराणोपपुराणादीनामपरस्मिन् च भागे नानाकालिकनानादेशीयनिबन्धकाराणाञ्च नामान्युपस्थाप्यन्ते । यथा प्रथमभागे—साङ्ख्यदर्शनप्रणेता कपिलमुनिः, कूर्मपुराणम्, वैशेषिकदर्शनकारः कणादः, सूर्यसिद्धान्तकारो मयः, गर्गः, वसिष्ठरामायणम्, सिद्धान्तशिरोमणिः, मनुः, विष्णुपुराणम्, वैश्वानरसंहिता, शुक्लयजुर्वेदकाण्वशाखा, बौधायनः, ब्रह्मसिद्धान्तः, लघुहारीतस्मृतिः, मत्स्यपुराणम्, गौतमीयतन्त्रम्, वैशम्पायनसंहिता, पितामहः, बृहस्पतिः, ज्योतिःसिद्धान्तः, नारदीयसंहिता, मरिचिः, शिवरहस्यम्, देवलः, पैठीनसिः, व्यासः, बृहद्योगियाज्ञवल्क्यस्मृतिः, बृहन्नारदीयपुराणम्, हारीतः, वृद्धमनुः, विष्णुधर्मोत्तरपुराणम्, वराहपुराणम्, भविष्यपुराणम्, गौतमधर्मसूत्रम्, याज्ञवल्क्यः, मीमांसादर्शनप्रणेता जैमिनिमुनिः, आपस्तम्बः, जाबालिः, सुमन्तुः, उशनाः, विश्वामित्रः, योगिनीतन्त्रं, शातातपः, प्रचेताः, पद्मपुराणम्, यमः, बृहद्वसिष्ठः, वामनपुराणम्, भृगुः, विष्णुधर्मोत्तरपुराणम्, लिङ्गपुराणम्, महाभारतम्, दक्षः, ब्रह्मवैवर्त्तपुराणम्, अग्निपुराणम्, देवीपुराणम्, ब्रह्मरामायणम्, विष्णुस्मृतिः, देवलस्मृतिः, निगमः, कालिकापुराणम्, गरुडपुराणम्, भविष्योत्तरपुराणम्, कात्यायनः, अङ्गिराः, ब्रह्माण्डपुराणम्, मार्कण्डेयपुराणम्, श्रीमद्भागवतम्, अगस्त्यसंहिता, शङ्खः, शाम्बपुराणम्, वाल्मीकिरामायणम्, कश्यपः, वसन्तराजः, वायुपुराणम्, कण्वः, वह्निपुराणम्, देवीरहस्यम्, बृहन्नृसिंहपुराणम्, आगमः, ईशानसंहिता, अध्यात्मरामायणम्, बह्वृचपरिशिष्टम्, गोभिलगृह्यसूत्रम्, बृहत्प्रचेताः, प्रजापतिः, छन्दोगपरिशिष्टम्, हरिवंशपुराणम्, शङ्खलिखितस्मृतिः, वृद्धशातातपः, पुष्करपुराणम्, गृह्यपरिशिष्टम्, पाणिनिः, कात्यायनः, पतञ्जलिः, रोमशः, पौलस्त्यः, वृद्धगौतमः, व्याघ्रः, वराहसंहिता, ऋष्यशृङ्गः, भोजः, शङ्करगीता, तार्क्ष्यपुराणम्, तत्त्वसागरसंहिता, पञ्चरात्रम्, श्रीमद्भगवद्गीता, विष्णुतन्त्रम्,

स्तवराजः, सनत्कुमारसंहिता, कौशलखण्डम् , भुशुण्डिरामायणम् , नृसिंहपुराणम् , नृसिंहागमः, तन्त्रसारः, एकाम्रपुराणम् , प्रह्लादसंहिता, विष्णुयामलम् , नारदपञ्चरात्रम् , हयशीर्षपञ्चरात्रम् , ऋग्वेदः, सामवेदः, शतपथश्रुतिः, अथर्ववेदः, परिशेषश्रुतिः, सौपर्णः, योगसारः, गोपालोपनिषत् , उत्तरतापिन्युपनिषत् , पराशरः, बृह्मसंहिता च ।

द्वितीयभागे—पदार्थतत्त्वनिरूपणकारः रघुनाथशिरोमणिः, कालमाधवः, सुप्रकाशः, कामाभट्टः, देवीदासः, ज्योतिषार्णवः, सत्यव्रतः, नरसिंहवाजपेयी, शतानन्दः, कालादर्शः, हेमाद्रिः, लक्ष्मीधरः, अनन्तभट्टः विधानपारिजातकारः कृत्यचिन्तामणिः, कृत्यकौमुदी, दीपिका, राजमार्त्तण्डः, गोपीनाथवाजपेयी, शुद्धिसर्वस्वम् , शब्दशक्तिप्रकाशिका, स्मृतिसारसङ्ग्रहः, श्राद्धप्रदीपकारः विप्रमिश्रः, आदित्यसूरिः, दिव्यसिंहः, रघुनन्दनः, कालनिर्णयप्रदीपिका, शम्भुकरवाजपेयी, कालतत्त्वम् , निर्णयामृतम् , फणिशङ्करभाष्यम् , श्रीधरस्वामी, भगवन्नामकौमुदीकारः लक्ष्मीधरगोस्वामी , रामतत्त्वप्रकाशः, संवत्सरप्रदीपः, तिथितत्त्वम् , नारायणभट्टः, नरसिंहः, विद्याकरवाजपेयी, जीमूतवाहनः, वैष्णवसाधनदीपिका, हरिभक्तिविलासः, रामार्च्चनचन्द्रिका, गोविन्दराजः, वर्द्धनाचार्यः, विज्ञानेश्वरः, कङ्कणाचार्यः, विश्वनाथः, कृत्यकल्पतरुः, नृसिंहाचार्यः, गौडभट्टाचार्यः, वाचस्पतिमिश्रः, विज्ञानगिरिः, कृत्यचिन्तामणिः, अद्भुतसागरः, लीलावती, यौक्तिकवाक्यम् , धवलसङ्ग्रहः, भक्तिप्रदीपः, भक्तिसर्वस्वम् , सनातनः, गोपालभट्टः, पण्डितसर्वस्वम् , आनन्दवनगोस्वामी, विद्याकरपद्धतिः, प्रतापमार्त्तण्डः, मन्त्रप्रकाशः, भास्कराचार्यः, वैष्णवसर्वस्वं चेति ।

यद्यप्येते ग्रन्था ग्रन्थकाराश्च कालसर्वस्वोद्धृतास्तथापि तेषां सर्वेषां प्रभावः कालसर्वस्वोपरि वर्त्तत इति कथयितुं न शक्यते । स्थलविशेषे तेषां केषाञ्चन मतानि स्वीकुर्वन् अपि ग्रन्थकारः कृष्णमिश्रः सर्वथा स्वकीयस्वाधीनचिन्तां न परित्यजतीति परिलक्ष्यते । पूर्ववर्त्तिभिर्ग्रन्थैः ग्रन्थकारैश्च प्रभावितमिदं ग्रन्थरत्नं कालसर्वस्वं परवर्त्तिनां ग्रन्थानां ग्रन्थकाराणाञ्चोपरि स्वप्रभावं विस्तारयतीत्यत्र नास्ति सन्देहः ।

कालसर्वस्वस्य वैशिष्ट्यम्

नैयायिकशैलीपरिपुष्टोऽयं कालसर्वस्वाभिधेयो ग्रन्थ उपोद्घाते कालसत्तारूपभेदोपयोगादिविषयं प्रस्तुवन् कालसत्तादिं च स्वीकुर्वन् औपाधिकभेदात् कालस्य भेदद्वयं प्रकल्प्य तत्र प्रथमपर्याये कालादर्शकाल-माधवादिभिः कालकालत्वेन कालत्वेन च यौ प्रतिपादितौ तौ क्रमानुसारं स्थूलकालत्वेन खण्डकालत्वेन च विभाव्य स्थूलकालमीश्वररूपत्वेन महा-कालरूपत्वेन वा परिगणय्य तस्यातिरिक्तत्वेन कार्याभावं प्रदर्शयन् तदङ्ग-भूतखण्डकालस्य वत्सरायनर्तुमासादिचतुर्विधत्वं केवलमुट्टङ्क्य निर्णय-सिन्धुप्रतिपादितभेदषट्कात् स्वातन्त्र्यं प्रापय्य सिद्धान्तशिरोमण्युदितनव-विधान् वत्सरान् संसूच्य तेषाञ्च प्रकृतानुपयोगित्वं मत्वा माधवादिसम्मता-ब्दपञ्चकेषु यद्यपि तत्रान्त्ययोर्द्वयोर्धर्मशास्त्रेऽनुपयोगित्वं हेमाद्रिप्रभृतिभिर्वि-वक्षितं तथापि कदाचित् चतुर्थवत्सरस्य नाक्षत्रस्यायुर्दायाद्युपयोगित्वं धर्मशास्त्रेऽपेक्षितं भवेदितिकृत्वा सौरसावनचान्द्रनाक्षत्रादिवत्सरचतुष्टयस्यो-पयोगान् साधु प्रतिपादयति। मलमासविचारे केवल कार्त्तिकादिमासत्रये क्षयमासो न स्यादपि तु माघमासे स्यादिति प्रतिपादयन् ग्रन्थोऽयं वैशिष्ट्यं धत्ते। वस्तुतः 1982 तमख्रीष्टसंवत्सरे माघमासः क्षीणो जातः।

जन्मतिथिकृत्यस्य दैवकार्यत्वात् पूर्वाह्ण एव कालः। कदाचित् भ्रमादिना मुख्यतिथौ तस्याकरणे जन्मतिथ्यृक्षशेषयुक्ते तदुत्तरदिने जन्मदिनकृत्यमिति प्रतिपादयन् ग्रन्थोऽसौ स्वातन्त्र्यं प्राप्नोति।

श्राद्धकालद्वैधे परेद्युः प्राप्तस्य श्राद्धस्य भ्रमात् पूर्वेद्युः करणेऽपि पुनः परदिने तत्करणं, न तु कृष्णैकादश्यादौ। प्रोषितमृतस्य प्रस्थानमासाज्ञाने तिथिमात्रज्ञाने माघाषाढान्यतरस्मिंस्तद्दिनं मृताहत्वेन कल्प्यम्। प्रस्थान-मासज्ञाने तिथ्यज्ञाने तु तन्मासीयदर्शे आब्दिकं स्यादित्यत्र वैशिष्ट्यम्।

यमद्वितीयायामनध्यायोऽसमीचीन इति ग्रन्थोक्तिर्वैशिष्ट्यपूर्णा। तृतीयाविद्धचतुर्थ्यां गणेशं पूजयित्वा सिद्धिं प्राप्नुयादिति महत्त्वपूर्णम्। मार्गशीर्षकृष्णपञ्चम्यां पुनर्वसुनक्षत्रयोगे फाल्गुनकृष्णपक्षद्वितीयायामुत्तर-फाल्गुनीयोगे वा सीताविवाह विधातव्यः। श्रीपञ्चम्यां सरस्वतीदेव्याः

रात्रिपूजाचारो निर्मूल इति कालसर्वस्ववचनं वैशिष्ट्यपूर्णं युक्तिसङ्गतञ्च। भाद्रशुक्लाष्टम्यां राधाजन्म । वैशाखशुक्लाष्टम्यां सीताजन्म। देवीपूजाया-श्चान्द्रमानान्तर्गतत्वेन क्वचिच्छोडशदिनान्न्यूनकालत्वमिति कालसर्वस्वे प्रतिपादितम् । आश्विनशुक्लदशम्यां सोमनाथपूजायां प्रदोषः कर्मकालः। पौषशुक्लदशम्यां कोरवि-पूजासमाचारे परविद्धत्वं ग्राह्यमित्युक्तिः कालसर्व-स्वस्य वैशिष्ट्यं प्रस्तौति । एकादशीव्रते वैष्णवैकादशीव्यवस्थायामुन्मीलि-नीवञ्जुलीत्रिस्पृशापक्षवर्द्धिनीति भेदचतुष्टयं ग्रन्थेऽस्मिन् सम्यक् प्रतिपादितम् ।

ग्रहणप्रकरणे रविचन्द्रयोः राहुग्रास एव ग्रहणमिति पौराणिकोपन्या-सस्यासमीचीनत्वं प्रतिपादितमत्र । अत्र कालसर्वस्वे वैज्ञानिकदृष्ट्या चन्द्रस्य भूच्छायाच्छादने चन्द्रग्रहः, सूर्यस्य तु चन्द्रेणाच्छादने सूर्यग्रह इति सिद्धान्ति-तम् । महावैशाखीयोगे केवलं पुरुषोत्तमक्षेत्रसमीपसागरे स्नानं फलप्रदं नान्यत्र, गोविन्दद्वादश्यां मीनयोगाभाव उत्कलग्राह्यः, वारुण्यादियोगे महावारुण्याः सन्निकर्षत्वे पृथक् स्नानं विशेषफलदायकमित्यादि कालसर्व-स्वस्य वैशिष्ट्यं प्रतिपादयति । भाविमहावैशाख्यादियोगानां चन्द्रसूर्यग्रहाणां साधनमपि कालसर्वस्वस्य स्वातन्त्र्यं प्रस्तौति । विशेषत आचारेषु स्मार्त्तानां वैष्णवानां पार्थक्यप्रदर्शनाय स्मृतिप्रकरणं वैष्णवप्रकरणञ्चेति विभागद्वयकल्पनं ग्रन्थस्यास्योपयोगितां व्यनक्ति ।

कालसर्वस्वे वैष्णवप्रकरणे माध्व-श्रीवैष्णव-रामोपासकवैष्णवोत्कल-वैष्णवादिविविधवैष्णवानां सम्प्रदायगतपरम्परानुसारं पर्वोत्सवानां यथा-कालानुष्ठानार्थं विस्तृतमालोचनं प्राप्यते । "यद्यपि राधाललिताजन्म हरिभक्तिविलासे नास्ति तथापि वैष्णवाचारात् साधनदीपिकायां सत्त्वाच्च तत्किञ्चिल्लिख्यते ।" इति व्रतद्वयं प्रतिपादयन् ग्रन्थोऽयं वैशिष्ट्यं धत्ते । न केवलमेतदपि च राधाकृष्णयोर्मेलनपूजात्मकं कार्त्तिककृष्णाष्टमीव्रतमत्र कालसर्वस्वे सन्निवेशित यदितः प्राक् न कस्मिंश्चिन्निबन्धे प्राप्यते । स्मार्त्तवैष्णवोभयपरम्परानुसारं व्रतपर्वणां समुचितं प्रतिपादनमत्र कृतमिति स्वयं ग्रन्थकारः कृष्णमिश्र कालसर्वस्वग्रन्थान्तश्लोकद्वये प्रस्तौति । मत्स्वी-कृतप्रथम (क) मातृकायाः पुष्पिकायामपि मातृकालेखकः कालसर्वस्वस्य

उत्कर्षतां प्रतिपादयति यथा—

"ग्रन्थाः सन्ति पुरातना इव नवा यद्यप्यनेके स्मृतौ
प्रायस्ते तदपीह संशयफला निर्णायका नित्यतः ।
ज्योतिःसाधनमौपपत्तिकवचः स्मार्त्तं तथा वैष्णवे
भो धीरा अधिकं क्वचिच्च चिनुत श्रीकालसर्वस्वतः ॥" इति ।

वस्तुतो ग्रन्थोऽसौ वैशिष्ट्यपूर्णोऽवश्यं प्रभावकश्चेत्यत्र नास्ति संशयः ।

आधारभूतमातृकाणां विवरणम्

उत्कलराज्यसङ्ग्रहालये कालसर्वस्वस्य मातृकात्रयमुपलभ्यते । एताः सर्वाः मातृकाः तालपत्रसन्निवेशिताः । सर्वासु मातृकासु लिपिः उत्कला (ओड़िआ) । ग्रन्थस्यास्य सम्पादने मत्स्वीकृता प्रथमा मातृका[13] स्पष्टाक्षरा । तस्याः पत्रसङ्ख्या—141 । द्वितीया या मातृका[14] स्वीकृता तस्याः ख-इति संज्ञा दत्ता मया । तस्याः लिपिः किञ्चिदस्पष्टा पत्राणि च स्थलविशेषे कीटभक्षितानि । तस्याः पत्रसङ्ख्या—135 । तृतीयमातृका[15] यस्याः ग-इति संज्ञान्तरं मया कृतं साऽसम्पूर्णा 104 सङ्ख्यकपत्रविशिष्टा च । तस्या अक्षराणि स्पष्टानि लक्ष्यन्ते । स्मृतिनिर्णयप्रकरणे पौषमासकृत्यं यावदत्र पाठोऽस्ति । यत्परो नास्ति चेष्टां कृत्वा ख-ग-मातृकाद्वयात्तुलनात्मकदृष्ट्या पाठो मयाऽधिगतः । तत्रत्यपार्थक्ये मया पाठान्तरमिति विभाग एकः कल्पितः । अधिकमातृकास्थितिज्ञानार्थं मया बहुत्र पत्रं प्रेषितम् । किन्तु तेभ्योऽधिगतेषु[16] पत्रेषु सर्वत्र नैराश्यम् । केवलं मद्रपुरीस्थसर्वकारीय-प्राच्यविद्यामातृकाग्रन्थालयादासादितपत्रे[17] कालसर्वस्वस्य मातृका अस्तीति ज्ञातम् ।

यद्यप्येतावन्मात्रं मयाऽधिगतं तथाप्यन्यत्र कालसर्वस्वग्रन्थस्य मातृकाः सन्तीति नास्ति संशयलेशः ।

13- Orissa State Museum Catalogue No. Dh-115.

14- Orissa State Museum Catalogue No. Dh-116.

15- Orissa State Museum Catalogue No. Dh-48 (B).

16- See letters—Decan College Library—859/Mss/3293, dt 30-9-82., Bhandarkar Oriental Research Institute—Ms/2107/ 82-83, dt. 1st Oct., 82.

17- Govt. Oriental Manuscripts Library—Ref. 1197/F/81, dt. 24-1-82 and dt. 19-5-82.

॥ श्रीः ॥

कृष्णमिश्रकृतं

कालसर्वस्वम्

(मञ्जूषा-सहितम्)

[श्रीगणेशाय नमः । अविघ्नमस्तु ।]

सग्रहणं पञ्चाङ्गस्फुटमभिधायाथ रामसिद्धेश्यौ ।

नत्वा कृष्णः सुधीशः कुरुते सत्कालसर्वस्वम् ॥[1]

ननु कालनिर्णयार्थं चेदयं ग्रन्थ[2] आरभ्यते तर्हि वृथा,

कालकालं जगन्नाथं चतुर्मूर्त्तिधरं हरिम् ।

प्रणम्य कालसर्वस्वे "मञ्जूषा" क्रियते मया ॥

1- ग्रहणं सूर्याचन्द्रमसोः राहुणाच्छादनम् । तत्सहितानां पञ्चाङ्गानां तिथिवारादीनां, तद्यथा भारतीयकुण्डलीविज्ञाने (पृ-1)—

तिथिर्वासरनक्षत्रे योगः करणमेव च ।

इति पञ्चाङ्गमाख्यातं व्रतपर्वनिदर्शकम् ॥ इति,

स्फुटं स्फुटगणनां, तद्यथा सिद्धान्तशिरोमणौ गणिताध्याये स्पष्टाधिकारे प्रथमश्लोके—

यात्राविवाहोत्सवजातकादौ खेटैः स्फुटैरेव फलस्फुटत्वम् ।

स्यात्प्रोच्यते तेन नभश्चराणां स्फुटक्रिया दृग्गणितैक्यकृद्या ॥

इत्यभिधाय ग्रन्थाकारेण सम्पाद्य अथ तदनन्तरं रामसिद्धेश्यौ रामः दाशरथिः सिद्धेशी सिद्धेश्वरी दुर्गेति यावत् ते देवते ग्रन्थकृदिष्टे नत्वा नमस्कृत्य सुधीशः कृष्णः कृष्णमिश्रः ग्रन्थकृत् सत् उत्तमम् उपादेयं कालसर्वस्व कालसर्वस्वाभिधग्रन्थरत्नं कुरुत इति भावः । सुधीश इत्युक्तिग्रन्थकर्त्तुर्न गर्वद्योतिकाऽपितु ग्रन्थस्य बुद्धिपूर्वकप्रणीतत्वेन ग्राह्यत्वबोधिका ।

2- ग्रन्थः शास्त्रम् , 'ग्रन्थो गुम्फे धने शास्त्रे' इति अनेकार्थसङ्ग्रहकोशवचनात् ।

कालस्याप्रत्यक्षाद्यगम्यत्वेनाप्रमाणत्वात् । अतएव कपिलमुनिः[3] प्रकृत्यादीनि पञ्चविंशति तत्त्वान्युक्त्वा तमुपेक्षितवान् । अथ यदि प्रसिद्धस्तर्हीश्वरात्मक एव सः । शिरोमण्यादि[4]महातार्किकैस्तथा निर्वचनात् ।

अनादिरेष भगवान् कालोऽनन्तोऽजरः परः ।

इति कौर्माच्च[5] । मैवम्, षष्ठद्रव्यत्वेन[0]कणाद[6]मुन्युक्तत्वात् ।

3- साङ्ख्यदर्शनप्रणेता कपिलमुनिः । साङ्ख्यदर्शनेऽस्मिन् मोक्षप्राप्तिनिमित्तं पञ्चविंशति तत्त्वान्यङ्गीकृतानि । तानि तत्त्वानि यथा साङ्ख्यसूत्रे (1/61)—

सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः, प्रकृतेर्महान्, महतोऽहङ्कारः, अहङ्कारात्पञ्च तन्मात्राणि, उभयमिन्द्रियं, तन्मात्रेभ्यः स्थूलभूतानि, पुरुष इति पञ्चविंशतिर्गणः । इति ।

4- शिरोमणिः रघुनाथशिरोमणिः । "पदार्थतत्त्वनिरूपणम्" इत्याख्यग्रन्थस्य प्रणेता सः । तस्मिन् ग्रन्थे (पृ-3) कालस्य ईश्वरात्मकत्वं प्रतिपादितं तेन । तद्यथा—

दिक्कालौ नेश्वरादतिरिच्यते मानाभावात् । तत्तन्निमित्तविशेषसमवधानवशादीश्वरादेव तत्तत्कार्यविशेषाणामुपपत्तेः परेषामेकैकस्मादिगादेरिव विलक्षणानां प्राच्यादिव्यवहाराणामिति । इति ।

5- कूर्मपुराणस्य पूर्वभागे (5/23) सम्पूर्णवचनं यथा—

अनादिरेष भगवान् कालोऽनन्तोऽजरोऽमरः ।
सर्वगत्वात्स्वतन्त्रत्वात्सर्वात्मत्वान्महेश्वरः ॥ इति ।

माधवाचार्येणापि कालमाधवे उपोद्घातप्रकरणे (पृ-29) कालस्यास्य स्वरूपनिर्णयार्थं विष्णुधर्मोत्तरवचनमुद्धृतम् । तद्यथा—

अनादिनिधनः कालो रुद्रः सङ्कर्षणः स्मृतः ।
कलनात् सर्वभूतानां स कालः परिकीर्त्तितः ॥
कर्षणात् सर्वभूतानां स तु सङ्कर्षणः स्मृतः ।
सर्वभूतशमित्वाच्च स रुद्रः परिकीर्त्तितः ॥
अनादिनिधनत्वेन स महान् परमेश्वरः ॥ इति ।

पाठान्तरम्—

0- 'अस्य' इति अत्र 'ख'-पुस्तकेऽधिकपाठः ।

भूतानामन्तकृत्कालः कालोऽन्यः कलनात्मकः ।

इति मय[7]वचनाच्च ।

किञ्च क्षणदिनमासाद्यनुभवो दुरपलापः । एवं ज्येष्ठकनिष्ठयोः परापरत्वासाधारणकारणं काल एवेत्यन्यत्र[3] विस्तृतम् ।[0]

यद्यप्येक एव कालः शास्त्रकृन्मतस्तथाप्यौपाधिकभेदादनेकः ।

उपाधिभेदादेकोऽपि भवेत्कालस्त्वनेकधा ।

6- वैशेषिकदर्शनशास्त्रप्रणेता कणादमुनिः । वैशेषिकदर्शनेऽस्मिन् अभिधेयसम्बन्धप्रतिपादने कणादमुनिः—धर्मविशेषप्रसूताद् द्रव्यगुणकर्म-सामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निः-श्रेयसम् । इति (1/1/4) निर्दिशति । तत्रापवर्गभागितया प्रथमनिर्दिष्टद्रव्य-पदार्थस्य विभागं प्रदर्शयन् कणादमुनिः सूत्रयति यथा (1/1/5 —

पृथिव्यापस्तेजो वायुराकाशं कालो दिगात्मा मन इति द्रव्याणि । इति । इतिकारादेतानि नवैव द्रव्याणि, नाधिकानि न वा न्यूनानि । अत्र क्रमतः कालस्य षष्ठद्रव्यत्वं सिद्धम् ।

7- सूर्यसिद्धान्ताभिधेय-ज्योतिषग्रन्थस्य प्रणेता मयः । तत्र सूर्यसिद्धान्ते मध्यमाधिकारे कालनिर्णये दशमश्लोके मयस्य सम्पूर्णवचनं यथा—

लोकानामन्तकृत्कालः कालोऽन्यः कलनात्मकः ।
स द्विधा स्थूलसूक्ष्मत्वान्मूर्तश्चामूर्त उच्यते ॥ इति ।

8- काललक्षणं प्रतिपादयन् वैशेषिकदर्शनकारः कणाद आह(2/2/6)—

अपरस्मिन्नपरं युगपच्चिरं क्षिप्रमिति काललिङ्गानि । इति ।

अत्र उपस्कार-भाष्यकारः शङ्करमिश्रः स्पष्टीकरोति, यथा —

अपरमितिप्रत्ययो युगपदितिप्रत्ययः चिरमितिप्रत्ययः क्षिप्रमितिप्रत्ययः काललिङ्गानि । अपरस्मिन्नपरमित्यनेन परस्मिन् परमित्यपि द्रष्टव्यम्, तेनायमर्थः बहुतरतपनपरिस्पन्दान्तरितजन्मनि स्थविरे युवानमवधिं कृत्वा परत्वमुत्पद्यते । तच्च परत्वमसमवायिकारणसापेक्षम् । .... तस्मादेता-दृशविशिष्टप्रत्ययान्यथानुपपत्त्या विशेषणप्रापकं यद् द्रव्यं स कालः । इति ।

0- वाक्यमिदं नास्ति ख-पुस्तके ।

इति गर्ग[9]वचनात् । उपाधिः सूर्यपरिस्पन्दः[10] । तथाहि द्विविधः कालः स्थूलः खण्डश्चेति । अत्र स्थूलकालो महाकालपदवाच्यो विभुः । स चातिरिक्त ईश्वररूपो नेत्यन्यत् । खण्डकालाश्च कलामुहूर्त्तदिनमासाद्यात्मकास्तदुपाधयः, घटपटाकाशप्राचीप्रतीच्यादिवत् । परन्तु स्मार्त्तवैशेषिकयोरियान् विशेषः, स्मार्त्तमते[11] महाभूता[0]दयो महाकालावयवाः । कालस्य निरवयवत्वप्रवादस्तु यक्षरक्षोवत्स्पर्शयोग्यावयवाभावात् ।

न च कालस्यावयवित्वे घटपटादिवदनित्यत्वं स्यादिति वाच्यम् । तार्किकाणामपि सिद्धान्तेऽपि स्मार्त्तमते इष्टापत्तेः । वैष्णवमते[12] रामकृष्णादिशरीरिणां विलक्षणावयविनामिव नित्यत्वाभ्युपगमाच्च । तादृशवैलक्षण्यस्य

9- तदेवं कालादर्शे(पत्रम्-1-ख)—

> उपाधिभेदादेकोऽपि भवेत्कालो ह्यनेकधा ।
> उपाधयो निमेषाद्याः प्रसिद्धा एव लोकतः ।। इति ।

10- परिस्पन्दः परितः स्पन्दनयुक्त इति वाचस्पत्यम् ।

11- महाभूतादीनां महाकालावयवत्वं स्वीकृतं स्मृतिकारैः । तत्रोक्तं मनुना (1/18,24) यथा—

> तदाविशन्ति भूतानि महान्ति सह कर्मभिः ।
> मनश्चावयवैः सूक्ष्मैः सर्वभूतकृदव्ययम् ।।
> काल कालविभक्तीश्च नक्षत्राणि ग्रहांस्तथा ।
> सरितः सागराञ्छैलान् समानि विषमाणि च ।। इति ।

कालमधिकृत्य स्मार्त्तवैशेषिकमतभेदद्वयविवेचनं माधवाचार्येणापि कालमाधवे विस्तरेण विहितम् । स्मार्त्तास्तावत्कालस्य सावयवत्वमङ्गीकुर्वन्ति प्रत्यक्षश्रुतौ कालावयवानां तद्रूपाणाञ्चोपलभ्यमानत्वात् । तथा च तैत्तिरीयशाखायामरुणकेतुकचयनब्राह्मणे कालस्य सावयवत्वं (कालमाधवः-पृ-23) श्रूयते—

> उक्तो वेषो वासांसि च कालावयवानामितः प्रतीच्येषु । इति

12- भगवतो नित्यत्वं सर्वैरङ्गीकृतम् । वैष्णवेषु रामभक्ता रामं पूर्णब्रह्म जानन्ति, यथोक्तमध्यात्मरामायणे बालकाण्डे(1/2)—

0- 'ऋतुमासादयः' इति ख-पुस्तके ।

घटाद्यवयविध्वस्वीकारात्[0] । अतएव वशिष्ठरामायणम्[13]—

अथाकलितरूपोऽसौ कालः कवलितप्रजः ।
ऋतुषट्कमयोदारवक्त्रषट्कसमन्वितः ।
मासद्वादशकोद्दामभुजद्वादशकोद्भटः ॥ इति ।

वैशेषिकमते[14] नित्यकालस्य निरवयवत्वान्मासवर्षादय उपाधयोऽवच्छेदकाः । यथा तथा वाऽस्तु । सर्वथा परापरत्वधीहेतुतया दिश इव सिध्यत्येव[00] कालः ।

विश्वोद्भवस्थितिलयादिषु हेतुमेकं मायाश्रयं विगतमायमचिन्त्यमूर्त्तिम् ।
आनन्दसान्द्रममलं निजबोधरूपं सीतापतिं विदिततत्त्वमहं नमामि ॥ इति ।

कृष्णभक्ताः कृष्णमपि नित्यं मन्यमानाः पूर्णब्रह्म विवेचयन्ति । तदुक्तं श्रीमद्भागवते (1/3/27-28)—

ऋषयो मनवो देवा मनुपुत्रा महौजसः ।
कलाः सर्वे हरेरेव सप्रजापतयस्तथा ॥
एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ।
इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे ॥ इति ।

13- योगवाशिष्ठे प्रथमभागे स्थितिप्रकरणे दशमसर्गे सम्पूर्णवचनं यथा—

अथाकलितरूपोऽसौ कालः कवलितप्रजः ।
आधिभौतिकमास्थाय वपुर्मुनिमुपाययौ ॥
खड्गपाशधरः श्रीमान् कुण्डली कवचान्वितः ।
षड्भुजः षण्मुखो बह्वावृत्तः किङ्करसेनया ॥ इति ।

14- कालस्य द्रव्यत्वं नित्यत्वं चोभयं प्रतिपादितमस्ति वैशेषिकदर्शने । तद्यथा (2/2/7)—

द्रव्यत्वनित्यत्वे वायुना व्याख्याते । इति ।

तस्यानेकत्वशङ्कायामेकत्वं प्रतिपाद्यते तत्र महर्षिकणादेन (2/2/8), यथा—

तत्त्वं भावेन । इति ।

अत्रः भाष्यकारः शङ्करमिश्रस्तत्स्पष्टीकरोति, यथा—

0- वाक्यमिदं नास्ति ख-ग-पुस्तकद्वये ।

00- 'सर्वथाऽस्त्येव' इति ख-ग-पुस्तकद्वये ।

तत्र स्थूलकाले कार्याभावात् खण्डकालो निरूप्यते । स कालो वत्सरायनर्तुमासभेदाच्चतुर्धा । वत्सरोऽपि चतुर्धा, सौरसावनचान्द्रनाक्षत्रभेदात्[15] । यद्यपि सिद्धान्तशिरोमणौ (मध्यमाधिकारः-कालमानम्-श्लोकः-32)—

एवं पृथङ्मानवदैवजैवपैत्रर्क्षसौरेन्दवसावनानि ।

ब्राह्मं च काले नवमं प्रमाणमिति

नवधा वत्सरा उक्तास्तथापि ते प्रकृतानुपयुक्ताः। तत्र द्वादशरविसंक्रान्त्यवच्छिन्नः सौरो वर्षः। तत्र पञ्चदशदण्डोत्तरपञ्चषष्टिदिनाधिकदिनशतत्रयं मानम्[16] ।

चिरादिप्रत्ययानां काललिङ्गानां सर्वत्र विशेषादनेकत्वेऽप्यात्मनामिव विशेषलिङ्गाभावात् सत्तावदेकत्वं कालस्येत्यर्थः । .... यथा एक एव स्फटिकमणिर्जवातापिञ्जाद्युपरागेण भिन्न इव भासते तथैक एव कालः सूर्यस्पन्दाद्यवच्छेदभेदेन तत्कार्यावच्छेदभेदेन च भिन्न इव भासते इत्यभ्युपगमात् । इति । अतएव नित्यकालस्य मासवर्षादय उपाधयोऽवच्छेदकरूपेण गृह्यन्ते ।

15- स्थूलकालो नित्यः । व्यापकार्थेऽत्र स्थूलशब्दः प्रयुक्तः । महाकालपरमात्मनो विश्वरूपप्रकटनमस्मादेव सिद्धम् । महाभारतेऽनुशासनपर्वणि (149/103) विष्णुसहस्रनामस्तोत्रे भगवतः परमात्मनः स्थूल इति नाम स्मयते, यथा—

अणुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान् ।
अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्धनः ॥ इति ।

अत्र भाष्यकारैः शङ्कराचार्यैः स्थूलो व्यापको मन्यते, यथा—

स्थूल इति उपचर्यते सर्वात्मत्वात् । इति ।

खण्डकालो जन्यः । जन्यकालेषु वत्सरः प्रधानः । स एव अब्दसंवत्सरेत्यादिनामभिः प्रसिद्धः । यद्यपि बार्हस्पत्यं स्वीकृत्य माधवाचार्येणाब्दस्य पञ्चविधत्वमुक्तं यदि च हेमाद्रौ अन्त्ययोर्नाक्षत्रबार्हस्पत्ययोर्धर्मशास्त्रेऽनुपयोगाद्वत्सरस्य त्रिविधत्वं स्वीकृतं तथाप्यत्र ग्रन्थकारेण नक्षत्रगणनोद्देशेन आयुर्दायोपयुक्त-नाक्षत्राब्दस्य ग्रहणं कृतम् ।

16- मानं परिमाणम् । तस्य ज्ञानोपयोगित्वमुक्तं शब्दकल्पद्रुमे—

न मानेन विना युक्तिर्द्रव्याणां जायते क्वचित् ।
अतः प्रयोगकार्यार्थं मानमत्रोच्यते मया ॥ इति ।

चतुर्वर्षेष्वतीतेषु एकदिनाधिक्यात् पट्पष्टिदिनानीति पौनःपुनिकः क्रमः ।

युगे सूर्यज्ञशुक्राणां खचतुष्करदार्णवाः । इति

सिद्धान्तोक्त[17]-रविभगणेन[18] प्रमाणीकृतेनैकवर्षेच्छया गुणितानां फलरूपाणां

वसुद्व्यष्टाद्रिरूपाङ्कसप्ताद्रितिथयो युगे ॥[19]

इति भूदिनानां भजने उक्तदिनमानलाभात् । शेषविलिप्तादे[20]र्गणकाचारा-दग्रहाच्च[0] । प्रायशो मेषादिषट्के त्रिंशत्तोऽधिकमेकं द्वे त्रीणि वा दिनानि स्युः । तुलादिषट्के तु प्रायशस्त्रिंशद्दिनानि । तदुक्तं ज्योतिषे[21]—

यां तिथिं समनुप्राप्य तुलां गच्छति भास्करः ।
तयैव स विसंक्रान्तिर्यावन्मेषं न गच्छति ॥
यदा वक्रातिचाराभ्यां क्वचित् क्रामति भास्करः ।
क्षत्रियाणामसृग्धारां तदा पिबति मेदिनी ॥

तया तत्तिथ्या, विशेषणे तृतीया । एवञ्चार्थः । वक्रातिचारपदमिह न्यूनाधिक्यबोधकम् । तेन भौमादिवत् केन्द्रकृतवक्रातिचाराभावेऽपि न क्षतिः ।

17- सूर्यसिद्धान्तस्य मध्यमाधिकारे (श्लो-29) सम्पूर्णवचनं यथा—

युगे सूर्यज्ञशुक्राणां खचतुष्करदार्णवाः ।
कुजार्किगुरुशीघ्राणां भगणाः पूर्वयायिनाम् ॥ इति ।

18-द्वादशराशीनामेकत्र समाहारो भगणः । तदुक्तं सूर्यसिद्धान्ते मध्यमाधिकारेऽष्टाविंशतितमश्लोके—

विकलानां कला षष्ट्या तत्षष्ट्या भाग उच्यते ।
तत्त्रिंशता भवेद्राशिर्भगणो द्वादशैव ते ॥ इति ।

19- सूर्यसिद्धान्ते मध्यमाधिकारे (श्लोः-37) सम्पूर्णवचनं यथा—

वसुद्व्यष्टाद्रिरूपाङ्कसप्ताद्रितिथयो युगे ।
चान्द्राः खाष्टखखव्योमखाग्निखर्तुनिशाकराः ॥ इति ।

20- अवशिष्टषोडशविलिप्तादेरित्यर्थः ।

21- क्वचित्क्रामति भास्करः इति स्थाने सूर्यसङ्क्रमणं भवेत् इति कृत्यतत्त्वार्णवे (पृ पृ-32-33) उद्धृतम् ।

0- चतुर्वर्षेष्व........दग्रहाच्च । इति ख-ग पुस्तकद्वये पाठो नास्ति ।

अन्यच्च,

त्रयस्त्रिंशदजादीनामेकोनं घटमीनयोः ।

इति । इदमाकस्मिकम् ।

षष्ट्यधिकशतत्रयदिनमितः सावनोऽब्दः । स चेत्सावनदिनै षड्भिरूनश्चतुःपञ्चाशदधिकत्रिशतदिनात्मकस्तदा चान्द्रोऽब्दः । तस्य सितकृष्णपक्षद्वयावच्छिन्नद्वादशमासनिष्पन्नत्वेन सावनात् षण्न्यूनतासिद्धेः । अतएव सौरसंवत्सरादेकादशदिनैरूनः षोडशदिनयुक्ताष्टमासाधिकवर्षद्वयेनाधिमासं जनयति । नाक्षत्रिकं तु चतुर्विंशत्यधिकदिनशतत्रयम् । तच्च[0] आयुर्दायोपयुक्तम् ।

अब्दः पञ्चविधश्चान्द्रो व्रतादौ तिलकादिके ।
सुजन्मादिव्रते सौरो गोसत्रादिषु सावनः ॥
त्रयोऽप्याचार्यसेवादौ विकल्प्यन्ते निजेच्छया ।

इति माधवीये[22] तेषां विनियोगः ।

अयनम्[23]

तच्च रविगतिरूपं द्विविधम्, उत्तरदक्षिणभेदात् । तदुक्तं सुप्रकाशे—

मृगाद्यं राशिषट्कं यदुत्तरायणसञ्ज्ञकम् ।
याम्यायन कर्कषट्कं ज्ञातव्यं भानुभुक्तितः ॥[24]
अहोरात्रं क्रमात्तच्च देवानामयनद्वयम् ॥

22- आयुर्दाये हि नाक्षत्रो बार्हस्पत्योऽधिवत्सरे ॥
इत्यनेन सह कालमाधवे (पृ-3) माधवाचार्येणाब्दानां विनियोग उक्तः ।

23- अयते यात्यनेन ऋतुत्रयेण सूर्यो दक्षिणाशामुत्तराशां चेति ऋतुत्रयमयनम् । इति माधवाचार्यः कालमाधवे (पृ-43) ।

24- सूर्यसिद्धान्ते मानाध्याये (श्लो.-9) वचनमप्येवम्, यथा—

भानोर्मकरसङ्क्रान्तेः षण्मासा उत्तरायणम् ।
कर्कादेस्तु तथैव स्यात् षण्मासा दक्षिणायनम् ॥ इति ।

0- एतच्च इति ख-ग-पुस्तकद्वये ।

एतेन मेषादिषट्कं देवानां दिवसः तुलादिषट्कं रात्रिः, एतच्च विपरीत-मसुराणामिति कामाभट्ट-देवीदासोक्तिः परास्ता[25] । मनु-विष्णुपुराण-विरोधाच्च[26] । भानुभुक्तित इति सौरत्वसूचकम्[0] ।

अखिलं मङ्गलं कर्म सौम्यायनगते रवौ ॥
देवतारामवाप्त्यादिप्रतिष्ठोदङ्मुखे रवौ ।
दक्षिणाशामुखे कुर्वन्न तत्फलमवाप्नुयात् ॥[27]

25- ज्योतिषे देवासुराणामहोरात्रनिर्णयो विशेषेण विचारितः । देवानां यद्दिनमसुराणां सा रात्रिस्तदनुसारं ज्ञायते । सूर्यसिद्धान्तस्य भूगोलाध्याये तदुक्तं यथा (श्लोकाः-45, 47, 48, 49, 50)—

मेषादौ देवभागस्थे देवानां याति दर्शनम् ।
असुराणां तुलादौ तु सूर्यस्तद्भागसञ्चरः ॥
देवासुरा विषुवति क्षितिजस्थं दिवाकरम् ।
पश्यन्त्यन्योऽन्यमेतेषां वामासव्ये दिनक्षये ॥
मेषादावुदितसूर्यस्त्रीन् राशीनुदगुत्तरम् ।
सञ्चरन् प्रागहर्मध्यं पूरयेन्मेरुवासिनाम् ॥
कर्कादीन् सञ्चरँस्तद्वदह्नः पश्चार्द्धमेव सः ।
तुलादींश्च मृगादींश्च तद्वदेव सुरद्विषाम् ॥
अतो दिनक्षपे तेषामन्योऽन्यं हि विपर्ययात् ।
अहोरात्रप्रमाणं च भानोर्भगणपूरणात् ॥ इति ।

अत्र व्याख्याकारेण कपिलेश्वरशास्त्रिणाऽप्येवं स्पष्टीकृतम्, यथा— अस्मात् कारणात् देवानामसुराणां च व्यत्यासतः परस्परं दिनं रात्रिश्च भवतः । यद्देवानां दिनं साऽसुराणां रात्रिः । यदसुराणां दिनं सा देवानां रात्रिरित्यर्थः । इति ।

26- उत्तरायणं देवानां दिवसः, दक्षिणायनं देवानां रात्रिर्भवति । एतत् प्रतिपादयन् मनुराह, यथा (1/67)—

दैवे रात्र्यहनी वर्षं प्रविभागस्तयोः पुनः ।
अहस्तत्रोदगयनं रात्रिः स्याद्दक्षिणायनम् ॥ इति ।

विष्णुपुराणे (1/3/10) अपि वचनमनुरूपंमुपलभ्यते । तद्यथा—

तैः षड्भिरयनं वर्षं द्वेऽयने दक्षिणोत्तरे ।
अयनं दक्षिणं रात्रिर्देवानामुत्तरं दिनम् ॥ इति ।

0- वाक्यमिदं नास्ति ख-ग-पुस्तकद्वये ।

वैश्वानरसंहितायाम्—

मातृभैरववाराहनरसिंहत्रिविक्रमाः ।
महिषासुरहन्त्री च स्थाप्या वै दक्षिणायने ।।[28]

स्थाप्याः प्रतिष्ठापनीयाः, जघान नात्यायतकृष्टशार्ङ्ग इतिवदुपसर्गाणां द्योतकत्वात्[29] । सिंहवाजपेयिभिस्तु[30] शान्तदेवताप्रतिष्ठा मुक्त्यर्थिनां दक्षिणायनेऽप्युक्तम् ।

ऋतुनिर्णयः[31]

27- सत्यव्रतवचनमेतदिति कालमाधवे (पृ -44) वत्सरप्रकरणे ।

28- वैखानससंहितावचनमेतदिति कालमाधवे (पृ -44) वत्सरप्रकरणे ।

29- धातूनामनेकेऽर्थाः भवन्ति । तत्र निपातयोगेऽर्थभिन्नत्व जायते । ते च निपाताः अव्ययशब्दाः चादयः (चादयोऽसत्त्वे 1/4/57) प्रादयः (प्रादयः-1/4/58) च भवन्ति । तेषां निपातानां द्योतकत्वं वाचकत्व वेति विचारितम् । नैयायिकाः चादीनां निपातानामर्थस्य वाचकत्वं प्रादीनामुपसर्गाणां द्योतकत्वंच मन्यन्ते । वैयाकरणाः केचन इत्थं जानन्ति । किन्तु नागेशभट्टादयोऽनेके वैयाकरणा उभयपर्यायभूतानां निपातानामर्थद्योतकत्वं प्रतिपादयन्ति । एतत्प्रतिपादयन् परमलघुमञ्जूषायां निपातार्थनिर्णयप्रकरणे ग्रन्थकारो नागेशभट्टः कथयति यत्—'अनुभूयते सुखम्' 'साक्षात्क्रियते गुरुः' इत्यादौ निपातानां द्योतकत्वेन अनुभवसाक्षात्काररूपफलयोर्धात्वर्थत्वेन सकर्मकत्वम् । कर्मसञ्ज्ञकार्थान्वय्यर्थकत्वं सकर्मकत्वमिति निष्कृष्टमतेऽपि फलाश्रयतया कर्मसंज्ञकस्य धात्वर्थफले एवान्वयौचित्येन द्योतकत्वमावश्यकम् । इति । अत्र अति+आ+यम—क्त' यथावदर्थं प्रतिपादयति तथावत् 'प्रति+स्था—अनीय' अपि स्वकीयमर्थं प्रतिपादयति । अत्र 'प्रति'-उपसर्गेण आवश्यकीयार्थस्य प्रकाशो जायते । अतएव उपसर्गाणां द्योतकत्वं स्पष्टमेव ।

30- नित्याचारप्रदीपे अयनप्रकरणे (पृ.पृ 72-73) ग्रन्थकारः नरसिंहवाजपेयी अयनकर्तव्यतायां स्वमतं प्रतिपादयति यथा—

दक्षिणायनकृष्णपक्षादिषु विशेषविहितकर्मव्यतिरेकेणाविशेषविहितानीति सम्बध्यते ।........दक्षिणायनकृष्णपक्षापराह्णेषु काम्यानि पित्र्याणीत्यर्थः । इति ।

31- इयर्त्ति गच्छति अशोकपुष्पविकासाद्यसाधारणलिङ्गमिति वसन्तादिकालविशेष ऋतुः । इति माधवाचार्यः कालमाधवे (पृ-44) ।

षड्वा ऋतव इति श्रुतेस्ते च षट् । ते च वसन्ताद्याश्चैत्रादिमासयुगात्मकाः । तदुक्तं काण्वशाखायाम् (उत्तरविंशतिः)—

मधुश्च माधवश्च वासन्तिका ऋतू । (14/2)

शुक्रश्च शुचिश्च ग्रैष्मा ऋतू । (15/1)

नभश्च नभस्यश्च वार्षिका ऋतू । (15/4)

सहश्च सहस्यश्च हैमन्तिका ऋतू । (15/8)

तपश्च तपस्यश्च शैशिरा ऋतू ।[32] (16/7)

ते च सौरचान्द्रभेदाद् द्विविधाः ।[33]

मीनमेषयोर्मेषवृषयोर्वा वसन्तः ।

इति बौधायनोक्ते[34]र्वसन्तस्य मीनमेषादित्वे विकल्पिते ग्रीष्मादीनामन्यपञ्चर्तूनामपि वृषमिथुनादित्वविकल्पः ।

वसन्ते ब्राह्मणोऽग्नीनादधीत, ग्रीष्मे राजन्यः, शरदि वैश्यः ।

32- मध्वादीनां मासानां चैत्रादित्वमुपन्यस्तं शास्त्रकारैः । तद्यथा कृत्यतत्त्वार्णवे (पृ. पृ-21-22) भागुरिः—

वसन्तश्चैत्रवैशाखौ ज्ञेयौ तौ मधुमाधवौ ।

ज्येष्ठाषाढावृतुर्ग्रीष्मस्तौ च शुक्रशुची स्मृतौ ॥

प्रावृट् श्रावणभाद्राख्यौ नभौनभस्यसंज्ञितौ ।

मासौ शरदिषोजौं तु तावाश्वयुककार्त्तिकौ ॥

सहःसहस्यौ हेमन्तो मार्गपौषौ तु तौ मतौ ।

तपस्तपस्यौ शिशिरस्तौ मासौ माघफाल्गुनौ ॥ इति ।

33- ऋतूनां द्विविधत्वमुक्तं माधवाचार्येण कालमाधवे, तद्यथा (पृ-4)—

वसन्ताद्य ऋतवो द्वेधा चान्द्राः सौराश्च चान्द्रकाः ।
चैत्राद्या, अथ मीनाद्या मेषाद्या वा विवस्वतः ॥ इति ।

34- निर्णयसिन्धुधृतम् (पृ-3) ।

0-इषश्चोर्जश्च शारदा ऋतू (काण्वशाखा-उत्त.15/4) इति ख-ग-अधिकपाठः ।

इति विनियोगे श्रुतिः[35] । अत्र वसन्तादिकं समाचारा[0]च्चैत्रशुक्लप्रतिपदादिकं ज्येष्ठदर्शान्तं[00] चान्द्रम् ।

हेमन्तः शान्तके प्रोक्तो वसन्तो विश्वकर्मणि ।
शिशिरस्तम्भने ज्ञेयो विद्वेषे ग्रीष्म ईरितः ॥

इति दीक्षासारीयं हेमन्तादिकं तु सौरम् । मन्त्रप्रयोगादौ मासवदृतूनामपि सौरत्वात् ।

अथ मासाः[36]

ते च त्रिविधाः, सौर-सावन-चान्द्रभेदात् ।

तदुक्तं ब्रह्मसिद्धान्ते[37]—

चान्द्रः शुक्लादिदर्शान्तः सावनस्त्रिंशता दिनैः ।
एकराशौ रविर्यावत्काल मासः स भास्करः ॥ इति ।

चान्द्रोऽपि दर्शान्तः पूर्णिमान्तो वेति विकल्प्यते । दर्शान्तत्वे—

इन्द्राग्नी यत्र हूयेते मासादिः स प्रकीर्त्तितः ।
मासाकृतायुतामासैर्मधुशुक्लादिभिर्गतैः ॥

35- कालमाधवधृतम् (पृ-47) ।

36- सान्तं मासिति चन्द्रवाचि प्रातिपदिकम् । सम्बन्धार्थे अणि इत्यतो मासशब्दो निष्पन्नः । तद्व्याख्याने कालमाधवकारः (पृ-48) माधवाचार्यः आह यथा—तदीयत्वं च पञ्चदशानां कलानां वृद्धिक्षयद्वारेणावगन्तव्यम् । यदीदं मासत्वं सौरसावनयोरनुगतं, तर्ह्येवमस्तु ; मसी-परिमाणे इत्यस्माद्धातोर्निष्पन्नोऽयं मासशब्दः । मस्येते परिमीयते यावता कालेन चन्द्रवृद्धिक्षयौ, स चान्द्रो मासः । यद्वा चन्द्रवृद्धिक्षयाभ्यां स्वयं मस्यते इति मासः । तथा च सिद्धान्तशिरोमणौ पठ्यते—

मस्यन्ते परिमीयन्ते स्वकलाः वृद्धिहानितः ।
मास एते स्मृता मासास्त्रिंशत्तिथिसमन्विताः ॥ इति ।

37- कालमाधवे (पृ-48) उद्धृतम् ।

0- शिष्टाचारात् इति ख-ग ।

00- वैशाखदर्शान्तम् इति ख ग ।

इत्यादि-लघुहारीत[38] मयवचनानि जाग्रन्ति ।

अश्वयुक्कृष्णपक्षे तु श्राद्धं कार्यं दिने दिने ।[39]

इत्यादि पूर्णिमान्तत्वे लिङ्गम्। अन्यथा भाद्रस्य कृष्णपक्षे इति ब्रूयात् ।

भाद्राश्विनौ त्रिभौ ज्ञेयौ फाल्गुनस्तु त्रिभो मतः ।
शेषा द्विभास्तु मासाःस्युः.......... ।।[40] इत्यादि ।

बृहद्मसिद्धान्ते[41]—

अमावास्यापरिच्छिन्नो मासः स्याद्ब्राह्मणस्य तु ।
संक्रान्तिपौर्णमासीभ्यां तथैव नृपवैश्ययोः ।।

38- लघुहारीतवचनमिति कालमाधवे (पृ-55) उद्धृतम् ।

39- स्मृतौ महालयाप्रकरणे पठ्यत इति कालमाधवे (पृ-50)। अत्र लिङ्गं स्मृतिलिङ्गम् । श्रुतिलिङ्गमपि चात्रोपन्यस्तम् , यथा—

आथर्वणिकाः सृष्टिप्रकरणे संवत्सर-दक्षिणोत्तरायण-सृष्टिमाम्नाय मास-पक्षसृष्टिमेवमामनन्ति—मासो वै प्रजापतिः तस्य कृष्णपक्ष एव रयिः शुक्लः प्राणः । इति ।

एवं चान्द्रमासस्य पौर्णमास्यन्तत्वे लिङ्गद्वयं विकल्प्यते ।

40- मासविशेषाणां चैत्रवैशाखादिसंज्ञा पूर्णिमायां तत्तन्नक्षत्रयोगेन जायते । तत्तत्प्रत्यासन्ननक्षत्रयोगेऽपि चैत्रवैशाखादिसंज्ञा न विरुद्धा । एतत्-प्रतिपादयन् माधवाचार्यः कालमाधवे स्मृतिवचनमुद्धरति (पृ-52), यथा—

अन्त्योपान्त्यौ त्रिभौ ज्ञेयौ फाल्गुनस्तु त्रिभो मतः ।
शेषा मासा द्विभा ज्ञेयाः कृत्तिकादिव्यवस्थिता ।। इति ।

41- कालमाधवे (पृ-51) उद्धृतम् । अनुष्ठानाद्व्यवस्थितमिदम् ।

प्रोक्तवचनेभ्यो दर्शान्तपूर्णिमान्तयोः समो विकल्पः । एतदाधारीकृत्य कालसारे मासप्रकरणे ग्रन्थकारो गदाधरः प्रतिपादयति यथा—

दर्शान्तपौर्णमासान्तयोः समो विकल्पः । अनुष्ठानं तु कुत्रचित् वचन-विशेषात् शिष्टाचाराद्वा व्यवस्थितम् । यत्तु बृहद्मसिद्धान्ते—अमावास्या परिच्छिन्नो....... नृपवैश्ययोरित्युक्तं तत् कर्मविशेषे बोध्यम् । यथा विष्णु-पुराणे-माघेऽसिते पञ्चदशी कदाचिदुपैति योगं यदि वारुणेन । इति शताभिषा-युक्तमाघदर्शे यच्छ्राद्धमुक्तं तद्ब्राह्मणस्याधिकफलदमिति । एवं क्षत्रियवै-

शतानन्दः[42]—

देवव्रतवृषोत्सर्गमेखलोद्वाहमङ्गलम् ।
सौरमानेन कर्त्तव्यमभिषेकं न चाब्दिकम् ॥

आब्दिकमिति वर्षवृद्धिराज्यवृद्धिपुष्याभिषेकगणेशव्रतपितृश्राद्धादिकं न सौरेण कार्यम् । किन्तु चान्द्रेणेत्याशयः । वृषोत्सर्गे त्रिषण्मासादयो[43] विहिताः सौराः । चकारस्त्वन्यत् । सुप्रकाशकारास्तु यत्र यत्र चान्द्रादौ विशेषवचनं लिङ्गं वा नास्ति तत्र तत्र सौरमानेनैव सामान्यतो व्यवहारः, यथा—

चैत्रे व्याधिमवाप्नोति यो गृहं कारयेन्नरः ।

इति मात्स्ये[44] चैत्रपदं सौनपरम् ।

श्ययोः सौरपौर्णमासान्तयोरुदाहार्यम् । तेन सर्वकर्मसु सामान्यतः सर्वेषामपि पौर्णमासान्तमासो ग्राह्यः । तस्य मुख्यत्वादाचाराच्च । इति ।

उत्कलेषु सर्वेषां पूर्णिमान्तमासग्रहणमतएव सुस्थितम् ।

42- स्मृतिसारसङ्ग्रहे (पृ-5) उद्धृतम् ।

43- प्रेतात्मनः स्वर्गगतिप्राप्त्युद्देशेन पुत्रेण वृषोत्सर्गः कर्त्तव्यः । वृषोत्सर्गविचारं प्रदर्शयति कृष्णमिश्रः शुद्धिसर्वस्वे (पृ-89), यथा—

एकादशे त्रिपक्षे च षण्मासे वत्सरे तथा ।
वृषोत्सर्गं प्रकुर्वीत यः पितुः स्वर्गमिच्छति ॥

इति कात्यायनीयात् । इति ।

44- मत्स्यपुराणे (253/2-5) गृहकालविनिर्णय उक्तः, यथा—

चैत्रे व्याधिमवाप्नोति यो गृहं कारयेन्नरः ।
वैशाखे धेनुरत्नानि ज्येष्ठे मृत्युं तथैव च ॥
आषाढे भृत्यरत्नानि पशुवर्गमवाप्नुयात् ।
श्रावणे भृत्यलाभं तु हानिं भाद्रपदे तथा ॥
पत्नीनाशोऽश्विने विन्द्यात्कार्त्तिके धनधान्यकम् ।
मार्गशीर्षे तथा भक्तं पौषे तस्करतो भयम् ॥
लाभं च बहुशो विन्द्यादग्निं माघे विनिर्दिशेत् ।
फाल्गुने काञ्चनं पुत्रानिति कालबलं स्मृतम् ॥ इति ।

अथवा[0] गौतमीये[45]—

मन्त्रारम्भस्तु चैत्रे स्यात्समस्तपुरुषार्थदः ।
वैशाखे रत्नलाभः स्याज्ज्येष्ठे तु मरणं ध्रुवम् ॥

इत्यादौ चैत्रवैशाखादिपदं मीनमेषादिपरम्। यत्र तु विशेषवचनं लिङ्गवचनं वाऽस्ति तत्र न, यथा—

यज्ञादौ सावनः स्मृतः
आब्दिके पितृकार्ये चेत्यादि ।[46]

लिङ्गं यथा—

एकमासं द्विमासं वेत्यादि ।[47]

अत्र गणेशचतुर्थीवन्मध्याह्नव्यापिचतुर्थ्यादराच्चान्द्रत्वम् । एवमन्यदित्याहुः । तदसत् ।

45- गौतमीयतन्त्रे (5/23-26) मन्त्राधिकारादिनिर्णये सम्पूर्णवचनं यथा—
मन्त्रारम्भस्तु चैत्रे स्यात् समस्तपुरुषार्थदः ।
वैशाखे रत्नलाभः स्याज्ज्येष्ठे तु मरणं ध्रुवम् ॥
आषाढे बन्धुनाशः स्यात् पूर्णायुः श्रावणे भवेत् ।
प्रजानाशो भवेद्भाद्रे आश्विने रत्नसञ्चयः ॥
कार्त्तिके मन्त्रसिद्धिः स्यान्मार्गशीर्षे तथा भवेत् ।
पौषे तु शत्रुपीडा स्यान्माघे मेधाविवर्द्धनम् ॥
फाल्गुने सर्वकामाः स्युर्मलमासं विवर्जयेत् ।
पञ्चाङ्गशुद्धदिवसे स्वोदये चन्द्रसूर्ययोः ॥ इति ।

46- कालमाधवे (पृ-52) सम्पूर्णं ज्योतिर्गणवचनं यथा—
सौरो मासो विवाहादौ यज्ञादौ सावनः स्मृतः ।
आब्दिके पितृकार्ये च चान्द्रो मासः प्रशस्यते ॥ इति ।

47- कालसारे विनायकव्रतनिर्णये सम्पूर्णं स्कान्दवचनं यथा—
एकमासं द्विमासं वा षण्मासं वत्सरं तथा ।
अथवा गणनाथस्य व्रतं द्वादशवार्षिकम् ॥ इति ।

0- यथा वा इति ख-ग-पुस्तकयोः पाठन्तरम् ।

यव्यद्वयं श्रावणादी[48]—

त्यादौ सामान्योक्तस्यापि सौरत्वदर्शनात् । एवञ्च,

अशीतिभागो वृद्धिः स्यान्मासि मासि सबन्धके ।

कान्तारगास्तु दशकं सामुद्रा विंशकं शतम् ।।[49]

इत्यादौ मासे तद्व्यवहारात् । न चैतत् सौरं ऋणपत्रे लिखितमेव सौरत्वनियमात् । अन्यथा चान्द्रसावनयोरपि दर्शनात् ।

मकरे वर्जयेन्मूलम् ।

तुलामकरमेषेषु प्रातःस्नायी जितेन्द्रियः ।

48- कात्यायनस्मृतेः (10/5) सम्पूर्णवचनं यथा—

यव्यद्वयं श्रावणादि सर्वा नद्यो रजस्वलाः ।

तासु स्नानं न कुर्वीत वर्जयित्वा समुद्रगाः ।। इति ।

यव्यो मासः । नदीलक्षणमुक्तं तत्रैव, यथा (10/6)—

धनुःसहस्राण्यष्टौ गतिर्यासां न विद्यते ।

न ता नदीशब्दवहा गर्त्तास्ताः परिकीर्त्तिताः ।। इति ।

अत्र श्रावणादिमासद्वयस्य सौरपरत्वमपि विचार्यते गदाधरेण कालसारे नदीरजस्वलाप्रकरणे, यथा—

श्रावणादिद्वयं सौरमासपरम् । तथा च कर्कटमिथुनयो रजोदोषः,

आदौ कर्कटके नद्यः सर्वा एव रजस्वलाः ।

त्रिदिनं तु चतुर्थेऽह्नि शुद्धाः स्युर्जाह्नवी यथा ।। इति स्मृतौ ।

सौरमास एवकारेण समुद्रगानां नदीनामपि शुद्धित्वकथनात् । इति ।

49- ऋणादानप्रकरणे कुसीदवृद्धिमुद्दिश्य याज्ञवल्क्यस्य (2/37-38) सम्पूर्णवचनं यथा—

अशीतिभागो वृद्धिः स्यान्मासि मासि सबन्धके ।

वर्णक्रमाच्छतं द्वित्रिचतुष्पञ्चकमन्यथा ।।

कान्तारगास्तु दशकं सामुद्रा विंशकं शतम् ।

दद्युर्वा स्वकृतां वृद्धिं सर्वे सर्वासु जातिषु ।। इति ।

अधिकवृद्धिग्रहणे निषेधदर्शनात् मासपरिमितकालनिमित्तं वसिष्ठादिविहिता कुसीदवृद्धिः परिकल्पिता । तत्र सौर-सावन-चान्द्र-नाक्षत्रमासेषु सौरमासस्य दिनाधिक्यात् तन्मासानुसारं कुसीदवृद्धिगणना समीचीना भवति ।

इत्यादौ चान्द्राचाराच्च[0] । तस्माद्यत्र यत्र सामान्येन मासनिरुक्तिस्तत्र तत्र वचनान्तरैर्विशेषावगमः क्वचिच्छिष्टाचाराच्चेति ।

चैत्रे व्याधिमवाप्नोतीति

सौरो मासो विवाहादावित्यादिपदाच्चैतत् सौरम् । यद्यपि

मन्त्रारम्भस्तु चैत्रे स्यादिति

तथापि मन्त्राद्यारम्भणं मीन

इति वैशम्पायनसंहितावचनात् सौरम् । अतएव

तुलामकरमेषेष्विति

सौरमपि तुलादिपदं

माघकार्त्तिकयोश्चैव चान्द्रमासो विधीयते ।[50]

इति वचनाच्चान्द्रम् ।

अथ सावनमासकृत्यम्[51]

अह्नो मुहूर्त्तयामाः प्रायश्चित्तोपवासश्च ।
आयुर्दायश्च नृणां गमनागमनं च सावनमासात् ॥

ज्योतिषार्णवे[52]—

सौरो मासो विवाहादौ यज्ञादौ सावनः स्मृतः ।
आब्दिके पितृकार्ये च चान्द्रो मासः प्रशस्यते ॥

यज्ञादावित्यादिपदात् प्रत्यब्दभृत्यभरण-जातकर्म-नामकर्म-शौचादिकं गृह्यते ।

चूडार्वाङ्मङ्गलं कर्म मलमासेऽपि कारयेत् ।
तेषां सावनमानेन ऋषिभिः परिकीर्त्तितम् ॥[53]

इति वचनात् ।

50- नित्याचारप्रदीपे (पृ-77) कालदीपे (पृ-115) चोद्धृतम् ।

51- अहोरात्राणां त्रिंशत्सङ्ख्या परिमीयते यत्र स सावनः । इति कालमाधवे (पृ-48) मासनिर्णये माधवाचार्यः ।

52- द्रष्टव्या पादटिप्पणी-46 ।

53- शतानन्द इति नित्याचारप्रदीपे (पृ-74) ।

0- वाक्यमिदं नास्ति ख-ग-पुस्तकद्वये ।

चान्द्रमासकृत्यम्

स च शुक्लकृष्णपक्षद्वयात्मको दर्शान्तः पूर्णिमान्तो वेत्युक्तम् । तयोः शिष्टाचाराद्विकल्पः ।

आब्दिके पितृकार्ये च मासश्चान्द्रमसः स्मृतः ।

पितृकार्यं मासिकवार्षिकादिश्राद्धम् ।

एकमासं द्विमासं वा षण्मासं वत्सरं तथेति

गणेशचतुर्थ्यामपि मध्याह्नव्यापिचतुर्थ्यादरेण मासस्य चान्द्रत्वम् । मासिक-वार्षिकश्राद्धादौ मृततिथिग्रहवन्मध्याह्नव्यापिचतुर्थ्यौचित्यात् । अन्यथा वत्सरमित्यत्रापि तत्तिथ्या ग्रहापत्तिः । अस्यार्थः—एकमासं व्रतं वार्षिकम् । वर्षगतं यावन्मासविहितम्[0] । तेन मलमासेऽपि तद्व्रतकर्त्तव्यताऽऽयाता ।

द्वादशमासाः संवत्सरः, क्वचित्त्रयोदशमासाः ।

इति श्रुतेः संवत्सरस्यापि क्वचित्त्रयोदशमासत्वात् । एवं द्विमासं षण्मास-मथवा संवत्सरम् । एतानि व्रतानि द्वादसङ्ख्यकानीत्यर्थः । अथवेत्यस्य संवत्सरमित्यधोऽन्वयात् । एवञ्च द्विमासादौ मलमासपाते त्वारम्भं विना-न्यवारेषु भाद्रशुक्लचतुर्थ्यपातेऽपि न क्षतिः ।

षष्ट्या तु दिवसैर्मासः[54]

इति वक्ष्यमाणवचनान्मलयुक्तशुद्धमासस्यैक्यं वा । केचित्तु

यदा चोत्पद्यते भक्तिर्मासि पूज्यो गणाधिपः ।[55]

54- कालमाधवे वत्सरप्रकरणे (पृ-57) सम्पूर्णं ज्योतिःपितामहवचनं यथा—

षष्ट्या तु दिवसैर्मासः कथितो बादरायणैः ।
पूर्वार्द्धं तु परित्यज्य कर्त्तव्या उत्तरे क्रियाः ॥ इति ।

55- कालसारे विनायकव्रतप्रकरणे सम्पूर्णं स्कन्दपुराणवचनं यथा—

गजवक्त्र च शुक्लायां चतुर्थ्यां पूजयेन्नृप ।
मासि भाद्रपदे प्राप्ते चतुर्थ्यां च विशेषतः ॥

0- वर्षकृतं यावन्मासकृतमिति ख-ग-पुस्तकद्वये पाठः ।

इतिस्वरसात् भक्त्याधिक्ये एकमासेनैकवारं द्विमासं द्विवारं षण्मासं षड्वार-मित्यर्थमाहुः । तन्न सामाचारिकम्[0] । दिनमध्येव चतुर्थी । तदुक्तं ब्रह्मसिद्धान्ते[56]—

सावनं स्यादहोरात्रमुदयादोदयाद्रवेः ।
रवेस्त्रिंशस्तु राश्यंशस्तिथिसम्भोग ऐन्दवम् ॥

सावनदिनानि तु प्रतिष्ठादिनात् पञ्चदशदिनैरङ्कुरारोपणादौ । यथा वा

सप्ताहं मण्डपे स्थितम् ।[57]

प्रथमगुण्डिचावद् द्वितीयगुण्डिचाया अवधि विशेषदिनानुल्लेखेन सप्तत्यागा-नौचित्यात् । एवं

ततः पञ्चदशाहानि मम स्नानादनन्तरम् ।[58]

यदा चोत्पद्यते भक्तिर्मासि पूज्यो गणाधिपः ॥
एकमासं द्विमासं वा षण्मासं वत्सरं तथा ।
अथवा गणनाथस्य व्रतं द्वादशवार्षिकम् ॥ इति ।

अत्र कालसारकारो गदाधर इत्थं प्रतिपादयति, यथा—

एतदपि एकमासपक्षे प्रमाणं, तथा कार्ये गौरवमपेक्ष्य द्विमासं व्याप्य द्विवारं व्रतमित्यर्थः । तथा अधिककार्यगौरवमपेक्ष्य प्रबलविघ्नाशङ्कायां षण्मासं व्रतम् । एवं षण्मासैरेव व्रतस्य समाप्तिः । वत्सरपक्षे द्वादशभिर्मा-सैर्मलमासपाते त्रयोदशभिः समाप्तिः । इति ।

56- कालमाधवे (पृ-80) उद्धृतम् ।

57- ब्रह्मपुराणे श्रीगुण्डिचायात्रावर्णने (66/2) सम्पूर्णवचनं यथा—

ये पश्यन्ति तदा कृष्णं सप्ताहं मण्डपे स्थितम् ।
हरिं रामं सुभद्रां च विष्णुलोकं व्रजन्ति ते ॥ इति ।

58- स्मृतिसारसङ्ग्रहे (पृ-43) सम्पूर्णं वायुपुराणवचनं यथा—

ततः पञ्चदशाहानि मम स्नानादनन्तरम् ।
सुरूपां वा विरूपां वा न पश्येत्प्रतिमां मम ॥ इति ।

0- एवञ्च द्विमासादौ........सामाचारिकम् । इति वाक्यानि ख-ग-पुस्तकद्वये न सन्ति ।

इत्यादावपि वक्ष्यते । उपसंहारे विशेषतिथ्युल्लेखे तु चान्द्रम् । यथा—

आश्विने शुक्लपक्षे तु कर्त्तव्यं नवरात्रकम् ।
प्रतिपदाक्रमेणैव यावच्च नवमी भवेत् ॥[59]

अत्रावधिवशात् क्षयवृद्धी सावननियमात् ।

अथ मलमासविचारः

ब्रह्मसिद्धान्ते[60]—

चान्द्रोऽधिमासोऽसंक्रान्तो मलमासः प्रकीर्त्तितः ।

ज्योतिषे[61]—

गते वर्षद्वये सार्द्धे पञ्चपक्षे दिनद्वये ।
दिवसस्याष्टमे भागे पतत्येकोऽधिमासकः ॥

गत इति भागेऽन्वेति ।

द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा ।
घटिकानां चतुष्केण पतत्येकोऽधिमासकः ॥

इति सिद्धान्तवाक्ये[62] घटिकापदं[0] दिनाष्टमभागार्थकम् । इदञ्च मेषादिषट्के

59- कालदीपे शरत्कालीनदुर्गापूजाप्रकरणे 'शुक्लपक्षे' स्थाने 'मासि शुक्ले' इति उद्धृतम् । कालसारेऽपि भविष्योत्तरपुराणवचनमेतत् ।

60- कालमाधवे (पृ-52) उद्धृतम् । मलमासस्य स्वरूपं प्रतिपादयन् ग्रन्थकारो ब्रह्मसिद्धान्तवचनमुद्धरति चान्द्रोऽधिमासेत्यादि । अत्र मलमासस्यासंक्रान्तत्वं सूचितम् । अन्यत्रापि मलमासस्य द्विसंक्रान्तत्वं सूच्यते । तथा च कालमाधवे वत्सरप्रकरणे (पृ-54) काठकगृह्यवचनम्—

यस्मिन्मासे न संक्रान्तिः संक्रान्तिद्वयमेव वा ।
मलमासः स विज्ञेयो मासे त्रिंशत्तमे भवेत् ॥ इति ।

अनेन मलमासः क्षयमासः अधिमास इति द्विविधः भवति ।

61- 'वर्षद्वये' स्थाने 'अब्दद्वितये' इति कृत्यतत्त्वार्णवे (पृ-16) शाण्डिल्यवचनम् ।

62- कालमाधवे (पृ-53) उद्धृतम् । कालाधिक्ये सति अत्र पुरुषस्य सूर्यस्य अभावादस्य मलमासस्य नपुंसकत्वम् । तथा चोद्धृतं तत्र

0- चतुष्कपदम् इति ख ग-पुस्तकद्वये पाठान्तरम् ।

एकद्वित्रिदिनवृद्ध्या प्रतिवर्षमेकादशदिनवृद्धिवशाच्चान्द्राज्जायते ।

यां तिथिं समनुप्राप्येति

प्रागुक्तेः । अतएव तुलादौ[63] दिनावर्द्धनान्नाधिमासः, किन्तु क्षयमासः ।

तेन चैत्रादर्वाङ्नाधिमासः

इति ब्रह्मसिद्धान्तो[64] युक्तिमूलकः ।

सिद्धान्तशिरोमणौ[65]—

असंक्रान्तिमासोऽधिमासः स्फुटः स्याद्-
द्विसंक्रान्तिमासः क्षयाख्यः कदाचित् ।
क्षयः कार्त्तिकादित्रये नान्यदा स्यात्
तदा वर्षमध्येऽधिमासद्वयं स्यात् ॥

स्फुटः स्फुटमानसिद्धो न तु मध्यमानकृतः । तस्य स्मृत्यनुपयोगात् । कार्त्तिकादित्रय इति मिथुनमन्दोच्चगतरविकालाभिप्रायम् । तेन कलियुगान्तरे च । कर्कटादिमन्दोच्चगते रवौ कलियुगान्ते युगान्तरे च कार्त्तिकादित्रयभिन्ने माघफाल्गुनादौ क्षयमासो भाव्येव । अतो नान्यदेतिस्याने सम्प्रतीतिपाठ्यम् । अधिमासद्वयं चैत्राश्विनयोः प्राय[0] इति शेषः ।

क्षयमासावधिस्तत्रैव ।

गतेऽब्ध्यद्रिनन्दैर्मिते शाककाले
तिथीशैर्भवत्यप्यथाङ्गाक्षसूर्यैः ।

ज्योतिःशास्त्रवचनम्—

असंक्रान्तो हि यो मासः कदाचित्तिथिवृद्धितः ।
कालान्तरात् समायाति स नपुंसक इष्यते ॥ इति ।

63- तुलादौ तुलादिषु पञ्चसु मासेषु । यद्यपि कार्त्तिकादिमासत्रये क्षयमासस्य सम्भवस्तथापि माघादित्रये तस्य कदाचित् सम्भवः स्यात् ।

64- कालमाधवे वत्सरप्रकरणे (पृ-61) ब्रह्मसिद्धान्तवचनं यथा—

चैत्रादर्वाङ्नाधिमासः परतस्त्वधिको भवेत् । इति ।

चैत्रादारभ्यार्वाचीनः पूर्वो नाधिमासः किन्तु परवर्त्ती मासोऽधिमासः स्यात् ।

65- सिद्धान्तशिरोमणौ मध्यमाधिकारेऽधिमासनिर्णये षष्ठश्लोकः ।

0- ख-ग-पुस्तकद्वये प्राय इति पाठो नास्ति ।

नखाङ्काग्निभूभिस्तथा प्रायशोऽयं

कुवेदेन्दुवर्षैः क्वचिद् गोकुभिश्च ॥[66]

ऋ-ऌवर्णयोः क्लीवत्वेन त्यागे ओ-कारस्य नवमत्वेनोनत्रिंशतिरित्यर्थः । गोकुभिरितिपाठे गोपदं नवभूखण्डसङ्केतितम् ।[0]

माधवीये[67]—

असंक्रान्तावेकवर्षे द्वौ चेत्संसर्पाह्मिमः ।
क्षयमासो द्विसक्रान्तः स चांहस्पति-संज्ञकः ॥
त्रयस्त्याज्या विवाहादौ संसर्पांहस्पती उभौ ।
शुद्धे श्रौते तथा स्मार्त्ते मलमासो विविच्यते ॥

अयं दर्शान्तश्चान्द्रोऽधिमास उत्तरमासशेषः ।

षष्ट्या तु दिवसैर्मासः कथितो बादरायणैः ।
पूर्वार्द्धं तु परित्यज्य कर्त्तव्या उत्तरे क्रियाः ॥

इति पितामहवचनात्[68] । तेन वैशाखान्तर्गतमलशुक्ले यादृशिप्रतिपद् द्वितीयादौ मृताहः पतेत् तस्यान्यवर्षे शुद्धवैशाखशुक्ले तादृशितिथौ प्रतिपद् द्वितीयादावाब्दिकश्राद्धम् । एवं वैशाखमलकृष्णे यादृशतिथौ मृताहः स्यात्तस्य ज्येष्ठकृष्णे तादृशतिथौ प्रथमाद्याब्दिकमित्याद्यूह्यम्[00] । शुद्धवैशाखशुक्ले ज्येष्ठकृष्णपक्षयोस्तन्मलमासोत्तरत्वात् । कालान्तरे वैशाखे पुनर्मलमासपाते तु तन्मलं तद्दिनमेव पितृवार्षिकान्तरम्, न तूत्तरज्येष्ठे ।

66- सिद्धान्तशिरोमणौ मध्यमाधिकारेऽधिमासनिर्णये सप्तमश्लोकः । किन्तु तत्र 'नखाङ्काग्नि'-स्थाने 'गजाद्यग्नि' इति पाठः । गते........नन्दै 974 मिते....... तिथीशै-1115 र्भविष्य........सूर्यैः 1256 ।
गजा ...भूभि 1378 स्तथा....कुवेदेन्दु 141 वर्षैः....भिश्च 19 ॥ इति ।

67- कालमाधवस्य उपोद्घातप्रकरणे माधवाचार्येणोक्तवचनम् ।

68- ज्योतिःपितामह इति कालमाधवे (पृ-57) मलमासनिर्णये ।

0- नवसङ्केतितम् इति ख-पुस्तके पाठान्तरम् ।

00- उन्नेयम् इति ख-ग-पुस्तकद्वये पाठान्तरम् ।

मलमासमृतानां तु मले स्यादाब्दिकान्तरम् ।

इति माधवीयात्[69] ।

काम्यारम्भं तत्समाप्तिं मलमासे विवर्जयेत् ।
आरब्धं मलमासे[0] स्यात्कृच्छ्रं सत्त्रादिकं च यत् ॥
तत्समाप्यं सावनस्य मानस्यानतिलङ्घनात् ।[70]
आरम्भस्य समाप्तेश्च मध्ये स्याच्चेन्मलिम्लुचः ॥
प्रवृत्तमखिलं काम्यं तदानुष्ठेयमेव तु ।
कारीर्यादि तु यत्काम्यं तस्यारम्भसमापने ॥
कार्ये कालविलम्बस्य प्रतीक्षाया असम्भवात् ।[71]
अनन्यगतिकं नित्यमग्निहोत्रादि न त्यजेत् ॥[72]
गत्यन्तरयुतं नित्यं सोमयागादि वर्जयेत् ।
अगति ग्रहणस्नानं जातेष्टिर्गतिसंयुता ॥[73]
द्वयं नैमित्तिकं तस्य व्यवस्था नित्यवन्मता ॥[74]

69- कालमाधवे (पृ-5) उपोद्घातप्रकरणे माधवाचार्येणोक्तम् ।

70- आरब्धस्य कृच्छ्रसत्त्रादिकर्मणः सावनमानानुरोधेन मलमासेऽपि समाप्तिः कार्या ।

71- अवग्रहेण शुष्यतां शस्यानां सवृद्धिसञ्जीवनं कारीरी-यागेन सम्भवतीतिकृत्वा तत्र कालप्रतीक्षाया असम्भावना ।

72- अहरहः कर्त्तव्यत्वात् अग्निहोत्रादेः अनन्यगतिकत्वम् । अग्निहोत्रस्य नित्यत्वमुक्तं मनुना, यथा (4/25)—

अग्निहोत्रं च जुहुयादाद्यन्ते द्युनिशोः सदा ।
दर्शेन चार्द्धमासान्ते पौर्णमासेन चैव हि ॥ इति ।

73- वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते इति यद्यपि जातेष्टेः तत्क्षणं कर्त्तव्यता सूचिता तथापि बालविपत्तिशङ्कानाशाय तस्य सगतिकत्वं शुद्धमासोयत्वं बोध्यम् ।

74- कालमाधवे (पू. पृ 4-5) ।

0- मलमासात्प्राक् इति ख-ग-पुस्तकद्वये पाठान्तरम् ।

वर्ज्यावर्ज्यसङ्ग्रहः कालादर्शे[75] यथा—

द्वादशाहसपिण्डान्तं कर्म ग्रहणजन्मनोः ।
सीमन्ते पुंसवे श्राद्धं द्वावेतौ जातकर्म च ॥
रोगशान्तिरलभ्ये च योगे श्राद्धं व्रतानि च ।
प्रायश्चित्तं निमित्तस्य वशात्पूर्वे परत्र वा ॥
अब्दोदकुम्भमन्वादिमहालययुगादिषु ।
श्राद्धं दर्शेष्वहरहः श्राद्धमूनादिमासिकम् ॥
मलिम्लुचान्यमासेषु मृतानां प्रथमाब्दिकम् ।
श्राद्धं तु पूर्वदृष्टेषु तीर्थेष्वेवं युगादिषु ॥
मन्वादिषु च यद्दानं दानं दैनन्दिनं च यत् ।
गोभूतिलहिरण्यानां सन्ध्योपासनयोः क्रिया ॥
पर्वहोमश्चाग्रयणं साग्नेरिष्टिश्च पर्वणोः ।
नित्याग्निहोत्रहोमश्च देवतातिथिपूजनम् ॥
स्नानञ्च स्नानविधिना चाभक्ष्यापेयवर्जनम् ।
तर्पणञ्च निमित्तस्य नित्यत्वादुभयत्र च ॥

द्वादशाहेत्यादि उभयत्र[0] चेत्यन्तं सर्वं कर्त्तव्यमिति शेषः ।

अनित्यमनिमित्तञ्च दानं यन्महदादिकम् ।
अग्न्याधानाध्वरापूर्वतीर्थयात्राऽमरेक्षणम् ॥
देवारामतडागादिप्रतिष्ठा मौञ्चिबन्धनम् ।
आश्रमस्वीकृतिः काम्यवृषोत्सर्गश्च निष्क्रमः ॥
राजाभिषेकः प्रथमश्चूडाकर्मव्रतानि च ।
अन्नप्राशनमारम्भो गृहाणाञ्च प्रवेशनम् ॥
स्नानं विवाहो नामानि तथाऽऽपन्नं महोत्सवम् ।

75- कालादर्श (प. प-17-18) धृतवचनम् ।

0- उभयत्र चेत्यन्तम् इति पाठो नास्ति ख ग-पुस्तकद्वये ।

विद्यारम्भं[0] समाप्तिश्च कर्म काम्यं च पाप्मनः ॥
प्रायश्चित्तञ्च सर्वं हि मलमासे विवर्जयेत् ॥

अनित्यमनिमित्तञ्चेत्यादि वर्जयेदित्यन्वेति ।

उपाकर्मोत्सर्जनञ्च पवित्रदमनार्पणम् ।
अवरोहश्च[76] हैमन्तः सर्पाणां बलिरष्टकाः ।
ईशानस्य बलिर्विष्णोः शयनं परिवर्त्तनम् ।
दुर्गेन्द्रस्थापनोत्थाने ध्वजोत्थानं च वज्रिणः ॥
पूर्वत्र प्रतिसिद्धानि परत्रान्यच्च दैविकम् ॥

पूर्वत्र मलमासे निषिद्धान्यपि तदुत्तरशुद्धमासे कार्याणीत्यर्थः ।[00]

दशम्यां कृष्णपक्षे चेन्मेषं गच्छेद्दिवाकरः ।
द्विराषाढः स विज्ञेयः कर्कटेऽर्के हरिः स्वपेत् ॥
दर्शद्वयं यदैकत्र भवेत्तु विषुवान्तरे ।
द्विराषाढस्तदा कार्यः कर्कटेऽर्के हरिः स्वपेत् ॥
नित्यनैमित्तिके कुर्यात् प्रयतः सन्मलिम्लुचे ।
तीर्थस्नानं गजच्छाया[77] प्रेतस्नानं तथैव च । इति—

76- अवरोहः निम्ने आगमनम् , अवरोहोऽवतरणे त्रिदिवे........ इति त्रिकाण्डशेषे (पृ-254) ।

77- कालादर्शे (प-12, पृ-ख) गजच्छायालक्षणमुक्तं यथा—

सोमवारयुतो दर्शः सूर्यग्रहणसन्निभः ।
त्रयोदश्यां तु सच्छायामिन्दुः पित्र्ये रविः करे ।
गजच्छाया तु सा ज्ञेया........ ॥ इति ।

0- व्रतारम्भं इति ख-ग पाठः ।

00- नन्दसंहितायाम्—

गर्भे वार्द्धुषिकृत्ये च मृतानां पिण्डकर्मणि ।
सपिण्डीकरणे चैव नाधिमासं विदुर्बुधाः ॥

इति ख-पुस्तकेऽत्राधिकः पाठः ।

बृहस्पतिवचनाद् गजच्छायाया नैमित्तिकत्वेन निषेधत्वेऽपि पुनरुक्तिस्तज्जातीयमहावैशाखीमहाज्यैष्ठ्यादीनां[78] निषेधार्था[0] ।

तिथिस्वरूपम्[79]

याज्ञवल्क्यमिताक्षरायाम् (1/218) अप्येषा परिभाषिता यथा—

यदेन्दुः पितृदैवत्ये हंसश्चैव करे स्थितः ।
यस्यां तिथिर्भवेत् सा हि गजच्छाया प्रकीर्त्तिता ।। इति ।

78- महावैशाखी-महाज्यैष्ठ्यादयो योगविशेषाः । तद् द्वयोः स्वरूपं प्रतिपादितं दिव्यसिंहेन कालदीपे । तत्र महावैशाखी यथा—

मेषेऽर्के कार्मुके जीवे मकरस्थेऽथवा द्विजे ।
पूर्णिमा रविवारेण तुलास्थे च शनैश्चरे ।।
वरीयोयोगयुक्ते च विशाखर्क्षे यदा शशी ।
महच्छब्दा तदा ज्ञेया कोटिसूर्यग्रहाधिका ।। इति ।

महाज्यैष्ठी यथा—

ऐन्द्रे गुरुः शशी चैव प्राजापत्यगते रवौ ।
पौर्णमासी गुरौ ज्यैष्ठी महाज्यैष्ठीति सा स्मृता ।। इति ।

स्मृतितत्त्वे (भागः-II-पृ. पृ-431-32) अपि रघुनन्दनेन प्रतिपादितं यथा—

ज्येष्ठायां गुरुचन्द्रावस्थाने रोहिण्यां सूर्यावस्थाने ज्यैष्ठी पौर्णमासी........ माससंज्ञकविशाखादिनक्षत्रे गुरुचन्द्रयोः सहावस्थाने महावैशाख्यादि........ । इति ।

79- तनु-विस्तारे इति धातोस्तिथिशब्दो निष्पन्नः । चन्द्रकलां वर्द्धमानां क्षीयमाणां वा एषा विस्तारयति । तदुक्तं माधवाचार्येण कालमाधवे (पृ-77) प्रतिपत्प्रकरणे—

तनोति विस्तारयति वर्द्धमानां क्षीयमाणां वा चन्द्रकलामेकां यः कालविशेषः सा तिथिः । यद्वा यथोक्तकलया तन्यते इति तिथिः । तदुक्तं सिद्धान्तशिरोमणौ—

तन्यते कलया यस्मात् तस्मात्तास्तिथयः स्मृताः । इति ।

0- दशम्यां कृष्णपक्षे........निषेधार्था । इति भागः ख-पुस्तके नास्ति ।

गर्गः[80]—

खर्वा दर्पा तथा हिंस्रा त्रिविधं तिथिलक्षणम् ।

खर्वा समा, दर्पा वृद्धिमती, हिंस्रा क्षीणा । एतत्त्रयस्य चान्द्रमान एव सम्भवो न तु सौरसावनयोः । अतश्चान्द्रदिनं निरूप्यते । सा द्विविधा, पूर्णा खण्डा चेति ।[0]

प्रतिपत्प्रभृतयः पुण्या उदयादोदयाद्रवेः ।
सम्पूर्णा इति विख्याता हरिवासरवर्जिताः ॥[81]

उदयात् सूर्योदयमभिव्याप्योत्तरसूर्योदयावधि । हरिवासर एकादशी ।[00]

हेमाद्रौ ज्योतिःसिद्धान्ते—

सर्वा ह्येतास्तु सम्पूर्णा उदयादोदयस्थिताः ।
आदित्योदयवेलायाः प्राङ्मुहूर्त्तद्वयान्विताः ॥
सम्पूर्णा इति विख्याता विद्धाऽन्याः परिकीर्त्तिताः ॥

इति एकादश्याः वक्ष्यमाणत्वादिति भावः ।[000]

नारदीये[82]—

आदित्योदयवेलाया[0000] आरभ्य षष्टिनाडिका ।
या तिथिः सा तु शुद्धा स्यात् सार्वतिथ्यो ह्ययं विधिः ॥[00000]

80- कालमाधवे प्रतिपत्प्रकरणे (पृ-80) सम्पूर्णं गर्गवचनं यथा—

खर्वो दर्पस्तथा हिंस्रस्त्रिविधं तिथिलक्षणम् ।
धर्माधर्मवशादेवं तिथिस्त्रेधा विवक्षिता ॥ इति ।

81- कालमाधवे (पृ-81) पुण्या-स्थाने-सर्वा इति पाठेन स्कन्दपुराण-वचनम् ।

82- कालमाधवे प्रतिपत्प्रकरणे (पृ-82) नारदीयपुराणवचने चतुर्थचरणे तिथिस्तु सा हि शुद्धा स्यात् इति धृतपाठः ।

0- पूर्णा स्कान्दे इति ख-पुस्तकेऽत्राधिकपाठः ।

00- तत्रारुणोदयमारभ्य प्रवृत्तेरिति भावः । इति ख-पुस्तकेऽत्र पाठोऽधिकः ।

000- हेमाद्रौ....इति भावः । इति भागः ख-पुस्तके नास्ति ।

0000- आदित्योदयवेलायामारभ्य इति ख-पुस्तके पाठः ।

00000- शुद्धा पूर्णा । इति ख-ग-पुस्तकद्वयेऽत्राधिकपाठः ।

आदित्योदयवेलामारभ्य प्रवृत्तेत्यनेन रव्युदयात् किञ्चित्क्षणानन्तरमुत्पन्ना न शुद्धेति सूचितम् । षष्टिनाडिकेति समभिप्रायकम् । तेन पूर्वत्र परत्र वा षष्ट्यधिका षष्टिन्यूनाऽपीति त्रिधा पूर्णपर्याया शुद्धेति रामनवम्यादौ वक्ष्यते । प्रथमोदयपदस्य रविरूपार्थान्यतरोदयार्थेन द्वितीयस्य रवेराईषदुदयोऽरुणोदय इत्यर्थेऽप्येतदन्यतरोत्थितापरारुणोदयस्पर्शिनी पूर्णेति निष्कर्षे वै तत्त्रैविध्य-लाभात् । अन्यत्रापि—

अकर्मण्यं तिथिमलं विद्यादेकादशीं विना ।[83]

रव्युदयात् षष्टिदण्डवत् षष्ट्यधिकाऽपि पूर्णा शुद्धा च[0] । षष्टिन्यूना तादृशी तिथिः खण्डा । एवं दिनद्वयवर्त्तिन्येकतिथिः षष्टिदण्डमिताऽधिकाऽपि खण्डा । पूर्णतिथौ विधिनिषेधयोर्नास्ति सन्देहः । खण्डतिथौ तु गार्ग्यः[84]—

निमित्तं कालमासाद्य वृत्तिर्विधिनिषेधयोः ।
विधिः पूज्यतिथौ तत्र निषेधः कालमात्रके ॥
तिथीनां पूज्यता नाम कर्मानुष्ठानयोग्यता ।
निषेधस्तु निवृत्त्यात्मा कालमात्रमपेक्षते ॥

भट्टमतेऽभावस्य कालविशेषरूपत्वादितिभावः[00] । पूज्यता यथा[85]—

त्रिसन्ध्यव्यापिनी या तु सैव पूज्या सदा तिथिः ।
न तत्र युग्मादरणमन्यत्र हरिवासरात् ॥
आसायं वर्त्तते या च सा तिथिः सर्वकर्मसु ॥

विधिः स्नानदानादिः, निषेधो निवृत्तिः ।

षष्ठीषु तैलं फलमष्टमीषु क्षौरक्रिया कृष्णचतुर्दशीषु—

83- पण्डितसर्वस्वे (पृ-57) धृतं सम्पूर्णवचनं यथा—
षष्टिदण्डात्मिकायाश्च तिथेर्निष्क्रमणं यदि ।
अकर्मण्यं तिथिमलं विद्यादेकादशीं विना ॥ इति ।

84- कालमासाद्य-स्थाने कालमादाय इति कालमाधवे (पृ-81) धृतम् ।

85- कालदीपे (पृ-4) तिथिस्वरूपप्रकरणे उद्धृतम् ।

0- तेन पूर्वत्र परत्र वा... शुद्धा च । इति भागः ख-ग-पुस्तकद्वये नास्ति ।

00- वाक्यमिदं ख-ग-पुस्तकद्वये नास्ति ।

इत्यादौ कृष्णेतिपाठे शुक्लचतुर्दश्यां न क्षौरनिषेधः। उभयपक्षे चतुर्दशीति-सुप्रकाशवाक्यग्रहे तु तत्र तद्विकल्प इति केचित्। विशेषवचने तु[0] षट्दण्ड-मितो निषेधः, यथा—

प्रतिपल्लेशमात्रेण कलामात्रेण चाष्टमी।
दिनं दूषयते सर्वं सुरा गव्यघटं यथा॥ इति।

एवमन्यत्र। कालादर्शे[86]—

योदयादेति मध्याह्नमखण्डा सा तिथिः स्मृता।
खण्डाऽन्यथा व्रतारम्भं समाप्तिं च विवर्जयेत्॥

खण्डतिथौ मरीचिः—

अखण्डव्यापिमार्त्तण्डा स्यात् सूर्योदयगा तिथिः।
सा ह्यखण्डा व्रतानां स्यात्तत्रारम्भसमापने॥
कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः।
तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणम्॥[87]

शिवरहस्ये[88]—

अभ्यङ्गे चोदधिस्नाने दन्तधावनमैथुने।
जाते च निधने चैव तत्कालव्यापिनी तिथिः॥

सत्यव्रतः[89]—

उदयस्था तिथिर्या हि न भवेद्दिनमध्यगा।
सा खण्डान व्रतानां स्यादारम्भश्च समापनम्॥
शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः।
कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः॥[90]

86- कालदर्श (पत्रम्-18) धृतम्।
87- कालदीपे तिथिस्वरूपप्रकरणे (पृ.पृ-4-5) उद्धृतम्।
88- कालसारे तिथिनिर्णये चैव स्थाने ग्राह्या इति।
89- कालसारे तत्रैवोद्धृतम्।
90- विष्णुधर्मोत्तरवचनमेतदिति एकादशीतत्त्वे (स्मृ०त० भागः-II-पृ-3)।

0- क्वचित् इति ख-ग-पुस्तकद्वयेऽत्राधिकपाठः।

यस्मिन्काले तु यत्कर्म तत्कालव्यापिनी तिथिः ।
आदित्योदयवेलायां याऽल्पाऽपीह[0] तिथिर्भवेत् ॥[91]
सा पूर्णेत्येव मन्तव्या प्रभूता नोदयं विना ।

मन्तव्येति सूर्योदयोत्थिततिथिप्रशंसामात्रमातिदेशिकम्, न तु वास्तवं पूर्णत्वम्। उदयादोदयादित्यधोवाक्यविरोधात् । वञ्जुली-पक्षवर्द्धिन्यादौ तद्दर्शनाच्च ।[00]

उदये सा तिथिर्ग्राह्या विपरीता तु पैतृके ।[92]

देवलः—

व्रतोपवासस्नानादौ घटिकैका यदा भवेत् ।
सा तिथिः सकला ज्ञेया श्राद्धादौ त्वस्तगामिनी[93] ॥[000]

अथ विद्धत्वविचारः

माधवीये[94]—

उदये पूर्वया तिथ्या विध्यते त्रिमुहूर्त्तकैः ।
सायं तूत्तरया तद्वन्न न्यूना वेधमर्हति ॥

पैठीनसिः[95]—

पक्षद्वयेऽपि तिथयस्तिथिं पूर्वां तथोत्तराम् ।
त्रिभिर्मुहूर्त्तैर्विध्यन्ति सामान्योऽयं विधिः स्मृतः ॥

91- कालदीपे तिथिस्वरूपप्रकरणे (पृ-5) उद्धृतम् ।

92- कालदीपे तत्रैवोद्धृतम् ।

93- कालदीपे तत्रैवोद्धृतम् ।

94- न्यूनया तु न विध्यते इति मुद्रितकालमाधवे उपोद्घातप्रकरणे (पृ-6) अस्य वचनस्य चतुर्थचरणे पाठः ।

95- कालमाधवे प्रतिपत्प्रकरणे (पृ-89) उद्धृतम् । पूर्वेद्युः सूर्योदयानन्तरममावास्या त्रिमुहूर्त्ता वर्त्तते चेत् सा प्रतिपदं विध्यति । तथैव परेद्युः सूर्यास्तमयात्प्राक् द्वितीया त्रिमुहूर्त्ता वर्त्तते चेत्तदा सा पूर्वां प्रतिपत्-तिथिं विध्यति इति भावः ।

0- स्वल्पाऽपीह इति ख-पुस्तके पाठान्तरम् ।

00- मन्तव्येति....दर्शनाच्च । इति भागः ख-ग-पुस्तकद्वये नास्ति ।

000- घटिका मुहूर्त्तम् । इति ख-ग-पुस्तकद्वयेऽत्राधिकपाठः ।

अह्नः पञ्चदशांशो रात्रेश्चैवं मुहूर्त्त इति संज्ञा । यथा त्रिमुहूर्त्तात्मिकामावास्यानन्तरं प्रतिपद् दर्शविद्धा । एवं[0] यस्यां प्रतिपदि अस्तमयात्प्राग्द्वितीया त्रिमुहूर्त्ता युज्यते सा प्रतिपद् द्वितीयाविद्धा । एवमन्यत्र । सामान्योऽयमित्युक्तेर्विशेषो यथा—उपाकर्मणि[96] षण्मुहूर्तवेधः, वैष्णवमते एकादश्यां चतुर्नाडिकारुणोदये दशमीकलाकाष्ठादिवेधः, जन्माष्टम्यां निशीथवेधः, रामनवम्यादौ पूर्वतिथिकलाकाष्ठादिसाहित्याद् वेधोऽपीत्यादि वक्ष्यते ।

तिथिविभागः[97]

माधवीये[98]—

प्रातः सङ्गवमध्याह्नापराह्णः सायमित्यसौ ।
अत्राह्नः पञ्चधा भागो मुख्यो द्वित्र्यादिभागतः ॥[99]

व्यासः[100]—

96- उपाकर्म वेदोपाकरणाख्यसाग्निककर्मविशेषः । स्वगृह्यशास्त्रानुसारेणेदं कर्त्तव्यम् । उपाकर्मकालोऽन्तरमालोचितः ।

97- तिथिशब्देनात्र दिवसस्य विभागो ग्रन्थकारेण प्रतिपाद्यते ।

98- कालमाधवे उपोद्घातप्रकरणे (पृ-6) माधवाचार्येणोक्तम् ।

99- द्विधा त्रेधा चतुर्धा पञ्चधा पञ्चदशधा चेत्यते मतभेदेन दिवसस्य विभागाः परिकल्पिताः सन्ति । एतेषु पञ्चधा-विभागस्य मुख्यत्वमङ्गीकृतम् ।

100- कालमाधवे प्रतिपत्प्रकरणे (पृ. पृ-86-87) उद्धृतम् । अन्ये पक्षा अपि तत्रालोचिताः । ते यथा—

द्विधा विभागः स्कन्दपुराणे दर्शितः—

आवर्त्तनात्तु पूर्वाह्णो ह्यपराह्णस्ततः परः । इति ।...............

त्रेधा विभागोऽपि स्कन्दपुराणे दर्शितः—

ऊर्ध्वं सूर्योदयात्प्रोक्तं मुहूर्त्तानां तु पञ्चकम् ।
पूर्वाह्णः प्रथमः प्रोक्तो मध्याह्नस्तु ततः परः ॥
अपराह्णस्ततः प्रोक्तो मुहूर्त्तानां तु पञ्चकम् ॥ इति ।..........

0- उदयावच्छिन्नायाम् इति ग-पुस्तकेऽत्राधिकपाठः ।

मुहूर्त्तत्रितयं प्रातस्तावानेव तु सङ्गवः ।

मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णस्तु तादृशः ।

सायाह्नस्त्रिमुहूर्त्तश्च सर्वकर्मसु गर्हितः ॥[0]

अयं पक्षो लक्ष्मीधरादिबहु[101] विद्वत्सम्मतत्त्वाद् द्वित्र्यादिविभागेभ्यो ज्याया-निन्त्युक्तम् । एवं

चतुर्धा विभागमाह गोभिलः—

पूर्वाह्णः प्रहरं सार्धं मध्याह्नः प्रहरं तथा ।

आतृतीयादपराह्णः सायाह्नश्च ततः परम् ॥ इति ।................

पञ्चदशधा विभागः शङ्खेन दर्शितः—

रौद्रश्चैत्रश्च मैत्रश्च तथा शालकटः स्मृतः ।
सावित्रश्च जयन्तश्च गान्धर्वः कुतपस्तथा ॥
रौहिणश्च विरिञ्चश्च विजयो नैर्ऋतस्तथा ।
महेन्द्रो वरुणश्चैव भेदाः पञ्चदश स्मृताः ॥ इति ।

101- कृत्यकल्पतरुकारो लक्ष्मीधरभट्टः । तेन विशालग्रन्थेऽस्मिन् नियत-कालकाण्डे दिवसविभागाः प्रदर्शिताः । माधवाचार्यः स्वीय-कालमाधवाख्य-ग्रन्थे प्रतिपत्प्रकरणे (पृ-88) प्रोक्तं पञ्चधा पक्षं स्वीकुर्वन् कथयति—पञ्चधाविभागपक्षस्य बहुश्रुतिस्मृतिषु दृष्टत्वात् प्रायेणैतमेवपक्षमाश्रित्य विधिनिषेधशास्त्राणि प्रवर्त्तन्ते । इति । तिथिनिर्णयकारो नागोजिभट्टश्चेत्थं प्रतिपादयति, यथा—अह्नश्च प्रातःसङ्गवमध्याह्नापराह्णसायाह्नात्मकः पञ्चधा विभाग एव ग्राह्यः । इति । विश्वनाथमिश्रश्च स्वकीये स्मृतिसारसङ्ग्रहाख्यग्रन्थे (पृ-12) पञ्चधा पञ्चदशधा चेतिविभागद्वयं स्वीकर्तुं कालादर्शवचनमुद्धरति । तद्यथा—

पञ्चधा पञ्चदशधा त्रेधा द्वेधा च वासराः ।

विभक्ता मुनयः प्राहुस्तत्राद्यौ मम सम्मतौ ॥ इति ।

तत्राद्याविति कथनेन पञ्चधा-विभागस्य मुख्यत्वम् । कालदीपकारो दिव्यसिंहः कालसारकारो गदाधरश्चापि पञ्चधा-विभागपक्षं स्वीकुरुतः ।

0- व्यासः....सर्वकर्मसु गर्हितः ॥ इति भागो नास्ति ख-ग-पुस्तकद्वये ।

वासरस्य तृतीयांशे नातिसन्ध्यासमीपतः ।[102]

इति[0] त्रिधा विभागोऽमाश्राद्धे वक्ष्यते ।

श्रुतिश्च[103]—

पूर्वाह्णो वै देवानां मध्यन्दिनो
मनुष्याणा[104]मपराह्णः पितॄणाम् । इति ।

दानव्रतकालः

पौर्वाह्णिकास्तु तिथयो दैवकार्ये फलप्रदाः ।

इति बृहद्याज्ञवल्क्यात् पञ्चधा विभक्तः सोदयत्रिमुहूर्त्तो दानव्रतादेः सामान्यकालः[105] । उपवासनक्तायाचितैकभक्तदानव्रतभेदाद्दैवं षड्विधम्[106] ।

102- अमाश्राद्धविचारे कात्यायनस्मृतौ सम्पूर्णवचनं यथा (16/1)—

पिण्डान्वाहार्यकं श्राद्धं क्षीणे राजनि शस्यते ।
वासरस्य तृतीयांशे नातिसन्ध्यासमीपतः ।। इति ।

अन्वाहार्यमुक्तमेव भगवता मनुना (3/123) यथा—

पितॄणां मासिकं श्राद्धमन्वाहार्यं विदुर्बुधाः ।
तच्चामिषेण कर्त्तव्यं प्रशस्तेन प्रयत्नतः ।। इति ।

पितॄणां मासिकतृप्तिजनकममावास्याश्राद्धम् अन्वाहार्यम् इति धर्मशास्त्रशब्द-कोषकारा अस्मद्गुरवः कुलमणिमिश्रपादाः ।

103- कालमाधवे प्रतिपत्प्रकरणे (पृ-86) उद्धृतम् ।

104- मनुष्याणामितिकथनेनातिथिसत्कारोद्देशेन भोजनदानमत्र विहितम् ।

105- सोदयत्रिमुहूर्त्तो दानव्रतादेः सामान्यकाल इति कथनेन विशेष-कालाः भिन्नाः परिकल्पिताः । सूर्योपरागयोगादिविशेषेषु दाने कालविशेषा यथा भिन्नाः परिलक्ष्यन्ते तथा विनायकव्रतशिवरात्र्यादिव्रतविशेषे मुख्य-कालमाधारीकृत्य कालविशेषे भिन्नता वर्त्तते ।

106- षड्विधदैवकार्यं प्रतिपाद्यते माधवाचार्येण कालमाधवे (पृ-6) यथा—

उपवासश्चैकभक्तं नक्तं चायाचितं व्रतम् ।
दानं च षड्विधं दैवं क्रमादत्र विविच्यते ।। इति ।

0- कात्यायनगिरा तत् इत्यत्र ख-पुस्तकेऽधिकपाठः ।

माधवीये[107]—

> सोदयत्रिमुहूर्त्तायां कुर्याद्दानं व्रतानि च ।
> उभयत्र तथात्वे तु पूर्वत्र तदनुष्ठितिः ॥
> परत्रैव तथात्वं चेत् पूर्वा ग्राह्या तिथिक्षये ।
> तिथेः साम्ये च वृद्धौ च गृह्यतां तिथिरुत्तरा ॥
> अस्पर्शे चैकदेशस्य व्याप्तौ पूर्वैव गृह्यताम् ।
> वृद्धि-साम्य-क्षया ग्राह्यतिथिगा नोर्ध्वगा इह ॥

अस्यार्थः—सोदयत्रिमुहूर्त्ता तिथिः षोढा । पूर्वेद्युरेव त्रिमुहूर्त्तव्यापिनी । परेद्युरेव त्रिमुहूर्त्तव्यापिनी । उभयेद्युस्तादृशी । नोभयत्र तथा । उभयत्रापि उदये साम्येन त्रिमुहूर्त्तव्यापिका । उभयेद्युर्वैषम्येण तादृशी चेति । यदा पूर्वेद्युः कृत्स्नं[0] सोदयत्रिमुहूर्त्तं व्याप्य परेद्युः स्वल्पा सोदयत्रिमुहूर्त्तकला-काष्ठा[108]दिव्याप्तिः यदा वा पूर्वेद्युः स्वल्पं सोदयत्रिमुहूर्त्तं व्याप्य परेद्युः कृत्स्ना सोदयत्रिमुहूर्त्तव्याप्तिरिति वैपरीत्यं तदेतत्पक्षद्वयं विषमव्याप्त्यन्त-र्गतम् । व्याप्तिर्हि स्पर्शमात्रम्, न तु कृत्स्नस्पर्श इति वक्ष्यते । प्रथमे पूर्वा[00] । तृतीयादिव्याप्तिचतुष्टयेऽस्तमयव्याप्तेः कर्मकालव्याप्तिबाहुल्याच्च पूर्वा ग्राह्या । द्वितीये ग्राह्यतिथेः क्षीयमाणत्वे पूर्वा ग्राह्या, वृद्धिमत्त्वे तु परेति । दानं स्वर्णपद्मादिकम् । व्रतं मण्डलव्रतादिकम् । गुरुपञ्चम्यादिकमपि व्रतमेव । तीर्थस्नानजपहोमादिवत्तस्यापि व्रतान्तर्भावात् । तेन सोदयत्रिमुहूर्त्तायां ।

> मुहूर्त्तद्वितयं ग्राह्यं भगवत्युदिते रवौ ।

107- मुद्रितकालमाधवे (पृ. पृ-8-9) पूर्वत्र-स्थाने पूर्वेद्युः इति पाठः ।

108- कलाकाष्ठादीनां परिमाणमुक्तं मनुना, यथा (1/64)—

> निमेषा दश चाष्टौ च काष्ठा त्रिंशत्तु ताः कला ।
> त्रिंशत्कला मुहूर्त्तः स्यादहोरात्र तु तावतः ॥ इति ।

0- ख-ग-पुस्तकद्वये कृत्स्नं-पदं नास्ति ।

00- पूर्वा-स्थाने त्वसन्देहः-इति ख-पुस्तके पाठः ।

इति बृहन्नारदीया[109]न्मुहूर्त्तद्वयस्याप्यनुकल्पत्वात् सोदयद्विमुहूर्त्तायां वा पञ्चम्यां गुरुवारयोगस्तु दैवगुरुपञ्चमीव्रतम् । सोदयत्रिमुहूर्त्तायां द्व्याधिक्ये तु सुतराम् । तेन सोदयद्विमुहूर्त्तन्यूनायामुदयकलानाडिकामुहूर्त्ताद्युत्तर-पञ्चम्यां वा गुरुवारयोगे तत्कृतिरन्याय्या ।

पञ्चमी चेद् गुरोर्वारे तदा स्याद् गुरुपञ्चमी ।[110]

इत्यनेन विशिष्य कालानभिधानात् । इदञ्च व्रतं शुक्लकृष्णपक्षसमानमिति प्राञ्चः । अर्वाञ्चस्तु

पक्षे सिते यदा राजन् ! पञ्चम्यां गुरुवासरे ।

इति कथाप्रस्तावात् शुक्लपक्षमात्रे तमाहुः । एवं गुरुशुक्लदशम्यां सुदशाव्रत-मुन्नेयम् । सुदशायाः परदिने व्रतयोग्यैकादशीपाते तत्क्रियाचारो नान्यदेति शिष्टपरम्परा । एवमन्यत् । नक्षत्रे तु भेदः ।

उदये त्रिमुहूर्त्तस्थं नक्षत्रं व्रतदानयोः ।
दिनद्वये तथात्वे तु पूर्वं स्याद् बलवत्तरम् ।[111]

इदञ्च राज्ञां पुष्पनीराजनादा[0]वुपयोक्ष्यते ।

109- बृहन्नारदीयपुराणे व्रतकालनिर्णये (27/8-9) सुतवचनं यथा—

व्रतादीनां च सर्वेषां शुक्लपक्षो विशिष्यते ।
अपराह्णाच्च पूर्वाह्णं ग्राह्यं श्रेष्ठतरं विदुः ॥
असम्भवे व्रतादीनां यदि पूर्वाह्णिका तिथिः ।
मुहूर्त्तद्वितयं ग्राह्यं भगवत्युदिते रवौ ॥ इति ।

110- पण्डितसर्वस्वे (पृ.पृ-74-75) गुरुपञ्चमी-व्रतमालोच्यते, यथा—

पञ्चमी गुरुवारेण यदा भवति संयुता ।

इतिवचनात् गुरुपञ्चमीयोगे व्रतम् । दैवे मुख्यः शुक्लपक्ष इति शुक्लपक्षेऽ-नुष्ठीयते । अत्रोदये तिथिवारसंयोगो निर्णायकः । तेन चतुर्थीशेषविशिष्टे वारे न व्रतम् , आदित्योदयवेलायामित्यादिवचनात् । तिथिमलत्वेनोदयस-म्बन्धेऽपि न व्रतम् , अस्याकर्मणत्वात् । इति ।

111- पूर्वं स्याद् बलवत्तरः इति कालमाधवे उपोद्घातप्रकरणे (पृ-17) माधववचनम् । सम्पूर्णाहोरात्रव्यापित्वात्पूर्वदिनं बलवत्तरं बोध्यम् ।

0- पुष्यपूर्णिमानिराजनादौ इति ख ग-पुस्तकद्वये पाठान्तरम् ।

जन्मतिथिकृत्यम्

ब्राह्मे गर्गश्च[112]—

सर्वैश्च जन्मदिवसे स्नातैर्मङ्गलपाणिभिः ।
गुरुविप्राग्निदेवाश्च पूजनीयाः प्रयत्नतः ॥[113]
स्वनक्षत्रं च पितरौ तथा देवः प्रजापतिः ।
प्रतिसंवत्सरं चैव कर्त्तव्यश्च महोत्सवः ॥

प्रतिसंवत्सरमिति नित्यताव्यञ्जकम्[114] । वर्षश्चात्र चान्द्रः[0] । सौरादिवर्षे जन्मर्क्षापतने तल्लोपापत्तेः । मलमासे त्वस्याभावः[115] । वर्ज्यप्रकरणे[00]

112- तिथितत्त्वे (स्मृतितत्त्वम्-I-पृ पृ-20-21) उद्धृतम् ।

113- गुरुप्रभृतीनां हितैषिणां पूजाऽभावे कुफलम् । तदुक्तं तिथितत्त्वे (स्मृ० त०-I-पृ-22) मत्स्यपुराणे—

न पूज्यते गुरुर्यत्र नरैस्तत्राफला क्रिया । इति ।

एतादृशे वृद्धिकर्मणि षोडश देवताः पूज्याः भवन्ति, यथोक्तं कात्यायनेन (1/11-13)—

गौरी पद्मा शची मेधा सावित्री विजया जया ।
देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥
धृतिः पुष्टिस्तथा तुष्टिरात्मदेवतया सह ।
गणेशेनाधिका ह्येता वृद्धौ पूज्याश्च षोडश ॥
कर्मादिषु च सर्वेषु मातरः सगणाधिपाः ।
पूजनीयाः प्रयत्नेन पूजिताः पूजयन्ति ताः ॥ इति ।

114- नित्यत्वव्यञ्जकाश्चाष्टौ भवन्ति । ते यथा—

नित्यं सदा यावदायुर्वीप्सा योगः फलाश्रुतिः ।
प्रत्यवायोऽनुकल्पश्चेत्यष्टौ नित्यत्वबोधकाः ॥ इति ।

यस्य कर्मणः करणे फलाभावः अकरणे प्रत्यवायः असामर्थ्ये चानुकल्पविधानं तन्नित्यम् इति कालदीपतेजनीकाराः (पृ-43) ।

115- मलमासे जन्मतिथिपालनाभावं सूचयति स्मृतितत्त्वकारो रघुनन्दनः । तद्यथा तिथितत्त्वे (स्मृ० त०-I, पृ-20)—तच्च मलमासे न

0- न तु सौरः इति ख-ग-पुस्तकद्वयेऽत्राधिकपाठः ।

00- चूडाकर्मव्रतानि चेति ग-पुस्तकेऽत्र पाठोऽधिकः ।

वृतपदेन महोत्सवपदेन वाऽस्य क्रोडीकारात् ।

वर्षवृद्ध्यभिषेकादि कर्त्तव्यमधिके न तु ।[116]

इतिवचनाच्च । तेन मलमासजातानां कालान्तरे तन्मलमासपाते तु न तन्मल इत्यजन्मदिने तत्कृत्यम्, किन्तु तदुत्तरशुद्धमासतद्दिनवर्ष[0] एव[117] । वर्षस्यापि क्वचित्त्रयोदशमासत्वाभ्युपगमात् ।[00] वार्षिकश्राद्धस्य वचनात् तत्र करणेऽप्यत्र तदभावः । न च प्रथमद्वितीयादिवर्षवृद्धेर्मले कृतिनिरासक-मिदमिति वाच्यम् । अप्राप्तत्वेन निषेधशङ्कादिलाभात् । वर्षस्यापि त्रयदश-मासत्वेन शुद्धे तिथ्यृक्षपाताच्च मले प्रसक्त्यभावात् । अन्यथा प्रथमाब्दश्राद्धा-नामपि मले कृत्यापत्तिः । मुख्ये पूर्वतिथौ प्राप्तस्य भ्रमादिना त्वकृतौ तु तिथ्यृक्षशेषयुक्ते तदुत्तरदिने जन्मतिथिकृत्यम्[118] ।

कर्त्तव्यं चान्द्रमासीयत्वेन सावकाशत्वात् । न च तस्य सौरमासीयत्वं तथात्वे तन्मासे तत्तिथेः कदाचिदप्राप्तौ तद्वर्षे तत्कृत्यलोपापत्तेः । इति ।

116- कालमाधवे वत्सरप्रकरणे (पृ-71) मलमासवर्ज्यावर्ज्यविवेके सम्पूर्णं कौथुमिवचनं यथा—

अधिमासे न कर्त्तव्ये श्राद्धे संवत्सराब्दिके ।
वर्षवृद्ध्यभिषेकादि कर्त्तव्यमधिके न तु ।।
अधिमासे न कर्त्तव्यं श्राद्धमाभ्युदयं तथा ।
तथैव काम्यं यत्कर्म वत्सरात्प्रथमादृते ।।
सपिण्डीकरणादूर्ध्वं यत्किञ्चिच्छ्राद्धिकं द्विजैः ।
इष्टं वाप्यथवा पूर्त्तं तन्न कुर्यान्मलिम्लुचे ।। इति ।

117- वर्षवृद्ध्यभिषेकादीनां शुद्धमासे कार्यत्वं सूचयति माधवाचार्यः हारीतवचनानुरोधेन कालमाधवे वत्सरप्रकरणे (पृ-72)—

उपाकर्म तथोत्सर्गं काम्यमुत्सवमष्टकाः ।
मासवृद्धौ पराः कार्या वर्जयित्वा तु पैतृकम् ।। इति ।

अत्र तद्दिनर्क्षे इति ग-पुस्तकपाठः समीचीनः ।

118- कृत्यकौमुदीकारो बृहस्पतिर्जन्मदिवसेऽशौचपाते विस्मृतौ वाऽन्यदिने

0- तद्दिनर्क्षे इति ग-पुस्तके पाठः ।

00- वर्षवृद्धीत्युक्तवाक्यस्य सङ्कोचे मानाभावात् । इति ख-पाठोऽत्राधिकः ।

मुख्यतिथ्यन्तराये तु तिथिशेषोऽपि गृह्यताम् ।

इति माधवीये[119] तिथेः तृ.क्षोपलक्षणत्वात् । तत्रापि विघ्ने तु द्विजे शक्त्या देयमिष्टं सुरे च[0], इति मन्तव्यम् । स्नातैस्तिलस्नातैः ।

तिलस्नायी तिलोद्वर्त्ती तिलहोमी तिलप्रदः ।
तिलभोक्ता च दाता च षट्तिली नावसीदति ॥[120]

इति जन्मतिथ्यधिकारे वचनात् । मङ्गलपाणिभिर्मङ्गलार्थकगुग्गुल्वादिकरैः । तदुक्तं कृत्यचिन्तामणौ[121]—

घृतदुग्धतिलान् दद्याज्जन्मग्रन्थेश्च बन्धनम् ।
गुग्गुलुं निम्बसिद्धार्थं दूर्वागोरोचनायुतम् ॥

तत्कृत्यं मनुते, यथोक्तं तेन तत्र वर्षवृद्धिप्रकरणे (पृ-58)—

प्रत्यब्दं जन्मदिवसे वर्षवृद्ध्यभिषेचनम् ।
वर्द्धयित्वाऽथवा कुर्य्याज्जन्ममासे शभे दिने ॥

वर्द्धयित्वेत्येतत्सूतिकाद्यशौचपाते विस्मृतौ च मन्तव्यम् । इति ।

119- कालमाधवे (पृ-7) सम्पूर्णं माधववचनं यथा—

मुख्यतिथ्यन्तराये तु तिथिशेषोऽपि गृह्यताम् ।
शुद्धाधिका तु कृष्णाऽपि पूर्वा सम्पूर्त्तिसम्भवात् ॥ इति ।

अत्र पूर्वविद्धैव तिथिमुख्याऽवधार्यते । पूर्वविद्धायामन्तराये विघ्ने विहितकर्माकरणे तिथिशेषे उत्तरविद्धायामपि तत्करणमिति बोधव्यम् ।

120- षट्तिलाचारात्पापक्षयो भवति । षट्तिलाचारे तिलमिश्रितस्नानस्यान्तर्भावो वर्त्तते । कालदीपे भीमद्वादशीप्रकरणे तिलप्रद-स्थाने तिलोदकीतिपाठः, तिलस्य दाता भोक्ता च इति तृतीयचरणे च पाठः ।

121- घृत-स्थाने गुड, महाबाहो-स्थाने महाभाग, कल्पान्तजीवित-स्थाने कल्पान्तजीवन, आयुरारोग्यमैश्वर्य-स्थाने आयुरिष्टार्थसिद्ध्यर्थं चेति तिथितत्त्वे (पृ-21) उद्धृतम् । सिद्धार्थः श्वेतसर्षपः । दक्षिणपाणौ जन्मग्रन्थिबन्धनं सूच्यते रघुनन्दनेन स्वकृततिथितत्त्वे (पृ-23), यथा—

जन्मग्रन्थिं दक्षिणपाणौ बध्नीयात् । इति ।

---

0 न च प्रथमद्वितीयादि....सुरे च । इति भागः ख-ग-पुस्तकद्वये नास्ति ।

सम्पूज्य भानुविघ्नेशौ महर्षिं प्रार्थयेदिदम् ।
चिरञ्जीवी यथाऽहं भो ! भविष्यामि तथा मुने ॥
रूपवान् वित्तवांश्चैव श्रिया जुष्टश्च सर्वदा ॥
मार्कण्डेय ! महाबाहो ! सप्तकल्पान्तजीवित !
आयुरारोग्यमैश्वर्यमस्माकं वरदो भव ॥

आरोग्यादिलिङ्गात्काम्यमपीदम्[122] । परार्थपूजायामस्माकमितिस्थाने एषां तेषामिति वा पदस्योहः । एवमहं भो इत्यत्रापि भविष्यतीति च । एवम्

देहि मे गणनायक ![123]

इत्यादिवदन्यत्र बोध्यम्[0] । अत्र विशेषादर्शनाद्दैवकार्येषु सामान्योक्तः पूर्वाह्णः कालः ।

द्वैधे निर्णयः

इदं जन्मतिथिकृत्यं जन्मर्क्षकृत्यं चेति समाचाराद्विकल्पः ।

जन्ममासस्य जन्माहे जन्मतारेन्दुसंयुते ।
तदलाभादृक्षमात्रे कुर्याद्वर्षविवर्द्धनम् ॥[124]

122- फलश्रवणाज्जन्मतिथिकृत्यस्यात्र काम्यत्वं सिद्धम् । महर्षिप्रार्थनानन्तरं चराचरभूतानामपि प्रार्थना कर्त्तव्या । तत्प्रमाणं यथा तिथितत्त्वे (स्मृ० त०-I-पृ-23) मत्स्यपुराणे—

त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च ।
ब्रह्मविष्णुशिवैः सार्धं रक्षां कुर्वन्तु तानि मे ॥ इति ।

123- वर्षवृद्धिकृत्ये सर्वफलप्राप्त्यर्थं गणपतिचरणेषु पुष्पाञ्जलिप्रदानावसरे उच्चार्यमन्त्रविशेषो यथा कृत्यकौमुद्याम् (पृ-67)—

आयुर्देहि यशो देहि श्रियं देहि त्वमेव च ।
पुत्रं पौत्रं प्रपौत्रञ्च देहि मे गणनायक ॥ इति ।

124- कृत्यकौमुद्यां वर्षवृद्धिप्रकरणे उद्धृतम् । वर्षवृद्ध्यकरणे क्षीणायुस्तत्र प्राप्यते ।

0- परार्थपूजायाम्....बोध्यम् । इति भागः ख-पुस्तके नास्ति ।

अभिषेकदिने राज्ञोऽन्येषामृक्षे दिनेऽथवा ।
वर्षवृद्धिः प्रकर्त्तव्या क्षीणायुस्त्वन्यथा भवेत् ॥

इतिवचनात् ।

सौरारयोर्दिने मुक्ता देयाऽनृक्षे तु काञ्चनम् ।[125]

इति लिङ्गाच्च ।

अभिषेकदिने राज्ञो वर्षवृद्धिः प्रशस्यते ।[126]

इति वाक्यान्तरे विधीयत इति हित्वा प्रशस्यत इति स्वरसाद्राज्ञामपि क्वचिज्जन्मर्क्षे तदाचारः[127] ।

क्षीणे राजनि शस्यते ।[128]

125- विषयेऽस्मिन् शुद्धिदीपिकायां (3/30-31) सम्पूर्णवचनं यथा—

सौरारयोर्दिने मुक्ता देयाऽनृक्षे तु काञ्चनम् ।
जन्मन्यृक्षे यदि स्यातां वारौ भौमशनैश्चरौ ॥
मासः स कल्मषो नाम मनोदुःखप्रदायकः ।
तस्य सर्वौषधिस्नानं ग्रहविप्रसुरार्च्चनम् ॥ इति ।

शान्तिविधानार्थमेषा व्यवस्थोक्ता । जन्मदिने निर्दिष्टवारद्वयपाते संवत्सरे विघ्नसम्भवश्चोक्तः शुद्धिदीपिकायाम (3/29)—

कृतान्तकुजयोर्वारे यस्य जन्मदिनं भवेत् ।
अनृक्षयोगसम्प्राप्तौ विघ्नस्तस्य दिने दिने ॥ इति ।

126- कृत्यकौमुद्यां वर्षवृद्धिकृत्ये (पृ-58) उद्धृतं सम्पूर्णवचनं यथा—

अभिषेकदिने राज्ञो वर्षवृद्धिः प्रशस्यते ।
अन्येषां जन्मनक्षत्रे क्षीणायुस्त्वन्यथा भवेत् ॥ इति ।

127- जन्मनक्षत्रेऽपि राज्ञो वर्षवृद्धिकृत्यमनुष्ठितं स्यादिति सूच्यते ग्रन्थकारेण । तत्राभिषेकदिने विधीयते-प्रशस्यत इति पदद्वयव्यवहारेण विधिवाक्यार्थवादवाक्ययोर्ग्रहणं भवति । उभयोरेकवाक्यतां विनाऽत्र वर्षवृद्ध्यनुष्ठानं कर्त्तुं न युज्यते । वाक्यद्वयस्यैकवाक्यता साधु प्रतिपादिता मीमांसापरिभाषाकारेण कृष्णयज्वना । तद्यथा वेदद्वैविध्यप्रकरणे—विधायकं वाक्यं ब्राह्मणम् । तच्छेषोऽर्थवादः । तस्य विधेयप्राशस्त्यप्रतीतिजननद्वारा विधिवाक्यैकवाक्यतया प्रामाण्यमिति वक्ष्यते । इति ।

128- द्रष्टव्या पादटिप्पणी-102 ।

इतिवत्[0] । तिथ्यृक्षयोर्यदुत्तरगामि तत्रैव वर्षवृद्धिरिति कौमुदीकारः[129] । दिनद्वये तिथे ऋक्षस्य वा सत्त्वे तु ब्राह्मे—

युगाद्या वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया ।
रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता ॥[130]

उदयस्त्रिमुहूर्त्तः[00] । शुद्धाधिकायां पूर्वतिथेः सङ्कल्पास्तमयव्यापित्वात् पूर्वा । केवलर्क्षेऽप्येवम् ।

यस्मिन्नुदेति सविता तन्नक्षत्रं दिनं भवेत् ।

इति बौधायनेनो[131]दयावच्छिन्नक्षग्रहात् । सर्क्षतिथौ भेदः । पूर्वेद्युरुदयानन्तरं प्रवृत्ता तिथिः सर्क्षा चेत्तर्हि सैव ग्राह्या । नोदयावच्छिन्नाऽप्यनृक्षोत्तरा ।

अस्तद्वये जन्मतिथिर्यदा स्यात्
पूज्या तदा जन्मभसंयुता च ।
असङ्गताभेन दिनद्वये तु
पूज्या परा या भवतीह यत्नात् ॥[132]

इतिवचनाद् दिनद्वयेऽस्तद्वय इत्यनुषज्यते । अन्यथा शुद्धाधिकायामतिप्रसङ्गः ।

129- प्रसङ्गेऽस्मिन् कृत्यकौमुदीकारस्य बृहस्पतेर्विचारो यथा (पृ-58)—
जन्ममासस्य जन्माहे....कुर्याद् वर्षविवर्द्धनम् ॥ जन्मदिनाज्जन्मदिननक्षत्रस्य वृद्धावेवेदं बोद्धव्यम् । नक्षत्राज्जन्मदिनस्योत्तरगामित्वे तु जन्मदिन एव । इति ।

130- तिथितत्त्वे (स्मृ० त०-I-पृ-25) देवीपुराणवचनमेतत् ।

131- तिथितत्त्वे (पृ-25) सम्पूर्णवचनं यथा—

तन्नक्षत्रमहोरात्रं यस्मिन्नस्तं गतो रविः ।
यस्मिन्नुदेति सविता तन्नक्षत्रं दिनं स्मृतम् ॥ इति ।

132- अस्त-स्थाने घस्र, यदा-स्थाने यदि, युता च-स्थाने युतैव, द्वये तु-स्थाने द्वयेऽपि इति पाठान्तरेण तिथितत्त्वे (पृ-25) देवीपुराणवचनम् ।

0- अभिषेकदिने....इतिवत् । इति भागः ख-ग-पुस्तकद्वये नास्ति ।

00- शिष्टव्याख्यानात् इति ग-पुस्तकेऽत्राधिकपाठः ।

अप्यर्थक-तु-शब्दाद्दिनद्वयत्र्यक्षयोगेऽपि परा। युगाद्या वर्षवृद्धिश्चेत्युक्ताच्च[0]। विस्मरणे तु तदुत्तरमासे तदृक्षदिने कार्यमित्येके। अन्ये तु तत्प्रतिनिधिभूतं गुरुविप्रदेवार्च्चनादिकमाहुः। सूतकाद्यशौचे त्वसगोत्रेण मोदकशर्करादिना पूजनम्। पित्रोर्मृतवत्सरे तल्लोपः।

माङ्गल्यमुत्सवञ्चैव परपाके च भोजनम्।
प्रथमेऽब्दे न कुर्वीत योजनेऽपि कृते सति ॥[133]

इतिवचनात्। केचित्तु[134]

प्रत्यब्दं जन्मदिवसे वर्षवृद्ध्यभिषेचनम्।
वर्द्धयित्वाऽथवा कुर्याज्जन्ममासे शुभे दिने ॥

इतिवाक्ये वर्द्धयित्वेत्यस्य सूतकाशौचविस्मरणाद्यर्थकत्वात् सूतकाद्यशौचानन्तरं तत्क्रियामाहुः। वर्ज्यं यथा स्कान्दे[135]—

133- विषयेऽस्मिन्स्मृतिसारसङ्ग्रहे (पृ-140) सम्पूर्णं लौगाक्षिवचनं यथा—
माङ्गल्यमुत्सवं कार्यं परपाके च भोजनम्।
दीपदानं गयाश्राद्धं श्राद्धं चापरपक्षिकम्।
प्रथमेऽब्दे न कुर्वीत योजनेऽपि कृते सति ॥ इति।
योजनं सपिण्डीकरणम्।

134- कृत्यकौमुदीकारोऽत्रेत्थं विवेचयति। तद्यथा (पृ-58)—
दृश्यते दिवसमात्रके वर्षवृद्धिविधायकम्। तथा प्रत्यब्दं....शुभे दिने ॥
वर्द्धयित्वेत्येतत्सूतिकाद्यशौचपाते विस्मृतौ च मन्तव्यम्। इति।

135- तिथितत्त्वे (स्मृ० त०-I-पृ-22) उद्धृतम्। न केवलं जन्मदिने अपि च जन्ममासे क्षौराध्वगमनयोर्निषेध उक्तः कृत्यकौमुद्यां (पृ 60) वाराहे, यथा—

जन्मदिनात् समारभ्य यावत्त्रिंशद्दिनानि तु।
जन्ममासः स विज्ञेयः क्षौराध्वानं च वर्जयेत् ॥ इति।

मैथुनमत्राष्टाङ्गमैथुनं बोधयति। तद्यथा दक्षस्मृतौ (7/31-32)—
ब्रह्मचर्यं सदा रक्षेदष्टधा रक्षणं पृथक्।

0- ख-पुस्तके वाक्यमिदं नास्ति।

खण्डनं नखकेशानां मैथुनाध्वानमेव च ।
आमिषं कलहं हिंसां वर्षवृद्धौ विवर्जयेत् ॥

अध्वानं मार्गगमनम्[0] , तच्च क्रोशाधिकमेव त्याज्यम् ।

अध्वगमनमाक्रोशम् ।

इति हारीतात्[136] । अस्य श्राद्धस्थलीयत्वेऽपि नाम्ना तदतिदेशः कौण्डपायिनामयने उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोतीत्यादौ नित्याग्निहोत्राति-

---

स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम् ॥
सङ्कल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च ।
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः ॥ इति ।

आमिषं न केवलं प्राण्यङ्गमपि च

आमिषं दृतिपानीयं गोवर्जं क्षीरमामिषम् ।
मसूरमामिषं सस्ये फले जम्बीरमामिषम् ॥
आमिषं शुक्तिकाचूर्णमारनालं तथामिषम् ॥

इति धर्मशास्त्रशब्दकोषधृतस्मृत्यन्तरोक्तं ज्ञेयम् । आरनालं काञ्जी इति उत्कलभाषाप्रसिद्धम् । जन्मदिवसे मैथुनादीनां त्यागे फलं प्रतिपादितं तिथितत्त्वे (स्मृ० त० I-पृ-22) ज्योतिषे, यथा—

स्नात्वा जन्मदिने स्त्रियं परिहरन् प्राप्नोत्यभीष्टां श्रियं
मत्स्यान्मोचयतो द्विजाय ददतोऽप्यायुश्चिरं वर्द्धते ।
शक्तून् खादति यस्तु तस्य रिपवो नाशं प्रयान्ति ध्रुवं
भुङ्क्ते यस्तु निरामिषं स हि भवेज्जन्मान्तरे पण्डितः ॥ इति ।

136- श्राद्धसम्पादनात्परं तदहोरात्रवर्ज्यानि रघुनन्दनेन तिथितत्त्वे (स्मृ० त०-I, पृ पृ-184-185) आलोचितानि । तद्यथा—

शातातपः—

श्राद्धं कृत्वा परश्राद्धे भुञ्जते ये च जिह्वलाः ।
पतन्ति नरके घोरे लुप्तपिण्डोदकक्रियाः ॥

जिह्वला लोलुपाः । विष्णुपुराणम्—

वर्ज्यानि कुर्वता श्राद्धं कोपोऽध्वगमनं त्वरा
भोक्तुरन्यत्र राजेन्द्र ! त्रयमेतन्न शस्यते ॥

0- अध्वगमनम् इत्यत्र ग-पुस्तके पाठान्तरम् ।

देशवत्[137] । अन्यथा तन्मानं दुर्वचम् । विवादार्थक-कलहस्थाने[138]

राजमार्त्तण्डे—

पुनर्भोजनमध्वानं द्यूताध्ययनमैथुनम् ।
दानं प्रतिग्रहं सन्ध्यां श्राद्धं कृत्वाऽष्ट वर्जयेत् ॥

नव्यवर्द्धमानधृता स्मृतिः—

पुनर्भोजनमध्वानं द्यूताध्ययनमैथुनम् ।
दानं सन्ध्यां पुनः स्नानं श्राद्धं कृत्वाऽष्ट वर्जयेत् ॥

अध्वानमध्वगमनं क्रोशात्परं न कार्यम् ।

अध्वगमनमाक्रोशपूरणम् ।

इति हारीतवचनात् । मैथुनं ऋतुकालीनमपि । तथा च श्राद्धानन्तरं शङ्खलिखितौ—

ऋतुस्नातां तदहोरात्रं परिहरेत् ।

इति । दानं याचितान्नाद्यतिरिक्तपरम् , वन्दिभ्यश्चेति प्रागुक्तत्वात् । इति । अध्वगमनादीनामाचरणेन कुफलमुक्तं लिखितस्मृतौ । तद्यथा (श्लो०-56-59)—

श्राद्धं कृत्वा परश्राद्धे यस्तु भुञ्जीत विह्वलः ।
पतन्ति पितरस्तस्य लुप्तपिण्डोदकक्रियाः ॥
श्राद्ध दत्त्वा च भुक्त्वा च अध्वानं योऽधिगच्छति ।
भवन्ति पितरस्तस्य तन्मासं पांसुभोजनाः ॥
पुनर्भोजनमध्वानं भाराध्ययनमैथुनम् ।
दानं प्रतिग्रहं होम श्राद्धं कृत्वाऽष्ट वर्जयेत् ॥
अध्वगामी भवेदश्वः पुनर्भोक्ता च वायसः ।
कर्मकृज्जायते दासः स्त्रीगमेन च सूकरः ॥ इति ।

अध्वगमनादीनां त्यागोऽपि याज्ञवल्क्यमिताक्षरायां पार्वणश्राद्धप्रकरणे (1/249) विज्ञानेश्वरेणोक्तः ।

137-अन्यधर्मस्यान्यत्रारोपोऽतिदेशः कथ्यते । तदुक्तं मीमांसादर्शनभाष्ये (7/1/12) शबरस्वामिना यथा—

अतिदेशो नाम ये परत्र विहिता धर्मास्तमतीत्यान्यत्र तेषां देशः । यथा देवदत्तस्य भोजनविधिं कृत्वा 'शालिसूपमांसापूपैर्देवदत्तो भोजयितव्य' इति, तमेव विधिं यज्ञदत्तेऽतिदिशति 'देवदत्तवद् यज्ञदत्तो भोजयितव्यः' इति । श्लोकमप्युदाहरन्ति—

प्रकृतात्कर्मणो यस्मात्तत्समानेषु कर्मसु ।

धर्मप्रवेशो येन स्यात् सोऽतिदेश इति स्थितिः ॥ इति ।

स च नाम्ना वचनेन वा । तत्र नाम त्रिविधमातिदेशिकं, कर्मनाम, संस्कार-नाम, यौगिकमिति । वचनं पुनर्द्विविधं, प्रत्यक्षश्रुतमानुमानिकं च । इति ।

सोऽयं नाम्नातिदेशविषयो भगवता जैमिनिना मीमांसादर्शने (12/1/13) कौण्डपायिनामयने प्राजहितेऽग्नौ मासाग्निहोत्रश्रपणानुष्ठानाधिकरणे प्रतिपादितः । तद्यथा—श्रपणं चाग्निहोत्रस्य शालामुखीये न स्यात् प्राजहितस्य विद्यमानत्वात् । इति अत्र स्पष्टीकृतं भाष्यकारेण यथा—कौण्डपायिनामयनेऽग्निहोत्रे चिन्त्यते । किं तदीयस्य द्रव्यस्य शालामुखीये श्रपणमथवा प्राजहित इति । प्राजहित इति गार्हपत्यस्य पूर्वाचार्यसंज्ञा । अत्रापि स एव न्यायः । गार्हपत्ये श्रपण श्रुतम् । स एव प्रयुक्तो विद्यते । अप्रयुक्ते च प्रसङ्गः स्यादिति । भूयांश्चात्र परिहारः । चोदकेन शालामुखीयः प्राप्यते । ज्योतिष्टोमे हि तस्य गार्हपत्यत्वं श्रुतम् । तच्च चोदकपरम्परया कौण्डपायिनामयनमागतम् । नामधेयेन तु प्राजहिते श्रपणं प्राप्यते । चोदकाच्च नामधेयशब्दो बलवत्तरः । तस्मात् तत्र श्रपणं कर्त्तव्यम् । इति । जैमिनीयन्यायमालायां (12/1/6) माधवाचार्योऽप्याह यथा—

शालामुखीयवह्नौ किं श्रप्यतां कौण्डपायिने ।

किं वा प्राजहिते वह्नौ चोदकप्राप्तितोऽग्रिमः ॥

प्राग्वंशे पश्चिमो वह्निर्भवेत्प्राजहितोऽत्र सः ।

अग्निहोत्रेति नाम्नाऽसौ नामाप्तो लिङ्गतो बली ॥ इति ।

तत्र विस्तरव्याख्याने माधवाचार्येण सिद्धान्तः प्रतिपादितो यथा—प्राचीनवंशे पश्चिमवह्निः पूर्वप्रसिद्धमुख्यगार्हपत्यस्य प्राजहित इति पूर्वाचार्यसंज्ञा । स च प्राजहितोऽग्निहोत्रनात्माऽत्रातिदिश्यते । नामातिदेशश्च शीघ्रबुद्धिहेतुतया लिङ्गातिदेशात् प्रबलः । तच्च लिङ्गं परम्परातिदेशात् प्रबलम् इति वक्तव्यम् । तस्मात् प्राजहिते श्रपणम् । इति । अत्र क्रोशाधिकपरिमिताध्वगमननिषेधस्य श्राद्धस्थलीयत्वेऽपि नाम्मातिदेशेन उपकारप्रसङ्गे वर्षवृद्धिकृत्ये पालनं प्रशस्तम् ।

138- विवादकलहयोः स्वतन्त्रार्थत्वं प्रतिपाद्यते मन्वर्थमुक्तावलीकारेण, यथा (मनु० 4/121)—

विवादे वाक्कलहे, कलहे दण्डादण्ड्यादौ । इति ।

युद्धार्थकसङ्गरमिति क्वचित्पाठः । क्षौरामिषादिनिषेधस्य पुरुपार्थत्वाद् वर्ष-वृद्ध्यकरणेऽपि तत्कार्यम् । वृद्धमनुः[139]—

मृते जन्मनि संक्रान्तौ श्राद्धे जन्मदिने तथा ।
अस्पृश्यस्पर्शने चैव न स्नायादुष्णवारिणा ॥

जन्मनि पुत्रजन्मनि । दीपिकायाम्[140]—

तस्य सर्वौषधिस्नानं गुरुविप्रसुरार्च्चनम् ।
सौरारयोर्दिने मुक्ता देयाऽनृक्षे तु काञ्चनम् ॥
सुरामांसीवचाकुष्ठं शैलेयं रजनीद्वयम् ।
शटीचम्पकमुस्तञ्च सर्वौषधिगणः स्मृतः ॥

सौरारदिने मङ्गलशनिवारौ । रजनीद्वयं हरिद्रा दारुहरिद्रा च । एषां पत्राणि मूलानि कुसुमानि च ।

एवमादीनि गन्धानि कषायाख्यो गणः स्मृतः ।

इति मात्स्य[0]विष्णुधर्मोत्तरात्[141] सुरामांस्यादीनां पत्रपुष्पादेरपि ग्रहः ।
व्यासः[142]—

श्राद्धे जन्मदिने चैव विवाहे मुखदूषिते ।
व्रते चैवोपवासे च न कुर्याद्दन्तधावनम् ॥

मुखदूषिते व्रणादिना मुखदोषे ।

139- स्मृतिचन्द्रिकायां श्राद्धकाण्डे, तिथितत्त्वे (पृ-22) चोद्धृतम् ।

140- शुद्धिदीपिकायां (3/30-32) प्रसङ्गेऽस्मिन् प्रतिपाद्यते यथा—

सौरारयोर्दिने मुक्ता देयाऽनृक्षे तु काञ्चनम् ।
जन्मन्यृक्षे यदि स्यातां वारौ भौमशनैश्चरौ ॥
मासः स कल्मषो नाम मनोदुःखप्रदायकः ।
तस्य सर्वौषधिस्नानं ग्रहविप्रसुरार्च्चनम् ॥
सुरामांसी वचाकुष्ठं शैलेयं रजनीद्वयम् ।
शटी चम्पकमुस्तञ्च सर्वौषधिगणः स्मृतः ॥ इति ।

141- गन्धानि-स्थाने चान्यानि इति तिथितत्त्वे (पृ-23) मात्स्यवचनम् ।

142- न कुर्यात् स्थाने वर्जयेत्-इति कृत्यकौमुद्यां (पृ-60) धृतपाठः ।

0- ख-पुस्तके मात्स्य-पदं नास्ति ।

जिह्वोल्लेखः सदैव तु ।

इति वचनादस्य तु न त्यागः । नव्यास्तु[0] भोजनादुत्तरसुखार्थदन्तधावनस्याय निषेधो न नित्यस्येत्याहुः ।

राजमार्त्तण्डे[143]—

यो जन्ममासे क्षुरकर्मयात्रां
कर्णस्य वेधं कुरुते तु मोहात् ।
नूनं स रोगी धनदारनाशं
प्राप्नोति सूनोर्वधबन्धनानि ॥

शतानन्दः[144]—

जातं दिनं दूषयते वसिष्ठ-
श्चाष्टौ च गार्ग्यो यवनो दशाहम् ।
जन्मर्क्षमासं किल भागुरिश्च
ब्रूते विवाहे क्षुरकर्णवेधे ॥

वराहः[145]—

जन्मनो दिनमारभ्य यावत्त्रिंशद्दिनाति तु[00] ।
जन्ममासः स विज्ञेयः क्षौराध्वानं विवर्जयेत् ॥

अत्र वेदेतरपुराणमन्त्रादिपाठे शूद्रस्याप्यधिकारः ।

वेदवर्जं शूद्रस्य ।

इति छन्दोगाह्निकाः[146] ।

143- दार-स्थाने पुत्र, सूनोः-स्थाने मूढ-इति कृत्यकौमुद्याम् (पृ-60) ।

144- श्चाष्टौ-स्थाने स्त्वष्टौ इति कृत्यकौमुद्याम् (पृ-60) ।

145 जन्मदिनात् समारभ्य, क्षौराध्वानञ्च वर्जयेत् इति कृत्यकौमुद्यां (पृ-60) वर्षवृद्धिप्रकरणे उद्धृतपाठः ।

146- वेदमन्त्रवर्जं शूद्रस्य ! इति छन्दोगाह्निकाः । इति तिथितत्त्वे (पृ-24) उद्धृतम् । न केवलं मन्त्रपाठे अपि च वैदिकयागादिकर्मणि शूद्रस्य नास्त्यधिकारः । विषयोऽयं विचारितो माधवाचार्येण जैमिनीयन्यायमालायां षष्ठाध्याये प्रथमपादे सप्तमाधिकरणे । तद्यथा—

0- केचित्तु इति ख-पुस्तके पाठः ।

00- दिनावधि इति ख-पुस्तके पाठः ।

एवं सति

अध्येतव्यं न चान्येन ब्राह्मणं क्षत्रियं विना ।
श्रोतव्यमिह शूद्रेण नाध्येतव्यं कदाचन ॥

इति भविष्ये[147] श्रवणाध्ययननिषेधो वेदविषयको ग्राह्यः ।
अन्यथा स्मृतिपुराणादेरपि निषेधे

य इदं शृणुयान्नित्यं यश्चापि परिकीर्त्तयेत् ।

इति यच्छब्देन वर्णसामान्यमुपक्रम्य

शूद्रः सुखमवाप्नुयात् ।[148]

इत्युपसंहारे शूद्रस्य सहस्रनामपठनं विरुध्यते ।

न हि वेदेष्वधिकारः कश्चिच्छूद्रस्य विद्यते ।
पुराणेष्वधिकारो मे दर्शितो ब्रह्मणैव हि ।

शूद्रोऽपि यष्टा नो वा स्यादवैधाध्ययनेन वा ।
उपदेष्टृमुखाद्वाऽस्य क्रतुवित्त्वेन यष्टृता ॥
त्रैवर्णिकैर्वेदविद्भिः कृतार्था विधयः क्रतोः ।
नाक्षिपन्ति चतुर्थस्य विद्यां तद्यष्टृता कुतः ॥ इति ।

स्वकृतविस्तरव्याख्यायां माधवाचार्यः कथयति—लिखितपाठादिना तात्कालिकाचार्योपदेशेन वा शूद्रस्याप्यनुष्ठानहेतुभूतविद्यासम्भवाच्छूद्रोऽपि यागाधिकारीति चेत् । मैवम् । क्रतुविधिवैयर्थ्यपरिहाराय हि शूद्रस्याविहिताऽपि विद्या कल्पते । क्रतुविधयश्च त्रैवर्णिकानुष्ठानेनैव चरितार्थाः सन्तो न शूद्रस्य विद्यां कल्पयन्ति । त्रैवर्णिकानां तु विद्या न कल्पनीया , अध्ययनविधिनैव विहितत्वात् । तस्मान्न शूद्रस्य यागाधिकारः । इति ।

147- तिथितत्त्वे (स्मृ० त०-I-पृ-24) उद्धृतम् ।

148- महाभारतस्यानुशासनपर्वणि (149/122-123) विष्णुसहस्रनाममाहात्म्यवर्णने सम्पूर्णवचनं यथा—

य इदं शृणुयान्नित्यं यश्चापि परिकीर्त्तयेत् ।
नाशुभं प्राप्नुयात्किञ्चित्सोऽमुत्रेह च मानवः ॥
वेदान्तगो ब्राह्मणः स्यात्क्षत्रियो विजयी भवेत् ।
वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात् ॥ इति ।

इति मात्स्याच्च । अतएव सच्छूद्राणां[149] रासपञ्चाध्यायी-गोपालस्तवादि-पाठाचारः[0] । केचित्तु

निषादस्थपतिं याजयेत् ।

इति श्रुतौ षष्ठीतत्पुरुषे लक्षणागौरवात् कर्मधारये निषादाभिन्नस्थपतियाजने प्रसक्ते[150] तस्य वेदनिषेधेष्वाधानोपयोगिमन्त्रपाठे यथा न विरुद्धस्तथा

149- सच्छूद्रलक्षणमाहोशनाः (श्लोकः-49)—

द्विजशुश्रूषणपरः पाकयज्ञपरान्वितः ।

सच्छूद्रं तं विजानीयादसच्छूद्रस्ततोऽन्यथा ॥ इति ।

भोज्यान्नत्वेन ते मनुना प्रदर्शिताः, यथा (4/253)—

आर्धिकः कुलमित्रश्च गोपालो दासनापितौ ।

एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत् ॥ इति ।

150- कर्मधारयसमासं स्वीकृत्य माधवाचार्येण जैमिनीयन्यायमालायां (6/1/13) निषादस्थपत्यधिकरणमालोचितम् । तद्यथा—

द्विजः स्थपतिरन्यो वा द्विजः षष्ठीसमासतः ।

कर्मधारयमुख्यत्वान्निषादो रौद्रयागकृत ॥ इति ।

विस्तरव्याख्यायामपि तेन प्रतिपाद्यते यथा—वास्तुमयं रौद्रं चरुं निर्वपेदिति प्रकृत्य श्रूयते । एतया निषादस्थपतिं याजयेदिति । वास्तुशब्दः किञ्चित्प्रकृतिद्रव्यविशेषमाह । एतस्यामिष्टावधिकारी निषादस्थपतिशब्दवाच्यस्त्रैवर्णिकः । कुतः । निषादानां स्थपतिरिति षष्ठीसमासस्य त्रैवर्णिके सम्भवात् । तस्य चाधीतवेदत्वेन विद्यासम्भवाच्चेति चेत् । मैवम् । निषादश्चासौ स्थपतिश्चेति कर्मधारयसमासस्य मुख्यत्वात् । षष्ठीसमासे तु सङ्कीर्णजातिविशेषवाचिना निषादशब्देन तत्सम्बन्ध उपलक्ष्येत । न त्वयं कर्मधारये दोषोऽस्ति । ततस्तात्कालिकाचार्योपदेशादिना विद्यां सम्पाद्य धनिको निषादो रौद्रयागं कुर्यात् । इति । विषयस्यास्योपन्यासार्थं माधवाचार्येण 'स्थपतिर्निषादः स्याच्छब्दसामर्थ्यात् ।' (6/1/51), 'लिङ्गदर्शनाच्च' (6/1/52) चेति जैमिनीयसूत्रद्वयमाधारीकृतम् । 'कर्मधारयोऽयं न षष्ठीतत्पुरुषः ।' इति तत्र मीमांसादर्शने टुप्टीकाकार-कुमारिलभट्टसिद्धान्तः ।

0- वाक्यमिदं नास्ति ख-पुस्तके ।

शूद्रस्यान्यपुराणनिषेधस्योक्तभविष्यपुराणेन निर्वाहात्तत्तत्कर्मोपयोगिपुराण-स्मृतिमन्त्रपाठो युक्तः ।

अनुमतोऽस्य नमस्कारो मन्त्रः ।[151]

इतिगौतमवचनाद्वैदिकमन्त्रस्थाने नमः-पदोहादित्याहुः । तस्माज्जन्मतिथौ शूद्राणां वैदिकमन्त्रस्यैव निषेधो न स्मृतिपुराणादिमन्त्राणाम् । एवं स्नानश्राद्धविवाहादिषु[0] । वचनान्तरप्रमाणवशान्न तयोरपि निषेधः । एवं स्त्रीणा-मिति[152] सर्वं सुस्थम्[00] । गौडास्तु पञ्चयज्ञस्नानश्राद्धादौ वेदमन्त्रवत् पुराणमन्त्रोऽपि शूद्राणां निषिद्धः[153] ।

नमस्कारेण मन्त्रेण पञ्चयज्ञान्न हापयेत् ।

इति याज्ञवल्क्यात्[154],

बृहन्नक्षत्रविशाञ्चैव मन्त्रवत्स्नानमिष्यते ।
तूष्णीमेव तु शूद्रस्य सनमस्कारकं स्मृतम् ॥

151- तिथितत्त्वे (स्मृ० त०-I-पृ-24) उद्धृतम् । किन्तु मुद्रितगौतमधर्मसूत्र 'अनुज्ञातोऽस्य नमस्कारो मन्त्रः ।' (2/1/66) इति पाठः । स वेदे अनधिकारी अपि नमस्कारमन्त्रे अधिकारी इत्यर्थः । इति गौतमधर्मसूत्रस्य सूक्ष्मा-वृत्तिकारा अस्मद् गुरुचरणाः ।

152- स्त्रीशूद्राणां मन्त्रादावनधिकारं सूचयन् अत्रिराह (श्लोकः-133)—

जपस्तपस्तीर्थयात्रा प्रव्रज्या मन्त्रसाधनम् ।
देवताराधनञ्चैव स्त्रीशूद्रपतनानि षट् ॥ इति ।

तिथितत्त्वे (पृ-24) रघुनन्दनोऽप्याह यथा—स्त्रीणामपि वैदिकमन्त्रनिषेधमाह नृसिंहतापिनीयम्—सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्रयोर्नेच्छन्ति सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्रो यदि जानीयात् स मृतोऽधो गच्छति । इति ।

153- तिथितत्त्वे (स्मृ० त० I-पृ-24) रघुनन्दनेनोपन्यस्तम् ।

154- शूद्रधर्मानाह याज्ञवल्क्यः (1/121), यथा—

0- 'इति सर्वं सुस्थम्' इति ख-ग-पुस्तकद्वयेऽधिकपाठः ।

00- 'वचनान्तर....सर्वं सुस्थम् ।' इति भागो ग-पुस्तके नास्ति ।

इतिबृहद्योगियाज्ञवल्क्यात्[155], तथा श्राद्धाधिकारे

अयमेव विधिः प्रोक्तः शूद्राणां मन्त्रवर्जितः ।
अमन्त्रस्य तु शूद्रस्य विप्रो मन्त्रेण गृह्यते ॥

इतिवराहपुराणाच्च[156] नमस्कारेण तूष्णीमिति मन्त्रवर्जित इति क्रमेण पञ्चयज्ञस्नानश्राद्धेषु वेदपुराणमन्त्राणामपि सामान्यतो निषेधादित्याहुः । तदसत् । नमस्कारेण तूष्णीमेवेत्यादेर्वैदिकमन्त्रनिषेधपरताया गोपीनाथादिभिरुक्तत्वात् ।

तच्चोदकेषु मन्त्राख्या ।

इति जैमिनिसूत्रे[157] मन्त्रपदस्य वैदिकमन्त्रार्थत्वात् । गौणार्थग्रहे गौरवात् मानाभावाच्च । अतएवेह न युगपद् वृत्तिद्वयैकशेषादिकमपि । अन्यथा

पूजयेयुर्द्विजाः सर्वे स्त्रीशूद्राणाममन्त्रकम् ।

भार्यारतिः शुचिर्भृत्यभर्ता श्राद्धक्रियारतः ।
नमस्कारेण मन्त्रेण पञ्चयज्ञान्न हापयेत् ॥ इति ।

नमस्कारमन्त्रो 'नमः' इति मिताक्षराकारो विज्ञानेश्वरः । तत्र नमस्कारमन्त्रं च केचित्—

देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।
नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥

इति वर्णयन्ति । इति ।

155- बृहद्योगियाज्ञवल्क्यस्मृतौ (7/158) । साधारणतः स्नानफलं प्रतिपादितं दक्षस्मृतौ यथा (2/14)—

गुणा दश स्नानपरस्य साधो रूपञ्च पुष्टिश्च बलञ्च तेजः ।
आरोग्यमायुश्च मनोनुरुद्धदुःस्वप्नघातश्च तपश्च मेधा ॥ इति ।

156- तिथितत्त्वे (स्मृ०त० I-पृ-24) उद्धृतम् ।

157- जैमिनिः विधिमन्त्रविचारे 'विधिमन्त्रयोरैकार्थ्यमैकशब्द्यात् ।' इति (2/1/30) सूत्रेण पूर्वपक्षमुपन्यस्य 'अपि वा प्रयोगसामर्थ्यान्मन्त्रोऽभिधानवाची स्यात् ।' इति (2/1/3) सिद्धान्तपक्षं सूचितवान् । तेन विस्पष्टं प्रतिपादयितुं 'तच्चोदकेषु मन्त्राख्या ।' इति (2/1/32) सूत्रं सूत्रितम् । अत्र भाष्यकारः शबरस्वामी एतत्स्पष्टीकरोति, यथा—

इति जयन्तीप्रकरणे मन्त्रपदस्य वैदिकमन्त्रार्थकत्वात्पौराणिकानां

मन्त्रगतो भावशब्दो विधायको नेति परीक्षितम् । कोऽयं मन्त्रो नामेति । उच्यते । अज्ञाते मन्त्र तद्गतो भावशब्दः कथं विचारित इति, इदमर्थतोऽधिकरणं पूर्वं द्रष्टव्यम् । कथंलक्षणो मन्त्र इति । तच्चोदकेषु मन्त्राख्या । अभिधानस्य चोदकेष्वेवंजातीयकेष्वभियुक्ता उपदिशन्ति—मन्त्रानधीमहे, मन्त्रानध्यापयामः । मन्त्रा वर्तन्त इति ।

प्रायिकमिदं लक्षणम् । अनभिधायका अपि केचिन्मन्त्रा इत्युच्यन्ते यथा वसन्ताय कपिञ्जलानालभत इति । न शक्यं पृष्टाकोटेन तत्र अत्रोपदेष्टुमिति लक्षणमुक्तम् ।

ऋषयोऽपि पदार्थानां नान्तं यान्ति पृथक्त्वशः ।
लक्षणेन तु सिद्धानामन्तं यान्ति विपश्चितः ॥

उदाहरणम्, मेधोऽसि इत्येवमादयोऽस्यन्ताः । इषे त्वा इत्येवमादयस्त्वान्ताः । आयुर्दा असि इत्याशीः । अग्निर्मूर्धा × इति स्तुतिः । सङ्ख्या, एको मम इति । प्रलपितम्, अक्षी ते इन्द्र पिङ्गले डुलेरिव इति । परिदेवनम्, अम्बे अम्बिक इति । प्रैषः अग्नीदग्नीन्=इति अन्वेषणम्, कोऽसि कतमोऽसि इति । पृष्टं, पृच्छामि त्वा इति । आख्यानम्, इयं वेदिः, इति । अनुषङ्गः, अच्छिद्रेण पवित्रेण + इति । प्रयोगः, त्रैस्वर्यं चातुःस्वर्यं च । सामर्थ्यमभिधानम् । तच्चैतद् वृत्तिकारेणोदाहरणापदेशेनाऽऽख्यातम् ।

एतदपि प्रायिकमेव । असिमध्या अपि च मन्त्रा भवन्ति, ईड्यश्चासि वन्द्यश्च वाजिन् इति । त्वामध्याश्च, तत्त्वा यामि इति । आशीर्ब्राह्मणमपि, सोऽकामयत प्रजाः सृजय इति । स्तुतिरपि, वायुर्वै क्षेपिष्ठा देवता + इति । प्रलापो, न चैतद् विद्मो, यदि ब्राह्मणा वा स्मोऽब्राह्मणाः स्मो वा इति । परिदेवनम्, ये मामधुक्षन्त ते मां प्रत्यमुञ्चन्त इति । प्रैषः, अमुतः सोममाहर इति । अन्वेषणम्, इह वा स इह वा इति । प्रश्नः, वेदः कर्णवतीं सूर्मिम् इति । प्रतिवचनं, विद्मो वा इति । अनुषङ्गः, हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षस × इति । प्रयोगः, त्रैस्वर्यं चातुःस्वर्यं च इति । सामर्थ्यम्, स्रुवेणावद्यति द्रवेष्विति । लक्षणकर्मणि प्रयोजनं प्रसिद्धत्वान्न वक्तव्यम्, लघीयसी प्रतिपत्तिर्लक्षणेन ।

आक्षेपेष्वपवादेषु प्राप्त्यां लक्षणकर्मणि ।
प्रयोजनं न वक्तव्यं यच्च कृत्वा प्रवर्तते ॥

धर्माय धर्मसम्भवो यत्यादीनामनिवृत्तिः । (?)

इति प्रामाणिकवाणी विरुध्यते । अन्ये तु मन्त्रवर्जित इत्यादेः स्वयं मन्त्रवर्जित इत्यर्थः, तेन ब्राह्मणं प्रतिनिधीकृत्य तद्द्वारा स्मार्त्तवैदिकमन्त्रोच्चारणेन कर्म कर्त्तव्यम् ।

अमन्त्रस्य तु शूद्रस्य........

इत्युक्तवाराहेऽमन्त्रस्य स्मार्त्तवैदिकमन्त्र[0]सामान्यपठनायोग्यस्येत्यर्थात् । न च तर्हि

अनुमतोऽस्य नमस्कारो मन्त्रः ।

इति गौतमस्मृतौ नमः-पदोच्चारणमसङ्गतं स्यादिति वाच्यम् । नमः-पदोच्चारणस्यादृष्टसिद्ध्यर्थत्वेन तद्विधानात् । तथाहि मन्त्रस्य प्रयोजनद्वयम् स्वोच्चारणजन्यादृष्टसिद्धिः, प्रयोगसमवेतार्थप्रकाशनञ्चेति । तत्र नमः-पदोच्चारणेनादृष्टसिद्धिः, ब्राह्मणपठितमन्त्रेण तादृशार्थप्रकाशनञ्च । ऊहकल्पनाप्येतदर्थेति[00] । न चादृष्टस्यैव प्रधानत्वात्तादृशार्थप्रकाशनमकिञ्चित्करम् । अथवा[000] ब्राह्मणपठितमन्त्रद्वारा तादृशार्थप्रकाशोऽदृष्टोत्पादकश्चेत्युभयं सिध्यतु । वैयधिकरण्येनापूर्वोत्पत्तेः पुत्रकृतगयाश्राद्धादौ दर्शनादिति वाच्यम् ।

अनुमतोऽस्य नमस्कारो मन्त्रः ।

नमस्कारेण मन्त्रेण........

इत्यादिस्मृतिवचनाच्छूद्रस्य नमः-पदोच्चारणावश्यकत्वात् । ब्राह्मणपठितमन्त्रस्य स्वपठितमन्त्रस्याप्युभयस्यापि मिलितस्यैव दण्डचक्रादिवदपूर्वजनकत्वसौवाच्याच्चेत्याहुः । वस्तुतस्तु, शूद्रस्य स्वयंकर्मकरणे सावित्रीप्रणववैदिक-

---

आक्षेपेषु पूर्वाधिकरणस्य प्रयोजनम्, अपवादेषूत्सर्गस्य प्राप्त्यामुत्तरविवक्षा कृत्वा चिन्तायां पूर्वाधिकरणस्य प्रयोजनम् । अस्ति वेदे मन्त्रशब्दो यस्यायमर्थः परीक्षितः । अहे=बुध्निय मन्त्रं मे गोपाय यमृषयस्त्रयीविदो विदुः, ऋचः सामानि यजूँषि इति ॥

0- ग-पुस्तके मन्त्र-पदं नास्ति ।

00- ख-ग पुस्तकद्वये वाक्यमिदं नास्ति ।

000- ग-पुस्तके अथवा-स्थाने 'अथ' इति पाठः ।

मन्त्रस्थाने नमः-पदोच्चारणं स्वरूपेण स्मार्त्तमनूच्चारणं चावश्यकम्। प्रतिनिधिद्वारा तत्करणे तु प्रतिनिधेरेव नमः-पदस्मार्त्तमनूच्चारणं न शूद्रस्येति सारम्। स्नानश्राद्धादिकर्माधिकारः कृतोपनयनविप्रवत्सोद्वाहशूद्रस्यैव नान्यस्य।[158]

चतुर्वर्णानां विवाहकालस्त्वष्टचत्वारिंशद्वर्षावधिकः। तदूर्ध्वं[0] विवाहेऽपि आश्रमभ्रष्टो गृहस्थकर्मानधिकारी[159],

चत्वारिंशद्वत्सराणां साष्टानां च परे यदि।
प्रिया वियुज्यते काचित् स तु खण्डाश्रमी स्मृतः॥
अष्टचत्वारिंशद्वत्सरं यावद्वयो न पूर्यते।
भार्यापुत्रवियुक्तस्य नास्ति यज्ञेऽधिकारिता॥

इति भविष्ये सामान्येन शूद्रस्याप्युक्तेः। काचिदिति[00] काऽपीत्यर्थः। तेन

158- उपनयनसंस्कारसंस्कृतद्विजः स्नानश्राद्धाद्यधिकारी भवति। शूद्रस्य उपनयनादिसंस्काराभावात्

विवाहमात्रसंस्कारं शूद्रोऽपि लभतां सदा।

इति शुद्धिसर्वस्वधृतवचनबलात् (पृ-11) विवाहानन्तरमेतत्कर्माधिकारो जायते न ततः पूर्वमिति।

159- विवाहकालस्य परमावधिविषये यद्यपि स्मृतिकारैर्नालोचितं तथापि विवाहयोग्यकालः प्रदर्शितः। तत्रोक्तं मनुना (9/94)—

त्रिंशद्वर्षोद्वहेत्कन्यां हृद्यां द्वादशवार्षिकीम्।
त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः॥ इति।

अधिकन्तु आश्रमचतुष्टयस्वीकृतिनिमित्तं स्वायुषो द्वितीयभागे गृहस्थाश्रमं स्वीकर्तुमुपदिश्यते मनुना, यथा (4/1)—

चतुर्थमायुषो भागमुषित्वाऽऽद्यं गुरौ द्विजः।
द्वितीयमायुषो भागं कृतदारो गृहे वसेत्॥ इति।

यथोपनयने परमकालः सामान्यकालाद्द्विगुणस्तथाऽत्र विवाहे सामान्यकाल-चतुर्विंशतिवर्षाणां द्विगुणात्मककालः परमावधिको भवति। अथवा

0- 'अविवाहे त्वाश्रमभ्रष्टः कर्मानधिकारी' इति ख-ग-पुस्तकद्वये पाठः।
00- 'शूद्रपरम्' इति ख-पुस्तकेऽत्राधिकपाठः।

शूद्रस्य पित्रादिलब्धायाः क्रीताया वाऽनूढभार्यायाः[160] सत्त्वेऽपि न कर्माधिकारः[0], शूद्रस्योढानूढत्वेन भार्याद्वैध्यात् ।

जातोऽपि दास्यां शूद्रेण कामतोऽंशहरो भवेत् ।

इति याज्ञवल्क्यात्[161] । विवाहोत्तरं मध्ये अष्टचत्वारिंशद्वर्षं प्रियाहीनत्वेऽपि तद्दोषः[00] । पुत्रपदं क्रीतदत्तकाद्युपलक्षकम् ।[162]

अथोपवासः[163] ।

शतायुर्वै पुरुषः । इति श्रुतिवचनानुरोधेनायुषो द्वितीयचतुर्थभागं पञ्चाशद्वर्षपर्यन्तं गृहस्थाश्रममनुतिष्ठेत् इति ।

160- अनूढभार्या दासीभार्या ।

161- शूद्रधनविभागे सम्पूर्णं याज्ञवल्क्यवचनं यथा (2/133-134)—

जातोऽपि दास्यां शूद्रेण कामतोऽंशहरो भवेत् ॥
मृते पितरि कुर्युस्त भ्रातरस्त्वर्धभागिकम् ।
अभ्रातृको हरेत्सर्वं दुहितृणां सुतादृते ॥

इति । अत्र शूद्रेण दास्यामुत्पन्नः पुत्रः कामतः पितुरिच्छया भागं लभते । इति ।

162- पुत्रास्तावद्द्वादशविधा भवन्ति । दायादबान्धवादायादबान्धवभेदेन ते मनुना प्रदर्शिताः, यथा (9/159-160)—

औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ।
गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट् ॥
कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा ।
स्वयंदत्तश्च शौद्रश्च षडदायादबान्धवाः ॥ इति ।

163- उपवासशब्दार्थः शुद्धिसर्वस्वबोधिन्याम् (पृ-102) आलोचितः । अपिच कालसारधृतविष्णुधर्मेऽभिहितो यथा—

उपावृत्तस्य पापेभ्यो यस्तु वासो गुणैः सह ।
उपवासः स विज्ञेयः सर्वभोगविवर्जितः ॥ इति ।

एकादशीतत्त्वे (स्मृ० त०-II पृ-19) भविष्यपुराणवचनमपि एवम् ।

0- 'न कर्माधिकारः' स्थाने 'निपात्यम्' इति ग-पुस्तकपाठः ।

00- 'ऊढ' स्थाने ग-पुस्तके 'आभरण' इति पाठः ।

उपवासो विहितसफलसायंप्रातरन्यतरभोजनाभावः[164]। क्वचित् खण्डरूपोऽपीति शुद्धिसर्वस्वे सलक्षणोऽस्माभिरुक्तः[165]। सफलोपवासः सर्वतिथिषु सामान्यादुक्तः, यथा नारदीये[166]—

शुक्लान् वा यदि वा कृष्णान् प्रतिपत्प्रभृतींस्तिथीन्।
उपोष्यैव बलिं दद्याद् विधिना त्वपरेऽहनि।
ब्राह्मणान् भोजयित्वा तु सर्वपापैः प्रमुच्यते॥

उपवासे कालविशेषाभावादहोरात्रसाध्यत्वाच्चाहोरात्रः कालः। तदभावे त्रिसन्ध्यव्यापिनी[167], तदभावे मध्याह्नव्यापिनी खण्डतिथिर्ग्राह्या।

164-सायं प्रातरित्युपलक्षणेनाहोरात्राभोजनसङ्कल्पपालनरूप उपवासश्चेति तात्पर्यार्थः।

165- 'शुद्धिसर्वस्वम्' ग्रन्थकर्त्तुः कृष्णमिश्रस्यापरा कृतिः। बोधिनीसहितं तन्मत्सम्पादितं पूर्वं प्रकाशितञ्च। तस्मिन् ग्रन्थे (पृ पृ-101-113) उपवासो विचारितो यथा—उपपूर्ववसतेर्भोजनाभावबोधकत्वाद्भोजनाभावत्वं तत्। अचेतनेऽपि घटादावुपवसतीति प्रयोगापत्तेः। न च चैतन्यविशिष्टं तत्, पशुपक्ष्यादौ तदापत्तेः। भोजनस्य गलोदरकवलसंयोगरूपत्वेनाव्याप्यवृत्तित्वाद् भुञ्जानोऽप्युपवसतीति प्रयोगापत्तेश्च। ....तत्र फलाश्रवणेऽपि नित्य इव विश्वजिन्न्यायेन स्वर्गस्य दोषाभावस्य वा फलत्वकल्पनात्। अत्रोच्यते। अङ्गिराः—

सायमाद्यन्तयोरह्नोः सायं प्रातश्च मध्यमे।
उपवासफलं प्रेप्सुर्जह्याद्भक्तं चतुष्टयम्॥

तथा च सफलत्वे सत्याद्यन्तदिनद्वये सायं भोजनाभावविशिष्टमध्यदिनप्रातः सायं भोजनान्यतराभावत्वमुपवासत्वमिति लक्षणं फलितम्। ....इत्यादि।

166- कालदीपे (पृ-8) विधिना त्वपरेऽहनि-स्थाने विधिवदपरेऽहनि-इति धृतः पाठः।

167- त्रिसन्ध्यव्यापिनी सूर्योदयात् सूर्योदयपर्यन्तं वर्त्तमाना। इति कालदीप-तेजनीकारैरस्मद् गुरुचरणैर्यन्निर्णीतं तदत्र न प्रसरति अहोरात्रस्य पूर्वोक्तत्वात्। अतः सूर्योदयात् सूर्यास्तपर्यन्तं वर्त्तमाना तिथिरत्र त्रिसन्ध्यव्यापिनीति बोध्यते।

कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः ।[168]

इतिवचनात् । कर्मकालो द्विविध:, मुख्यो गौणश्चेति । मुख्याभावे गौणग्रहः। तिथिव्याप्तिर्द्विविधा, स्वाभाविकी साकल्यवचना[169] चेति । यदा प्रतिपद्-दर्शयुक्ता तदा पूर्वोपोष्या,

पञ्चमी सप्तमी चैव दशमी च त्रयोदशी ।
प्रतिपन्नवमी चैव कर्त्तव्या सम्मुखी तिथिः ॥[170]

इति पैठीनसिवचनात् । सम्मुखी नाम सायाह्नव्यापिनी गृह्यते[171], यथा—

प्रतिपत्सम्मुखी कार्या या भवेदापराह्णिकी ।
दैवं कर्म तथा ज्ञेयं पित्र्यं वा मनुरब्रवीत् ॥[172]

सम्मुखीति सायाह्नव्याप्तत्रिमुहूर्त्तवेधोऽभिहितः[173] । आपराह्णिकीत्यनेन ततोऽधिको वेधः । उभयथा शुक्लप्रतिपत् पूर्वोपोष्या, कृष्णा तु यदोदयादूर्ध्वं

168- निर्णयसिन्धौ तिथिवेधादिनिर्णये सम्पूर्णं विष्णुधर्मवचनं यथा—

कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः ।
तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणम् ॥ इति ।

169- तेजनीसहिते कालदीपे (पृ-8) साकल्यवचनं देवलेनोक्तं यथा—

यां तिथिं समनुप्राप्य उदयं याति भास्करः ।
सा तिथिः सकला ज्ञेया स्नानदानव्रतादिषु ॥ इति ।

170- कालमाधवे प्रतिपत्प्रकरणे (पृ-82) धृतम् ।

171- कालमाधवे प्रतिपत्प्रकरणे (पृ-82) स्कन्दपुराणवचनं तत्प्रमाणम्, यथा—

सम्मुखी नाम सायाह्नव्यापिनी दृश्यते यदा ।
प्रतिपत्सम्मुखी कार्या या भवेदापराह्णिकी ॥ इति ।

172- कालमाधवे प्रतिपत्प्रकरणे (पृ-82) एतदनुरूपं व्यासवचनं यथा—

प्रतिपत्सैव विज्ञेया या भवेदापराह्णिकी ।
दैवं कर्म तथा ज्ञेयं पित्र्यञ्च मनुरब्रवीत ॥ इति ।

173- सायाह्नव्याप्तिवचनेन त्रिमुहूर्त्तवाचको वेधोऽभिधीयते । इति उपवासनिर्णये कालदीपकारेण (पृ-9) दिव्यसिंहेनापि प्रतिपाद्यते ।

पूर्वेद्यु स्त्रिमुहूर्त्ता ततोऽप्यधिका वा स्यात्तदा द्वितीयायोगात्परोपोष्या,

प्रतिपत्सद्वितीया स्यात्.... ।[174]

इति आपस्तम्बात् । दर्शविद्धायाः प्रतिपदः प्रातरसत्त्वेऽपि तत्र सङ्कल्पः[175] । गुणभूतप्रतिपदः साक्षादभावेऽपि प्रधानकर्मार्थं तदुपादानात्[176] । इदञ्च स्फुट कार्त्तिकपूर्णिमायां वक्ष्यते । सङ्कल्पाभावे दोषमाह—

174- निर्णयसिन्धौ (पृ-14) सम्पूर्णम् आपस्तम्बवचनं यथा—

—
प्रतिपत्सद्वितीया स्यात् , द्वितीया प्रतिपद्युता ।
चतुर्थीसंयुता या च सा तृतीया फलप्रदा ।। इति ।

175- प्रतिपद्यप्यमावास्या इति युग्मवाक्यानुरोधात् प्रातःकाले प्रतिपदोऽभावेऽपि—

अभावेऽपि प्रतिपदः सङ्कल्पः प्रातरिष्यते ।

इति कालमाधववचनात् (पृ-7) अमावास्यायुक्तप्रतिपत्प्रातः काले सङ्कल्पः करणीयः । इष्टफलसाधनविषयकबुद्धिः सङ्कल्पः 'अनेन कर्मणेदमिष्टं फलं साध्यत इत्येवंविषया बुद्धिः सङ्कल्पः' इति कुल्लूकभट्टप्रतिपादनात् । व्रतादीनां सङ्कल्पजत्वमुक्तं मनुना, यथा (2/3)—

सङ्कल्पमूलः कामो वै यज्ञाः सङ्कल्पसम्भवाः ।
व्रतानि यमधर्माश्च सर्वे सङ्कल्पजाः स्मृताः ।। इति ।

176- प्रधानकर्मणां सम्पादननिमित्तं गुणकर्मणामुपादानत्वेन ग्रहणं भवति । अतएव कर्मणां गुणप्रधानभावो नितरां वर्त्तते । माधवाचार्येण जैमिनीयन्यायमालायां द्वितीयेऽध्याये प्रथमपादे तृतीयेऽधिकरणे सुष्ठु विचारितमेतत् , यथा—

अवघातादिनापूर्वमुत्पाद्यं विद्यते न वा ।
यजत्यादिवदस्त्येव वाक्यवैयर्थ्यमन्यथा ।।
दृष्टे तुषविमोके तु नापूर्वं द्रव्यतन्त्रतः ।
स्याद्यजत्यादिवैषम्यं नियमापूर्वकृद्वचः ।।

दर्शपूर्णमासयोः श्रूयते । व्रीहीनवहन्ति । तण्डुलान् पिनष्टीति । तत्रावघातपेषणे अपूर्वजनके । विहितधात्वर्थत्वाद् यजत्यादिधात्वर्थवत् । विपक्षे विधिवाक्यवैयर्थ्यरूपो बाधकस्तर्कोऽवगन्तव्यः । तुषविमोकचूर्णत्वयोर्दृष्टप्रयोजनयोर्लोकसिद्धत्वेन तादर्थ्येऽवघातपेषणयोर्विधिर्व्यर्थः स्यात् । तस्मादस्त्य-

सङ्कल्पेन विना विप्र ! यत्किञ्चित्कुरुते नरः ।
फलं चानर्थकं तस्य धर्मस्यार्धक्षयो भवेत् ॥[177]

सङ्कल्पप्रकारमाह—

गृहीत्वौदुम्बरं पात्रं यद्वा वार्येव धारयेत् ।[178]

पूर्वमिति प्राप्ते ब्रूमः । दृष्टफले सम्भवत्यपूर्वं न कल्पनीयम् । यजत्यादि-दृष्टान्तस्तु विषमः । तत्र हि क्रियाप्राधान्येन द्रव्यपारतन्त्र्याभावादपूर्वसाधनत्वं क्रियाया युक्तम् । इह तु व्रीहीनिति कर्मकारकविभक्त्या व्रीहीणामीप्सिततमत्वेन प्राधान्यावगमाद् द्रव्यपरतन्त्रोऽवघातो द्रव्य एवातिशयं कुर्यात् । न त्वपूर्वं जनयति न च विधिवैयर्थ्यम् । नखनिर्भेदादिना तुषविमोकसम्भवेऽप्यवघातेनैवासौ कर्त्तव्य इति यो नियमस्तस्य नियमस्यापूर्वहेतुत्वेन विधेयत्वात् । तस्मान्नास्त्यवघातादिजन्यमपूर्वम् । इति ।

177- 'विप्र'स्थाने 'राजन्' 'चानर्थकं'-स्थाने 'चाल्पाल्पकं' इति तिथितत्त्वे (पृ-22) उद्धृतम् ।

178- कालमाधवे द्वितीयादिप्रकरणे (पृ-217) व्रतानुष्ठानक्रमनिर्णये सम्पूर्णं वराहपुराणवचनं यथा—

गृहीत्वौदुम्बरं पात्रं वारिपूर्णमुदङ्मुखः ।
उपवासं तु गृह्णीयाद् यद्वा वार्येव धारयेत् ॥

इति । औदुम्बरं ताम्रमयम् । ताम्रापात्राभावे जलमात्रं गृहीत्वा सङ्कल्पः कार्य इत्यर्थः । स च शङ्खशुक्ताश्मकांस्यरूप्यताम्रमयपात्रे साग्रमूलदर्भत्रय-फलपुष्पान्विते जलं गृहीत्वा पूर्वदिङ्मुखेनोत्तरदिङ्मुखेन वा जलाशयादितीरे ऐशान्यां जलप्रक्षेपेण कार्यः । पात्राभावे हस्तेनापि । मृन्मये तु सर्वथा वर्ज्यम् । इति सङ्कल्पप्रकारः प्रतिपाद्यते तिथिनिर्णय-ग्रन्थकारेण नागोजिभट्टेन प्रतिपन्निर्णयप्रकरणे । तत्र प्रकृतिगतजलस्य नित्यं शुचित्वं वर्त्तते । एतदुक्तं मनुना (5/128) यथा—

आपः शुद्धा भूमिगता वैतृष्ण्यं यासु गोर्भवेत् ।
अव्याप्ताश्चेदमेध्येन गन्धवर्णरसान्विताः ॥ इति ।

यमोऽप्याह यथा (श्लो० 94-95)—

दिवा सूर्यांशुभिस्तप्तं रात्रौ नक्षत्रमारुतैः ।
सन्ध्ययोरप्युभाभ्यां च पवित्रं सर्वदा जलम् ॥

बार्हस्पत्यभविष्ययोः—

मासपक्षतिथीनाञ्च निमित्तानाञ्च सर्वशः ।
उल्लेखनमकुर्वाणो न तस्य फलभाग्भवेत् ॥[179]

निमित्तं फलम् । चकारद्वयान्निमित्तानां सामान्यतः[0] पार्थक्यम् । न तु मासपक्षेत्यभेदान्वयि तत् मासपक्षे[00]त्युपलक्षणम् । उक्तवाक्ये कल्पमन्वन्तर-प्रभवादिवर्षाणां[180] द्वीपखण्डादीनां चाप्युच्चारणम् । यागविवाहादौ

स्वभावयुक्तमव्याप्तममेध्येन सदा शुचि ।
भाण्डस्थं धरणीस्थं वा पवित्रं सर्वदा जलम् ॥ इति ।

179- 'नरकं प्रतिपद्यते' इति कालदीपे (पृ-10) चतुर्थचरणे धृतपाठः । अत्र 'पौर्णमास्यमावास्ययोरपि पक्षोल्लेखः कार्यः ।' इति प्रतिपाद्यते ग्रन्थकर्त्रा दिव्यसिंहमहापात्रेण । 'निमित्तानां वारनक्षत्रयोगलग्नकरणादीनां कालांशानाम्' इति प्रतिपादयन्ति कालदीपतेजनीकारा अस्मद् गुरुचरणाः ।

180- प्रभवादयोऽब्दाः षष्टिः । तदाह निर्णयसिन्धौ (पृ-2) गार्ग्यः—

प्रभवो विभवः शुक्लः प्रमोदोऽथ प्रजापतिः ।
अङ्गिराः श्रीमुखो भावो युवा धाता तथैव च ॥
ईश्वरो बहुधान्यश्च प्रमाथी विक्रमो वृषः ।
चित्रभानुः सुभानुश्च तारणः पार्थिवोऽव्ययः ॥
सर्वजित्सर्वधारी च विरोधी विकृतिः खरः ।
नन्दनो विजयश्चैव जयो मन्मथदुर्मुखौ ॥
हेमलम्बो विलम्बोऽथ विकारी शार्वरी प्लवः ।
शुभकृच्छोभनः क्रोधी विश्वावसुपराभवौ ॥
प्लवङ्गः कीलकः सौम्यः साधारणविरोधकृत् ।
परिधावी प्रमादी च आनन्दो राक्षसोऽनलः ॥
पिङ्गलः कालयुक्तश्च सिद्धार्थी रौद्रदुर्मती ।
दुन्दुभी रुधिरोद्गारी रक्ताक्षी क्रोधनः क्षयः ॥ इति ।

0- 'मासादितः' इति ख-ग-पुस्तकद्वये पाठान्तरम् ।

00- भेदान्वयि........मासपक्षेति-इति स्थाने भेदान्यपीतरमासे तु इति ग-पुस्तके पाठः ।

तन्महावाक्योच्चारणं स्वनक्षत्रपूजादौ नास्तीत्यालस्यप्रयुक्तम् । यत्तु महावाक्ये[181] प्रभवादिबार्हस्पत्यवत्सरस्थाने वर्त्तमानव्यावहारिकवत्सर[0] इत्युच्चारयन्ति तदयुक्तम् । अमुके मासीत्यादिवदमुके प्रभवादिवत्सर इत्यस्यैव वक्तुमौचित्यात् । उल्लेखनपदस्य विशिष्टनामोच्चारणार्थकत्वात् ।

वाक्यस्य रचना कार्या विधिवाक्यानुसारतः ।

इति न्यायात् । अन्यथा वर्त्तमानव्यावहारिके मासि पक्षे इत्याद्युच्चारणापत्तिः । एवं निमित्तं धन[00]पुत्रकलत्राद्यपि फलं विशेषरूपेण तूष्णीमुच्चार्यम् , न त्वभीष्टसिद्ध्य इति । वत्सरसाधनमाह ज्योतिषे[000]—

शकेन्द्रकालः पृथगाकृतिघ्नः शशाङ्कनन्दाश्वियुगैः समेतः ।
शराद्रिवस्विन्दुहृतः स लब्धः षष्ट्याप्तशेषः प्रभवादयोऽब्दाः ॥

एकभक्तनिर्णयः ।

ब्राह्मे[182]—

एतेषामुपयोगनिर्णय उक्तो निर्णयसिन्धुग्रन्थकर्त्रा कमलाकरेण यथा—

यद्यपि ज्योतिषे गुरोर्मध्यमराशिभोगेन प्रभवादीनां माघादौ प्रवृत्तिरुक्ता, तथापि प्रभवादीनां चान्द्रत्वमप्यस्ति, 'चान्द्राणां प्रभवादीनां पञ्चके पञ्चके युगे' इति माधवोक्तेः । तेन चान्द्रः प्रभवादिश्चैत्रसिते प्रवर्त्तते, बार्हस्पत्यस्तु माघादौ । इति । अनेन प्रभवादीनां चान्द्रत्वं बार्हस्पत्यत्वञ्चोभयत्वमङ्गीकृतम् ।

181- महावाक्ये तदुल्लेखप्रकारो यथा— ....वैवस्वतमन्वन्तरे सत्यादिचतुर्युगानां मध्ये अष्टाविंशतितमे कलियुगे कियदधिकपञ्चसहस्रपरिमितेऽब्दे बौद्धावतारे कलिप्रथमचरणे प्रभवादिषष्टिसंवत्सराणां मध्ये अमुकसवत्सरे अमुकगोलावलम्बिनि....इत्यादि ।

182- मुद्रितब्रह्मपुराणे वचनमिदं नोपलभ्यते, किन्तु कालमाधवे प्रतिपत्प्रकरणे (पृ-103) उद्धृतं वर्त्तते । गरुडपुराणेऽपि पूर्वखण्ड (129/1) दुष्टोद्धरणपञ्चम्यादिव्रतनिर्णये इत्थं पठ्यते । तद्यथा—

0- वत्सर-स्थाने वर्ष-इति ख-ग-पुस्तकद्वये पाठः ।

00- ग-पुस्तके धन-पदं नास्ति ।

000- ज्योतिषे-स्थाने ख-ग-पुस्तकद्वये श्रीपतिभट्टः-इति पाठः ।

प्रतिपद्येकभक्ताशी समाप्ते कपिलाप्रदः ।

एकभक्तं त्रिविधम् , स्वतन्त्रमन्यार्थमुपवासप्रतिनिधिरूपञ्च । पञ्चधाविभक्तमध्याह्नोऽस्य मुख्यकालः[183] वक्ष्यमाणदिवेतिवचनात् ।। तदुत्तरमासायमवशिष्टो गौणः । न च दिवेत्यस्य प्रातःसङ्गवयोः सत्त्वात्तावपि गौणकालौ स्यातामिति वाच्यम् । अतीत इत्यनेन दिनार्द्धोत्तरदिवाभागस्यैव तत्कालत्वाभ्यनुज्ञानात् । तथा च स्कान्दे[184]—

दिनार्द्धसमयेऽतीते भुज्यते नियमेन यत् ।
एकभक्तमिति प्रोक्तमतस्तत्स्याद्दिवैव तत् ।।

बौधायनः[185]—

उदये तूपवासस्य नक्तस्यास्तमये तिथिः ।
मध्याह्नव्यापिनी ग्राह्या एकभक्ते सदा तिथिः ।।

अतो मध्याह्नव्यापिनी तिथिर्ग्राह्या । तदभावे तूक्ततदुत्तरगौणकालव्यापिनी । तादृशी तिथिश्च षोढा । पूर्वेद्युरेव मध्याह्नव्यापिनी । परेद्युरेव मध्याह्नव्यापिनी । उभयत्र तथा । नोभयत्र तादृशी । उभयत्र साम्येन वैषम्येण चैकदेशव्यापिनीति द्वौ । यदा पूर्वेद्युर्मध्याह्नं स्वल्पं व्याप्य परेद्युः कृत्स्नमध्याह्नव्याप्तिः यदा वा पूर्वदिनमध्याह्नं सर्वं व्याप्य परेद्युः स्वल्पमध्याह्नव्याप्तिस्तदेतत् पक्षद्वय विषमव्याप्त्यन्तर्गतम् । व्याप्तेः कृत्स्नाकृत्स्नसाधारणस्पर्शार्थकत्वात् । अतएव शब्दशक्तिप्रकाशिकायां[186] मासाभिव्याप्तिः

वक्ष्ये प्रतिपदादीनि व्रतानि व्यास शृणवथ ।
वैश्वानरपुरं याति शिखिव्रतमिदं स्मृतम् ।
प्रतिपद्येकभक्ताशी समाप्ते कपिलाप्रदः ।। इति ।

183- पञ्चधा विभक्तस्य दिवसस्य तृतीयभागस्त्रिमुहूर्त्तकालो मध्याह्नः । अनेन दिवसे द्वादशदण्डानन्तरं यद्यपि एकभक्तं प्राप्यते तथापि दिनार्धसमयेऽतीते इति वक्ष्यमाणवचनानुरोधेन षोडशसप्तदशादिदण्डा अत्र मुख्यः कालः ।

184- कालमाधवे (पृ-103) निर्णयसिन्धौ चैकभक्तनिर्णये उद्धृतम् ।

185- कालमाधवे (पृ-103) एकभक्तनिर्णये उद्धृतम् ।

186-शब्दशक्तिप्रकाशिका न्यायविभागे प्रसिद्धग्रन्थः । ग्रन्थोऽयं जगदीश-

कृत्स्नमाससम्बन्धाभिपदादानीता । कृत्स्नमध्याह्नार्थकत्वे कृत्स्नमध्याह्नं व्याप्नोतीति माधवग्रन्थे कृत्स्नपदानर्थक्यम् । एकदेशव्याप्तिरिति तत्कथनानुपपत्तिश्च स्यात् । किञ्च[0] दिनद्वये साम्येनैकदेशमध्याह्नव्याप्तेः समव्याप्त्यनन्तर्गतापत्तिः । प्रत्युत दिनद्वये कृत्स्नमध्याह्नव्याप्तिरेव समव्याप्तिः स्यात् । तथा च षोढा गणनासङ्गतिराचारविरोधश्चेति बहुव्याकुली स्यादिति ध्येयम् । प्रथमद्वितीयौ मध्याह्नानुरोधादसन्देहौ । तृतीये तूभयेद्यु[00]र्मुख्यमध्याह्नसत्त्वेऽपि गौणाधिक्यात् पूर्वा । चतुर्थेऽप्येवमुभयेद्युर्मुख्यालाभतौल्येऽपि गौणाधिक्यात्पूर्वा[000] । षष्ठे तु यद्दिने मुख्यकालाभिव्याप्त्याधिक्यं गौणकालव्याप्तेः सत्त्वासत्त्वयोरपि तद्दिनं ग्राह्यम् । विषम[0000]व्याप्ति-पञ्चमपक्षेऽपि गौणाधिक्यात्पूर्वा । यत्तु स्मृतिसारे[187]—

दिनद्वये साम्येन मध्याह्नैकदेशव्याप्तौ उत्तरतिथेः साम्ये वृद्धौ च परा

तर्कालङ्कारभट्टाचार्येण विरचितः । अत्रास्मिन्प्रसङ्गे (पृ पृ-359-60) विचारो यथा—मासं सुप्यते, क्रोशं गम्यते, इत्यादौ 'कालाऽध्वनोरत्यन्तसंयोगे' (अष्टाध्यायी-2/3/3) इत्यनुशिष्टेर्द्वितीययाऽभिव्याप्तिरुच्यते । तेन मासाभिव्याप्तः स्वापः, क्रोशाभिव्याप्त गतेः कर्मत्वमित्यादिकस्तत्र बोधः । तत्र मासादेरभिव्याप्तिर्मासवृत्त्यधिकरणतावच्छेदकीभूतयावत्त्वपर्याप्त्यधिकरणकालवृत्तित्वं तथाविधयत्किञ्चिद्यावत्त्वव्यापकत्वं वा; क्रोशादेस्तु क्रोशगम्यदेशवृत्त्यधिकरणतावच्छेदकीभूतयावत्त्वपर्याप्त्यधिकरणदेशवृत्तित्वं यथाविधयत्किञ्चिद्यावत्त्वव्यापकत्वं वेति मन्तव्यम् । इति ।

187- स्मृतिसारसङ्ग्रहे (पृ-6) ग्रन्थकर्त्रा विश्वनाथमिश्रेण प्रसङ्गेऽस्मिन् कथ्यते यत्—पूर्वा स्वल्पं मध्याह्नं स्पृशति, उत्तराऽपि तावन्तमेव तदा खर्वत्वात् उत्तरैव ग्राह्या, खर्वदर्पौ परौ ग्राह्याविरयुक्तत्वात् । यदि सा दिनद्वयव्यापिनी भूत्वा ह्रासवती तदा पूर्वा ग्राह्या । यदि वृद्धिमती तदा परैव । इति।

0- किञ्च पदं ख-ग-पुस्तकद्वये नास्ति ।

00- ख-पुस्तके 'उभयेद्युः' इति पाठो नास्ति ।

000- ग-पुस्तके 'पूर्वा' नास्ति ।

0000- ख-पुस्तके 'विषमव्याप्ति' इति नास्ति । किन्तु ग-पुस्तके 'समव्याप्तिः' इति पाठान्तरम् ।

ग्राह्या, क्षये तु पूर्वा ,

खर्वदर्पौ परौ ग्राह्यौ हिंस्रा स्यात्पूर्वकालिकी ।[188]

इति वचनात् । खर्वा समा[0], दर्पा वृद्धिः, हिंस्रा क्षीणेति तदर्थात् इति । तन्न, गौणाधिक्यात् पूर्वप्राबल्यस्य माधवेनोक्तत्वेन[189] तद्विरोधात् । खर्वादिवाक्यस्य तु गौणकालाभाववत्येकोद्दिष्टादावनकाशस्य वक्ष्यमाणत्वात् । अन्याङ्गैकभक्ते तु

पूजाव्रतेषु सर्वत्र मध्याह्नव्यापिनी तिथिः ।

मध्याह्ने पूजयेन्नृपः ।[190]

इत्यादिवचनादङ्गिनः पूजनस्य मध्याह्ने विहितत्वेन सोऽप्यत्र कालः । मध्याह्नोत्तरं यावपराह्णसायाह्नौ तावप्यत्राविशेषाद् गौणौ । एवञ्च स्वतन्त्रैकभक्ततिथिरिति अन्याङ्गेऽपि सदृशी । उपवासप्रतिनिध्येकभक्तमेकादश्यादौ वक्ष्यमाणं तद्योग्यतिथौ कार्यम् ।

तिथौ यत्रोपवासः स्यादेकभक्तेऽपि सा स्मृता ।[191]

188- निर्णयसिन्धौ (पृ-14) तिथिवेधादिनिर्णये सम्पूर्णं व्याघ्रवचनं यथा—

खर्वो दर्पस्तथा हिंसा त्रिविधं तिथिलक्षणम् ।

खर्वदर्पौ परौ पूज्यौ, हिंसा स्यात्पूर्वकालिकी ॥ इति ।

189- प्रसङ्गेऽस्मिन् कालमाधवे (पृ-105) एकभक्तनिर्णये माधवाचार्येण कथ्यते यत्—तृतीये पूर्वविद्धा ग्राह्या मुख्यकालव्याप्तेः समत्वेऽपि गौणकालव्याप्तेरधिकत्वात् । अनेनैव न्यायेनोभयत्र मुख्यकालव्याप्त्यभावेऽपि गौणकालव्याप्तिलाभात्पूर्वविद्धैव । पञ्चमेऽप्ययमेव न्यायो योज्यः । षष्ठे तु, यदा पूर्वेद्युर्मध्याह्नैकदेशमधिकं व्याप्नोति, तदानीं तदाधिक्यात् गौणकालव्याप्तेश्च पूर्वेद्युर्ग्राह्या । इति ।

190- कालमाधवे (पृ-105) प्रतिपत्प्रकरणे एकभक्तनिर्णये वचनद्वयमिदमुद्धृतम् ।

191- 'स्मृता' स्थाने 'तथा' इति कालमाधवे (पृ-105) एकभक्तनिर्णये एकादशीतत्त्वे (स्मृ० त०-II-पृ-92) च सुमन्तुवचनमिदम् ।

0- 'साम्या' इति ग-पुस्तके पाठान्तरम् ।

इति वचनात् ।

अथ नक्तम्

वाराहे धन्यव्रते[192]—

मार्गशीर्षे सिते पक्षे प्रतिपद्या तिथिर्भवेत् ।
तस्यां नक्तं प्रकुर्वीत रात्रौ विष्णुं प्रपूजयेत् ॥

नक्तपदस्य रात्र्यर्थकत्वे कुर्वीतेत्यन्वयाद्रात्रिभोजनमर्थः[193] । तेन भोजनस्य रागप्राप्तत्वाद्रात्राविति कालनियमविधिः । तथा सति दिवा भोजनाभाव-विशिष्टं रात्रिभोजनं व्रतस्वरूपं निष्पन्नम् । एतन्नक्तस्य कालद्वयम्, यथा भविष्ये[194]—

मुहूर्त्तोनं दिनं नक्तं प्रवदन्ति मनीषिणः ।
नक्षत्रदर्शनान्नक्तमहं मन्ये गणाधिप ! ॥ इति ।

एतत्कालद्वयस्याधिकारिभेदमुक्तवान् देवलः[195]—

नक्षत्रदर्शनान्नक्तं गृहस्थस्य बुधैः स्मृतम् ।
यतेर्दिनाष्टमे भागे तस्य रात्रौ निषिध्यते ॥

अन्यत्रापि[196]—

192- कृत्यकल्पतरौ व्रतकाण्डे धन्यप्रतिपद्व्रतप्रकरणे वराहपुराणवचनं पठ्यते यथा—
अगस्त्य उवाच—

अथातः संप्रवक्ष्यामि धन्यव्रतमनुत्तमम् ।
येन सद्यो भवेद्धन्यो ह्यधन्योऽपि हि यो भवेत् ॥
मार्गशीर्षे सिते पक्षे प्रतिपद्या तिथिर्भवेत् ।
तस्यां नक्तं प्रकुर्वीत रात्रौ विष्णुं च पूजयेत् ॥ इति ।

193- कालदीपकारो दिव्यसिंहः कालसारकारो गदाधरश्च 'नक्तशब्दो भोजनपरः' इति प्रतिपादितवन्तौ । अस्मद्गुरुचरणाश्च कालदीपतेजन्यां 'यद्यपि नक्तशब्दः कालवाची तथाप्यत्र लक्षणया भोजनपरः, व्रतपरश्च ।' इति साधु विवेचयन्ति ।

194-कालमाधवे (पृ-106) प्रतिपत्प्रकरणे नक्तनिर्णये उद्धृतम् ।

195- कालमाधवे तत्रैवोद्धृतम् ।

196- एकादशीतत्त्वे (स्मृ० त०-II-पृ.पृ-94-95) रघुनन्दनेनोद्धृतम् ।

नक्तं निशायां कुर्वीत गृहस्थो विधिसंयुतः ।
यतिश्च विधवा चैव कुर्यात्तत् सदिवाकरम् ॥
दिवानक्तं तु तत्प्रोक्तमन्तिमे घटिकाद्वये ।
निशानक्तं तु तत्प्रोक्तं यामार्धे प्रथमे सदा ॥ इति ।
प्रदोषव्यापिनी ग्राह्या सदा नक्तव्रते तिथिः । [197]

इति वचनात् प्रदोषोऽस्य मुख्यः कालः ।

व्यासः[198]—

प्रदोषस्त्रिमुहूर्त्तः स्याद्भानावस्तं गते सति ।

अत्राप्येकभक्तवत् षोढा भेदः । पूर्वपरतिथ्योः प्रदोषव्याप्तौ क्रमात् पूर्वपरे ग्राह्ये । उभयेद्युस्तद्व्याप्तौ तु परा ।

यदैव तिथ्योरुभयोः प्रदोषव्यापिनी तिथिः ।
तत्रोत्तरत्र नक्तं स्यादुभयत्रापि सा यतः ॥

इति जाबालिस्मृतेः[199] ।

यतो दिवारूपे गौणे रात्रिरूपे च मुख्ये सा तिथिरित्यर्थः । उभयेद्युः प्रदोष-व्याप्त्यभावेऽपि परा ।

अतथात्वे परत्र स्यादर्वागस्तमिते हि सा ।

इति जाबालिस्मृते[200] । हि यतोऽस्तमयात्प्राग्गौणे सायं काले सा तिथिरतोऽपि परा ग्राह्येत्यर्थः । एवञ्च दिवारात्रिवृतत्वेन प्रदोषस्य मुख्यकालत्वे सायंकालस्त्वनुकल्पः । अतथात्व इत्यनेन प्रदोषाभावमनूद्य सायंकालस्यापि गौणत्वेन सूचनात् । तेन गृहस्थोऽपि रात्रावक्षमो यतिविधवावद्दिवा नक्त

197- स्कन्दपुराणवचनमिति एकादशीतत्त्वे (स्मृ० त०-II-पृ-93) ।

198- कालमाधवे (पृ-107) नक्तनिर्णये व्यासवचनं यथा—

त्रिमुहूर्त्तं प्रदोषः स्याद्भानावस्तं गते सति ।
नक्तं तु तत्र कर्त्तव्यमिति शास्त्रविनिश्चयः ॥ इति ।

199- 'उभयोर्यदि वा तिथ्योः' इति निर्णयसिन्धौ (पृ-16) नक्तप्रकरणे कालादर्शे जाबालिवचने प्रथमचरणे पाठः ।

200- 'अस्तादर्वाग्यतो हि सा' इति कालमाधवे (पृ-107) नक्तनिर्णये निर्णयसिन्धौ (पृ-15) द्वितीयचरणे धृतः पाठः ।

कुर्यात्[201] । तदाह स्कान्दे[202]—

प्रदोषव्यापिनी न स्याद्दिवा नक्तं विधीयते ।
आत्मनो द्विगुणच्छायामतिक्रामति भास्करे ॥
तन्नक्त नक्तमित्याहुर्न नक्त निशिभोजनम् ।
एवं ज्ञात्वा ततो विद्वान् सायाह्ने तु भुजिक्रियाम् ॥
कुर्यान्नक्तवृती नक्तफल भवति निश्चितम् ॥

सप्तमीभानुवारादौ सौरनक्ते तु पूर्वव्यत्यासेन[0] सायं कालो मुख्यः, प्रदोषोऽनुकल्पः । तदाह सुमन्तुः[203]—

त्रिमुहूर्त्तस्पृगेवाह्नि निशि ह्येतावती[00] तिथिः ।
तस्यां सौरं भवेन्नक्तमहन्येव तु भोजनम् ॥

अत्र सायं व्याप्तेर्मुख्यत्वात् प्रथमं निर्देशः[204] । भविष्ये[205]—

ये त्वादित्यदिने ब्रह्मन्नक्तं कुर्वन्ति मानवाः ।
दिनान्ते तेऽपि भुञ्जीरन्निषेधाद्रात्रिभोजने ॥ इति ।

201- गृहस्थस्य कृते रात्रिभोजनेऽपि यदा निषेधस्तदा तेन दिवा नक्तं कर्तुं शक्यते । तदुक्तं स्मृतिसारसङ्ग्रहकारेण (पृ-8) विश्वनाथमिश्रेण— भानुवारे सङ्क्रान्त्यादिना गृहस्थस्यापि यदा रात्रिभोजने निषेधस्तदा दिवैव नक्त कुर्यात् । इति । माधवाचार्येणापि पूर्वमित्थं प्रतिपादितम् ।

202- कालमाधवे (पृ-108) नक्तनिर्णये उद्धृतम् ।

203- कालमाधवे (पृ-108) ह्येतावती-स्थाने वैतावती, निर्णयसिन्धौ (पृ-15) चैतावती-इति पाठः ।

204- प्रसङ्गोऽयं स्पष्टीक्रियते माधवाचार्येण कालमाधवे (पृ-108 नक्त-निर्णये, यथा—अत्र सायंव्याप्तेर्मुख्यकालत्वात् प्रथमतो निर्देशः, प्रदोष-व्याप्तेरनुकल्पत्वात्पश्चान्निर्देशः । इतरनक्तेषु तु प्रदोषव्याप्तेर्मुख्यत्वादुदाहृत-कूर्मपुराणवचने सैव प्रथम निर्दिष्टा, सायंकालव्याप्तिः पश्चान्निर्दिष्टेति विवेकः । इति ।

205- कालमाधवे (पृ-109) नक्तनिर्णये भविष्योत्तरपुराणवचनमेतत् ।

0- पूर्वव्यत्ययेन-इति ख-ग-पुस्तकद्वये पाठः ।

00- चैतावती-इति ख-पुस्तके पाठः ।

दिनान्ते दिनाष्टमभागे सायाह्ने । यतेर्दिनाष्टमे भुजिक्रियामिति साम्यात् । तेन सायाह्नीयत्रिमुहूर्त्तानां क्रमादुत्तममध्यमाधमकालत्वमायातम्[206] । एवं त्रिमुहूर्त्तं प्रदोषः स्यादि[207]त्यत्राद्यं त्रिमुहूर्त्तार्धं मुख्यम् । तदुत्तरसार्धमुहूर्त्तो मध्यमः[0] ।

तस्यां नक्तं प्रकुर्वीत रात्रौ विष्णुं प्रपूजयेत् ।

इति त्रिमुहूर्त्तानन्तरं निशीथपर्यन्तो जघन्यकालः । उपवासप्रतिनिध्येकादशीनक्ते तु

उदयस्था सदा[00] पूज्या हरिनक्तव्रते तिथिः ।[208]

इति स्कान्दादुदय एव । साम्येन वैषम्येण चैकदेशव्याप्तौ तु गौणाधिक्यात्परा । सौरनक्तेऽप्येतन्न्यायाद् गौणप्रदोषाधिक्यात् पूर्वेति माधवाचार्याः[209] ।

206- प्रसङ्गोऽयं सुष्ठु विचार्यते माधवाचार्येण कालमाधवे (पृ-109) नक्तनिर्णये, यथा—

अस्मिंश्च दिवा भोजने उत्तमोऽन्तिमो मुहूर्त्तः, मध्यम उपान्त्यम् , ततः प्राचीनो जघन्यः । एवञ्च सत्यन्तिमभागत्रिमुहूर्त्तवचनान्युपपद्यन्ते । रात्रिभोजनेऽपि घटिकात्रयमुत्तमः कालः, घटिकाषट्क मध्यमः कालः ।........... निशीथपर्यन्तो जघन्यः कालः । 'नक्तं प्रकुर्वीत रात्रौ' इति सामान्येनाभिधानात् । इति ।

207- त्रिमुहूर्त्तं प्रदोषः स्याद्भानावस्तं गते सति ।

नक्तं तु तत्र कर्त्तव्यमिति शास्त्रविनिश्चयः ॥

इति कालमाधवे (पृ-107) नक्तनिर्णये व्यासवचनम् ।

208- कालादर्शे स्कान्दवचनमिति निर्णयसिन्धौ (पृ-16) उद्धृतम् ।

209- प्रसङ्गेऽस्मिन् माधवाचार्यस्य विचारो यथा कालमाधवे (पृ-108)— यत्तु सप्तमी-भानुवासरादौ सौरनक्तं विहितं, तत्र पूर्वोक्तविपर्यासेन सायंकालव्याप्तिर्मुख्यः कल्पः, प्रदोषव्याप्तिरनुकल्पः । इति । उपोद्घातेऽप्युक्तम्—

0- 'तदुत्तरत्रिमुहूर्त्तार्धं मध्यमम्' इति ख-ग-पुस्तकद्वये वाक्यस्यास्य पाठान्तरम् ।

00- सदा-स्थाने तदा इति ख-ग-पुस्तकद्वये पाठः ।

चतुर्दश्यां सौरनक्तकृतौ तु प्रदोषव्याप्तिर्मुलं न तु सायं व्याप्तिः । रात्रिनक्त-प्रतिनिधित्वेन तत्र सौरनक्ताचरणात् । सप्तमीभानुवारादौ तु सौरनक्तस्य वाचनिकत्वेन प्राधान्यात् सायंव्याप्तिग्रहे विशेषः । शिवरात्रौ तु चतुर्दशी-कृतनक्तपाते तु नक्तस्य हविष्येतरनिवृत्ति[210]रूपत्वात् कार्त्तिकहविष्यवत्-तन्त्रेणोपवासेन तत्सिद्धिः । विशेषाभावस्य सामान्याभावव्याप्यत्वात्[0] । चतुर्दश्यां नक्तं विना शिवभ्रमणपूजादिकं तु वक्ष्यमाणशुक्लकृष्ण[00]चतुर्दशी-परपूर्वविवेकोन्नेयम् । सप्तमीभानुवारादिसौर[000]नक्तस्य[211]चैकदिने प्राप्तौ कालभेदेऽपि प्रसङ्गाद्[212]दिवानक्तेन रात्रिनक्तप्रसिद्धिः । मानभेदेऽपि

सौरनक्ते तु सायाह्न-व्यापिनी न प्रदोषगा । इति ।

210- नक्तव्रते हविष्यादीनामाचरणमुचितम् । तदुक्तं निर्णयसिन्धौ (पृ-16) नक्तनिर्णये मदनरत्ने गारुडे—

हविष्यभोजनं स्नानं सत्यमाहारलाघवम् ।
अग्निकार्यमधः शय्यां नक्तभोजी षडाचरेत् ॥ इति

स्मृतिसारसङ्ग्रहे (पृ-9) धवलसङ्ग्रहे अग्निकार्य-स्थाने ब्रह्मचर्यम्-इति पाठः ।

211- सौरनक्तं दिवानक्तम् । तदुक्तं कालदीपतेजनी (पृ-15) धृतनारसिंहे—

हस्तयुक्तेऽर्कदिवसे सौरनक्तं समाचरेत् ।
स्नात्वार्कमध्ये विष्णुं च ध्यात्वा रोगात्प्रमुच्यते ॥
आत्मनो द्विगुणां छायां यदा सन्तिष्ठते रविः ।
सौरनक्तं विजानीयान्न नक्तं निशिभोजनम् ॥ इति ।

212-तन्त्रप्रसङ्गयोर्लक्षणभेदं प्रतिपादयन् जैमिनीयन्यायमालायां द्वादशा-ध्यायारम्भे माधवाचार्य आह—

तन्त्रं द्वयोर्देशकत्वादेकादश उदीरितम् ।
प्रसङ्गोऽन्योद्देशकत्वाज्जघन्यः सन्नथोच्यते ॥ इति ।

0- ख-पुस्तके वाक्यमिदं नास्ति । ग-पुस्तके 'इति वक्ष्यते' इत्यधिकपाठो वाक्यान्ते ।

00- शुक्लकृष्ण-इति पदं नास्ति ग-पुस्तके ।

000- सौर-स्थाने कृतदिवा-इति ग-पुस्तके पाठः ।

सौमिकवेद्यां पाशुकवेद्यन्तर्भाव[213]वत्[0] । अन्याङ्गोपवासप्रतिनिधिनक्तं त्वेकभक्तवत् ।

विस्तरेऽपि तेनोक्तम्—उभयोद्देशेन सकृदनुष्ठानं तन्त्रम् । अन्योद्देशेनान्यदीयस्यापि सहानुष्ठानं प्रसङ्ग इति तद्भेदः । इति । अत्र दिवानक्तरात्रिनक्तयोः कालभेदेऽपि प्रथमोक्तदिवानक्तेन अनन्तरोक्तरात्रिनक्तस्य सहानुष्ठानं सम्पादितं प्रसङ्गबलात् ।

213- गृहस्थेन यागहोमादयो ये तावदनुष्ठेयास्तेषु सोमयागोऽन्यतमः । तदनुष्ठानार्थमुक्तं मनुना यथा (4/26)—

सस्यान्ते नवसस्येष्ट्या तथर्त्वन्ते द्विजोऽध्वरैः ।

पशुना त्वयनस्यादौ समान्ते सौमिकैर्मखैः ॥ इति ।

सोमयज्ञसंस्थायां कालगणनादृष्ट्या एकाहाहीनसत्रभेदेन त्रिप्रकारकत्वं प्राप्यते । तत्र एकाहपर्यायभूतः सोमयागः पञ्चसु दिनेषु सम्पाद्यते । तत्र पञ्चमदिनं सुत्यादिनं भवति । दीक्षातश्चतुर्थदिने पशुयागोऽनुष्ठेयः । प्रतिपादितमेतत् यज्ञतत्त्वप्रकाशे (पृ-57) सोमयागनिरूपणे चिन्नस्वामिशास्त्रिणा यथा—तृतीयोपसद्दिने दीक्षातश्चतुर्थदिने प्रातरेव द्वयाभ्यां प्रवर्ग्योपसद्भ्यां प्रचर्य प्रवर्ग्यमुद्वास्य, उत्तरवेद्यां प्रवर्ग्यपात्राणि प्रक्षिप्य, अग्निषोमीयस्य पशोस्तन्त्रमारभेत । इत्यादि ।

पशुयागस्य सोमयागाङ्गत्वे क्रियाविचारः प्रतिपाद्यते तेन तत्र (पृ 34); यथा—पशुयागस्यास्य निरूढपशुबन्ध इति संज्ञा याज्ञिकानाम् । आहिताग्निस्सन् संवत्सरे सकृदवश्यमिमं यागमनुतिष्ठेत् । अन्यथा प्रत्यवायी स्यात् । यावज्जीवं चैवमनुष्ठानम् । अस्य ब्राह्मणग्रन्थेषु कुत्रापि स्वातन्त्र्येण प्रयोगविधानं न दृश्यते ।

सर्वेषां पशुयागानां प्रकृतिभूतोऽग्निषोमीयः पशुयागः । स सोमयागाङ्गभूतस्तदङ्गमध्ये पठितः । तत्रैव च सर्वेषां पश्वङ्गानामाम्नानमस्ति । इत्यादि ।

सौमिकी वेदिः सोमयागे प्रयुज्यते । अस्या वेद्याः पार्श्वमानं षट्त्रिंशत्प्रक्रमाः, पूर्वदिङ्मानं चतुर्विंशतिः प्रक्रमाः, पश्चिममानं त्रिंशत् प्रक्रमाः । एषा महावेदिरपि कथ्यते । पाशुकवेद्याः पार्श्वमानम् अष्टाशीत्युत्तरैकशतमङ्गुलाः ।

0- वाक्यमिदं ख-ग-पुस्तकद्वये नास्ति ।

अथायाचितम्

अनागसे शंसति बालचापलम्........[214]

वादिनामविवादः । अनश्वोऽब्राह्मण इत्यादिदर्शनान्नञः संसर्गान्योऽन्य-भावोभयार्थत्वं तत्र सिद्धम् । तथा च याचितमन्नं, तस्याभाव इत्येकं मतम् । एतत्पक्षे तु अप्रयत्नलभ्यपरान्नभक्षणमुपवासश्चेत्युभयं सङ्गृहीतम् । एवं चोपवासस्याहोरात्रसाध्यत्वात् कालविशेषाभावः । सङ्कल्पोऽपि याचितमन्नं न भोक्तव्यम् इत्येवंरूपः[215] । अन्यच्चायाचितं याचितभिन्नमयत्नलभ्यपरान्न-भोजनम् । निषेधस्य प्रसक्तिपूर्वकत्वात् याच्ञाप्रसक्तेरयाचितपदं परद्रव्यमेव बोधयति न तु स्वीयमिति प्राञ्चः[216] । वस्तुतस्तु, अयाचितपदस्य परकीय-त्वविशिष्टेऽयाचितद्रव्ये निरूढलक्षणा[217] । तेन स्वद्रव्येऽपि याच्ञा[0]विरहे

षडरत्नयोऽपि केषाञ्चिन्मतानुसारम् । पूर्वदिङ्मानं त्रयोऽरत्नयः, पश्चिम-मानं चत्वारोऽरत्नयः । अतएव सोमयागनिमित्तं या महावेदिः सम्पाद्यते सोमयागाङ्गभूतपशुयागार्थमपि निर्दिष्टाया वेद्यास्तस्यामन्तर्भावो भवति ।

214- नैषधीयचरिते (1/25) नलस्य सौन्दर्यवर्णनाप्रसङ्गे महाकविः श्रीहर्षः कथयति—

स्वबालभारस्य तदुत्तमाङ्गजैः समं चमर्येव तुलाभिलाषिणः ।
अनागसे शंसति बालचापलं पुनः पुनः पुच्छविलोलनच्छलात् ।। इति ।

215- सङ्कल्पेनाहोरात्रेऽस्मिन् याचितमन्नं न स्वीकुर्याम् इति ग्रन्थकर्तु-रभिप्रायः । 'अयाचितस्य नियमरूपत्वात् ।' इति स्मृतिसारसङ्ग्रह (पृ-10) वचनादत्र नियमस्यास्य पालनम् ।

216- विषयेऽस्मिन् प्रतिपाद्यते कालमाधवे (पृ-110)—निषेधस्य प्रस-क्तिपूर्वकत्वाद्याच्ञाप्रसक्तेश्च परद्रव्यविषयत्वादयाचितशब्दोऽपि परद्रव्यमेव विषयीकरोति । इति ।

217- शब्दस्य वृत्तिस्त्रिधा, अभिधा, लक्षणा, व्यञ्जना चेति । तत्र अभि-धेयार्थाद्भिन्नार्थावगमनार्थं सम्बन्धयर्थस्वीकारे लक्षणा भवति । तद्विचारो यथा काव्यप्रकाशद्वितीयोल्लासे—

0- निषेधस्य प्रसक्ति....याच्ञा-इति भागो ग-पुस्तके नास्ति ।

नायाचितत्वप्रसक्तिरिति सारम्[218] । संसर्गाभावे प्रमाणं तु

अथापरं त्र्यहं न याचेत ।[219]

इति गौतमवचनं प्राजापत्यसूचकम् । स्फुटं तमाह बृहस्पतिः[220]—

त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितम् ।

त्र्यहं परञ्च नाश्नीयात् प्राजापत्यं चरन् द्विजः ॥

अत्र भोजनतदभावौ व्रताङ्गेन तु पुरुषार्थौ[0] । स्मृत्यन्तरम्[221]—

अयाचिताशी मितभुक् परां सिद्धिमवाप्नुयात् ।

मितभुक् चतुर्दशग्रासभोजी ।[222]

मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् ।

अन्योऽर्थो लक्ष्यते यत् सा लक्षणाऽऽरोपिता क्रिया ॥ इति ।

रूढिमूला लक्षणा यथा—कलिङ्गाः साहसिकाः, प्रयोजनमूला च यथा—गङ्गायां घोष इत्यादि । अत्र परकीयविशिष्टायाचितद्रव्ये लक्षणाऽऽरोपः ।

218- याच्ञा हि स्वोपभोगाय रागतः क्रियते इति उपार्जितमात्रमेव याचितं, तेन पूर्वसञ्चितं याचितमेव । इति कालदीपतेजनीकाराणामस्मद्गुरुचरणानां वचनानुरोधेन स्वद्रव्ये याचितत्वप्रसक्तिः । 'यद्यपि स्वगृहे पूर्वसञ्चितवस्तु इदानीमयाचितं भवति, तथापि पूर्वं प्रयत्नसम्पादितत्वात्तद्याचितमेव । इत्यपि पूर्वं कालमाधवे (पृ-110) माधवाचार्येणैतत्प्रतिपादितम् ।

219- अथापरं त्र्यहं न कञ्चन याचेत । इति मुद्रितगौतमधर्मसूत्र (3/8/4) पाठः ।

220- कालदीपे (पृ-17) कालसारे चोद्धृतम् ।

221- कालमाधवे (पृ-110) स्मृत्यन्तरवचनम् ।

222- माधवाचार्यः कालमाधवे अयाचितनिर्णये (पृ.पृ-110-111) मितभुक् दशग्रासभोजीति प्रतिपादयति, यथा—मितभोजित्वं दशग्रासत्वम् । तदुक्तं चतुर्विंशतिमते—

प्रातस्तु द्वादश ग्रासा नक्ते पञ्चदशैव तु ।

अयाचिते तु द्वौ चाष्टौ प्राजापत्यो विधिः स्मृतः ॥ इति ।

0- ख-पुस्तके वाक्यमिदं नास्ति ।

यतिधर्म उशनाश्च[223]—

भिक्षाऽशनसमुद्योगात् प्राक्केनापि[0] निमन्त्रितम् ।
अयाचितं तु तद्भैक्ष्यं भोक्तव्यमनुरब्रवीत् ॥

इह निषेधेऽनुष्ठेयाभावात् पर्युदासस्य च पराधीनत्वादुभयथा[224] कालविशेषाभावः । तस्मादुपवासवद् युग्मादिवाक्येनात्र[225] पूर्वपरतिथिरन्वेष्या ।

अथ श्राद्धकालनिर्णयः[226]

मितभोजित्वं दशग्रासभोजित्वमित्यप्युक्तं दिव्यसिंहगदाधरादिभिः । तिथिनिर्णयकारो नागोजिभट्टस्तु (पृ-72) ततोऽधिकग्रासभोजनं मनुते । तद्यथा—ग्रासनियमोऽत्र चतुर्विंशतिः षोडश वेति यथाशक्यम् । इति । एतदपि अहोरात्रे सकृद्भोजनम् 'अयाचितलब्धस्य तादृशमेव सकृद्भोजनमयाचितम् ।' इति तेन तत्र (पृ-51) प्रतिपादितत्वात् ।

223- कालमाधवे अयाचितनिर्णये (पृ-111) उद्धृतम् ।

224- उभयथा निषेधपक्षे पर्युदासपक्षे च । निषेधपक्षे प्रतिषेधपक्षे । प्रतिषेधपर्युदासयोः स्वरूपं कालदीपतेजन्याम् (पृ-17) उक्तं यथा—

अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता ।
प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ् ॥

यथा—याचितं न भक्षयेत् । इति ।

प्रधानत्वं विधेर्यत्र प्रतिषेधेऽप्रधानता ।
पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् ॥

यथा— अयाचितं भक्षयेत् । इति ।

225- निगमोक्तं युग्मवचनं यथा कालमाधवे (पृ-89)—

युग्माग्नियुगभूतानां षण्मुन्योर्वसुरन्ध्रयोः ।
रुद्रेण द्वादशी युक्ता चतुर्दश्या च पूर्णिमा ॥
प्रतिपद्यप्यमावास्या तिथ्योर्युग्मं महाफलम् ।
एतद् व्यस्तं महाघोरं हन्ति पुण्यं पुरा कृतम् ॥ इति ।

226- गृहस्थः हिंसापरिहारार्थं निरन्तरं यत्नशीलो भूत्वाऽपि चुल्ल्यादिव्यवहारेण स्वकीयसाधारणकर्माणि कुर्वन् पापी भवति । ततो मुक्तिनिमित्तं

0- ख-पुस्तके साकेनापि, ग-पुस्तके प्राज्ञेनापि-इति पाठः ।

नापराह्णे न मध्याह्ने पितृकालौ हि तौ स्मृतौ ।[227]

तेन पञ्च महायज्ञाः सम्पादनीया इति प्रतिपादयन् मनुराह (3/68-69)—

पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः ।
कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन् ॥
तासां क्रमेण सर्वासां निष्कृत्यर्थं महर्षिभिः ।
पञ्च क्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम् ॥ इति ।

ते पञ्च महायज्ञा ब्रह्मयज्ञः पितृयज्ञो देवयज्ञो भूतयज्ञो नृयज्ञश्चेति । तत्र पितृयज्ञं तावत्प्रतिपादयति मनुः (3/82)—

कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन वा ।
पयोमूलफलैर्वाऽपि पितृभ्यः प्रीतिमावहन् ॥ इति ।

श्रद्धामूलकं पितृदेवतोपासनात्मकं प्रजानिश्श्रेयसार्थं कर्मेदं श्राद्धमिति प्रसिद्धम् । एतत् स्पष्टीकुर्वन् आपस्तम्ब आह (2/7/16/1-2)—

सह देवमनुष्या अस्मिँल्लोके पुरा बभूवुः । अथ देवाः कर्मभिर्दिवं जग्मुरहीयन्त मनुष्याः । तेषां ये तथा कर्माण्यारभन्ते सह देवैर्ब्रह्मणा चाऽमुस्मिन् लोके भवन्ति । अथैतन्मनुः श्राद्धशब्दं कर्म प्रोवाच । प्रजानिश्श्रेयसाय च । तत्र पितरो देवता ब्राह्मणास्त्वाहवनीयार्थे । इति । मन्वर्थमुक्तावलीकारः कुल्लूकभट्टोऽपि (3/82) श्राद्धशब्दोऽयं कर्मविधिवाक्यवर्त्ती कौण्डपायिनामयनीयाग्निहोत्रशब्दवद् वक्ष्यमाणपार्वणश्राद्धधर्मातिदेशार्थः । इति विवेचयति ।

सर्वत्र श्राद्धसम्पादने कुशतिलानां नितरामावश्यकता वर्त्तते । तत्र हस्तेनैकेन श्राद्धमुभयेन च तर्पणं कर्त्तव्यमिति प्रतिपाद्यते मत्स्यपुराणे, यथा (22/89-91)—

विष्णोर्देहसमुद्भूताः कुशाः कृष्णास्तिलास्तथा ।
श्राद्धस्य रक्षणायालमेतत्प्राहुर्दिवौकसः ॥
तिलोदकाञ्जलिर्देयो जलस्थैस्तीर्थवासिभिः ।
सदर्भहस्तेनैकेन श्राद्धमेवं विशिष्यते ॥
श्राद्धसाधनकाले तु पाणिनैकेन दीयते ।
तर्पणं तूभयेनैव विधिरेष सदा स्मृतः ॥ इति ।

227- स्मृतिसारोद्धारे तृतीयोद्धारे (पृ-19) सम्पूर्णं दक्षवचनं यथा—
प्रातःकाले तु सम्प्राप्ते कुर्य्यान्नक्तव्रतादिकम् ।
नापराह्णे न मध्याह्ने पितृकालौ हि तौ स्मृतौ ॥ इति ।

इत्यादिवचनात् मध्याह्नापराह्णौ सामान्यतः श्राद्धकालौ । तथाहि श्राद्धं द्विविधम् , एकोद्दिष्टं पार्वणञ्च । तदाह कण्वः[0]—

एकमुद्दिश्य यच्छ्राद्धमेकोद्दिष्टं तदुच्यते ।
त्रीनुद्दिश्य तु यच्छ्राद्धं पार्वणं मुनयो विदुः ॥[228]

यद्यप्येतौ कालौ श्राद्धोद्देशेन सामान्येन विहितौ तथाप्यवसरात्मकाः काला अपरे निर्दिष्टाः । ते च याज्ञवल्क्येन श्राद्धप्रकरणे (1/217-18) प्रतिपादिताः । तद्यथा—

अमावास्याऽष्टका वृद्धिः कृष्णपक्षोऽयनद्वयम् ।
द्रव्यं ब्राह्मणसम्पत्तिर्विषुवत्सूर्यसङ्क्रमः ॥
व्यतीपातो गजच्छाया ग्रहणं चन्द्रसूर्ययोः ।
श्राद्धं प्रति रुचिश्चैते श्राद्धकालाः प्रकीर्त्तिताः ॥ इति ।

एते कालाः पार्वणवृद्धिश्राद्धयोः कृते उक्ता इति याज्ञवल्क्यमिताक्षराकारेण विज्ञानेश्वरेण प्रतिपादितम् । एकोद्दिष्टकालानाह याज्ञवल्क्यः (1/256)—

मृतेऽहनि प्रकर्त्तव्यं प्रतिमासं तु वत्सरम् ।
प्रतिसंवत्सरं चैवमाद्यमेकादशेऽहनि ॥ इति ।

सपिण्डीकरणश्राद्धस्याष्टौ कालाः कृत्यकौमुद्यां (पृ-223) कालादर्शे दर्शिताः । तद्यथा—

एकादशे द्वादशेऽह्नि त्रिपक्षे वा त्रिमासि वा ।
षष्ठे चैकादशे त्वब्दे सम्पूर्णे वा शुभागमे ।
सपिण्डीकरणस्येत्थमष्टौ कालाः प्रकीर्त्तिताः ॥ इति ।

भारद्वाजगृह्यसूत्रेऽपि (3/17/1) उक्तं यथा—

संवत्सरे सपिण्डीकरणमेकादशे मासि षष्ठे चतुर्थे द्वादशेऽहनि । इति ।

228- कालमाधवे पित्र्यनिर्णये (पृ-119) तदुच्यते-स्थाने प्रकीर्त्तितम् , यच्छ्राद्धं-स्थाने यत्तद्धि-इति पाठान्तरेण कण्ववचनमुद्धृतम् । प्रतिपदि मृतस्य मासान्तरवर्त्तिन्यां प्रतिपद्येकोद्दिष्टरूपं मासिकं प्रसक्तम् । संवत्सरान्तरवर्त्तिन्यां तस्यां प्रतिपदि पार्वणरूपमाब्दिकं श्राद्धं प्राप्नोति । इति एकोद्दिष्टपार्वणश्राद्धद्वयं स्पष्टीकृतं तत्र माधवाचार्येण ।

0- कण्वः-स्थाने ग-पुस्तके काश्यपः-इति पाठः ।

पुनश्च श्राद्धं नित्यं नैमित्तिकं काम्यं चेति त्रिविधम्। याज्ञवल्क्यमिताक्षराकारेण विज्ञानेश्वरेण तत्र श्राद्धप्रकरणे एतत्सर्वं स्पष्टीकृतम्। तद्यथा— तत्र नित्यं नियतनिमित्तोपाधौ चोदितमहरहरमावास्याष्टकादिषु। अनियतनिमित्तोपाधौ चोदितं नैमित्तिकं यथा पुत्रजन्मादिषु। फलकामनोपाधौ विहितं काम्यं यथा स्वर्गादिकामानां कृत्तिकादिनक्षत्रेषु, तिथिषु च। इति। एतान्यतिरिच्य वृद्धिश्राद्धमपि ब्रह्मपुराणे प्रतिपादितम्। एतेषां चतुर्णां स्वरूपमुपन्यस्तं तत्र ब्रह्मपुराणे (220/11-13) यथा—

नित्यश्राद्धमदैवं च मनुष्यैः सह गीयते ॥
नैमित्तिकं सुरैः सार्धं नित्यं नैमित्तिकं तथा।
काम्यान्यन्यानि श्राद्धानि प्रतिसंवत्सरं द्विजैः ॥
वृद्धिश्राद्धं च कर्त्तव्यं जातकर्मादिकेषु च।
तत्र युग्मान् द्विजानाद्धर्मन्त्रपूर्वं तु वै द्विजाः ॥ इति।

कालसारधृतविश्वामित्रवचनानुसारं श्राद्धमेतद् द्वादशविधम्। तद्यथा—

नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धं सपिण्डनम्।
पार्वणं चेति विज्ञेयं गोष्ठ्याः शुद्ध्यर्थमष्टमम् ॥
कर्माङ्गं नवमं प्रोक्तं दैविकं दशमं स्मृतम्।
यात्रास्वेकादशं प्रोक्तं पुष्ट्यर्थं द्वादशं पुनः ॥ इति।

विज्ञानेश्वरस्तु याज्ञवल्क्यमिताक्षरायां श्राद्धप्रकरणे अहरहः श्राद्धं, पार्वणं, वृद्धिश्राद्धम्, एकोद्दिष्टं, सपिण्डीकरणं चेति श्राद्धं पञ्चविधमाह। नित्यश्राद्धमहरहरमावास्याष्टकादिषु कर्त्तव्यम्। एतद्वैश्वदेवविहीनमशक्तावुदकेन कर्तुं शक्यते। नैमित्तिकमेकोद्दिष्टश्राद्धम्। अत्रायुग्मब्राह्मणा आहवनीयार्थे स्वीक्रियन्ते। स्वर्गाद्यभिप्रेतफलसिद्धिकामनायां कृत्तिकादिनक्षत्रेषु तिथिषु च कृतं काम्यश्राद्धम्। तत्र नक्षत्रविशेषे फलमुक्तं याज्ञवल्क्येन (1/265-68) यथा—

स्वर्गं ह्यपत्यमोजश्च शौर्यं क्षेत्रं बलं तथा।
पुत्रं श्रैष्ठ्यं च सौभाग्यं समृद्धिं मुख्यतां शुभम् ॥
प्रवृत्तचक्रतां चैव वाणिज्यप्रभृतीनपि।
अरोगित्वं यशो वीतशोकतां परमां गतिम् ॥
धनं वेदान्भिषक्सिद्धिं कुप्यं गा अप्यजाविकम्।

अश्वानायुश्च विधिवद्यः श्राद्धं संप्रयच्छति ॥
कृत्तिकादिभरण्यन्तं स कामानाप्नुयादिमान् ।
आस्तिकः श्रद्धानश्च व्यपेतमदमत्सरः ॥ इति ।

ब्रह्मपुराणेऽपि (220/33-42)—

कृत्तिकासु पितॄनर्च्य स्वर्गमाप्नोति मानवः ॥
अपत्यकामो रोहिण्यां सौम्ये तेजस्वितां लभेत् ।
शौर्यमार्द्रासु चाऽऽप्नोति क्षेत्राणि च पुनर्वसौ ॥
पुष्ये तु धनमक्षय्यमाश्लेषे चाऽऽयुरुत्तमम् ।
मघासु च प्रजां पुष्टिं सौभाग्यं फाल्गुनीषु च ।
प्रधानशीलो भवति सापत्यश्चोत्तरासु च ।
प्रयाति श्रेष्ठतां शास्त्रे हस्ते श्राद्धप्रदो नरः ॥
रूपं तेजश्च चित्रासु तथाऽपत्यमवाप्नुयात् ।
वाणिज्यलाभदा स्वाती विशाखा पुत्रकामदा ॥
कुर्वतां चानुराधासु ता दद्युश्चक्रवर्त्तिताम् ।
आधिपत्यं च ज्येष्ठासु मूले चाऽऽरोग्यमुत्तमम् ॥
आषाढासु यशःप्राप्तिरुत्तरासु विशोकता ।
श्रवणेन शुभाँल्लोकान्धनिष्ठासु धनं महत् ॥
वेदवित्त्वमभिजिति भिषक्सिद्धिं च वारुणे ।
अजाविकं प्रौष्ठपद्यां विन्देद् गावस्तथोत्तरे ॥
रेवतीषु तथा कुप्यमश्विनीषु तुरङ्गमान् ।
श्राद्धं कुर्वंस्तथाऽऽप्नोति भरणीष्वायुरुत्तमम् ॥
एवं फलमवाप्नोति ऋक्षेष्वेतेषु तत्त्ववित् ।
तस्मात्काम्यानि श्राद्धानि देयानि विधिवद् द्विजाः ॥ इति ।

श्राद्धकरणे तिथिविशेषे फलविशेषमाह याज्ञवल्क्यः (1/262-64) यथा—

कन्यां कन्यावेदिनश्च पशून्वै तत्सुतानपि ।
द्यूतं कृषिं वणिज्यां च द्विशफैकशफांस्तथा ॥
ब्रह्मवर्चस्विनः पुत्रान् स्वर्णरूप्ये सकुप्यके ।
ज्ञातिश्रैष्ठ्यं सर्वकामानाप्नोति श्राद्धदः सदा ॥
प्रतिपत्प्रभृतिष्वेका वर्जयित्वा चतुर्दशीम् ।
शस्त्रेण तु हता ये वै तेभ्यस्तत्र प्रदीयते ॥ इति ।

अपरपक्षे तिथिविशेषे श्राद्धफलमुक्तं ब्रह्मपुराणे (220/14-22), यथा—

कन्यां गते सवितरि दिनानि दश पञ्च च ।
पूर्वेणैवेह विधिना श्राद्धं तत्र विधीयते ॥
प्रतिपद्धनलाभाय द्वितीया द्विपदप्रदा ।
पुत्रार्थिनी तृतीया तु चतुर्थी शत्रुनाशिनी ॥
श्रियं प्राप्नोति पञ्चम्यां षष्ठ्यां पूज्यो भवेन्नरः ।
गणाधिपत्यं सप्तम्यामष्टम्यां बुद्धिमुत्तमाम् ॥
स्त्रियो नवम्यां प्राप्नोति दशम्यां पूर्णकामताम् ।
वेदांस्तथाऽऽप्नुयात्सर्वानेकादश्यां क्रियापरः ॥
द्वादश्यां जयलाभं च प्राप्नोति पितृपूजकः ।
प्रजावृद्धिं पशुं मेधां स्वातन्त्र्यं पुष्टिमुत्तमाम् ॥
दीर्घायुरथवैश्वर्यं कुर्वाणस्तु त्रयोदशीम् ।
अवाप्नोति न सन्देहः श्राद्धं श्रद्धासमन्वितः ॥
यथासम्भविनाऽन्नेन श्राद्धं श्रद्धासमन्वितः ।
युवानः पितरो यस्य मृताः शस्त्रेण वा हताः ॥
तेन कार्यं चतुर्दश्यां तेषां तृप्तिमभीप्सता ।
श्राद्धं कुर्वन्नमावास्यां यत्नेन पुरुषः शुचिः ॥
सर्वान् कामानवाप्नोति स्वर्गं चानन्तमश्नुते । इति ।

पार्वणविधानेन काम्यश्राद्धं कर्त्तव्यम् । पुत्रजन्मादिषु वृद्धिश्राद्धमुक्तम् । गन्धोदकतिलैर्युक्तं पात्रचतुष्टयमर्घ्यार्थं कृत्वा तत्र प्रेतपात्रजलं त्रिधा विभज्य पितृपात्रत्रये 'ये समानाः समनसः' इति मन्त्राभ्यां सेचयेदिति सपिण्डनश्राद्धम् । प्रतिपादितमेतद् याज्ञवल्क्येन (1/253-54), यथा—

गन्धोदकतिलैर्युक्तं कुर्यात्पात्रचतुष्टयम् ।
अर्घ्यार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत् ॥
ये समाना इति द्वाभ्यां शेषं पूर्ववदाचरेत् ।
एतत्सपिण्डीकरणम् ....॥ इति ।

सापिण्ड्ये पिण्डभागिनः पित्राद्यास्त्रय एव । चतुर्थादीनां त्रयाणां लेपभागित्वं च सिद्धान्तितम् । पर्वणि अमावास्यायां यत्क्रियते तत्पार्वणम् । गोष्ठ्यां यच्छ्राद्धं क्रियते तद् गोष्ठीश्राद्धम् । सम्पत् सुखार्थं पितृतृप्तये शुद्धये ब्राह्मणभोजनं यत्क्रियते तत् शुद्धिश्राद्धम् । निषेकादिशारीरसंस्कारेषु सोमयागे च

तदुभयमपि प्रत्येकमामरूपं[229] पक्वरूपञ्चेति चतुर्धा । आमत्वञ्च श्राद्ध-

यच्छ्राद्धं क्रियते तत् कर्माङ्गश्राद्धम् । सप्तम्यादितिथिषु देवानुद्दिश्य हविष्येण यच्छ्राद्धं क्रियते तद् दैविकश्राद्धम् । देशान्तरगमनावसरे सर्पिषा सम्पादितं यात्राश्राद्धम् । अर्थाद्युपचये विहितं पुष्टिश्राद्धमिति सर्वं सुस्थितम् । कालसार-धृतभविष्ये सर्वमेतद्विवृतमस्ति ।

229- पाकं विना दीयमानमन्नमामम् । तत्तु तण्डुलादि कथ्यते आपस्त-म्बधर्मसूत्रव्याख्याने (1/6/18/1) उज्ज्वलावृत्तिकारेण हरदत्तेन । कालसारे श्राद्धप्रकरणे वसिष्ठेनाप्युक्तं यथा—

शस्यं क्षेत्रगतं प्राहुः सतुषं धान्यमुच्यते ।
आमं वितुषमित्युक्तं स्विन्नमन्नमुदाहृतम् ॥ इति ।

दातुरशुचित्वे आमश्राद्धस्य प्रसरः साधारण्येनोक्तः । विघ्नादिविशिष्टावसरः प्रतिपाद्यतेऽत्र श्राद्धक्रियाकौमुदी (पृ-26-28) कारेण गोविन्दानन्देन, यथा—

लघुहारीतः—

श्राद्धविघ्ने द्विजातीनामामश्राद्धं प्रकीर्त्तितम् ।

पाकसामग्र्यभावेनाशक्त्यादिना वा श्राद्धविघ्ने सतीत्यर्थः । उशनाः—

आत्मनो देशकालानां विप्लवे समुपस्थिते ।
आमश्राद्धं द्विजैः कार्यं शूद्रेण तु सदैव हि ॥

प्रचेताः—

आपद्यनग्नौ तीर्थे च चन्द्रसूर्यग्रहे तथा ।
आमश्राद्धं द्विजैः कार्यं शूद्रेण तु सदैव हि ॥

× × ×

ब्रह्मपुराणे—

स्त्रीभिर्वर्णावरैः शूद्रैर्देयं विप्रानुशासनात् ।
मन्त्रवद् विधिपूर्वं हि वह्निपाकविवर्जितम् ॥

यच्च, भार्याऽभावे द्विजाभावे प्रवासे पुत्रजन्मनि ।
आमश्राद्धं द्विजैः कार्यं यस्य भार्या रजस्वला ॥
अपत्नीकः प्रवासी च यस्य भार्या रजस्वला ।
सिद्धान्नेन न कुर्वीत आमं तस्य विधीयते ॥

इति नामशून्यं वचनद्वयं तदमूलम्........ । इति ।

भोजनयोग्यत्वे सति स्मृतिसिद्धपक्वताविरहवत्त्वम् । तेन मत्स्यमांसयोस्त-
दयोग्यत्वान्नामत्वम् । अतः श्राद्धमनामिषमिति तु पक्वश्राद्धे सावकाशम् ।
"शकृत्संप्रविध्यति , लोहितं निरस्यति ।" इत्यादौ शकृल्लोहितयोरभोज्य-
त्वेन[0] पश्वालम्भाप्रयोजकत्व[230]वन्मांसस्यापक्वतायामभोज्यत्वेनामश्राद्धा-

---

230- शकृल्लोहितयोः पश्वालम्भाप्रयोजकत्वं 'पशावनालम्भाल्लोहित-शकृतोरकर्मत्वम् ।' इति जैमिनीयसूत्रे (4/1/27) विचारितम् । तत्र भाष्य-कारेणोक्तं यथा—

अस्ति ज्योतिष्टोमे पशुरग्निषोमीयः । तत्र श्रूयते । हृदयस्याग्रेऽवद्यत्यथ जिह्वाया इत्येवमादि । तथा, लोहितं निरस्यति, शकृत् संप्रविध्यति, स्थवि-मतो बर्हिरङ्क्त्वाऽपास्यतीति । तत्र सन्देहः । किं हृदयादिभिरवदानैरिज्या पशोः प्रयोक्त्री, उत शकृत्संप्रव्याधो लोहितनिरसनं च तदपि प्रयोजकमिति । किं प्राप्तम् । एकनिष्पत्तेः सर्वं समं स्यात् । उभयं प्रयोजकमिति । एवं प्राप्ते ब्रूमः । पशौ शकृल्लोहितयोरप्रयोजकत्वम् । न हि तदर्थः पशोरालम्भः । शकृत् संप्रविध्यति, लोहितमपास्यतीत्युच्यते । न पशोरन्यस्य वेति । पशु-रग्निषोमीये वाक्येन, यो दीक्षितो यदग्निषोमीयं पशुमालभते, इति । शकृल्लोहिते पशोः प्रकरणेन भवेतां, प्रकरणं च वाक्येन बाध्यते । नन्वेते शकृल्लोहिते प्रतिपाद्येते ; तेन यागार्थस्य पशोर्नान्यस्येति निश्चयः । एवं चेदप्रयोजके शकृल्लोहिते इति । किं भवति प्रयोजनम् । साम्ये सति शकृल्लोहिताभावेऽन्यः पशुरालम्भनीयः, शकृल्लोहितयोरप्रयोजकत्वे लोपः । इति ।

माधवाचार्योऽपि जैमिनीयन्यायमालायां (4/1/12) प्रतिपादयति यथा—

> हृदादिः शकृदादिश्च पश्वालम्भप्रयोजकः ।
> हृदादिरेव वाद्योऽस्तु प्रकृतस्तेन साम्यतः ॥
> हविषो यागशेषत्वाद्धृदादेर्हविरात्मनः ।
> प्रयोजकत्वं तस्यैव नेतरस्यातथात्वतः ॥ इति ।

स्वकीयविस्तरव्याख्यायामपि स प्रतिपादयति यथा—अग्निषोमीयपशौ श्रूयते । हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षस इति । तथान्यदपि श्रुतम् । शकृत्संप्रविध्यति , लोहितं निरस्यतीति । तत्र हृदयादीनां शकृदादीनां च

0- हविष्याभावात्—इति ग-पुस्तकेऽत्राधिकपाठः ।

नर्हत्वात् । अतएव मांसाष्टकायां शूद्रस्य नाधिकार इति प्रवादः संगच्छते । गोधूमामिक्षादेर्लौकिकपक्वत्वेऽपि

विनोदकेन यत्पक्वं यत्पक्वं लवणं विना ।
अपक्वं तद्धि जानीयात् ....॥

इत्यादिस्मृत्या पक्वतानिषेधाच्छास्त्रीयमामत्वमक्षतम् ।

हारीतः[231]—

आमश्राद्धं तु पूर्वाह्ने[0] एकोद्दिष्टं तु मध्यतः ।
पार्वणं त्वपराह्ने स्यात्प्रातर्वृद्धिनिमित्तकम् ॥ इति ।

मनु[232]रपि—

पूर्वाह्ने दैविकं श्राद्धमपराह्ने तु पार्वणम् ।

प्रातरिति तूपनयनविवाहादौ । पुत्रजन्मादौ वृद्धिश्राद्धं तु पुत्रजन्मलग्नानन्तरं कार्यम् ।[233]

प्रकरणपाठसाम्यात् पशुसाध्यत्वसाम्याच्च हृदयादिवच्छकृदादिकमपि पश्वालम्भस्य प्रयोजकमिति चेत् । मैवम् । पशुयागो हि हविःसाध्यः । हविष्ट्वं चात्तुं योग्यत्वाद्धृदयादीनामेव, न त्वयोग्ययोः शकृल्लोहितयोः । तस्माद्धृदयादिरेव प्रयोजकः । शकृत्संप्रवेधो लोहितनिरसनं चेत्येतदुभयं शेषप्रतिपात्तमात्रम् । इति ।

231- 'पार्वणश्चापराह्ने तु' इति कालमाधव (पृ-96) धृतहारीतवचने तृतीयचरणे पाठः । वृद्धिः पुत्रजन्मादिः । इति श्राद्धचन्द्रिकायाम् (पृ-7) उपन्यस्तम् ।

232- मुद्रितमनुस्मृतौ वचनमिदं नोपलभ्यते । किन्तु कालमाधवे प्रतिपत्प्रकरणे (पृ-96) उद्धृतं सम्पूर्णं मनुवचनं यथा—

पूर्वाह्ने दैविकं श्राद्धमपराह्ने तु पार्वणम् ।
एकोद्दिष्टन्तु मध्याह्ने प्रातर्वृद्धिनिमित्तकम् ॥ इति ।

233- कृत्यकौमुदीकारेण बृहस्पतिना एकोद्दिष्टश्राद्धकालप्रकरणे (पृ-215) प्रतिपादितमित्थम्, यथा—श्राद्धं निमित्तपुत्रजन्मादिलग्नानन्तरं कार्यम् । उपनयनादि प्रति नियतकालनिमित्तकं च प्रातः । इति ।

0- पूर्वाह्ने-स्थाने मध्याह्ने इति ग-पुस्तके पाठः ।

वृद्धिश्राद्धं तु लाग्निकम् ।[234]

इति वचनात् । तच्च दिवा रात्रौ वा । विवाहसङ्क्रमादौ तद्विषयत्वज्ञाना-द्दिवैव न रात्रौ ।

रात्रौ सङ्क्रमणे भानोर्दिनार्धं स्नानदानयोः ।[235]

इति वचनात् । श्राद्धस्य दानरूपत्वादिति विप्रमिश्राः[236] ।[0]

234- कृत्यकौमुद्यामेकोद्दिष्टश्राद्धकालप्रकरणे (पृ-215) सम्पूर्णं राज-मार्त्तण्डवचनं यथा—

आमपात्रं तु पूर्वाह्णे एकोद्दिष्टं तु मध्यतः ।
पार्वणं चापराह्णे तु वृद्धिश्राद्धं तु लाग्निकम् ॥ इति ।

वृद्धिश्राद्धं साधारण्येनोपन्यस्तं श्राद्धचन्द्रिकायाम् (पृ-5), यथा—भविष्यपुराणे—

वृद्धौ यत्क्रियते श्राद्धं वृद्धिश्राद्धं तदुच्यते ।
सर्वं प्रदक्षिणं कार्यं पूर्वाह्णे तूपवीतिना ॥ इति ।

वृद्धौ मात्रादिक्रमेण श्राद्धत्रयं सम्पाद्यते, तदुक्तं श्राद्धप्रदीपे क्रमालोके (पृ-50) शातातपवचनात् , यथा—

मातृश्राद्धं तु पूर्वं स्यात्पितॄणां तदनन्तरम् ।
ततो मातामहानां च वृद्धौ श्राद्धत्रयं स्मृतम् ॥ इति ।

235- सङ्क्रान्तिपुण्यकालनिर्णये माधवाचार्येण कालमाधवे (पृ-18) कथ्यते यथा—

अहः सङ्क्रमणे रात्रावनुष्ठाननिषेधतः ॥
उक्तौ कालौ व्यवस्थाप्यौ तद्वशात्पूर्वपश्चिमौ ।
रात्रौ सङ्क्रमणे भानोर्दिनार्धं स्नानदानयोः ॥ इति ।

वृद्धवसिष्ठवचनमपि प्रसङ्गेऽस्मिन् तेनोद्धृतम् । तद्यथा (पृ-274)—

अह्नि सङ्क्रमणे पुण्यमहः कृत्स्नं प्रकीर्त्तितम् ।
रात्रौ सङ्क्रमणे भानोर्दिनार्धं स्नानदानयोः ॥ इति ।

236- श्राद्धस्वरूपं प्रतिपादयन् श्राद्धप्रदीपकारो विप्रमिश्रः (पृ पृ-8-15) आह यथा—

0- विवाहसङ्क्रमादौ........विप्रमिश्राः । इति भागः ख-पुस्तके नास्ति ।

एतच्च श्राद्धं दानमेव । ननु स्वस्वत्वध्वंसपरस्वत्वापत्तिफलकत्यागस्य दानत्वात् गयाश्राद्धादौ तदभावात् कथं दानतेति चेत् , परस्वत्वापत्तेः दानपदार्थान्तर्गतत्वात् प्रतिग्रहस्य वृत्त्यर्थत्वेन प्राप्तत्वात् विधेयत्वाभावात् । न चैवं प्रीतिदत्तादिस्वीकार इव मन्त्रादिनियमो न स्यादिति वाच्यम् । भोजनादौ दिङ्मुखनियमस्यैवादृष्टार्थत्वात् ।..........वस्तुतः प्रतिग्रहस्याङ्गत्वादङ्गानां प्रधानदेशकालान्वयित्वाद् दानकाले प्रतिग्रहाननुष्ठाने वैगुण्यमन्यथा समग्रफलम् । वचनात्तु परोक्षदानस्थले काम्यकर्मण्यप्यङ्गवैगुण्ये फलमिति । मैथिलास्तु यागदानहोमविलक्षणम् उत्सर्गाभिधमपि त्यागमाहुः । पुष्करिण्युत्सर्गादावाब्रह्मस्तम्बपर्यन्तानां स्वीकाराभावेन दानत्वाभावात् । अयमेव न्यायः परोक्षदानस्थले इति । तत्सिद्धं श्राद्धस्य दानत्वम् । इति ।

श्राद्धदीपकारो दिव्यसिंहमहापात्रश्च श्राद्धस्य दानरूपत्वं यागरूपत्वंचोभयं विवेचयति । तद्यथा (पृ पृ-1-2)—

श्राद्धं नाम पितॄनुद्दिश्य द्रव्यत्यागः । तत्र ब्राह्मणभोजनं पिण्डदानं चोभयं प्रधानमिति बहवः । अतएव,

अग्नौ हुतेन देवास्तथाः पितॄस्तथा द्विजतर्पणैः ।
नरकास्थाश्च तृप्यन्ति पिण्डैर्दत्तैस्त्रिभिर्भुवि ॥

इति पिण्डदानब्राह्मणभोजनयोः समकक्षतया फलश्रवणम् ।...........वस्तुतस्तु पितॄनुद्दिश्य द्रव्यत्याग एव प्रधानम् । पिण्डदानं ब्राह्मणभोजनं सर्वमङ्गम् । तस्य श्राद्धस्य दानरूपत्वम् । न च स्वस्वत्वध्वंसपरस्वत्वापत्तिफलकत्यागस्य दानत्वात् गयाश्राद्धादौ तदभावात् कथं दानत्वमितिवाच्यम् । परस्वत्वापत्तेर्दानपदार्थान्तर्गतत्वात् प्रतिग्रहस्य वृत्त्यर्थत्वेन प्राप्तत्वाद् विधेयत्वाभावात् । अतएव पारस्करसूत्रे पित्रा प्रत्तामादायेत्युक्तम् । अन्यथा प्रत्तामित्यनेन प्रतिग्रहसिद्धेरादायेति व्यर्थं स्यात् । तस्मात् श्राद्धस्य दानत्वं सिद्धम् ।

× × ×

श्राद्धेऽपि देवतोद्देशद्रव्यत्यागस्य श्राद्धपदार्थत्वाद् ब्राह्मणस्याहवनीयादिवत् प्रक्षेपाधारत्वात् श्राद्धद्रव्यस्वीकारस्य न प्रतिग्रहरूपत्वम् । पितृभ्यो दद्यादिति दानश्रुतावपि पितॄणां प्रतिग्रहीतृत्वाभावात् ब्राह्मणस्य प्रतिग्रहीतृत्वेऽपि दानविधावुद्देश्यत्वाभावात् । उद्देश्यत्वे सति प्रतिग्रहीतुरेव सम्प्रदानत्वात् । सम्प्रदानरहिते ददात्यर्थस्याभावात् श्राद्धस्य यागरूपत्वमेव । इति ।

विश्वामित्रः[237]—

देवानुद्दिश्य क्रियते यत्तद् दैविकमुच्यते ।
तन्नित्यश्राद्धवत्कुर्याद् द्वादश्यादिषु शस्यते ॥

ब्राह्मणादित्रिवर्णानां विदेशतीर्थ[0]जायारजःप्रभृतिषु अमावास्याभिन्नमामश्राद्धं पूर्वाह्णान्तं कृत्यम् । अमायामामश्राद्धस्यापि चन्द्रक्षयविशिष्टापराह्णे विहित-

---

कालसारकारो गदाधरश्च श्राद्धस्वरूपनिरूपणे श्राद्धस्य दानरूपत्वं न तावद् यागरूपत्वमिति प्रतिपादयन् आह —

श्राद्धमिति शब्दो वाचको यस्य तत्तथा । ब्राह्मणास्त्वाहवनीयार्थ इति त्यक्तद्रव्यप्रतिपत्तिस्थानत्वेनेत्यर्थः । तथा च पितॄनुद्दिश्य द्रव्यत्यागो विप्र-स्वीकारपर्यन्तः श्राद्धमिति लक्षणम् । विष्टरब्राह्मणश्राद्धेऽपि पश्चाद् ब्राह्मण-स्वीकाराल्लक्षणसमन्वयः ।...........तत्सिद्धं श्राद्धस्य दानत्वम् ।...........ननु पितॄन् यजेत इति श्रुतेः श्राद्धस्य यागत्वमिति चेन्न । तत्र यजतेर्दानार्थत्व-पक्षाश्रयणात् ।...........एतेन यजेत इति वचनमवलम्ब्य श्राद्धस्य त्यागत्वं यागदानोभयरूपत्वं चेति युक्तिकालं वितत्य वदन्तो निरस्ता एव । इति ।

विज्ञानेश्वरेणापि याज्ञवल्क्यमिताक्षरायां श्राद्धप्रकरणे श्राद्धस्य दानत्वं प्रतिपादितम् । तद्यथा—

श्राद्धं नामादनीयस्य तत्स्थानीयस्य वा द्रव्यस्य प्रेतोद्देशेन श्रद्धया त्यागः । इति ।

अतएव श्राद्धस्य सर्वश्रेष्ठदानत्वं सिद्धम् । अत्रिणोक्तमिदं सविस्तरम् । तद्यथा (श्लो० 362-366)—

सर्वशास्त्रार्थगमनं सर्वतीर्थावगाहनम् ॥
सर्वयज्ञफलं विद्याच्छ्राद्धदानान्न संशयः ॥
महापातकसंयुक्तो यो युक्तश्चोपपातकैः ।
घनैर्मुक्तो यथा भानू राहुमुक्तश्च चन्द्रमाः ॥
सर्वपापविनिर्मुक्तः संतापं च विलङ्घयेत् ।
सर्वसौख्यमयं प्राप्तः श्राद्धदानान्न संशयः ॥
सर्वेषामेव दानानां श्राद्धदानं विशिष्यते ।
मेरुतुल्यं कृतं पापं श्राद्धदानं विशोधनम् ॥ इत्यादि ।

0- विदेशतीर्थयात्रायां रजः-इति ग-पुस्तके पाठः ।

त्वात् । तच्च सपिण्डीकरणानन्तरं मासिकाब्दिकभिन्नम् ।

मासंसंवत्सरादृते ।[238]

सपिण्डीकरणादूर्ध्वमामश्राद्धं विधीयते ।[239]

इत्यादिवचनात् । आमश्राद्धं त्विति तु-शब्दः शूद्रव्यवच्छेदकः । तथा हि यस्य श्राद्धमामं पक्वरूपञ्चेति द्विविधं प्राप्तं तस्य पुनरामश्राद्धं पूर्वाह्ण एवेत्यर्थात्[240] । तेन

आमं शूद्रस्य पक्वान्नं शूद्रः कुर्यात् सदैव हि ।[241]

इति वचनाच्छूद्रस्य मासिकाब्दिकं सर्वमामश्राद्धं वक्ष्यमाणपार्वणैकोद्दिष्टकालानुसारेण कार्यं न तु पूर्वाह्ण इति गोपीनाथादयः । आदित्यसूरिणा तु शूद्राणामप्यामश्राद्धं पूर्वाह्ण एवेत्युक्तम् । तत्तु न सामाचारिकम् । योगिनीतन्त्रे[242]—

237- शस्यते- स्थाने यत्नतः इति कालमाधवे (पृ-97) धृतपाठः ।

238- द्रष्टव्या पादटिप्पणी-229 ।

239- श्राद्धदीपे (पृ-74) सम्पूर्णवचनं यथा—

अपत्नीकोऽपि सिद्धान्नैः कुर्याच्छ्राद्धानि षोडश ।
सपिण्डीकरणादूर्ध्वमामश्राद्धं विधीयते ।। इति ।

240- शूद्रातिरिक्तानामन्येषां वर्णानामामश्राद्धं पक्वश्राद्धं चेत्युभयविधश्राद्धं प्रशस्तम् । तैरामश्राद्धं पूर्वाह्णे कर्त्तव्यम्, एकोद्दिष्टपार्वणश्राद्धद्वयं च यथाक्रमं मध्याह्नापराह्णयोः कर्त्तव्यम् । किन्तु केवलमामश्राद्धे शूद्रस्याधिकारवशात्तेन तदपराह्णे कर्त्तव्यम् । श्राद्धचन्द्रिकाकारेण (पृ-74) अपि शूद्रकर्तृकनित्यामश्राद्धं त्वपराह्णे कार्यम् । इत्युक्तम् ।

241- श्राद्धक्रियाकौमुद्यां श्राद्धवर्ज्यप्रकरणे (पृ-32) देवलवचनं यथा—

आमं शूद्रस्य पक्वान्नं पक्वमुच्छिष्टमुच्यते । इति ।

शूद्रस्यामश्राद्धकर्त्तव्यता 229 तमपादटिप्पण्यां प्रतिपादिता ।

242- योगिनीतन्त्रे द्वितीयभागे पञ्चमपटले (श्लोकः-291) भगवतोक्तमेतत् । निरग्निः शूद्रोऽग्न्यभावी द्विजो वा, 'यत्तु,

आमश्राद्धप्रदोऽनग्निः सर्वत्राहुर्मनीषिणः ।

निरग्नेरामश्राद्धे तु अन्नं न क्षालयेत्क्वचित् ।
वृद्धौ च क्षालयेदन्नं सङ्क्रमे[0] ग्रहणेषु च ।।

मासिकोनसांवत्सरिकान्तं सर्वमेकोद्दिष्टम् ।

सपिण्डीकरणादर्वाग् यानि श्राद्धानि षोडश[243] ।
एकोद्दिष्टविधानेन कुर्याच्छ्राद्धानि तानि तु ।।

इति पैठीनसि[244]वचनात् ।[00] सन्यासिनामेव तानिषोडशश्राद्धानि पार्वणानि ।

इति जाबालनामकं वचनं यदि समूलं तदपि पाकोपयुक्तागन्यभावपरं शूद्रपरं वा मन्तव्यम् । इति श्राद्धक्रियाकौमुद्यां श्राद्धवर्ज्यप्रकरणे (पृ-28) ग्रन्थकारेण गोविन्दानन्देनोक्तत्वात् । शूद्रस्य मन्त्रवर्जितं पाकवर्जितं च श्राद्धमुक्तं योगिनीतन्त्रे तत्रैव, यथा—

त्रिभिर्वर्णैर्वरैः शूद्रैर्देयं विप्रानुशासनात् ।
मन्त्रवर्जश्च विधिवद् वह्निपाकविवर्जितम् ।। 328 ।। इति ।

ग्रन्थोक्त आमशब्द आमतास्तुतिपरः, अन्यथा वचनस्यास्यानावश्यकत्वम् ।

243- षोडश श्राद्धानि यथा याज्ञवल्क्यमिताक्षरायाम् (1/255)—

द्वादशाहे त्रिपक्षे च षण्मासे मासि चाब्दिके ।
श्राद्धानि षोडशैतानि संस्मृतानि मनीषिभिः ।। इति ।

कात्यायनोऽपि (24-8)—

द्वादश प्रतिमास्यानि आद्यं षाण्मासिके तथा ।
सपिण्डीकरणं चैव एतद्वै श्राद्धषोडशम् ।। इति ।

244- कालमाधवे (पृ-120) यानि-स्थाने कुर्वन्-इतिपाठः । द्वादशाहे सपिण्डीकरणेऽत्र व्यवस्थामाह माधवाचार्यो यथा—यदा तु द्वादशाहादौ सपिण्डीकरणं तदा तस्मात्पूर्वं यस्मिन् कस्मिन्नपि वा दिने मासिकान्यापकृष्यानुष्ठेयानि । सोऽयमनुकल्पः । इति ।

0- क्रमेण-इति ग-पुस्तके पाठः ।

00- अयं च मुख्यकल्पः । द्वादशाहत्रिपक्षादौ सपिण्डीकरणापकर्षेऽत्र कृतापि दिने तत्पूर्वं वा मासिकाकरणे त्वनुकल्पः । उभयथा षोडशश्राद्धान्येकोद्दिष्टान्येव न तु पार्वणानीत्याशयः । इति ख-ग-पुस्तकद्वयेऽत्राधिकपाठः ।

तेषां सपिण्डीकरणाभावेन तद्वचनाप्रवृत्तेः[245] । वार्षिकश्राद्धमपि कुलपरम्पर-येच्छाविकल्पाद्वा[0] एकोद्दिष्टम् । अमाप्रेतपक्षयुगाद्यष्टकासु[246] पतितं मृताहश्राद्धं

245- सन्यासिनामेकोद्दिष्टसपिण्डीकरणश्राद्धाभावः प्रतिपादितो विज्ञानेश्वरेण याज्ञवल्क्यमिताक्षरायाम् (1/255) यथा—इदञ्च प्रेतश्राद्धसहितं सपिण्डीकरणमसन्यासिनां पुत्रादिभिर्नियमेन कर्त्तव्यम् , प्रेतत्वविमोक्षार्थत्वात् सन्यासिनां तु न कर्त्तव्यम् । यथाहोशनाः—

एकोद्दिष्टं न कुर्वीत यतीनां चैव सर्वदा ।
अहन्येकादशे प्राप्ते पार्वणं तु विधीयते ॥
सपिण्डीकरणं तेषां न कर्त्तव्यं सुतादिभिः ।
त्रिदण्डग्रहणादेव प्रेतत्वं नैव जायते ॥ इति ।

यतीनामेकोद्दिष्टं न कुर्वीत । इति विप्रमिश्रादिभिश्चाप्युक्तम् ।

246- युगादिचतुष्टयं निरूपितं कालसारे ब्राह्मे, यथा—

वैशाखशुक्लपक्षे तु तृतीयायां कृतं युगम् ।
कार्त्तिके शुक्लपक्षे तु त्रेता च नवमेऽहनि ॥
तथा भाद्रपदे कृष्णत्रयोदश्यां च द्वापरम् ।
माघे तु पौर्णमास्यां च घोरं कलियुगं स्मृतम् ॥
युगारम्भास्तु तिथयो युगाद्यास्तेन विश्रुताः ॥ इति ।

भाद्रकृष्णत्रयोदश्यामिति शुक्लादिमासाश्रयणेनाश्विनकृष्णत्रयोदश्यामित्यर्थः । भविष्ये—

वैशाखशुक्लस्य तु या तृतीया नवम्यसौ कार्त्तिकशुक्लपक्षे ।
नभस्यमासस्य तमिस्रपक्षे त्रयोदशी पञ्चदशी च माघे ॥
एता युगाद्याः कथिताः पुराणे अनन्तपुण्यास्तिथयश्चतस्रः ।
पानीयमप्यत्र तिलैर्विमिश्रं दद्यात्पितृभ्यः प्रायतो मनुष्यः ॥
श्राद्धं कृतं तेन समाः सहस्रं रहस्यमेतत्पितरो वदन्ति ॥ इति ।

अष्टकाश्चतस्रः,

हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकाः ।

इति आश्वलायनगृह्यसूत्र (2/4/1) वचनात् ।

0- क्वचित्-इति ख-ग-पुस्तकद्वयेऽत्राधिकपाठः ।

कालकामधूरिलोचनदेवता[247]कमादिश्राद्धान्तभूतमेव पार्वणम् । बहुव्यापितयाऽमादिश्राद्धानां तन्त्रत्वेन मृताहस्य तत्रान्तर्भावात् ।

अमायां वा क्षयो यस्य प्रेतपक्षे विशेषतः ।
पार्वणं तस्य कर्त्तव्यं नैकोद्दिष्टं कदाचन ॥

इति यौक्तिकवाक्यात्[248] । विशेषत इत्यष्टकाऽन्वष्टकायुगाद्युपलक्षणार्थम् । कदाचनेतिपदं क्षयं विनाऽशौचमलमासवशादमादौ वार्षिककरणेऽपि पार्वण-[0]बोधार्थम् ।[00]अपुत्रस्त्रीपुंसाममावास्याप्रेतपक्षश्राद्धादिकं निरग्निकर्तृकं चेदेकोद्दिष्टम्[249] । शस्त्रहतानां चतुर्दश्यामापरपक्षिकं श्राद्धमेकोद्दिष्टम्[250] ।

247- श्राद्धानुसारेण देवताः स्मृत्यन्तरे सूचिताः, ता यथा—

इष्टिश्राद्धे क्रतुर्दक्षः सङ्कीर्त्त्यौ वैश्वदेविकः ।
नान्दीमुखे सत्यवसू काम्ये च धुरिलोचनौ ॥
पुरुरवा आर्द्रवाश्च पार्वणे समुदीरितौ ।
नैमित्तिके कालकामावेवं सर्वत्र कीर्त्तयेत् ॥ इति ।

248- स्मृतिसारसङ्ग्रहे (पृ-154) अमावस्यां क्षयो यस्य—इति प्रथमचरणे शङ्खवचनपाठः ।

249- अपुत्रस्त्रीपुंसां मरणे आपस्तम्बवचनानुसारमेकोद्दिष्टश्राद्धं प्रतिपादितं श्राद्धकल्प-कारेण श्रीदत्तेन अपरपक्षतिथिषु काम्यश्राद्धप्रकरणे (पृ-67) यथा—

अपुत्रा ये मृता केचित् स्त्रियो वा पुरुषाश्च ये ।
तेषामपि च देयं स्यादेकोद्दिष्टं न पार्वणम् ॥ इति ।

250- विषशस्त्रादिहतानामपरपक्षे चतुर्दश्यामेकोद्दिष्टश्राद्धमुपन्यस्तं श्राद्धकल्पे (पृ पृ-48-50) श्रीदत्तेन । तद्यथा—

विषशस्त्रश्वापदादितिर्यग्ब्राह्मणघातिनाम् ।
चतुर्दश्यां भवेत्पूजा अन्येषां तु विगर्हिता ॥

इति मरीचिवचनात् । देवीपुराणे—

आहवेषु विपन्नानां जलाग्निभृगुपातिनाम् ।
चतुर्दश्यां भवेत्पूजा अमावास्यां तु कामिकी ॥

0- अमाप्रेतपक्षयुगा....पार्वणबोधार्थम् । इति भागः ख-ग-पुस्तकद्वये नास्ति ।

00- अपुत्रा वा मृताः केचिदित्यापस्तम्बस्मृत्या तु-इति ख-ग-पुस्तकद्वयेऽत्राधिकपाठः ।

विदेशस्थपुष्पवद्दारकयोः श्राद्धं भीष्मश्राद्ध[251]मपि तथा । एवमेकोद्दिष्टान्तरं वचनैरुन्नेयम् । यत्तु गोपीनाथवाजपेयिभिरुक्तम्—

शूद्राणां मृताहे त्वेकोद्दिष्टमेव नियतं न तु पार्वणम् । वाजसनेयिनां प्रायश एकोद्दिष्टस्य विकल्पितत्वात् । शूद्रा वाजसनेयिन इति शूद्राणां तदतिदेशात् ।

एकोद्दिष्टं तु शूद्राणां मृताहे श्राद्धमिष्यते ।

इति वचनाच्चेति , तदयुक्तम् ।

औरसक्षेत्रजौ पुत्रौ विधिना पार्वणेन तु ।[252]

........चतुर्दश्यां तु यच्छ्राद्धं सपिण्डीकरणे कृते ।
तदेकोद्दिष्टविधिना कर्त्तव्यं शस्त्रघातिनाम् ॥

इति गौडीयवाक्यम् .... । इति ।

251- भीष्मश्राद्धं भीष्माष्टमीश्राद्धम् । तस्यैकोद्दिष्टत्वं निरूपितं कालसारे । तद्यथा—

माघमासं प्रकृत्य धवलसङ्ग्रहे—

अष्टम्यां च सिते पक्षे भीष्माय च तिलोदकम् ।
अन्नं च विधिवद् दद्युः सर्वे वर्णा द्विजातयः ॥

........अस्य श्राद्धस्य एकोद्दिष्टकालत्वात् एकोद्दिष्टकालेन व्यवस्था । इति ।

252- औरसक्षेत्रजपुत्रयोः पार्वणश्राद्धाधिकारो विचार्यते विधानपारिजाते (पृ-285) पञ्चमस्तवके क्षयाहश्राद्धप्रकरणे यथा—दत्तकादयो दश पुत्रास्तु साग्नयोऽनग्नयश्चैकोद्दिष्टमेव कुर्युः ।

प्रत्यब्दं पार्वणेनैव विधिना क्षेत्रजौरसौ ।
कुर्यातामितरे कुर्युरेकोद्दिष्टं सुता दश ॥

इति जातुकर्णोक्तेः । यदा तु दत्तकादीनामपि पिता दर्शे महालये वा मृतस्तत्र पार्वणैकोद्दिष्टयोर्विकल्पः ।

अमायां च क्षयो यस्य प्रेतपक्षेऽथवा भवेत् ।
निरग्निरपि वा कुर्यान्मातापित्रोस्तु पार्वणम् ॥

इति वायुपुराणोक्तेः । इति । स्मृतिसारसङ्ग्रहकारस्तु मन्थकृदुद्धृत-गोपीनाथवाजपेयिमतवत् स्वमतं प्रतिपादयति सपिण्डीकरणोत्तरश्राद्धप्रकरणे । तद्यथा—तत्र कल्पतरुः-प्रत्यब्दं मृताहनि पार्वणैकोद्दिष्टयोस्तुल्यबलविकल्पे प्राप्ते

इत्यादिना सामान्यतश्चतुर्वर्णानां पार्वणसूचनाच्छूद्राणामपि मृताहे पार्वणस्येच्छया विकल्पात् । तथैवाचाराच्च । किञ्च मृताहे एकोद्दिष्टनियमः प्रायश एकोद्दिष्टस्य विकल्पितत्वादिति स्वग्रन्थयोरन्योन्यविरोधः । तथाहि नियमपदेन[0] सर्वथाऽपि पार्वणनिषेधसिद्धिः । प्रायविकल्पित[00]शब्दाभ्यां वाजसनेयिवत् पाक्षिकप्राप्तिरिति व्यत्ययात्[000] । किञ्च श्राद्धक्रमलिखने पार्वणपक्षे पितुर्मृताहविहितं पार्वणश्राद्धमहं कुर्वीय इति सङ्कल्प इत्यन्यस्य ग्रन्थविरोधः[0000] । आब्दिकं वचनादाचाराच्च पार्वणं विकल्पात् । साग्नेस्त्वाब्दिके पार्वणत्वनियमः । तथा त्रिदण्डिन[253] एकदण्डिनो वा यतेरपि वार्षिके । अमावास्याप्रेतपक्षयुगाद्यष्टकासु पितृमृताहश्राद्धमन्वष्टकाकृतमातृमृताहवत्तन्त्रेणानुष्ठानान्मातामहादिविशिष्टं पार्वणम् । वृद्धिनित्यश्राद्धेऽपि तथा[00000] । एवमन्यत्पार्वणसाक्षिवचनं वक्ष्यामः ।

व्यवस्था । तथा औरसः क्षेत्रजः साग्निः प्रत्यब्दं पार्वणमेव कुर्यात् ,

औरसक्षेत्रजौ पुत्रौ विधिना पार्वणावहौ ।

इति जाबालिवचनात् । इति । एतस्मात् निरग्निशूद्राणां मृताहे एकोद्दिष्टश्राद्धं प्रशस्यते । किन्तु अस्मदुत्कलेषु शूद्रेणापि त्रिपुरुषोद्देशेन पार्वणश्राद्धमाचर्यते ।

253- दमनं दण्डः, यस्य वाङ्मनःकायेतित्रयस्य दमनं जातं सः त्रिदण्डी कथ्यते । तदुक्तं मनुना (12/10)—

वाग्दण्डोऽथ मनोदण्डः कायदण्डस्तथैव च ।
यस्यैते निहिता बुद्धौ त्रिदण्डीति स उच्यते ॥ इति ।
वाग्दण्डो मौनता प्रोक्ता कर्मदण्डस्त्वनीहता ।
मानसस्य तु दण्डस्य प्राणायामो विधीयते ॥

इति पराशरमाधवे दक्षः ।

0- नियतपदेन-इति ख-पुस्तके पाठः ।
00- प्रायसविकल्पित-इति ग-पुस्तके पाठः ।
000- भिन्नत्वात्-इति ख-ग-पुस्तकद्वये पाठः ।
0000- ख ग पुस्तकद्वये वाक्यमिदं नास्ति ।
00000- वाक्यमिदं ख-ग-पुस्तकद्वये नास्ति ।

अथैकोद्दिष्टकालः[254] ।

मनुः[255]—

पूर्वाह्णे दैविकं श्राद्धमपराह्णे तु पार्वणम् ।
एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकम् ॥

व्यासः[256]—

मुहूर्त्तत्रितयं प्रातस्तावानेव तु सङ्गवः ।
मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णश्च तादृशः ॥
सायाह्नस्त्रिमुहूर्त्तश्च सर्वकर्मसु गर्हितः ॥

गौतमोऽपि[257]—

आरभ्य कुतपे श्राद्धं कुर्यादारौहिणं बुधः ।
विधिज्ञो विधिमास्थाय रौहिणं न तु लङ्घयेत् ॥

254- एकोद्दिष्टम् एक उद्दिष्टो यस्मिन् श्राद्धे तदेकोद्दिष्टमिति कर्मनामधेयम् । शेषं पूर्ववदाचरेत् इत्युपसंहारात् पार्वणसकलधर्मप्राप्तौ विशेषोऽभिधीयते । इति मिताक्षराकारेण विज्ञानेश्वरेण याज्ञवल्क्यस्य यद्वचनमाधारीकृत्य व्याख्यानमुपन्यस्तम् एकोद्दिष्टस्वरूपसूचकं तत् , यथा (1/251)—

एकोद्दिष्टं देवहीनमेकार्घ्यैकपवित्रकम् ।
आवाहनाग्नौकरणरहितं ह्यपसव्यवत् ॥ इति ।

अस्य विशिष्टश्राद्धस्य सम्पादने विशिष्टकाल आदरणीय : ।

255- द्रष्टव्या पादटिप्पणी-233 ।

256- कालमाधवे प्रतिपत्प्रकरणे (पृ पृ-86-87) अपराह्णश्च-स्थाने अपराह्णोऽपि, त्रिमुहूर्त्तश्च-स्थाने त्रिमुहूर्त्तस्तु, सर्वकर्मसु गर्हित-स्थाने सर्वधर्मबहिष्कृतः इति पाठः । पञ्चधाविभक्तदिवसस्य तृतीयभाग एकोद्दिष्टश्राद्धकालः ।

257- कालमाधवे प्रतिपत्प्रकरणे (पृ-122) न तु-स्थाने तु न-इति पाठः । कुतपरौहिणौ दिवसस्याष्टमनवममुहूर्त्तौ । अहोरात्रयोस्त्रिंशन्मुहूर्त्तानां नामानि माधवाचार्येण कालमाधवे प्रतिपत् प्रकरणे (पृ-85) उदाहृतानि । तत्र दिवसमुहूर्त्ताः क्रमेण यथा—

रौद्रः श्वेतश्च मैत्रश्च तथा सारभटः स्मृतः ।
सावित्रो वैश्वदेवश्च गान्धर्वः कुतपस्तथा ॥

रौहिणस्तिलकश्चैव विभवो निकृतस्तथा ।
शम्बरो विजयश्चैव भेदाः पञ्चदश स्मृताः ॥ इति ।

रात्रिमुहूर्त्तानां नामानि यथा—

शङ्करश्चाजपादश्च तथाऽहिर्बुध्न्यमैत्रकौ ।
आश्विनो याम्यवाह्नयौ वैधात्रश्चान्द्र एव च ॥
आदितेयोऽथ जैवश्च वैष्णवः सौर एव च ।
ब्राह्मा नाभस्वतश्चैव मुहूर्ताः क्रमशो निशि ॥ इति ।

कुतपमुहूर्त्तस्य श्राद्धोपयोगित्वं कुतपशब्दस्य निर्वचनञ्चोक्तमस्ति मत्स्यपुराणे । तद्यथा (22/84-87)—

अह्नो मुहूर्त्ता विख्याता दश पञ्च च सर्वदा ।
तत्राष्टमो मुहूर्त्तो यः स कालः कुतपः स्मृतः ॥
मध्याह्ने सर्वदा यस्मान्मन्दीभवति भास्करः ।
तस्मादनन्तफलदस्तदारम्भो भविष्यति ॥
मध्याह्नः खड्गपात्रं च तथा नेपालकम्बलः ।
रूप्यं दर्भास्तिला गावो दौहित्रश्चाष्टमः स्मृतः ॥
पापं कुत्सितमित्याहुस्तस्य सन्तापकारिणः ।
अष्टावेते यतस्तस्मात्कुतपा इति विश्रुताः ॥ इति ।

हेमाद्रिणा चतुर्वर्गचिन्तामणौ परिशेषखण्डे श्राद्धकल्पे पञ्चमेऽध्याये (पृ-208) कुतपकालचर्चा प्रतिपादिता । तद्यथा—स्कन्दवायुपुराणयोः—

कुं यत्र गोपतिर्गोभिः कार्त्स्न्येन तपति क्षणे ।
स कालः कुतपो ज्ञेयस्तत्र दत्तं महाफलम् ॥

कुः पृथ्वी तां, गोपतिः सूर्यः, गोभिः स्वकीयैः करैः, कार्त्स्न्येन समग्रां यस्मिन् क्षणे तपति उष्णां करोति, स कालः कुतपो ज्ञेयः । तदनेन कुतपशब्दनिर्वचनं कृतम् । निरूपितश्च कुतपोऽयमिति । सर्वच्छायासङ्कोचाद्दिवसमध्य एव हि सूर्यः कृत्स्नां पृथ्वीं तपति । अतो दिवसमध्यः कुतप इत्येवमसौ निर्द्धारितो भवति । स च मुहूर्त्तपरिमितोऽपि स्वल्पमनुसन्धायोपचारवृत्या क्षणशब्देनोक्तः । इति । कुतपरौहिणयोर्मध्याह्नगतमध्यमचरमभागयोरेकोद्दिष्टकर्मकालत्वेन व्यवस्था प्रदर्शिता । अत्रैकोद्दिष्टस्य समाप्तिकालोऽनेनोक्तः । एकोद्दिष्टश्राद्धस्योपक्रमे कुतपस्य पूर्वोत्तरभागौ विकल्पितौ चेच्छानुसारम् । तथाहि कालमाधवे (पृ-122) व्यासवचनम्—

मुहूर्त्तात् सप्तमादूर्ध्वं मुहूर्त्ताद्दशमादधः ।
एकोद्दिष्टस्य कालोऽयम्........ ॥[258]

इत्यस्याप्ययं भावः । अत्रैकभक्तवत् षोढा भेदः । मध्याह्नव्याप्तिवशात्पूर्वापरावसन्दिग्धौ । उभयेद्युर्मध्याह्नव्याप्तौ च पूर्वदिन एकोद्दिष्टम्,

स्वकालातिक्रमे कुर्याद्रात्रेः पूर्वं यथाविधि ।[259]

इति प्राप्तस्य सायाह्नरूपगौणकालस्य[260]

यस्यामस्तं रविर्याति पितरस्तामुपासते ।[261]

इत्यस्य चानुरोधात् । दिनद्वये साम्येनैकदेशव्याप्तौ

खर्वदर्पौ परौ ग्राह्यौ हिंस्रा स्यात्पूर्वकालिकी ।

कुतपप्रथमे भागे एकोद्दिष्टमुपक्रमेत् ।
आवर्त्तनसमीपे वा तत्रैव नियतात्मवान् ॥ इति ।

258-श्राद्धदीपे (श्लो०-379) 'इति शास्त्रविनिश्चयः' इति चतुर्थचरणपाठः ।

259- कालमाधवे पार्वणश्राद्धनिर्णये (पृ-125) व्यासवचनम् ।

260- श्राद्धकालातिक्रमे तल्लोपापत्तौ रात्रेः पूर्वं सायाह्नेऽपि तत्कर्तुं शक्यते, गौणकालत्वेनास्याभ्यनुज्ञानात् । विचारितमेतन्माधवाचार्येण कालमाधवे प्रतिपत्प्रकरणे पार्वणश्राद्धनिर्णये (पृ-125) यथा—

ननु सायाह्नस्यापि कर्मकालत्वं क्वचित् स्मर्यते—

दिनान्ते पञ्च नाड्यस्तु पुण्याः प्रोक्ता मनीषिभिः ।
उदये च तथा पित्र्ये दैवे चैव च कर्मणि ॥ इति ।

मैवम्, यमेन प्रतिषिद्धत्वात्,

सायाह्नस्त्रिमुहूर्त्तः स्याच्छ्राद्धं तत्र न कारयेत् ।
राक्षसी नाम सा वेला गर्हिता सर्वकर्मसु ॥ इति ।

तर्हि पञ्चनाडीवचनं निर्विषयं स्यादिति चेन्न, केनापि निमित्तेनापराह्णासम्भवे गौणकालाभ्यनुज्ञापरत्वात् । इति ।

261- कालमाधवे प्रतिपत्प्रकरणे एकोद्दिष्टनिर्णये (पृ-121) सम्पूर्णं बृहन्मनुवचनं यथा—

यस्यामस्तं रविर्याति पितरस्तामुपासते ।
तिथिं तेभ्यो यतो दत्तो ह्यपराह्णः स्वयम्भुवा ॥ इति ।

इति वाक्यं[262] नियामकम् । खर्वादयः समवृद्धिह्रासरूपाः प्रागुक्ताः ।

दर्शश्च पौर्णमासश्च पितुः सांवत्सरं तथा ।
पूर्वविद्धमकुर्वाणो नरकं प्रतिपद्यते ॥[263]

इति वाक्याच्च । वैषम्येणैकदेशव्याप्तौ यद्दिने भूयसी व्याप्तिस्तद्दिन एकोद्दिष्टम् । न चोक्तसामान्यकालवशात् पूर्वेद्युः किं[0] न स्यादिति वाच्यम् । 'महती यत्र तद्दिवामि'त्यादेः पार्वणे वक्ष्यमाणत्वात् । न चैतदपराह्णोक्तेः पार्वणपरतामाशङ्क्या, श्राद्धसामान्यपरतायाः सर्वैरुक्तेः ।

तत्राल्पत्वमहत्त्वाभ्यां निर्णयः पितृकर्मणि ।

इति सामान्याच्च । कार्यवशान्मध्याह्ने प्रत्यूहेऽपराह्ण एकोद्दिष्टं कार्यम् । तत्रापि विघ्ने सायाह्ने ।

स्वकालातिक्रमे कुर्याद्रात्रेः पूर्वं यथाविधि ।

इति स्मरणात् ।

उपसन्ध्यं न कुर्वीत पितृपूजां कथञ्चन ।[264]

इति मुख्यकाललाभपरम् । सायाह्नेऽप्यकरणे तत्तिथिशेषयुक्ते परदिने तत् । गौणमुख्यखण्ड[00] कालालाभेऽपि प्रधानतिथिमात्रे तदौचित्यात् । लोपे च दोषस्य वक्ष्यमाणत्वात् । परदिने मृताहनिर्णयेन वक्ष्यमाणमृताहा[000]विहित

262- ग्राह्यौ-स्थाने पूज्यौ-इति स्मृतिसारोद्धारे प्रथमोद्धारे (पृ-11) व्यासनिगमवचनम् ।

263- कालमाधवे पार्वणश्राद्धनिर्णये (पृ-134) उद्धृतपाठः ।

264- कालमाधवे प्रतिपत्प्रकरणे पार्वणश्राद्धनिर्णये (पृ-126) सम्पूर्णं स्कन्दपुराणवचनं यथा—

उपसन्ध्यं न कुर्वीत पितृपूजां कथञ्चन ।
स काल आसुरः प्रोक्तः श्राद्धं तत्र विवर्जयेत् ॥ इति ।

सन्ध्यासमीपे श्राद्धस्य प्रारम्भोऽपि निषिद्धोऽनेन ।

0- किं न-इति नास्ति ख-ग-पुस्तकद्वये ।

00- ख-ग पुस्तकद्वये खण्ड-इति पदं नास्ति ।

000- मृताहविहित-इति ग-पुस्तके पाठः ।

इति वाक्यस्या[265]प्रसरेणा[0]मायां तच्छङ्कानवकाशात् । श्राद्धकालविशिष्टमृता-हलक्षणायां गौरवात् ।

मुख्यतिथ्यन्तराये तु तिथिशेषोऽपि गृह्यताम् ।

इति माधवा[266]दसङ्गतिश्च । परदिनेऽपि विघ्ने तु कृष्णैकादश्यादौ तदिति वक्ष्यते । पूर्वदिने विघ्ने परदिने श्राद्धमिति दिव्यसिंहोक्तं[267] न रुचिरम् । तिथिशेषवति तच्छेषशून्येऽपि परदिने श्राद्धापत्तेः[00] । तिथिशेषविशिष्टपर-दिनार्थे[000] गौरवाच्च ।

सर्वथा प्रातःसङ्गवयोर्न श्राद्धं कार्यम्, स्वकालातिक्रमे कुर्यादिति प्राग्-वचनात् । किन्तु गौणमुख्याभाववत्परदिने प्रातःसङ्गवेतरमध्याह्नादिकाले तत्कार्यम् ।

यां तिथिं समनुप्राप्य........ ।[268]

265- कृत्यकौमुद्यामविदितमृताहकालनिरूपणे (पृ.पृ-219-20) यमहारी-तयोः सम्पूर्णवचनं यथा—

श्राद्धविघ्ने समुत्पन्ने मृताहेऽविदितेऽथवा ।
एकादश्यां प्रकुर्वीत कृष्णपक्षे विशेषतः ।। इति ।

266- कालमाधवे उपोद्घातप्रकरणे माधवेन कथितमेतत् । अत्र पूर्वविद्धा तिथिर्मुख्यत्वेन गृह्यते । पूर्वविद्धायामन्तराये विघ्ने तत्र विहितकर्माकरणे उत्तरविद्धायामपि तत्कर्त्तव्यमिति ज्ञायते ।

267- विषयेऽस्मिन् श्राद्धदीपे (पृ-94) दिव्यसिंह आह यथा -- प्रशस्ते पूर्वदिने यथोक्तकाले केनापि निमित्तेन श्राद्धासम्भवे मुख्यतिथ्यन्तराये तु.... इति न्यायेन परदिने श्राद्धकरणम् । अत्राप्यकरणे कृष्णैकादश्यमावास्यादौ कार्यम् । इति ।

268- कालमाधवे प्रतिपत्प्रकरणे (पृ-98) देवलवचनं यथा—

0- प्रसरेण-स्थाने ग-पुस्तके अभावेम-इति पाठः ।

00- ख-ग-पुस्तकद्वये वाक्यस्यास्य पाठान्तरम्—
तिथिशेषवति तच्छेषावशिष्टस्यापि परदिनस्य प्रतीतेः । इति ।

000- परदिनार्थकत्वे लक्षणायां गौरवाच्च-इति ख-ग-पुस्तकद्वये अत्र अधिकपाठः ।

इत्यादिना शास्त्रदृष्ट्याऽकालेऽपि सङ्कल्पवत्तिव्यपादानात् । न वा तल्लोपः,

पण्डिता ज्ञानिनो मूर्खास्त्रयोऽथ ब्रह्मचारिणः ।
मृताहं संपरित्यज्य चण्डालाः प्रेतयोनिषु ॥

इति मरीचिना[269] दोषानुध्यानात् । एवं प्रातःसङ्गववद्रात्रावपि ग्रहणभिन्नं श्राद्धं न कार्यम् ।

रात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्त्तिता हि सा ।[270]
रात्रेरन्यत्र कुर्वाणः श्रेयः प्राप्नोत्यनुत्तमम् ।[271]
रात्रेः पूर्वं यथाविधि ।

इति मन्वादिस्मरणात् ।

न च नक्तं श्राद्धं कुर्वीतारब्धे चाभोजनमासमापनात् ।[272] इति आपस्तम्बस्मृत्या रात्रावपि तत्स्यादिति वाच्यम् । तस्य समाप्तिमात्रबोधकत्वात् ।

यां तिथिं समनुप्राप्य अस्तं याति दिवाकरः ।
तिथिः सा सकला ज्ञेया दानाध्ययनकर्मसु ॥ इति ।

269- कालमाधवे प्रतिपत्प्रकरणे पार्वणश्राद्धनिर्णये (पृ-127) अथ-स्थाने वा, संपरित्यज्य-स्थाने समतिक्रम्य, चतुर्थचरणे चाण्डालेष्वभिजायते चेति उद्धृतपाठः ।

270- रात्रौ श्राद्धकरणं निषेधितं मनुना, यथा (3/280)—

रात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्त्तिता हि सा ।
सन्ध्ययोरुभयोश्चैव सूर्ये चैवाचिरोदिते ॥ इति ।

271- स्वकालातिक्रमे रात्रेः पूर्वं श्राद्धसम्पादनं सूचयति माधवाचार्यः कालमाधवे (पृ-125) व्याघ्रपादवचनानुरोधेन, यथा—

विधिज्ञः श्रद्धयोपेतः सम्यक्पात्रनियोजकः ।
रात्रेरन्यत्र कुर्वाणः श्रेयः प्राप्नोत्यनुत्तमम् ॥ इति ।

272- आपस्तम्बधर्मसूत्रे द्वितीयप्रश्ने सप्तदशकण्डिकायां 23-24 तमसूत्र-द्वयमिदम् । आरब्धे श्राद्धकर्मणि विलम्बात् मध्ये वा यदि सूर्यास्तो जातस्तदा रात्राववशिष्टश्राद्धकर्म न कुर्यात् , परेद्युर्दिवैव कुर्यात् । केचिदत्र द्वितीयसूत्र-स्यान्ते 'अन्यत्र राहुदर्शनात्' इत्यधिकं पठन्ति । राहुदर्शने रात्रावपि श्राद्धस्य कर्त्तव्यता वर्त्तते ।

माधवाचार्यास्तु[273] सायाह्ने विघ्ने तु रात्रौ श्राद्धं कार्यम् । नक्तं श्राद्धं कुर्वीतारब्धे चेत्यादिपूर्वमापस्तम्बीये श्राद्धसमाप्तिसिद्धौ[0] तस्याश्चारम्भोपलक्षणत्वात् । गौणमुख्यकालालाभेऽपि तिथिमात्रे तदौचित्यादित्याहुः । तच्चिन्त्यम् ।

रात्रौ श्राद्धं न कुर्वीत राहोरन्यत्र दर्शनात् ।[274]

273- कालमाधवे पार्वणश्राद्धनिर्णये (पृ.पृ-125-26) माधवाचार्यस्य विचारो यथा—ननु, सायाह्नेऽपि यदा कथञ्चित् प्रत्यूहस्तदा श्राद्धस्य किं लोप एव, किं वा रात्रावपि कर्तुं शक्यते ? तत्र लोप एवेति तावत्प्राप्तम् । कुतः ? मुख्यकालत्व-गौणकालत्वयोः रात्रेर्निषेधात् ।...........तस्मादह्नि श्राद्धासम्भवे लोप एवेति प्राप्ते ब्रूमः । न तावद्रात्रौ सर्वात्मना श्राद्धस्य निषेधो वक्तुं शक्यः, आपस्तम्बेन रात्रौ श्राद्धसमाप्त्यभ्युपगमात्, न च नक्तं श्राद्धं कुर्वीतारब्धे च भोजनसमापनम् । इति । ननु, सन्ध्यासमीपे प्रारब्धस्य रात्रौ समाप्तिप्रसङ्गः । तादृशस्तु प्रारम्भः स्कन्देन निषिद्धः,

उपसन्ध्यं न कुर्वीत पितृपूजां कथञ्चन ।
स काल आसुरः प्रोक्तः श्राद्धं तत्र विवर्जयेत् ।। इति ।

नैवम्, सन्ध्यासामीप्यस्य मुख्यकालत्वनिषेधात् । गौणकालत्वं तु पूर्वमभिहितम् । तत्र प्रारब्धस्य रात्रावपि परिसमाप्तिः सम्भाव्यते ।

नन्वेवमपि रात्रौ समाप्तिरेवाभ्यनुज्ञायते न त्वारम्भ इति चेत्, मैवम् । आरम्भस्यापि तया समाप्त्या उपलक्षणीयत्वात् । आब्दिकश्राद्धपरित्यागे प्रत्यवायबाहुल्यस्मरणात् । तथा च भविष्यत्पुराणप्रभासखण्डयोः पठ्यते—

मृतेऽहनि पितुर्यस्तु न कुर्याच्छ्राद्धमादरात् ।
मातुश्चैव वरारोहे वत्सरान्ते मृतेऽहनि ।
नाहं तस्य महादेवि पूजां गृह्णामि नो हरिः ।। इति ।

वस्तुतः रात्रौ श्राद्धं न कर्त्तव्यं स्मृतिविरोधात् । अस्मदुत्कलदेशे रात्रौ श्राद्धाचारो नास्ति ।

274- कालमाधवे पार्वणश्राद्धनिर्णये (पृ-126) शातातपवचनं यथा—

रात्रौ श्राद्धं न कुर्वीत राहोरन्यत्र दर्शनात् ।
सूर्योदयमुहूर्त्ते च सन्ध्ययोरुभयोस्तथा ।। इति ।

0- सिद्धौ-पदस्थाने ख-ग-पुस्तकद्वये स्वीकारे-इति पाठः ।

इति मनुशातातपनिषेधेन रात्रौ तदनौचित्यात् । न च समाप्तेरारम्भोपलक्षणम् । उक्तापस्तम्बीये श्राद्धे कृते भुञ्जतां ब्राह्मणानां रात्रिपाते दोषो नास्तीत्यर्थस्यानन्तभट्टीकारादिभिः[275] कथनात् । अन्यथा वसन्तारब्धस्य मखस्य कदाचिद् ग्रीष्मे समापने ग्रीष्मस्यापि तदारम्भकालत्वापत्तिः । तिथित्वमात्राद्रात्रौ तत्करणे प्रातःसङ्गवयोः श्राद्धं[0] न कार्यमिति स्वोक्तिविरोधः । एवञ्च

नैमित्तिकं तु कुर्वीत स्नानं दानं च रात्रिषु ।

इति सुमन्तुवचनबलाद्रात्रौ जातकर्मग्रहणादिनैमित्तिकश्राद्धकृतावपि विवाहसङ्क्रमे नक्तं भाविन्यपि[00] तत्पूर्वदिवस एव श्राद्धं न तु रात्राविति विप्रमिश्रोक्तिः[276] साध्वीति दिक् ।

कृत्यकल्पतरौ श्राद्धकाण्डे श्राद्धकालनिरूपणे (पृ-23) वचनस्यास्य द्वितीयार्धपाठो यथा—

सन्ध्ययोरुभयोश्चैव न कुर्वीत कदाचन । इति ।

275- विधानपारिजात-ग्रन्थकारः अनन्तभट्टः । तेन तत्र पञ्चमस्तवके (पृ-293) क्षयाहद्वैधे निर्णय-प्रकरणे रात्रिश्राद्धविषयः आलोचितः । तद्यथा— अथ यदि दैवान्मानुषाद्वा प्रतिबन्धात् तद्दिने सांवत्सरं श्राद्धं न कृतं, तदा रात्रावपि तद्दिने कार्यम् । 'मृताहं समतिक्रम्य चण्डालेष्वभिजायते ।' इति मरीचिना तदहातिक्रमे दोषोक्तेः । न नक्तं श्राद्धं कुर्वीत, अत्र वा भोजनसमापनमित्यापस्तम्बेन गौणकालतोक्तेश्च । ग्रहणदिने वार्षिकादिप्राप्तौ तद्दिन एवान्नेनामेन हेम्ना वा कार्यं नोत्तरदिन इत्युक्तं तृतीयस्तवके ग्रहणनिर्णयप्रकरणे । इति ।

276- श्राद्धप्रदीपे बाधाभ्युच्चयालोके (पृ पृ-188-90) ग्रन्थकर्त्तुर्विप्रमिश्रस्य विचारो विषयेऽस्मिन् यथा—भविष्यपुराणे सुमन्तुः—

रात्रौ स्नानं न कुर्वीत दानं चैव विशेषतः ।
नैमित्तिकं तु कर्त्तव्यं स्नानं दानं च रात्रिषु ॥
यज्ञे विवाहे यात्रायां तथा पुस्तकवाचने ।
दानान्येतानि शस्तानि निशि देवालये तथा ॥

0- श्राद्धं-स्थाने तत्-इति ख-ग-पुस्तकद्वये पाठः ।

00- नक्तं भाविन्यपि-इति ख-ग-पुस्तकद्वये नास्ति ।

ज्ञानाज्ञानकृतश्राद्धविघ्ने तु राजमार्त्तण्डे[277]—

श्राद्धविघ्ने समुत्पन्ने मृताहाविदिते तथा ।

अमावास्यां प्रकुर्वीत वदन्त्येके मनीषिणः ।।

एकादश्यां प्रकुर्वीत कृष्णपक्षे विशेषतः ।[278]

इति उत्तरार्धं लघुहारीतीयम् । मृताहस्याविदिते विस्मरणे । तेन मृताहप्राप्त-मासिकवार्षिकादेरेव क्रिया । अमावास्यायुगाद्यष्टकादीनां तु विस्मरणे लोप इति फलितम् । अशौचे तु तदन्ते वक्ष्यते[0] । हेमाद्रिस्तु[279]—

ग्रहणोद्वाहसङ्क्रान्तियात्रार्त्तिप्रसवेषु च ।

श्रवणे चेतिहासस्य रात्रौ दानं प्रशस्यते ।।

केवलं जातकर्मणि बालानां चूडाकर्मादिके तथा । इति विधानात् ,

न सोष्यन्तीजातकर्मप्रोषितागमकर्मसु ।

इति प्रतिषेधाच्च विधेः सहिरण्यतिलश्राद्धपरत्वान्निषेधस्य पक्वान्नश्राद्धपरत्वात् पक्वान्नेन न कार्यम् ।...........एवं रात्रौ विवाहे सङ्क्रान्तौ च रात्रौ श्राद्धं कर्त्तव्यमिति शूलपाणिः । तदसङ्गतम् । अविष्यत्युद्वाहसङ्क्रान्त्युपलक्षितदिवसस्य च निमित्तत्वात् रात्रिप्रसङ्गाभावात् प्रातर्वृद्धिनिमित्तकम् इति कालविधानात् ।...........वस्तुतस्तु अहःसङ्क्रमणे पुण्यम् ....इति वचनाच्छ्राद्धस्य दानस्य च पूर्वं निर्णीतत्वाद्दानवद्दिवसे एव श्राद्धं कर्त्तव्यम् । इति ।

स्मृतिवचनस्वीकारात् विप्रमिश्रोक्तवचनं साधु वर्त्तते ।

277- श्राद्धतत्त्वे (स्मृ० त०-I-पृ-285) ।

278- द्रष्टव्या पाददिप्पणी-265 ।

279- चतुर्वर्गचिन्तामणौ श्राद्धकल्पे (पृ-203) तृतीयाध्याये ग्रन्थकारेण हेमाद्रिणा श्राद्धविघ्ने विचारः प्रदर्शितः । तद्यथा—यद्भार्यारजोदर्शनादिरूपे श्राद्धविघ्ने सत्यामश्राद्धं कर्त्तव्यमिति प्रकीर्त्तितं तदमावास्यादिकालिकमेव, न तु यन्मृताहकालिकं मासिकं सांवत्सरिकं च तदपीत्यर्थः । किन्तु तत्पक्वान्नेनैव कर्त्तव्यम् । तच्चैकभार्येण ।

एकोद्दिष्टे तु संप्राप्ते यदि विघ्नः प्रजायते ।

अन्यस्मिंस्तत्तिथौ तस्मिन् श्राद्धं कुर्यात्प्रयत्नतः ।।

0- ख-ग-पुस्तकद्वये वाक्यमिदं नास्ति ।

एकोद्दिष्टे तु संप्राप्ते यदि विघ्नः प्रजायते ।
मासेऽन्यस्मिंस्तिथौ तस्मिंस्तदा दद्यात्प्रयत्नतः ॥

तिथौ मृताहे इत्याह । मध्याह्नद्वैधे परेद्युः प्राप्तस्य श्राद्धस्य भ्रमात्पूर्वेद्युः कृतावपि पुनः परदिने तत्करणम्, न तु कृष्णैकादश्यादौ[280], श्राद्धविघ्न इत्यस्याभावात्। परेद्युरपि विघ्ने तु कृष्णैकादश्यादाविति नव्याः । वस्तुतस्तु, पूर्वेद्युर्भ्रान्तिकृतस्य परत्र विघ्नेऽपि न पुनः कृष्णैकादश्यादौ तत्क्रिया, श्राद्धविघ्नपदस्य मृताहकृतश्राद्धाभावार्थकत्वेन तस्य पूर्वेद्युः कृतत्वेन तद् विघ्नाभावात् । मध्याह्नापराह्नरूपस्वकालकृतश्राद्धाभावार्थकत्वे

मुख्यतिथ्यन्तराये तु........।

इति माधवीयात्तिथिशेषे श्राद्धासङ्गतिः । तच्छेषे कृतेऽपि पुनः कृष्णैकादश्यादौ तदापत्तिश्च[281] । एवं पार्वणेऽपीति ध्येयम् ।

अथ पार्वणकालः ।

अपराह्णे तु पार्वणम् ।

इत्यत्रापराह्णो मुख्यः । मात्स्ये[282]—

अन्यस्मिन् अनन्तरे मासि । तत्तिथौ मृततिथौ । यस्मिन् शुक्ले कृष्णे वा मृतस्तस्मिन् पक्षे । श्राद्धं विघ्नवशादतिक्रान्तं कुर्यादित्यर्थः । यदि विघ्न इत्यत्रापि ऋष्यशृङ्गवचनाविरोधायाशौचव्यतिरिक्तनिमित्तेनेति विशेषो द्रष्टव्यः । इति ।

280- निर्धारितकालस्य नातिक्रान्तत्वात् परदिवसे प्राप्तस्य श्राद्धस्य पूर्वदिवसेऽनुष्ठानेऽपि परदिने तच्छ्राद्धानुष्ठानं कर्त्तव्यम् । तद्धेतोः न तत्र अमावास्याकृष्णैकादशीप्रसङ्गः ।

281- शेष-शब्दोऽत्राल्पात्यल्प इतिकृत्वा निर्द्धारितमुख्यगौणकालगतत्वात् तत्परवर्त्तिकृष्णैकादश्यां श्राद्धं कर्त्तव्यम् ।

282- मत्स्यपुराणम्-22/84-85,88 । तत्र 'मध्याह्ने सर्वदा यस्मान्मन्दीभवति भास्करः ।' इति मुद्रितपाठः । पार्वणश्राद्धस्यापराह्णकर्मकालत्वेऽपि कार्यवशात् सहसा सम्पादननिमित्तं कुतपादिमुहूर्त्तानामादरः । विचारितमेतत् गदाधरेण कालसारे पार्वणश्राद्धकालनिर्णये यथा—कदाचित्

अह्नो मुहूर्त्ता विख्याता दश पञ्च च सर्वदा ।
तत्राष्टमो मुहूर्त्तो यः स कालः कुतपः स्मृतः ॥
अष्टमे भास्करो यस्मान्मन्दीभवति सर्वदा ।
तस्मादनन्तफलदस्तत्रारम्भो विशिष्यते ॥
ऊर्ध्वं मुहूर्त्तात्कुतपाद्यन्मुहूर्त्तचतुष्टयम् ।
मुहूर्त्तपञ्चकं चैतत्स्वधाभवनमिष्यते ॥[283]

एतेन कुतप आरम्भादपराह्णे समाप्तेश्च कुतपाद्यपराह्णान्तव्याप्तिरत्रोत्तमः कालः । तदभावेऽपराह्णव्याप्तिमात्रमिति सिद्धम्[284] । अत्रापि प्राग्वद्भेदाः । पूर्वपरमात्रापराह्णे पूर्वपरौ[0] । दिनद्वयेऽपराह्णव्याप्तौ बौधायनः[285]—

कार्यवशात् पार्वणश्राद्धस्य सहसा कार्यत्वे सति दिवसापरभाग एव कार्यम्, न पूर्वभाग इत्यत्रैव तात्पर्यं............। तच्च अह्नो मुहूर्त्ता विख्याता............ इति मात्स्योक्तौ यथाकालप्राप्तश्राद्धविषये कुतपस्य प्रारम्भकालत्वमुक्त्वा नवमादिमुहूर्त्तानां श्राद्धकालत्वमुक्तम् । इति ।

283- दिवसस्य अष्टममुहूर्त्तात् द्वादशमुहूर्त्तं यावत् स्वधाभवनं नाम पितृपुरुषोद्देशेन श्राद्धदानार्थं समुचितोऽवसरः प्रोक्तः ।

284- कालमाधवे (पृ. पृ-128-30) माधवाचार्येणाऽपीत्थं विचार उपन्यस्तः । तद्यथा—कुतपे प्रक्रान्तस्य सायाह्नादर्वाचीनः सर्वोऽपि मुख्योऽनुष्ठानकालः ।........तदेवं पार्वणश्राद्धस्यापराह्णः कर्मकालः, कुतपः प्रारम्भकाल इति ।........यस्मिन् काले यद्विहितं कर्मोपक्रमोपसंहारयुक्तं तस्मिन् काले तस्यां तिथौ यस्मिन्नहनि सम्भावयितुं शक्यते, तदुत्तरं पूर्वं वा ग्राह्यमिति । यदा कुतपापराह्णोभयव्यापिनी न सम्भवति तदा केवलापराह्णव्यापिन्यपि तिथिर्ग्रहीतव्या, पित्र्यर्थे चापराह्णिकी इति भविष्यत्पुराणेऽभिधानात् । इति । पार्वणस्य च

आरभ्य कुतपे श्राद्धं रोहिणं तु न लङ्घयेत् ।

इत्यपराह्णकालत्वात् । इति विप्रमिश्रेण श्राद्धप्रदीपे बाधाभ्युच्चयालोके रोहिणमुहूर्त्तस्यालङ्घनं यदुक्तं पार्वणश्राद्धप्रारम्भकालमुद्दिश्य प्रशस्तं तत् ।

285- कालमाधवे (पृ-130) कालसारे च 'या भवेत्' स्थाने 'या तिथिः' इति उद्धृतपाठः ।

0- 'असन्देहो' इति ख-पुस्तके अत्र अधिकपाठः ।

अपराह्णद्वयव्यापिन्यतीतस्य च या भवेत् ।
क्षये पूर्वा तु कर्त्तव्या वृद्धौ कार्या तथोत्तरा ॥

अतीतस्य मृतस्य । तत्र वृद्धिक्षयौ न ग्राह्यतिथिगतौ , तत्क्षयेऽपराह्णव्याप्त्यभावात् । किन्तूर्ध्वतिथिगौ० ।

तिथ्यादौ तु भवेद् यावान् ह्रासो वृद्धिः परेऽहनि ।
तावान्ग्राह्यः स पूर्वेद्युरदृष्टोऽपि स्वकर्मणि ॥[286]

तिथ्यादावित्यादिना नक्षत्रयोगयोर्ग्रहः । स्वकर्मणीति निमित्तसप्तमी । पूर्वतिथ्यर्थं वृद्धिक्षयौ प्रक्षेप्यावित्यर्थः । एवञ्च क्षयदिनापराह्णे यावान् क्षयस्तावतः पूर्वेद्युर्योगे तु नोत्तरतिथिरपराह्णव्यापिनीति पूर्वविद्धैव ग्राह्या । वृद्धौ तु परदिनकुतपमारभ्यापराह्णगतत्वेनाशेषमुख्यव्यापित्वात्परा । एवञ्चापराह्णद्वयेति वाक्यमौपपत्तिकम् । उत्तरतिथेः साम्ये तु खर्वादिवाक्यात्परदिने पार्वणम् । दिनद्वये त्वपराह्णव्याप्तौ पूर्वा , परेद्युः कुतपमात्रगुणसत्त्वेऽपि पूर्वेद्युस्तिथिमूलत्वात्तद् व्यापित्वरूपगुणाधिक्यात्[287] । तथाहि नारदीये[288]—

पित्र्यं मूलं तिथेः प्रोक्तं शास्त्रज्ञैः कालकोविदैः ।

व्यासोऽपि[289] —

286- कालमाधवे (पृ-131) कालसारे च स्मृत्यन्तरवचनमेतत् ।

287- माधवाचार्येणापि कालमाधवे (पृ पृ-132-33) पार्वणश्राद्धकाल इत्थं निर्णीतः । तद्यथा—नन्वपराह्णस्पर्श उभयत्रापि समानः, प्रारम्भकाले तु कुतपे परेद्युः सद्भावो विशिष्यते, ततः परविद्धैव कुतो न ग्राह्येति चेत्, गुणाधिक्यादिति ब्रूमः । परेद्युः कुतपप्राप्तिरेक एव गुणः, पूर्वेद्युस्तु तिथिमूलत्वमस्तमयव्याप्तिश्चेति गुणद्वयम् । इति ।

288- कालमाधवे (पृ-133) पैत्र्यम् इति धृतपाठः ।

289- कालसारे पार्वणश्राद्धकालनिर्णये 'तत्परा'-स्थाने 'नेतरा'-पाठः । कालमाधवे (पृ-133) अह्न्यस्तमय-स्थाने अह्नोऽस्तमय, चतुर्थचरणे नेतरा

0- ख-ग-पुस्तकद्वये नास्ति ।

अह्न्यस्तमनवेलायां कलामात्राऽपि या तिथिः ।
सैव प्रत्याब्दिके श्राद्धे तत्परा⁰ पुण्यहानिदा ॥

इति । अतएवात्र यौक्तिकं सुमन्तुवाक्यम्[290]—

द्व्याहव्यापिनी चेत्स्यान्मृताहस्य यदा तिथिः ।
पूर्वस्यां निर्वपेत्पिण्डमित्याङ्गिरसभाषितम् ॥

वैषम्येणैकदेशव्याप्तौ तु यद्दिने महती व्याप्तिस्तद्दिने पार्वणम् ।

द्व्यपराह्णव्यापिनी चेन्मृताहस्य यदा तिथिः ।
महती यत्र तद्विद्धां प्रशंसन्ति महर्षयः ।

पुत्रहानिदा-पाठः । तत्परा ततः परा ततः अन्या इत्यर्थः । अस्तमयव्याप्तेः प्राशस्त्यार्थमुत्तरविद्धाप्रतिषेधमूलकवचनमिदम् ।

290- स्मृतिसारसङ्ग्रहे (पृ-144) यदा-स्थाने च या-पाठः । मृततिथेः वृद्धिगामितया अपराह्णद्वयव्यापित्वे पूर्वदिवसे श्राद्धं कर्त्तव्य गौणकाललाभाधिक्यात् । माधवाचार्येण कालमाधवे (पृ-132) वचनमिदं

द्व्यहेऽप्यव्यापिनी चेत् स्यान्मृताहस्य तु या तिथिः ।

इति पठ्यते । तदनुसारं मृततिथिर्यदा दिनद्वयेऽप्यपराह्णं न स्पृष्ट्वाऽवशिष्टं कालं व्याप्नोति तदा पूर्वदिवसे पार्वणश्राद्धस्य कर्त्तव्यता वर्त्तते । सायं काले मृततिथेस्त्रिमुहूर्त्तसत्त्वे एषा व्यवस्था ग्रहणीया । तदाह बृहस्पतिः कृत्यकौमुद्यां (पृ-228) मृताहश्राद्धनिर्णये—यदि पूर्वेऽह्नि सायं मृततिथिस्त्रिमुहूर्त्ता भवति साऽऽराध्या । तदाह गोभिलः—

द्व्यहस्य व्यापिनी चेत् स्यान्मृताहस्य यदा तिथिः ।
पूर्वविद्धैव कर्त्तव्या त्रिमुहूर्त्ता भवेद्यदि ॥

पूर्वेद्युः सायमिति वाक्यशेषः । कार्ष्णाजिनिरपि—

अह्नोऽस्तमनवेलायां कलामात्राऽपि या तिथिः ।
सैव प्रत्याब्दिकी ग्राह्या नापरा पुत्रहानिदा ॥

इयमपि पूर्वेह्नि त्रिमुहूर्त्ता स्वीकार्या इत्येवंपरम् । कलामात्रा ग्राह्या सुतरां त्रिमुहूर्त्तेत्यर्थः । इति ।

0- नेतरा-इति ख-ग-पुस्तकद्वयेपाठः ।

इति मरीचिस्मरणात्[291] । साम्येनैकदेशव्याप्तिश्चेत्तदा ग्राह्यतिथिगतक्षय-वृद्धिसाम्यैरेकोद्दिष्टवत्खर्वादिवाक्येन निर्णयम् । अमायां चन्द्रक्षयनियमात्त-दतिरिक्तपार्वणेऽयं विधिः[292] । स्वकालातिक्रमश्राद्धविघ्नादिकं त्वेकोद्दिष्टवत् ।

अथ मृताहाज्ञानादौ प्रसङ्गात्किञ्चिदुपन्यस्यते ।

बृहस्पतिः[293]—

यदा मासो य विज्ञातो ज्ञातं तद्दिनमेव तु ।
तदा ह्याषाढके मासि माघे वा तद्दिनं भवेत् ॥

तद्दिनं मृतदिनम् । कल्पितमिति शेषः ।

भविष्ये तु[294]—

मार्गशीर्षे तथाऽऽषाढे माघे वा तद्दिनं भवेत् ।

इति मार्गशीर्षमासोऽपि पठितः स एव ।

291- कालमाधवे (पृ-134) मृताहस्य-स्थाने आब्दिकस्य-पाठः । कृत्य-कौमुद्यां (पृ.पृ-227-28) चेत्-स्थाने स्यात् , यत्र-स्थाने तत्र-पाठः ।

292- अमायां पार्वणश्राद्धं विचारितं रघुनन्दनेन श्राद्धतत्त्वे (पृ-251) यथा—अथ पार्वणस्य प्रतिमासकर्त्तव्यत्वम् । अत्र मार्कण्डेयपुराणम्—

कार्यं श्राद्धममावास्यां मासि मास्युडुपक्षये ।

यन्मासि मासि कार्यम् । पितॄनुपक्रम्य 'मासि मासि वोऽशनम्' इति श्रुतेः । एतच्च श्राद्धं चन्द्रक्षयेऽमावास्यां प्राप्यातिशस्तम् । इति ।

293- कालसारे 'ज्ञातं तत्'-स्थाने विज्ञातं-धृतपाठः । श्राद्धक्रियाकौमुद्यां (पृ-478) गोविन्दानन्देन बैशाखे ज्येष्ठे वा मासि श्राद्धस्यास्य कर्त्तव्यता सूचिता, यथा—श्रवणदिवसाज्ञाने बाल्ये वा पित्रोर्मरणे व्यवस्थामाह पद्मपुराणे—

न जानाति दिनं यस्तु न मासं वसुधाधिप ।
तेन कार्यममावास्यां श्राद्धं संवत्सरं खलु ।
मार्गशीर्षे तथा माघे वैशाखे ज्येष्ठ एव वा ॥

तिथिविशेषज्ञाने मासज्ञानेऽप्येवम् । इति ।

294- श्राद्धतत्त्वे (पृ-287) कालसारे च सम्पूर्णवचनं यथा—

दिनमेव तु जानाति मासं नैव तु यो नरः ।
मार्गशीर्षे तथा भाद्रे मासि वा तद्दिनं भवेत् ॥ इति ।

न ज्ञायते मृताहश्चेत् प्रोषिते संस्थिते सति ।

मासश्चेदथ विज्ञातस्तद्दर्शे स्यात्तदाब्दिकम् ॥[295]

प्रोषित इत्यज्ञानोपलक्षणम् ।

दिनमासौ न विज्ञातौ मरणस्य यदा पुनः ।

प्रस्थानदिनमासौ तु ग्राह्यौ पूर्वोक्तया दिशा ॥[296]

प्रस्थानमासमज्ञात्वा तत्तिथिमात्रज्ञाने उक्तमाघाषाढान्यतरस्मिंस्तद्दिनं मृताहत्वेन कल्प्यम् । मासं ज्ञात्वा प्रस्थानदिनमात्राज्ञाने तु तन्मासीयदर्शे आब्दिकं स्यादिति पूर्वोक्तया दिशेत्यस्यार्थः[0] । प्रस्थानदिनमासयोरप्यज्ञाने प्रचेताः[297]—

अपरिज्ञाते मृते त्वमावास्यायां श्रवणदिवसे वा ।

श्रवणमासीयामायां श्रवणदिनमात्रे वेत्यर्थः ।

मृतस्याहो न जानाति मासं वाऽपि कथञ्चन ।

तेन कार्यममावास्याश्राद्धं माघेऽथ मार्गके ॥

इति प्रभासखण्डात् मरणदिनमासयोरप्यज्ञाने माघमार्गामायां श्राद्धमिति रघुनन्दनः[298] । कथञ्चनेत्यस्य प्रस्थानमरणश्रवणरूपेण केनाप्यज्ञानादित्यर्थात् । अपिना प्रस्थानश्रवणमासज्ञानेऽपि माघमार्गामायां श्राद्धमित्येके ।

295, 296- श्राद्धतत्त्वे (स्मृ० त०-I-पृ-286-287) स्यात्तदाब्दिकम्-स्थाने स्यान्मृताहानि इति बृहस्पतिवचनपाठः ।

297- श्राद्धतत्त्वे (स्मृ० त०-I-पृ-286) अविज्ञातमृते-इति, कृत्यकौमुद्यां (पृ-219) अपरिज्ञाते मृताहे-इति धृतपाठः ।

298- प्रसङ्गेऽस्मिन् श्राद्धतत्त्वे (स्मृ० त०-I-पृ-287) रघुनन्दनः प्रतिपादयति यथा—मरणप्रस्थानदिनमासाज्ञाने श्रवणदिवसस्य विषयः । प्रभासखण्डम्—

मृतस्याहो न जानाति........माघेऽथ मार्गके ॥

कथञ्चनेति मरणप्रस्थानदिनमासत्वरूपेण श्रवणदिनत्वरूपेण च केनाप्यज्ञाने इत्यर्थश्च सर्वत्र तत्तन्मासीयकृष्णैकादश्यभाव एव अमावास्या ग्राह्या श्राद्धविघ्न

0- 'प्रस्थानमासमज्ञात्वा....दिशेत्यस्यार्थः ।' इति भागो नास्ति ग-पुस्तके ।

श्राद्धविघ्ने समुत्पन्ने मृते रजसि सूतके ।
वदन्ति शुद्धौ तत्कार्यं दर्शे वाऽपि मनीषिणः ॥[299]

अशौचा[0]नन्तरं मलमासपाते तु मलोत्तरशुद्धमासकृष्णैकादश्यां तद्दर्शे वा मृताहश्राद्धम् , न तु मलमासे ;[300]

मलमासमृतानां तु यच्छ्राद्धं प्रतिवत्सरम् ।
मलमासेऽपि कर्त्तव्यं नान्येषां तु कदाचन ॥

इति पैठीनसिस्मृतेरिति रघुनन्दनः[301] । नवीनास्तु नान्येषामित्यत्र शुद्धमास-शुक्लपक्षमृतानामागामिनि तन्मलशुक्ले श्राद्धभ्रमनिरासार्थकत्वादशौचोत्तरं मलमासेऽपि वार्षिकश्राद्धं स्यात् । अस्तु वा मृताहाज्ञानश्राद्धविघ्नादिकृतं यद्वार्षिकश्राद्धं तन्न कार्यं मलदर्शैकादश्यादावित्यर्थो न त्वशौचानन्तरोत्पन्नमलमासे श्राद्धाभाव इत्यर्थ इति ।

इतिवचनात् , अन्यथा तद्वचनस्थमृताहाविदित इत्यस्य विषयानुपपत्तेः । तस्य ह्यमावास्यापेक्षया प्राधान्यं तद्वचने विशेष इत्यभिधानात् । इति ।

299- अविदितमृताहकालनिरूपणात्परं विघ्नितश्राद्धकालो निरूप्यते कृष्णमिश्रेण श्राद्धविघ्न इति । कृत्यकौमुद्यां (पृ-221) श्राद्धविघ्ने समुत्पन्ने-इति धृतपाठः ।

300- दिव्यसिंहः श्राद्धदीपे (पृ.पृ-86-87) विषयेऽस्मिन् इदं विचारयन् अमावास्यापेक्षया एकादश्यां श्राद्धस्य वैशिष्ट्यं प्रतिपादयति तद्यथा— श्राद्धविघ्ने समुत्पन्ने........कृष्णपक्षे विशेषतः ॥ कृष्णपक्षैकादश्याममावास्यापेक्षया विशेषतः कुर्वीतेत्यर्थः ।........मृताहाविदिते तथेति वाक्यशेषादशौचान्तदिने मलमासपाते तु मलमासोत्तरभाविदर्शे एव श्राद्धं कार्यम् । इति ।

301- मुद्रितश्राद्धतत्त्वे (स्मृ० त०-I-पृ-286) यच्छ्राद्धं-स्थाने श्राद्धं यत् इति पैठीनसिवचनपाठः । तत्र ग्रन्थकारो रघुनन्दनो विवेचयति यथा— पैठीनसिवचनस्य मलमासमृतविषयत्वाच्च परवचनेऽपि तदुभयश्राद्धस्याशौचपतितस्य मलमासाभ्यन्तरे कर्त्तव्यतोक्ता न तु तद्भिन्नस्य अनुपस्थितस्य तस्य च राजमार्त्तण्डे नैकादश्यां कर्त्तव्यतोक्तेः । मृताहाविदितेऽपि अविज्ञातमृते अमावास्यायां श्रवणदिवसे वा । इति प्रचेतोवचनोक्तामावास्यापेक्षया विशेषत इत्यनेन कृष्णैकादश्याः प्राधान्यं प्रतीयते । इति ।

0- अशौचानन्तरं-पदं ग-पुस्तके नास्ति ।

प्रतिसंवत्सरं श्राद्धमशौचात्पतितं तु यत् ।
मलमासेऽपि कर्त्तव्यमिति भागुरिभाषितम् ।।[302]

इति वचनात् । अतएव

तदाशौचे व्यतीते तु या तिथिः प्रतिपद्यते ।
सा तिथिस्तत्र कर्त्तव्या न त्वन्या वै कदाचन ।।

इति अशौचान्त अन्यदिननिषेधाद्द्रव्यासम्भवेऽप्यशौचान्तदिन[0] एव मासिक-वार्षिकश्राद्धमिति वादिनो विप्रमिश्रा[303] अपि अनुकूला इत्याहुः । रजसीति कौमुदीमते

अपुत्रा तु यदा भार्या संप्राप्ते भर्तुराब्दिके ।
रजस्वला भवेत् सा तु कुर्यात्तत् पञ्चमेऽहनि ।।

इति रजस्वलायाः कर्त्तृत्वपक्षाभिप्रायकम्[304] । पुरुषश्राद्धक्रियापक्षे स्त्रियां रजस्यपि श्राद्धमाचर्यत एव बहुभिः सुसिद्धमित्यादिप्रतिवचनस्य शालग्राम-द्विजपक्षे सुस्वागतादिप्रतिवचनवत् स्वयंनिर्वाहात् । अन्यथा मृतपत्नीकस्य श्राद्धलोपापत्तिः ।

302-कर्त्तव्यं-स्थाने तत्कार्यम् इति श्राद्धतत्त्वे (स्मृ०त०-I- पृ-286) पाठः ।

303-अत्र विप्रमिश्रस्य विचारः श्राद्धप्रदीपे (पृ-191) बाधाभ्युच्चयालोके यथा—अशौचकृतविघ्ने विशेषमाह ऋष्यशृङ्गः—

देये पितॄणां श्राद्धे तु अशौचं जायते यदि ।
तदाशौचे व्यतीते तु तेषां श्राद्धं प्रदीयते ।।
शुचीभूतेन दातव्यं या तिथिः प्रतिपद्यते ।
सा तिथिस्तस्य कर्त्तव्या न त्वन्या वै कदाचन ।।

देये अवश्यं देये मासिकवार्षिकादौ । अशौचविघ्ने शौचान्ततिथावेव देयम् । न तु द्रव्यासम्पत्तिविघ्न इव कृष्णैकादश्यामिति न त्वन्या वै कदाचनेति-वचनात् । इति ।

304- बृहस्पतिः कृत्यकौमुद्यां (पृ-221) विघ्नितश्राद्धकालनिरूपणे रजोदशायां श्राद्धप्रसङ्गमालोचयन् एकपत्नीकरजस्वलायाः पञ्चमेऽहनि श्राद्धपक्षं प्रतिपादयति । तद्यथा—रजःशुद्धिस्तु पञ्चमे दिने । तथा च शङ्खः—

0- निषेधा....शौचान्तदिन-भागोऽयं ख-ग-पुस्तकद्वये नास्ति ।

श्राद्धविघ्ने द्विजातीनामामश्राद्धं प्रकीर्त्तितम् ।
अमावास्यादिनियतं माससंवत्सरादृते ।।[305]

इत्यनुसाराद्दामश्राद्धं वा[0] । मरणसन्देहे तु यमः[306]—

गतस्य न भवेद्वार्त्ता यस्य द्वादशवार्षिकी ।
प्रेतावधारणं तस्य कर्त्तव्यं सुतबान्धवैः ।।

सुतैस्तद् बान्धवैर्वे[307]त्यर्थः[00] ।

आषाढकृष्णपक्षस्य तिथिरेकादशी तु या ।
तदारभ्यैव कर्त्तव्याः पिण्डदानोदकक्रियाः ।।[308]

शुद्धा भर्त्तुश्चतुर्थेऽहि न शुद्धा दैवपित्र्ययोः ।
दैवे कर्मणि पित्र्ये च पञ्चमेऽहनि शुध्यति ।।

द्विभार्यस्य तु रजोदोषो न प्रविशति । शुद्धपत्नीकस्याप्येवमिति केचित् । यत्तु

अपत्नीकः प्रवासी च भार्या यस्य रजस्वला ।
आमश्राद्धं द्विजो दद्याच्छूद्रो दद्यात् सदैव हि ।।

इति रजस्युत्पन्ने आमश्राद्धं विहितं तदमावास्यादिश्राद्धविषयमेव ।इति ।

305- श्राद्धक्रियाकौमुद्यां (पृ-29) लघुहारीतवचनम् ।

306- मुद्रितयमस्मृतौ वचनमिदं नोपलभ्यते । किन्तु श्राद्धतत्त्वे (स्मृ०त०-I-पृ-287) यस्य-स्थाने यावत् इति पाठः । विघ्नितश्राद्धकालनिरूपणानन्तरं पुनरविदितमृताहकालनिरूपणे विशेषवचनमिदम् । कृत्यकौमुद्यां (पृ-219) स्मृतिवचनत्वेनोद्धृतम् । एतत्पितृव्यतिरिक्तविषयमिति श्राद्धदीपे (पृ-25) प्रतिपाद्यते दिव्यसिंहेन । गदाधरस्तु कालसारेऽशौचप्रकरण एतन्मार्कण्डेयवचनं मनुते । अनन्तरवचनमपि तेनोद्धृतं यथा—

पिता प्रवसितो यस्य न च वार्त्ता न चागमः ।
ऊर्ध्वं पञ्चदशाद्वर्षात्कार्या पिण्डोदकक्रिया ।। इति ।

307- सुततुल्या बान्धवाः सुतबान्धवा इति मध्यपदलोपिकर्मधारयसमासः इत्यप्यर्थो मन्यते गदाधरेण पितेत्यादितदनन्तरवचनलाभात् । तदर्थानुसारं पुत्रस्य बान्धवानाञ्चाशौचपालनदिने वैषम्यम् । तच्चिन्त्यम् ।

0- रजसीति....द्दामश्राद्धं वा-भागोऽयं ख-ग-पुस्तकद्वये नास्ति ।

00- सुतैस्तदभावे सगोत्रैश्चेत्यर्थः । इति ग-पुस्तकपाठः ।

यत्तु पितरि प्रोषिते यस्य न वार्त्ता नैव चागतिः ॥
ऊर्ध्वं पञ्चदशाद्वर्षात्कृत्वा तत्प्रतिरूपकम् ॥
कुर्यात्तस्य च संस्कारं यथोक्तविधिना ततः ।
तदानीमेव सर्वाणि प्रेतकार्याणि सञ्चरेत् ॥[309]

इति पुत्रवतः पञ्चदशवर्षरूप[0]विशेषः स्मृतिसारकालादर्शादावुपन्यस्तः, कालनिर्णयदीपिकायां सपुत्रापुत्रसाधारण्येन पञ्चदशवर्षोत्तर एव कालो निरूपित; ; तत्सर्वं शम्भुकर-विप्रमिश्र-रघुनन्दनादिभिरलिखिताच्छिष्टैर्ना-द्रियते[310] । पर्णदाहे त्र्यहाशौचादिकं शुद्धिसर्वस्वे[311] वक्ष्यामः । द्वादश-

308- प्रोषितस्य मरणश्रवणाभावेऽपि कालेऽतीते पिण्डदानार्थं कृत्य-कौमुद्याम् (पृ-220) अविदितमृताहकालनिरूपणप्रकरणे सम्पूर्णं स्मृतिवचनं यथा —

आषाढकृष्णपक्षस्य तिथिरेकादशी च या ।
तदारभ्यैव कर्त्तव्या पिण्डदानोदकक्रियाः ॥
मार्गशीर्षे माघमासे वैशाखे ज्येष्ठ एव च ।
एषु चतुर्षु मासेषु कृष्णपक्षे विशेषतः ॥ इति ।

अपुत्रस्य कृत एतां व्यवस्थां मनुते कृत्यकौमुदीकारो बृहस्पतिः ।

309- प्रोषितपितृविषये विशेषप्रतिपादने श्राद्धदीप (पृ-25) धृतवचन-मिदम् । हेमाद्रिकृतचतुर्वर्गचिन्तामणौ श्राद्धकल्पे पञ्चमाध्याये कृत्वा तत्-स्थाने कृत्वा तु, प्रेतकार्याणि-स्थाने शेषकर्माणि इति जातुकर्णवचनम् । प्रतिरूपकं पलाशपत्रैः कुशैर्वा कृत्वा अग्नौ जुहुयात् । तदाह कृत्यकौमुद्याम् (पृ-220) अविदितमृताहकालनिरूपणे गालवः—

पालाशैस्त्रिशतैः पत्रैः कृत्वा वा प्रकृतिं कुशैः ।
शरैर्जुहुयादग्नौ वा प्रोषितस्यावधारणे ॥ इति ।

अस्थिसङ्ख्याभेदेन पलाशपत्रसङ्ख्याभेदोऽन्यैर्विचारितः ।

310- मुद्रितस्मृतिसारसङ्ग्रहे पितरि प्रोषित इति वचनमिदं विचारोऽयं वा नोपलभ्यते । शिष्टैर्नाद्रियत इति कथनेन स्वयं कृष्णमिश्रोऽपि पञ्चदश-वर्षोत्तरपक्षं न स्वीकरोति । सपुत्रापुत्रसाधारण्येनात्र द्वादशवर्षरूपपक्षं

0- पञ्चदशवर्षरूप-इति ख-ग-पुस्तकद्वये नास्ति ।

वर्षोत्तरपर्णास्थिदाहानन्तरं प्रोषितस्य कदाचिदागमने तु जीवन्यासेष्ट्यादिः कालादर्श-कालतत्त्वादौ[312] द्रष्टव्यः ।

स्वीकुर्वन् कृष्णमिश्रः शुद्धिसर्वस्वे (पृ-57) कथयति यथा—पर्णदाहकालस्तु—
गतस्य न भवेद्वार्त्ता........कर्त्तव्यं सुतबान्धवैः ।। इति ।

311- विषयमिममाधारीकृत्य शुद्धिसर्वस्वे (पृ-55) कृष्णमिश्रेण प्रतिपाद्यते यथा—

एवं पर्णशरं दग्ध्वा त्रिरात्रमशुचिर्भवेत् ।

इति ब्राह्मे पर्णदाहकृतत्रिदिनाशौचं साग्नेर्दशाहोत्तरवत्तन्मध्येऽपि त्र्यहरूपं समम्, न तु दशाहशेषेण त्वहबाधः, तस्य मरणावध्यशौचाभावात् । निरग्नेस्तु दशाहमध्ये पर्णदाहे दशाहशेषदिनैः शुद्धिः; गुरुणा दशाहेन लघोस्त्रिदिनाशौचस्य बाधात् । इत्यादि ।

312- पर्णास्थिदाहानन्तरं प्रोषितस्य जीवतस्तस्यागमने कालसारेऽशौचप्रकरणान्ते गदाधरेण जीवन्यासेष्ट्यादिव्यवस्था प्रतिपादिता । तद्यथा—

विहितक्रियस्य जीवतस्तस्य दैवादागमने वृहन्मनुः—

जीवन् यदि समागच्छेद् घृतकुम्भे नियोज्य तम् ।
उद्धृत्य स्थापयित्वाऽस्य जातकर्मादि कारयेत् ।।
द्वादशाहं व्रतं कुर्यात्त्रिरात्रमथवाऽस्य तु ।
स्नात्वोद्वहेत्ततो भार्यामन्यां वा तदभावतः ।।
अग्नीनाधाय विधिवद् व्रात्यस्तोमेन वा यजेत् ।
तथैवेन्द्राग्निपशुना गिरिं गत्वा च तत्र तु ।
इष्टिमायुष्यतीं कुर्यादीप्सितांश्च क्रतुंस्तथा ।।

इदं साग्नेः । निरग्नेस्तु चरुरेव, स चन्द्राग्नेयः । तदुक्तं गृह्यप्रायश्चित्ते—य आहिताग्नेः पुरोडाश एव अनाहिताग्नेश्चरुर्भवति । इति । तत्र वृहन्मनूक्तवचनस्यार्थक्रमः कालादर्शकारिकायां स्फुटमुक्तः—

यदागच्छेत्पुमान् जीवन् सपत्नोऽधिकसंस्कृतः ।
घृतकुम्भे स्थापयित्वा तमुद्धास्य शुभे क्षणे ।।
संस्कृतं जातकर्माद्यैरुपनीतं विधानतः ।
द्वादशाहं त्रिरात्रं वा विहितोपोषणं व्रतम् ।।
गृहादागत्य पूर्वां वा तदभावे परां स्त्रियम् ।
उद्वहन्तं च संस्कुर्याच्चरुणायुष्मतेन च ।। इति ।

प्रतिपत्

चैत्रे मासि जगद् ब्रह्मा ससर्ज प्रथमेऽहनि ।
शुक्लपक्षे समग्रं तु तदा सूर्योदये सति ॥
प्रवर्त्तयामास तदा कालस्य गणनामपि ।
ग्रहान्मासान् ऋतून्गणान् वत्सरान् वत्सराधिपान् ॥[313]

इति वचनात् चैत्रशुक्लप्रतिपत् संवत्सरादिप्रतिपत् । युग्मात्[314] शुक्लप्रतिपत् दर्शविद्धा ग्राह्या । कृष्णा तु प्रतिपत् सद्वितीयेत्यापस्तम्बात्[315] परविद्धा ।

या शुक्लप्रतिपच्चैत्रमासस्य वत्सरस्य या ।
पूर्वविद्धा न कर्त्तव्या कर्त्तव्या परसंयुता ॥[316]

इतिवचनात् चैत्रशुक्लप्रतिपत् न दर्शविद्धैव । गौडास्तु—कृष्णा प्रतिपदुपवासे परा न योज्या । यदाह वृहद्वसिष्ठः—

द्वितीया पञ्चमी वेधाद्[0] दशमी च त्रयोदशी ।
चतुर्दशी चोपवासे हन्युः पूर्वोत्तरे तिथी ॥

द्वितीयादयः स्वस्ववेधयोगात् प्रतिपत्तृतीये हन्युरित्यर्थः । आपस्तम्बवचनस्योपवासपरत्वादित्याहुः[317] । तत्तु

313- तिथिविशेषेषु कृत्यनिरूपणे प्रथमतः प्रतिपद्विचार्यते । तत्र संवत्सरादिप्रतिपत् चैत्रशुक्लप्रतिपत् । विवृतं चैतत् स्मृतिसारसङ्ग्रहे प्रतिपन्निर्णये—तत्रेदं चिन्त्यते ज्योतिर्विदां चैत्रशुक्लादिव्यवहारः । तथा च शतानन्दः—युगवर्षमासादिभेदेन चैत्रशुक्लप्रतिपदमारभ्य तस्य प्रवृत्तिरिति । अतएव दैवज्ञचूडामणिः—युगवर्षमासदिवसाः सम्यक्प्रवृत्तास्तु चैत्रशुक्लादेः । ब्रह्मपुराणे—चैत्रे मासि........सूर्योदये सति । इति ।

314- द्रष्टव्या पादटिप्पणी-225 ।

315- द्रष्टव्या पादटिप्पणी-174 ।

316- कालसारे प्रतिपद्व्रतनिर्णये ब्रह्मपुराणवचनम् ।

317- रघुनन्दनः तिथितत्त्वे (स्मृ० त०-I-पृ-26) अप्येवं विचारयति, यथा—कृष्णाऽप्युपवासे द्वितीयायुता न ग्राह्या । तथा च बृहद्वशिष्ठः—द्वितीया पञ्चमी........तिथी । द्वितीयावेधयोगात् प्रतिपत् तृतीये हन्तीत्यर्थः ।

0- विद्धा इति ग-पुस्तके पाठः ।

शुक्लपक्षे दर्शविद्धा , कृष्णे विद्धा द्वितीयया ।

उपोष्या प्रतिपच्छुक्ल........ ||[318]

इति माधवविरोधादुपेक्ष्यम् ।

कर्त्तिकशुक्लप्रतिपदि वामनपुराणीयो[319] वल्युत्सवः । सोऽप्युपवासवत् पूर्वविद्धदिने[320] ।

पूर्वविद्धैव कर्त्तव्या शिवरात्रिर्बलेर्दिनम् ।[321]

एवमन्यत्र । अत्रोपवासपरेण विशेषविधिनाऽऽपस्तम्बीयसामान्यस्य सङ्कोचात् । इति ।

318- कालमाधवे (पृ-6) माधवाचार्योक्तं सम्पूर्णवचनं यथा—

शुक्लपक्षे दर्शविद्धा, कृष्णे विद्धा द्वितीयया ।।

उपोष्या प्रतिपच्छुक्ले मुख्या स्यादापराह्णिकी ।

तदभावे तु सायाह्नव्यापिनी परिगृह्यताम् ।। इति ।

वस्तुतस्तु 'नन्दां संवत्सरादौ तु दर्शविद्धां न कारयेत् ।' इति कालदीप- (पृ-18) धृतवचनबलात् चैत्रशुक्लप्रतिपत् द्वितीयायुक्ता ग्राह्या ।

319- वामनपुराणे द्विनवतितमाध्याये बलिबन्धने भगवद्वाक्यं यथा—

दीपप्रदाननामाऽसौ तव भावी महोत्सवः ।। 56 ।।

तत्र त्वां नरशार्दूला हृष्टाः पुष्टाः स्वलङ्कृताः ।

पुष्पदीपप्रदानेन अर्चयिष्यन्ति यत्नतः ।। 57 ।।

तत्रोत्सवो मुख्यतमो भविष्यति स चापि लोके तव नामचिह्नितः ।

यथैव राज्ये भवतस्तु साम्प्रतं तथैव सा भाव्यथ कौमुदीति ।। 58 ।।

इति । प्रदीपामावास्यापरदिने बल्युत्सवः कर्त्तव्यः ।

320- अयमेवाशयः कालमाधवे (पृ-7) माधवाचार्येणोपन्यस्तः, यथा—

बल्युत्सवं च पूर्वेद्युरुपवासवदाचरेत् ।

इति । पूर्वेद्युरभावे परविद्धायामुपवासवत्कर्त्तव्योऽयमुत्सवः । उपवासस्य परविद्धत्वमुक्तं तेन कालमाधवे (पृ 102) यथा—किं बहुना, मुख्यायाः पूर्वविद्धायाः प्रतिपदोऽसम्भवे शेषिपरित्यागाद्वरमुत्तरविद्धायाः परिग्रहणमित्यवगन्तव्यम् । तदेवं शुक्लप्रतिपदुपवास-बल्युत्सवयोः पूर्वविद्धा मुख्येति व्यवस्थितम् । इति ।

321- कालसारे प्रतिपत्प्रकरणे सम्पूर्णं पादमवचनं यथा—

श्रावणी दुर्गनवमी तथा दूर्वाष्टमी च या ।

पूर्वविद्धैव कर्त्तव्या शिवरात्रिर्बलेर्दिनम् ।। इति ।

इति स्कान्दात् । वैष्णवानामयं दैत्योत्सवः प्रदोषव्यापितिथौ वक्ष्यते । एवं दर्शविद्धायामस्यां गोवर्धनपूजाऽपि[322] । अत्र प्रतिपदि ब्राह्मे[323] द्यूतं[324] दर्शितम्—

शङ्करश्च पुरा द्यूतं ससर्ज सुमनोहरम् ।
कार्त्तिके शुक्लपक्षे च प्रथमेऽहनि भूपते ॥
जितश्च शङ्करस्तत्र जयं लेभे च पार्वती ।
अतोऽर्थाच्छङ्करो दुःखी नित्यं गौरी सुखोषिता ॥
तस्माद् द्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैः ।
तस्मिन् द्यूते जयो यस्य तस्य संवत्सरः शुभः ।
पराजयो विरुद्धश्च लब्धनाशकरो भवेत् ॥

अत्र विधिनिषेधौ फले । उपवासद्यूतादिकं विधिः । तत्र पूर्वपरनियमो न तु निषेधः । स च यद्यपि कालमात्रापेक्ष उक्तस्तथापि

प्रतिपल्लेशमात्रेण कलामात्रेण चाष्टमी ।
दिनं दूषयते सर्वं सुरा गव्यघटं यथा ॥

इति निर्णयामृतधृतस्मृत्या

उदयेऽस्तमये वाऽपि मुहूर्त्तद्वयगामि यत् ।
तद्दिनं तदहोरात्रमनध्यायं विदो विदुः ॥

इति आपस्तम्बेन यत्र क्वापि काले प्रतिपत्कलादिसत्त्वे दिनमात्रं दुष्टम् । अतएव फणिशङ्करभाष्यादौ अध्येतॄणां गुरूणामध्ययनाभावसमाचारोऽप्युदयास्ताष्टमीयुक्तदिनद्वये ।

केचिदाहुः क्वचिद्देशे यावत्तु दिननाडिकाः ।
तावदेव त्वनध्यायो नहि तस्मिन् दिनान्तरे ॥

इदं तु अन्यग्रन्थपरम् । प्रेकोच्चैश्चाद्वितीयापरं वा । अतएव पूर्वकल्पप्रामाण्यात्

322- अत्र गोवर्धनः गोमयेन चित्रेण वा कृत्वा पूजनीयः ।

323- मुद्रितब्रह्मपुराणे नास्ति, किन्तु तिथितत्त्वे (पृ-27) उद्धृतम् ।

324- अक्षशलाकादिभिर्यत्क्रीड्यते तद् द्यूतम् , यथा मनुः (9/223)—
अप्राणिभिर्यत्क्रियते तल्लोके द्यूतमुच्यते । इति ।

षष्ठीयुक्तसप्तम्यां परदिनोदये सप्तम्युत्तरमस्तमयेऽष्टमीयोगे पूर्वदिने गलग्रहं मन्वाना न व्रतमाचरन्ति प्राञ्चः । युक्तं चैतत् ।

अष्टम्यां सप्तमीविद्धा त्रयोदश्यां चतुर्दशी ।
प्रतिपदि द्वितीया च तमेवाहुर्गलग्रहम् ॥

इति सुप्रकाशधृतवचनात् । क्वचित्कालमात्राश्रयेऽपि त्यागः । यथा—

षष्ठीषु तैलं फलमष्टमीषु ।

इत्यादि । यथा वा

प्रतिपत्सु प्रयातानां सिद्धिरेव न संशयः ।[325] इति ।

कृष्णप्रतिपदि गमननिषेधः ।

वामनपुराणे—

नन्दासु नाभ्यङ्गमुपाचरेच्च क्षौरञ्च रिक्तासु जयासु मांसम् ।
पूर्णासु योषित्परिवर्जनीया भद्रासु कर्माणि[0] समाचरेच्च ॥[326]
नन्दा भद्राश्च जया रिक्ताः पूर्णाः स्वनामसदृशफलाः ।[327]

इति प्रतिपदादिपञ्चम्यन्तानां क्रमात् संज्ञा । एवं षष्ठ्यादीनाम् । प्रतिपदादिपञ्चदशतिथिषु क्रमात् फलनिषेधो यथा[328]—

325- ज्योतिषतत्त्वसुधार्णवे ज्योतिस्तत्त्ववचनम् (श्लो०-5) इदम् ।

326- तिथितत्त्वे (स्मृ० त०-I-पृ-27), कृत्यकल्पतरौ वामनपुराणवचनमिदम् । कर्माणि-स्थाने सर्वाणि-पाठः । वारविशेषे नक्षत्रविशेषे च वर्ज्यावर्ज्यविवेकोऽप्युक्तस्तिथितत्त्वे (पृ-28) यथा—प्रायश्चित्तं वचनान्तरैकवाक्यतया यथायोग्यमूहनीयं कल्पतरौ—

नाभ्यङ्गमर्के न च भूमिपुत्रे क्षौरं च शुक्रेऽथ कुजे च मांसम् ।
बुधे च योषां न समाचरेच्च शेषेषु सर्वाणि सदैव कुर्यात् ॥
चित्रास्वहस्ताश्रवणासु तैलं क्षौरं विशाखाप्रतिपत्सु वर्ज्यम् ।
मूले मृगे भाद्रपदासु मांसं योषिन्मघाकृत्तिकासोत्तरासु । इति ।

327- नन्दा भद्रा जया रिक्ता पूर्णा च प्रतिपदः क्रमात् ।
इति तिथितत्त्वे (स्मृ० त०-I-पृ-27) ज्योतिषवचनम् ।

328- तिथितत्त्वे (स्मृ० त०-I-पृ-27) स्मृतिवचनमिदम् ।

0- कर्माणि-स्थाने सर्वाणि इति ख-पुस्तके पाठः ।

कुष्माण्डे चार्थहानिः स्याद् बृहत्यां न स्मरेद्धरिम् ।
बहुशत्रुः पटोले स्याद्धनहानिश्च मूलके ॥
कलङ्को जायते बिल्वे तिर्यग्योनिश्च निम्बके ।
ताले शरीरनाशः स्यान्नारिकेले च मूर्खता ॥
तुम्बी गोमांसतुल्या स्यात्कलम्बो गोबधात्मकः ।[0]
शिम्बी पापकरी ज्ञेया पूतिका ब्रह्मघातिका ॥
वार्त्ताकौ सुतहानिः स्याच्चिररोगी च माषके ।
महापापकरं मांसं प्रतिपदादिषु वर्जयेत् ॥

सप्तम्यां तालनिषेधोऽन्यदिने तालभक्षणबोधकः । पूतिका द्वादश्यां शूद्रपराऽतिदोषा वा[329] । एवमन्यत् ।

तिथिदेवता यथा[330]—

वह्निर्विरञ्ची गिरिजा गणेशः फणी विशाखो दिनकृन्महेशः ।
दुर्गान्तको विष्णु हरिः स्मरश्च शर्वः शशी चेति पुराणदृष्टाः ॥

अथ द्वितीया

तत्र माधवाचार्याः[331]—इयं पूर्वविद्धा ग्राह्या ।

329- रघुनन्दनोऽपीत्थं मनुते, यथा तिथितत्त्वे (स्मृ० त०-I-पृ-28)—पूतिका च द्वादश्यामधिकदोषाय शूद्रविषयिका वा । इति ।

330- कालादर्शे (पत्रम् 16) प्रतिपादितमेवं यथा—

अग्निं विरञ्चिं गिरिजां गणेशं फणिनं गुहम् ॥ 37 ॥
सूर्यं शम्भुं भारतीञ्च यममीशं हरिं स्मरम् ।
शिवं चन्द्रं प्रतिपदाद्यास्वेवं तिथिषु क्रमात् ॥ 38 ॥
शुक्ले कृष्णेऽपि वा पक्षे विधिवत् परिपूजयेत् ॥ 39 ॥ इति ।

331- कालमाधवे (पृ पृ-137-138) माधवाचार्येणेत्थं विचारितम्, तद्यथा—युग्मत्वाभिप्रायेणैव द्वितीयायाः परविद्धायाः उपोष्यत्वं भृगुस्मृतिविष्णुधर्मोत्तराभ्यां दर्शितम्—

एकादश्यष्टमी षष्ठी द्वितीया च चतुर्दशी ।
त्रयोदशी चतुर्थी च उपोष्याः स्युः परान्विताः ॥ इति ।

0- कलम्बी गोबधात्मिका इति ख-ग-पुस्तकद्वये पाठः ।

एकादश्यष्टमी षष्ठी द्वितीया च चतुर्दशी ।
त्रयोदश्यप्यमावास्या उपोष्याः स्युः परान्विताः ॥

इत्यादि भृगुवचनं यदा पूर्वेद्युरुदयात्त्रिमुहूर्त्तानन्तरं प्रवृत्ता द्वितीया परेद्युरपि त्रिमुहूर्त्तव्यापिनी तत्परं ग्राह्यम् । एवञ्च तदन्यशुक्लकृष्णसाधारणद्वितीया-मात्रं पूर्वयुतं ग्राह्यम् । तथाहि—

पूर्वेद्युरसती प्रातः परेद्युस्त्रिमुहूर्त्तगा ।
स्याद् द्वितीया परोपोष्या पूर्वविद्धा ततोऽपरा ॥[332]

यदा पूर्वेद्युरुदयमारभ्य परेद्युरुदयस्योपरि त्रिमुहूर्त्तं वर्द्धते तदा पूर्वेद्युरेवोपवासः । न चोदाहृतेन परान्विताः-इति वचनेन विरोधः शङ्कनीयः परान्विता-पूर्वान्वितयोः प्रसक्तयोर्द्वयोः सतोरस्य वचनस्य नियामकत्वात् । न चात्र परान्वितत्वं प्रसक्तमस्ति, पूर्वस्य दिनस्य सम्पूर्णतिथित्वात् सम्पूर्णखण्डयोः सम्पूर्णस्यासन्देहत्वेन प्रबलत्वात् । असञ्जातविरोधित्वकृत्स्नकर्मकालव्या-प्तिभ्यां पूर्वदिनस्यैव प्राबल्यम् । तस्मात्तत्रैवोपवासः । ननु, पूर्वदिनोपवासं प्रतिषेधति व्यासः—

तृतीयया युता कार्या द्वितीया न तु पूर्वया । इति ।

नैवम् । अस्य वचनस्य खण्डतिथिविषयत्वेन सम्पूर्णतिथावप्रवृत्तेः । खण्डतिथि-विषयत्वञ्च, पूर्वया युता नैव कार्येत्यभिधानादवगम्यते । ननु, खण्डतिथावपि द्वितीया पूर्वविद्धैवोपोष्या—

प्रतिपत्सद्वितीया स्याद् द्वितीया प्रतिपद्युता ।

इत्यापस्तम्बेन प्रतिपद् द्वितीययोर्युग्मत्वाभिधानात् । एतदेव वचनमुपजीव्य कृष्णा प्रतिपत्परविद्धैवोपोष्येति पूर्वं निर्णीतम् । एवं तर्हि द्वितीयाऽपि क्वचित्पूर्वविद्धा भवतु । तदुक्तं स्कन्दपुराणे—

प्रतिपत्सम्मुखी कार्या या भवेदापराह्णिकी ।
पूर्वाह्णिकी च कर्त्तव्या द्वितीया तादृशी विभो ॥ इति ।

तादृशी सम्मुखी पूर्वयुतेत्यर्थः । पूर्वेद्युरुदये मुहूर्त्तं परित्यज्यावशिष्ट-पूर्वाह्ण-सम्बन्धिनी यदा भवति तदा वेधकारिण्याः पूर्वतिथेर्मुहूर्त्तत्रयाभावेन वेद्धुमसामर्थ्यात् स्वयं खण्डाऽपि सती सम्पूर्णावत् पूर्वत्रोपवासे युज्यते । इति ।

332- कालमाधवे (पृ-9) उपोद्घातप्रकरणे वचनं यथा—

पूर्वेद्युरसती प्रातः परेद्युस्त्रिमुहूर्त्तगा ॥
सा द्वितीया परोपोष्या पूर्वविद्धा ततोऽपरा । इति ।

इत्याहुः । स्मृतिसारकारस्तु[333]—

एकादश्यष्टमी षष्ठी द्वितीया च चतुर्दशी ।
त्रयोदशी अमावास्या उपोष्याः स्युः परान्विताः ।।

इति विष्णुधर्मात् द्वितीया परविद्धा कार्या, उपवासशब्दस्य व्रतार्थत्वात् ।

प्रतिपत् सद्वितीया स्याद् द्वितीया प्रतिपद्युता ।

इति आपस्तम्बवचनं यमद्वितीयाविषयम्, अनन्तभट्टीकारादिभि[334]स्तथोक्तत्वादित्याचष्टे । तदुभयं चिन्त्यम् । प्रतिपत्सद्वितीयेत्यत्र प्रतिपदः कृत्स्नाया ग्रहणे तत्साहित्येन कृष्णद्वितीयायाः एव ग्रहौचित्यात् । परेद्युस्त्रिमुहूर्त्तव्यापिनी द्वितीया परविद्धैव कार्येतिवाक्यालाभात् । किञ्च षष्ठ्यष्टम्यादिकमप्येवं स्यात् । तथा च कृष्णपक्षेऽष्टमी चैवे[335]त्यादिपूर्वविद्धा[0] वाक्यविरोधः । अपि युग्मादिवाक्येनाचारेणापि विरोधः । नापि प्रतिपत्सद्वितीया स्यादितियमद्वितीयाविषयम्, तस्याः शुक्लत्वात् । तस्मात् स्मार्त्तभट्टाचार्यव्यवस्थाऽत्र[336] सारम् । तथाहि प्रतिपत्सद्वितीयेति कृष्णप्रतिपत्साहचर्यात्

333-स्मृतिसारसङ्ग्रहे (पृ-15) द्वितीयानिर्णये ग्रन्थकर्त्रा विश्वनाथमिश्रेण प्रतिपादितं यथा—सा च परविद्धा कार्या । तथा च विष्णुधर्मोत्तरे—एकादश्यष्टमी षष्ठी........उपोष्याः स्युः परान्विताः । उपवासशब्दो व्रतपरः । यत्तु प्रतिपत्सद्वितीया स्याद् द्वितीया प्रतिपद्युतेति तद्यमद्वितीयाविषयम् । तस्यां हि भगिनीभिर्भ्रातरो भोज्यन्ते नैव व्रतादिविषयमित्यनन्तभट्टीकारः । इति ।

334- विषयेऽस्मिन् विधानपारिजाते तृतीयस्तवके (पृ-679) अनन्तभट्टोक्तवचनं यथा—कार्त्तिकशुक्लद्वितीया यमद्वितीया । सा च पूर्वविद्धा ग्राह्या । इति ।

335- कालसारे अष्टमीप्रकरणे सम्पूर्णं निगमवचनं यथा—

कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी ।
पूर्वविद्धैव कर्त्तव्या परविद्धा न कस्यचित् ।
उपवासादिकार्येषु ह्येष धर्मः सनातनः ।। इति ।

336- स्मार्त्तभट्टाचार्यः रघुनन्दनभट्टाचार्यः । तत्कृततिथितत्त्वे (स्मृ०त०-

0- ग्राह्येति- ख-ग-पुस्तकद्वयेऽत्राधिकपाठः ।

कृष्णद्वितीया पूर्वविद्धा। युग्मादिवाक्यात् शुक्ला परा ग्राह्येति। एवं सति

द्वितीयैकादशी षष्ठी तथा चैवाष्टमी तिथिः।
वेधादधस्ताद्वन्युक्ता उपवासे तिथिस्त्विमाः ॥

इत्यादिनारदवचनं तु कृष्णद्वितीयाविषयम्। द्वितीयाद्यास्तृतीयादियुता नोपोष्या इत्यर्थात्। एकादश्यष्टमी षष्ठी चेत्यादिभृगुवचनं शुक्लद्वितीयापरमिति न द्वयोरन्योन्यविरोधः। यमद्वितीयाऽपि शुक्लत्वात् परोचिता, विशेषाभावादिति ध्येयम्।

श्रीगुण्डिचा

स्कान्दे[337]—

आषाढस्य सिते पक्षे द्वितीया पुष्यसंयुता।
तस्यां रथे समारोप्य रामं मां भद्रया सह ॥
यात्रोत्सवं प्रवर्त्याथ प्रीणयेत्तु द्विजान् बहून्।
ऋक्षाभावे तिथौ कार्या[338] सदा सा प्रीतये मम ॥

मां जगन्नाथम्। सा गुण्डिचा।

I-पृ-29) विषयेऽस्मिन् प्रदर्शितः सिद्धान्तः कृष्णमिश्रेण स्वीकृतोऽत्र सारमितिकथनेन। रघुनन्दनप्रदर्शितविचारोऽत्र यथा—सा च कृष्णा पूर्वयुता ग्राह्या, प्रतिपत्सद्वितीया....इत्यापस्तम्बवचनात्। तत्रोक्तयुक्तेः प्रतिपत्कृष्णा तत्साहचर्याद् द्वितीयाऽपि तथेति। शुक्ला तु परयुता ग्राह्या युग्मात्। एवं वक्ष्यमाण उपवासविधायकयोः विरुद्धवचनयोर्व्यवस्थोन्नेया। यथा नारदः—द्वितीयैकादशी षष्ठी....उपवासे तिथिस्त्विमाः। अत्र द्वितीयाद्यास्तृतीयादियुता नोपोष्या इत्यर्थः। विष्णुरहस्यम्—

एकादश्यष्टमी षष्ठी द्वितीया च चतुर्दशी।
त्रयोदश्यप्यमावास्या उपोष्याः स्युः परान्विताः ॥

तस्मात्पूर्ववचनं कृष्णपक्षविषयं परवचनं शुक्लपक्षविषयम्। इति।

337- मुद्रितस्कन्दपुराणे वचनं नास्ति, किन्तु तिथितत्त्वे (स्मृ० त०-I-पृ-29) उद्धृतम्।

338- पुष्यानक्षत्रयोगाभावेऽपि केवलायामाषाढशुक्लद्वितीयातिथौ सा गुण्डिचायात्रा कार्या, सदा-शब्दयोगेन तस्या यात्राया नित्यत्वात्। उक्तञ्चैतत् कालसारकारेण-सदा-शब्दाद् यात्रेयं श्रीपुरुषोत्तमक्षेत्रेऽवश्यं कार्या। नक्षत्रं विनाऽपि कार्येति च गम्यते। इति।

ब्राह्मे[339]—

गुण्डिचामण्डपं यान्तं ये पश्यन्ति रथे स्थितम् ।
कृष्णं बलं सुभद्रां च ते यान्ति भवनं हरेः ॥
ये पश्यन्ति तदा[0] कृष्णं सप्ताहं[340] मण्डपे स्थितम् ।
हरिं रामं सुभद्रां च विष्णुलोकं व्रजन्ति ते ॥

किञ्च, यात्रां कृत्वा गुण्डिचाख्यां विधिवत्सुसमाहितः ।
आषाढस्य सिते पक्षे नरो योषिदथापि[00] वा ॥
दृष्ट्वा रामं च कृष्णं च सुभद्रां च द्विजोत्तमाः ।

339- ब्रह्मपुराणे (66/1-2) ।

340- गुण्डिचामण्डपे सप्ताहस्थितिरूपविषयोऽयं विचार्यते कालदीपतेजनी (पृ-20) कारैरस्मद्गुरुचरणैः, यथा—

अत्र सप्ताहमिति नात्यन्तसंयोगे द्वितीया अपितु सप्ताहं यावत् इति बोधव्यम् । तेन देवप्रतिमानां गुण्डिचामन्दिरे सप्ताहस्थितिः न नियता किन्तु गमनागमनवासरावेव नियताविति निष्कर्षः । तेन द्वितीयायां गुण्डिचा-मन्दिरं प्रति गमनं, सप्ताहं तत्र मण्डपे स्थितिः, नवमदिने पुनः प्रत्यागमनं चेति सर्वमेकैव यात्रा । एतदुक्तं स्कान्दे पुरुषोत्तमक्षेत्रमाहात्म्ये(35/8-10)—

दक्षिणाभिमुखा यात्रा विष्णोरेषा सुदुर्लभा ।
यात्रा प्रयत्नतः सा हि भक्तिश्रद्धासमन्वितैः ॥
यथा पूर्वा तथा चेयं द्वे च मुक्तिप्रदायिके ।
यात्राप्रवेशौ देवस्य एक एवोत्सवः मतः ॥
पुराविदो वदन्त्येनां यात्रां नवदिनात्मिकाम् ॥

प्रत्यागमनाव्यवहितपूर्वसायंसन्ध्यादर्शनेन सुमहत्पुण्यम् । तदुक्तं तत्रैव—

दिनानि सप्त यान्यत्र कृष्णे वसति मण्डपे ।
एकस्मादुत्तरं श्रेयो यत्तस्मादुत्तरोत्तरम् ॥ (34/33)

तथा— दिवा तद्दर्शनं पुण्यं रात्रौ दशगुणं भवेत् । (34/12) इति ।

0- तदा-स्थाने सदा-इति ग-पुस्तके ।

00- अथापि-स्थाने कदापि-इति ग-पुस्तके ।

पञ्चदशाश्वमेधानां फलं प्राप्नोति चाधिकम् ॥[341]

आषाढस्य सिते पक्षे द्वितीया पुष्ययोगतः ।

स्कान्दे[342]—

आषाढस्य सिते पक्षे द्वितीया पुष्यसंयुता ।

अरुणोदयवेलायां तत्र देवं प्रपूजयेत् ॥

अत्रारुणपदस्य सूर्यार्थत्वात् सूर्योदयादित्रिमुहूर्त्तात्मकपूर्वाह्णोऽस्य कालः[343] । दिनद्वये पूर्वाह्णे सत्त्वे तु सामान्यशुक्लद्वितीयान्यायः । शुद्धाधिकायां तिथिमलत्वान्नोत्तरग्रहः । स्नानात् सावनपञ्चदशदिनोत्तरं शुद्धाधिकायामपि पूर्वैव , विश्रामदिननियमस्य शास्त्रीयत्वात् । वस्तुतस्तु पुष्यसंयुता "द्वितीया पुष्ययोगतः", "ऋक्षाभावे तिथा"विति स्वरसात्

प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः ।[344]

341- कृत्यकौमुद्यां (पृ-26) ब्रह्मपुराणवचनम् ।

342- स्कान्दे क्षेत्रमाहात्म्ये (33/38) तत्र-स्थाने तस्याम् इति पाठः ।

343- यद्यप्यत्रारुणोदयः कर्मकालत्वेनोक्तस्तथापि दैवे ह्यौदयिकी ग्राह्येति नारदीयोक्तेः सूर्योदयः पूर्वाह्णोऽत्र यात्राकालः । उक्तोऽरुणोदयस्तु तत्पूर्वभाविकर्मसम्पादनकालः । अतएवात्र पूर्वाह्णव्याप्तिर्ग्राह्येति कालदीपे (पृ-21) दिव्यसिंहेनोक्तं यत्तत् कालचन्द्रिकाकारेण धर्मपाठिना—यस्मिन् दिने उदयादारभ्य द्वितीया पूर्वाह्णं व्याप्नोति तस्मिन्नेव दिने श्रीगुण्डिचायात्रा कर्त्तव्या, यथा ब्रह्मपुराणे—

आषाढस्य सिते पक्षे द्वितीया यत्र नारद ।
दिने उदयमारभ्य पूर्वाह्णव्यापिनी भवेत् ।
अस्मिन् दिने रथे कृष्णं रामं भद्रां प्रवेशयेत् ॥

इति प्रतिपादितम् । किन्तु वीरसर्वस्वकारः (पृ-93)

गुण्डिचाख्या द्वितीया तु पूर्वाह्णव्यापिनी मता ।
सदा परयुता ग्राह्या पुष्ययुक्ता शुचौ सिता ॥

इति वचनात् परयुताग्राह्यत्वं यदुक्तवान् तन्न समीचीनम् , सदा पुष्यानक्षत्रयुक्ताऽपि न समीचीना ऋक्षाभावे तिथौ कार्येतिप्रागुक्तत्वात् ।

344- "चोदना वा गुणानां युगपच्छास्त्राच्चोदिते हि तदर्थत्वात्तस्य तस्योपदिश्येत ।" इति जैमिनि (2/2/6) सूत्रे तन्त्रवार्त्तिककारेण

इत्यादेर्वक्ष्यमाणत्वाच्च तिथिमलं विना पुष्ययुते पूर्वाह्णव्यापिदिने गुण्डिचा न्याय्येत्यनुमीयते ।

प्रेकोचैचाद्वितीया

राजमार्त्तण्डे[345]—

प्रेकोचैचाद्वितीयास्ताः प्रेतपक्षे गते तु या ।
या तु कोजागरे याते चैत्रावल्याः परेऽपि च ॥
चातुर्मास्ये समाप्ते च या द्वितीया भवेत्तिथिः ।
परास्वेतास्वनध्यायः पुराणैः परिकीर्त्तितः ॥

कुमारिलभट्टेन प्रतिपाद्यते यथा—नैतेऽष्टाकपालादयो गुणविधयः । कुतः । प्राप्ते कर्मणि........ । इत्यादि । वचनमेतद्विचार्यते मीमांसान्यायप्रकाश-व्याख्यायां (पृ-39) वासुदेवशास्त्रिणा, यथा—यस्मिन् वाक्ये कर्म तदङ्गभूता अनेके गुणाश्च निर्दिश्यन्ते तत्र तत्कर्म वचनान्तरेण प्राप्तं चेत्तत्र तस्याप्राप्तत्वाभावाद्विधानं न संभवति । किन्तु तत्र तस्यानुवाद एव कृत इति वक्तव्यम् । तथा च तत्कर्मानूद्य तत्र निर्दिष्टानामनेकेषां गुणानां विधाने उद्देश्यविधेय-भावभेदेन वाक्यभेददोषो दुष्परिहर इत्यतस्तत्र तत्कर्मानुवादेनानेकेषां गुणानां विधानमिति न शक्यते वक्तुम् । यदि च तत्कर्म वचनान्तरेण प्राप्तं न स्यात्तर्हि तत्र निर्दिष्टाङ्गभूतानेकगुणविशिष्टं तत्कर्म किञ्चित्फलमुद्दिश्य विधातुं शक्यते । तत्र च यद्यपि विधेयं गुरुभूतं तथाप्युद्देश्यविधेयभावरूपः प्रयत्न एक एवेति न वाक्यभेददोष इति भावः । अत्र प्राप्ते कर्मणीत्यत्र कर्मपदं द्रव्यादीनां सर्वेषामुपलक्षणम् । द्रव्ये गुणे कर्मणि वा प्राप्ते सति तदनुवादेन द्रव्याणां गुणानां कर्मणां वा सजातीयानामनेकेषां तथा विजातीयानां द्रव्यगुणकर्मणामप्यनेकेषां विधानं न युज्यत इति तात्पर्यम् । इति ।

345- तिथितत्त्वे (स्मृ० त०-I पृ-30) या द्वितीया-स्थाने द्वितीया या-धृतपाठः । कालदीपे (पृ-21) कोप्रेचैचा-पाठः । वीरसर्वस्वे (पृ-93) कोप्रेचैचा, परासु-स्थाने सर्वासु-पाठः । अध्ययनस्य जपान्तर्भावादत्र सूर्योदयव्यापिद्वितीयातिथिग्रहणम् "अनध्ययने तिथिरौदयिकी एव, यां तिथिं समनुप्राप्य........इति देवलस्मरणात् । अध्ययनस्य जपरूपत्वाच्च ।" इति कालदीपतेजनीकारप्रतिपादनात् ।

शुद्धा[0] तिथिमलत्वान्न परा। निषेधस्य कालमात्राश्रयत्वाद्वा[346] तत्काल[00]मनध्यायः। चैत्रावली चैत्रपौर्णमासी।

शुचावूर्जे तपस्ये च या द्वितीया विधुक्षये।
चातुर्मास्यद्वितीयास्ताः प्रवदन्ति मनीषिणः ॥[347]

शुचावाषाढे, ऊर्जे कार्त्तिके, तपस्ये फाल्गुने, विधुक्षये कृष्णपक्षे। शुचादिरत्र दर्शान्तः।

यमद्वितीया

लैङ्गे[348]—

कार्त्तिके च द्वितीयायां शुक्लायां भ्रातृपूजनम्।
या न कुर्याद्विनश्यन्ति भ्रातरः सप्तजन्मनि ॥

तस्या इति शेषः।

भारते[349]—

कार्त्तिके शुक्लपक्षे तु द्वितीयायां युधिष्ठिर!
यमो यमुनया पूर्वं भोजितः स्वगृहे मुदा[000] ॥
तस्यां निजगृहे राजन्न भोक्तव्यमतो बुधैः।

346- निषेधस्य कालमात्राश्रयत्वं सूच्यते कालमाधवे (पृ-81) यथा—
निमित्तं कालमासाद्य वृत्तिर्विधिनिषेधयोः।
विधिः पूज्यतिथौ तत्र निषेधः कालमात्रके ॥ इति।

347- कालदीपे (पृ-22), वीरसर्वस्वे (पृ-93) धृतम्। आश्विनशुक्लद्वितीयायां कार्त्तिकवैशाखश्रावणमार्गशीर्षचैत्रकृष्णद्वितीयासु अनध्यायः कर्त्तव्यः।

348- तिथितत्त्वे (स्मृ० त०-I-पृ-29) च-स्थाने तु-पाठः।

349- तिथितत्त्वे (स्मृ० त० I-पृ पृ-29-30) शुक्लपक्षे तु-स्थाने शुक्लपक्षस्य, मुदा स्थाने स्वयम्, राजन्-स्थाने पार्थ, अन्तिमश्लोकार्द्धे दानानि च प्रदेयानि-इति धृतपाठः।

0- शुद्धाऽधिका इति ग-पुस्तके।

00- तावत्कालम् इति ग-पुस्तके पाठः।

000- स्वयम् इति ग-पुस्तके पाठः।

यत्नेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनम् ॥
नानादानानि देयानि भगिनीभ्यो विशेषतः ॥

किञ्च, यमं च चित्रगुप्तं च यमदूतांश्च पूजयेत् ।
अर्घ्यश्चात्र प्रदातव्यो यमाय सहजद्वयैः ॥

सहजद्वयैर्भ्रातृभिर्भगिनीभिश्च । अर्घ्यमन्त्रो यथा—

एह्येहि मार्त्तण्डज ! पाशहस्त !
यमान्तकालोकधरामरेश !
भ्रातृद्वितीयाकृतदेवपूजां
गृहाण चार्घ्यं भगवन्नमस्ते ॥

प्रणाममन्त्रो यथा—

धर्मराज ! नमस्तुभ्यं नमस्ते यमुनाग्रज !
पाहि मां किङ्करैः सार्द्धं सूर्यपुत्र ! नमोऽस्तु ते ॥

यमुनापूजानन्तरं तन्नमस्कारमन्त्रो यथा—

यमस्वसर्नमस्तेऽस्तु यमुने ! लोकपूजिते !
वरदा भव मे नित्यं सूर्यपुत्रि ! नमोऽस्तु ते ॥

अन्नं दत्त्वा पठेत्—

भ्रातस्तवानुजाताऽहं भुङ्क्ष्व भक्तमिदं शुभम् ।
प्रीतये यमराजस्य यमुनाया विशेषतः ॥

ज्येष्ठायामग्रजातेत्यूहः । अत्र भोक्तव्यं पुष्टिवर्द्धनमिति विध्युत्तरफलश्रवणाद्भोजनोत्तरफलकामो नियमः । तेनाष्टधाविभक्तदिनपञ्चमांशोऽस्य कालः । तथा च दक्षः[350]—

पञ्चमे च तथा भागे संविभागो यथार्हतः ।
पितृदेवमनुष्याणां कीटानां चोपदिश्यते ॥
संविभागं ततः कृत्वा गृहस्थः शेषभुग्भवेत् ॥

संविभागो विभज्यान्नस्य प्रतिपादनम् । तिथिद्वैधे दिनपञ्चमांशव्यापिनी तिथिर्ग्राह्या । उभयेद्युस्तद्व्याप्तौ तदभावे वा शुक्लत्वात् परग्रहः ।

350- स्मृतीनां समुच्चयान्तर्गत-दक्षस्मृतौ (2/40-41) ।

इयं पूर्वविद्धा द्वितीया ग्राह्येति अनन्तभट्टीकारोक्तं[351] निर्मूलम् । इयं यमद्वितीया वैष्णवसमा ।

ज्योतिषे[352]—

तस्यां यमद्वितीयायां यात्रायां मरणं ध्रुवम् ।

अत्र[0] वचनाभावादनध्याये भ्रमः कृतः ।

तृतीया

सा च रम्भाव्रतं विना सर्वकर्मसु चतुर्थीयुता ग्राह्या ।

रम्भाख्यां वर्जयित्वा तु तृतीयां मुनिसत्तम !

अन्येषु दैवकार्येषु गणयुक्ता प्रशस्यते ॥

इति ब्रह्मवैवर्त्तात्[353] । गणश्चतुर्थी । आपस्तम्बोऽपि[354]—

द्वितीयाशेषसंयुक्तां तृतीयां कुरुते तु यः ।

स याति नरकं घोरं कालसूत्रं भयङ्करम् ॥

एतेन युग्मवाक्यं रम्भायां सावकाशम् । विवाहोत्तरं प्रथमशुक्लतृतीयानिशि

351- विधानपारिजाते द्वितीयखण्डे तृतीयस्तवके (पृ-679) अनन्तभट्टेनोक्तं यत्—कार्त्तिकशुक्लद्वितीया यमद्वितीया । सा च पूर्वविद्धा ग्राह्या । इति । निर्मूलमिति कथनेन कृष्णमिश्र एतन्मतं खण्डयति । यद्यप्ययं पक्षो गदाधरप्रभृतिभिः स्वीकृतस्तथापि विधानपारिजातकारमतं समीचीनम्, अनेकत्र शास्त्रवचनमाश्रित्य तथा प्रतिपादनात् । यथा भट्टोजिदीक्षितकृततिथिनिर्णये (पृ-38)—सा पूर्वविद्धा अपराह्णव्यापीनी ग्राह्या । तदुक्तं स्कान्दे—

ऊर्जे शुक्ले द्वितीयायामपराह्णेऽर्च्चयेद्यमम् ।

स्नानं कृत्वा भानुजायां यमलोकं न पश्यति ॥ इति ।

352- ज्योतिषतत्त्वसुधार्णवे यात्राप्रकरणे (श्लो०-3) तस्यां-स्थाने तथा-इति ज्योतिःसारवचनपाठः । तिथितत्त्वे (स्मृ० त०-I-पृ-30) तस्यां-स्थाने तथा, ध्रुवम्-स्थाने भवेत्-पाठः ।

353- निर्णयसिन्धौ (पृ-23) कालसारे च दैवकार्येषु-स्थाने सर्वकार्येषु ।

354- कालसारे कुरुते तु-स्थाने कारयेत्तु-पाठः ।

0- निषेध-इति ख-ग-पुस्तकद्वयेऽत्राधिकपाठः ।

वरकन्ययोश्चन्द्रनिराजना[0]विधिरुत्कले पूर्वविद्धायां समाचारः कृतः[355] । स च नैमित्तिकत्वान्मलमासेऽपि क्रियते ।

नित्यनैमित्तिके कुर्यात्प्रयतः सन्मलिम्लुचे ।[356]

इति वृहस्पतिवचनात् ।[00]

अक्षयतृतीया

वैशाखे मासि राजेन्द्र ! शुक्लपक्षे तृतीयिका ।
अक्षया नाम सा प्रोक्ता कृत्तिकारोहिणीयुता ॥

355- अस्मदुत्कलेषु विवाहानन्तरं प्रथमशुक्लतृतीयानिशि वरकन्याभ्यां चन्द्रपूजाऽऽचर्यते । परिणयनात्पूर्वमेषा कन्या कदाचिदन्यपुरुषासक्ता स्यात् ततः शुद्ध्यर्थं विवाहात्परं गर्भसञ्चाराय ऋतुकाले समुचितरजःस्रावरूप-शुद्ध्यर्थं वा चन्द्र आराध्यः स्याद्यतो हि स्त्रीणां शुद्धिकारकदेवतारूपेण चन्द्रः प्रसिद्धो वर्त्तते । एतदभिप्रेत्य 'सोमः शौचं ददावासामि'ति याज्ञवल्क्येन (1/71) उक्तम् । अपरञ्च विवाहानन्तरं 'सुस्थ इन्दौ सकृत्पुत्रमि'ति याज्ञवल्क्योक्त (1/80) शुभपुत्रसन्तानप्राप्त्यर्थं नक्षत्राधिपतिश्चन्द्रः पूजनीयो भवति । द्वितीयाविद्धतृतीयानिशि अत्र चन्द्रनिराजना क्रियते । द्वितीया-तृतीययोर्भद्राजयातिथ्योः संयोगे तत्र विशेषेण कार्यसिद्धिः सम्भवति तिथौ सामान्येन सर्वकारणत्वलाभात् । तिथेर्वै शिष्ट्यमाह लल्लः—

तिथिः शरीरं तिथिरेव कारणं तिथिः प्रमाणं तिथिरेव साधनम् ।

इति निर्णयसिन्धौ (पृ-122) । चन्द्रपूजायामत्र देशाचारः प्रमाणम् ।

356 कालमाधवे (पृ-62) कालसारे च उद्धृतम् । स्मृतिसारसङ्ग्रहे (पृ-58) विषयेऽस्मिन् स्मृत्यन्तरवचनं यथा—

सीमन्तः प्रेतकृत्यञ्च नवशय्या नवः शशी ।
मलमासेऽपि कर्त्तव्यं निमित्तविहितञ्च यत् ॥ इति ।

अत्र चन्द्रदर्शननिमित्तकं वक्ष्यमाणं धात्रेयिकावाक्यमपि पठनीयम् । नित्यं नियतनिमित्तोपाधौ चोदितम्, अनियतनिमित्तोपाधौ चोदितं नैमित्तिकमिति विज्ञानेश्वरः (याज्ञ० 1/217) ।

0- निराजना-स्थाने वन्दापना इति ख-ग-पुस्तकद्वये ।

00- इति शिष्टाः- इति ख-पुस्तकेऽत्राधिकपाठः ।

तस्यां दानादिकं पुण्यमक्षयं समुदाहृतम् ॥[357]

भविष्ये[358]—

वैशाखे मासि राजेन्द्र ! तृतीया चन्दनस्य च ।
कलधौतं तथा धान्यं घृतं चापि विशेषतः ।
तस्यां दत्तं त्वक्षयं स्यात्तेन सा त्वक्षया स्मृता ॥

चन्दनस्येतिलिङ्गाच्चन्दनदानमत्र प्रशस्तम् ।

कृत्यकौमुद्याम्[359]—

दानात्तु चन्द्रनस्येह कञ्जजो नात्र संशयः ।

कञ्जजो ब्रह्मा । भविष्ये—

या शुक्ला कुरुशार्दूल ! वैशाखे मासि वै तिथिः ।
तृतीया साऽक्षया लोके गीर्वाणैरभिवन्दिता ॥
योऽस्यां ददाति करकान् वारिवाजसमन्वितान् ।
स याति पुरुषो वीर ! लोकान् वै हेममालिनः ॥[360]

करकान् कुम्भान् , वाजमन्नम् , हेममालिनः सूर्यस्य ।

स्कान्दे[361]—

वैशाखस्य सिते पक्षे तृतीयाऽक्षयसंज्ञिता ।
तत्र मां लेपयेद् गन्धचन्दनैरतिशोभितम् ॥

मां विष्णुम् । ब्राह्मे[362]—

यः पश्यति तृतीयायां कृष्णं चन्दनचर्च्चितम् ।
वैशाखे मासि राजेन्द्र ! स यात्यच्युतमन्दिरम् ॥

357- तिथितत्त्वे (पृ-31) । 358- कृत्यकौमुद्याम् (पृ-18) ।

359- कृत्यकौमुदीकारस्य (पृ 18) विचारोऽत्र यथा—तृतीया चन्दनस्येतिवचनादत्र चन्दनदानप्रशस्तमित्युक्तम् । तदुक्तम्—दानात्तु........नात्र संशयः । इह चन्दनदानात् कञ्जजो ब्रह्मा भवतीत्यर्थः ।

360-कृत्यकौमुद्यां (पृ-18) शुक्ला-स्थाने त्वेषा, करकान्-स्थाने कलशान् , वाज-स्थाने वस्त्र चेति धृतपाठः ।

361- चन्दनैः-स्थाने लेपनैः-इति तिथितत्त्वे (स्मृ० त०-I-पृ 31) ।

362- मुद्रितब्रह्मपुराणे (63/21) चर्च्चितं-स्थाने रूषितम् , तृतीयचरणे वैशाखस्य सिते पक्षे इति च पाठः । तत्रैवान्यत् सर्वमुक्तम् ।

तत्रैव— वैशाखे शुक्लपक्षे तु तृतीयायां जनार्दनः ।
यवानुत्पादयामास युगं च कृतवान् कृतम् ।
ब्रह्मलोकात् त्रिपथगां पृथिव्यामवतारयत् ।
तस्यां कार्यो यवैर्होमो यवैर्विष्णुं समर्च्चयेत् ॥
यवान् दद्याद् द्विजातिभ्यः प्रयतः प्राशयेद् यवान् ।
पूजयेच्छङ्करं गङ्गां कैलासं च हिमालयम् ।
भगीरथं च नृपतिं सागराणां सुखावहम् ॥
स्नानं दानं तपः श्राद्धं जपहोमादिकं च यत् ।
श्रद्धया क्रियते तत्र तदानन्त्याय कल्प्यते ॥
सिन्धोस्तीरे विशेषेण सर्वमक्षयमश्नुते ॥

आग्नेयपुराणेऽत्र[363] छत्रोपानह् दानादौ फलाधिक्यमुक्तम् । कृत्तिका-रोहिणीयुतेत्युक्त्या तदन्यतरयोगे[0]फलातिशयः । इदञ्च सोदयत्रिमुहूर्त्तायामिति दानप्रकरणे विचारितम् । अत्र स्कान्दे रथार्थं[364] वनयागोऽप्युक्तः, यथा—

363- अक्षयतृतीयायां छत्रादिदानमुक्तं कृत्यकौमुद्याम् (पृ-18) आग्नेय-पुराणे—

यो ददाति द्विजेभ्यस्तु तृतीयायामुपानहौ ।
वैशाखे शुक्लपक्षे तु सच्छत्रकरकान्वितौ ॥
न तस्य मनसो दाहो श्रियं पुत्रांश्च विन्दति ।
सर्वव्याधिविनिर्मुक्तो मर्त्यलोके महीयते ॥ इति ।

364- एषा परम्परा श्रीजगन्नाथमन्दिरे प्रचलिता वर्त्तते । प्रतिवर्षं बलभद्रसुभद्रासहितस्य भगवतो जगन्नाथदेवस्य गुण्डिचायात्रानिमित्तं रथानां निर्माणमक्षयतृतीयादिवसे प्रारभ्यते । रथानां निर्माणार्थं काष्ठखण्डानामपि सङ्ग्रहणमस्माद्दिवसात् भवति । पूर्ववर्षीयाक्षयतृतीयायां सङ्गृहीत-काष्ठखण्डैः परवर्त्तिन्यामक्षयतृतीयायां रथनिर्माणं भवति । एतदर्थं वृक्षच्छेदनकाले वनयागः क्रियते । श्रीजगन्नाथादिदेवप्रतिमानां नवकलेवर-निर्माणावसरे दारुसङ्ग्रहार्थमपि वनयागो नृसिंहमन्त्रयुताहुतिभिः सम्पाद्यते ।

0- तदुभययोगे-इति ख-ग-पुस्तकद्वयेऽत्र पाठः ।

वैशाखस्यामले पक्षे तृतीया पापनाशिनी ।
स्वयमाविष्कृता चैव प्राजापत्यर्क्षसंयुता ॥
तस्यां सङ्कल्प्य नृपतिराचार्यं वृणुयाच्छुचिः ।
एकं त्रीन् वाऽथ तक्षाणां दृष्टनिर्माणमादरात् ॥
वृणुयाद् वनयागाय वस्त्रालङ्करणादिभिः ॥

अत्र दैवकार्यत्वात् पूर्वाह्णः कालः ।

रम्भातृतीया

भद्रे ! कुरु प्रयत्नेन रम्भाख्यं व्रतमुत्तमम् ।
ज्येष्ठशुक्लतृतीयायां स्नाता नियमतत्परा ॥[365]

अन्यच्च— रम्भातृतीयां वक्ष्यामि सर्वपापप्रणाशिनीम् ।
मार्गशीर्षे तथा मासि तृतीयायां नराधिप !
शुक्लायां प्रातरुत्थाय दन्तधावनपूर्वकम् ॥[366]

इत्यादिकमुक्त्वोपसङ्हृतम्—

सौभाग्यार्थं पुरा चीर्णं रम्भया मुनिसत्तम !
तेन रम्भातृतीयेयं परं सौभाग्यदायिनी ॥[367]
रम्भातृतीया पूर्वा स्यादुत्तरा स्याद् व्रतान्तरे ।
परेऽह्नि नास्ति चेत्पूर्वविद्धाऽप्यस्तु व्रतान्तरे ॥

इति[368] माधवीयादियं पूर्वा कार्या ।

गौरीव्रतम्[369]

शतानन्दसङ्ग्रहे[370]—

365, 366, 367- कुरुष्व यत्नेन इतिपाठेन कालसारे भविष्योत्तरपुराणवचनमेतत् सर्वम् । तथा-स्थाने अथवा, मुनिसत्तम-स्थाने राजसत्तम इत्यधिकपाठान्तरेण भविष्यत्पुराणवचनमेतत् कालमाधवे (पृ-140) ।

368- कालमाधवे (पृ-9) ।

369- अस्मदुत्कलेषु एतत् बालि (बालुका) तृतीयाव्रतमिति प्रसिद्धम् ।

370- च दातव्या-स्थाने प्रदातव्या, पायसं च-स्थाने सर्वदानम् इति कालसारे धृतपाठः ।

गुडपूपाश्च दातव्या मासि भाद्रपदे सिते ।
तृतीयायां पायसं च वासुदेवस्य प्रीतये ॥
उमां शिवं गणेशं च विधिवत्पूजयन्ति याः ।
गौरीवरप्रसादेन परं सौभाग्यमाप्नुयुः ॥

अत्र हस्तर्क्षयोगे फलाधिक्यम् ,

भाद्रे मासि सिते पक्षे तृतीया हस्तसंयुता । इति लिङ्गात् ।
मुहूर्त्तमात्रसत्त्वेऽपि दिने गौरीव्रतं परे ।
शुद्धाधिकायामप्येवं गणयोगप्रशंसनात् ॥

इति माधवाचार्याः[371] । गौरीव्रतस्य रात्रिविधेयत्वेऽपि माधवोक्त्या[372] परदिनग्रहः । श्रीपञ्चमीवत् । नक्तं च नार्त्तजव्रतान्माधवीया[0]भिन्नमस्ति गौरीव्रतमित्येके । तन्मृग्यम् । रात्र्याचारो वा भ्रान्तिकृतः ।

चतुर्थी

इयञ्च परयुता ग्राह्या युग्मात् ।

बृहद्वसिष्ठो[373]ऽपि—

एकादशी तथा षष्ठी अमावास्या चतुर्थिका ।
उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुताः ॥ इति वचनाच्च ।
[374]अमा वै सोमवारेण रविवारेण सप्तमी ।
चतुर्थी भौमवारेण अक्षयादपि चाक्षया ॥[00]

सोमवारेणेत्यादिविशेषेण तृतीया । अक्षया अक्षयफला इत्यर्थः । अत्र

371- कालमाधवे (पृ पृ-9-10) ।

372- विषयेऽस्मिन् कालमाधवे (पृ-142) माधवाचार्यवचनं यथा— शिष्टाश्च मुहूर्त्तमात्रसद्भावमाश्रित्य गौरीव्रतं परेद्युरेवानुतिष्ठन्ति । अतो गौरीव्रतं परेद्युरेवानुष्ठेयम् । इति । दिव्यसिंहगदाधरादयोऽप्येतत्स्वीकुर्वन्ति ।

373- कालसारे वसिष्ठः, स्मृतिसारसङ्ग्रहे तु वृद्धवसिष्ठः ।

374- कालसारे भविष्योक्तिः ।

0-माधवीयं भविष्यमभिन्नमप्यस्ति गौरीव्रतं दिवेत्येके । इति ग-पुस्तके पाठः ।

00-इति भविष्यात्-इति ग-पुस्तकेऽत्राधिकपाठः ।

प्रदोषेऽध्ययनं निषेधति स्मृतिः[375]—

त्रयोदश्याश्चतुर्थ्याश्च सप्तम्या द्वादशीतिथेः ।
प्रदोषेऽध्ययनं धीमान्न कुर्याच्च यथाक्रमम् ।।

प्रदोषशब्दोऽत्र रात्रिप्रथमयामपर इति हेमाद्रिः । रात्रिमात्रर्थ इत्यन्ये ।

गणेशचतुर्थी

स्कान्दे[376]—

विनायकव्रते कार्या सर्वकार्येषु षण्मुख !
चतुर्थी च जया युक्ता गणनाथसुतोषिणी ।।

कालादर्शे[377]—

भाद्रे शुक्लचतुर्थ्यर्कभौमवारेण संयुता ।
महाचतुर्थी विज्ञेया तत्र विघ्नेशमर्च्चयेत् ।।
प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने देवमर्च्चयेत् ।

इति वचनान्मध्याह्नोऽस्य कालः । तेन द्वैधे मध्याह्नव्यापिनी कार्या ।

चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते ।
मध्याह्नव्यापिनी चेत् स्यात्परतस्तु परेऽहनि ।।

इति वृहस्पतिवचनात्[378] ।

मातृविद्धा प्रशस्ता स्याच्चतुर्थी गणनायके ।
मध्याह्ने परतश्चेत्स्यान्नागविद्धा प्रशस्यते ।।[379]

इति वाक्याच्च । वाक्यद्वये पर एवेति भावः । तेन दिनद्वये मध्याह्नव्याप्तौ

375- तिथितत्त्वे (पृ.पृ-31-32) विषयेऽस्मिन् रघुनन्दनेनोक्तं यथा—स्मृतिवचनम्-त्रयोदश्याश्चतुर्थ्याश्च....न कुर्वीत यथाक्रमम् ।। प्रदोषशब्दोऽत्र प्रथमप्रहर इति हेमाद्रिः, रात्रिपर इति निर्णयामृतकृद्भोजदेवः । इति ।

376- कालमाधवे (पृ-146), कालसारे च विनायकव्रतप्रकरणे ।

377- स्मृतिसारसङ्ग्रहे (पृ-58) महाचतुर्थी सा ज्ञेया, मध्याह्ने पूजयेन्नृप ! इति तथाऽन्तिमे विनायकव्रते कार्या पूर्वविद्धा सदा तिथिः । चेति धृतपाठः ।

378- परतश्चेत्परेहनि-इति निर्णयसिन्धौ (पृ.पृ-101-2) धृतपाठः ।

379- कालमाधवे (पृ-146) स्मृत्यन्तरवचनम् ।

जयायोगात् पूर्वा ग्राह्या । एवमुभयेद्युर्मध्याह्नव्याप्तावपि पूर्वा । तथा च मध्याह्नव्याप्तेरेकभक्तन्यायेन षोढा भेदे परेद्युरेव मध्याह्नव्याप्तौ परा । इतरेषु पञ्चसु पक्षेषु पूर्वैवेति निष्कृष्टम् । एतेन तिथिसामान्यतः पूर्वविद्धाग्रहोक्त्या परदिनमात्रे मध्याह्नव्याप्तौ पूर्वदिनग्रहं प्रतिपादयन् स्मृतिसारकारः[380] परास्तः । तिथिपदस्य मध्याह्नव्यापितिथ्यर्थकत्वे मानाभावाद् गौरवाच्च । व्याप्तिश्च कृत्स्नाकृत्स्नस्पर्शमात्रमित्युक्तम् । भविष्ये[381]—

विनायकं समभ्यर्च्य चतुर्थ्यां यदुनन्दन !
सर्वविघ्नविनिर्मुक्तः कार्यसिद्धिमवाप्नुयात् ॥ इत्युक्त्वा
निद्रां रतिं शिवां भद्रां मेधां कीर्त्तिं सरस्वतीम् ।
श्रद्धां पुष्टिं तथा तुष्टिं तत्रैवाहनि पूजयेत् ॥
विद्याकामो विशेषेण पूजयेच्च सरस्वतीम् ॥ (इत्युक्तम् ।)

लैङ्गे[382]—

चतुर्थ्यां तु गणेशस्य गौर्याश्चैव विधानतः ।
पूजां कृत्वा लभेत्सिद्धिं सौभाग्यं च नरः क्रमात् ॥

इति वचनान्निद्रासरस्वत्यन्तानामप्यत्र कामनावशात् पूजा स्यात् । एतेन यस्यां कस्याञ्चिच्चतुर्थ्यां गौरीगणेशौ पूजयेदिति वदन् दिव्यसिंहोऽत्र[383]

380- विषयेऽस्मिन् स्मृतिसारसङ्ग्रहे (पृ-58) ग्रन्थकर्त्रा उक्तं यथा— तिथिद्वैधे पूर्वदिने व्रतं कर्त्तव्यम् । इति ।

381- कालमाधवे (पृ-148) कीर्त्तिं मेधां, प्रज्ञां तुष्टिं तथा कान्तिं तत्रैवाहनि-इति धृतपाठः । कर्मणां निर्विघ्नसाधनार्थं विनायकः पूजनीयः । याज्ञवल्क्येन तत्प्रतिपाद्यते यथा (याज्ञ०-1/271)—

विनायकः कर्मविघ्नसिद्ध्यर्थं विनियोजितः ।
गणानामाधिपत्ये च रुद्रेण ब्रह्मणा तथा ॥ इति ।

382-मुद्रितलिङ्गपुराणे नोपलभ्यते, किन्तु कालमाधवे (पृ-149) उद्धृतम् ।

383- दिव्यसिंहः कालदीपे (पृ-28) प्रसङ्गेऽस्मिन् विचारयति यथा— सिद्धिसौभाग्यविशिष्टफलकामो यस्यां कस्याञ्चिच्चतुर्थ्यां गौरीगणेशौ पूजयेत् । इति । कालसारकारोऽप्येतदनुसरति । वस्तुतस्तु गणेशपूजने कृष्णचतुर्थी प्रशस्ता, शुक्लचतुर्थी प्रशस्ततरा, भाद्रमासशुक्लपक्षचतुर्थी प्रशस्ततमेति ज्ञातव्यम् ।

वश्रामेत्यवधेयम् । स्मृतिसारमाधवादिभिर्गणेशचतुर्थ्यामेव[384] तदभिधानात् । न च मासि मासि गणेशपूजापक्षे तत्सिद्धिरिति वाच्यम् । कृष्णचतुर्थीषु तदभावात् । न च प्रतिकृष्णचतुर्थ्यां गुप्तगणेशाख्यपूजाऽस्तीति शङ्क्यम् । तथापि तत्क्रमपूजकापूजकसामान्योक्तेरयुक्तत्वाच्च । एकमासं द्विमासं वेत्यादिपक्षा मध्याह्नव्यापिचतुर्थीग्राहकाः , मासिकादौ तिथ्यादरवत् । मलमासकर्त्तव्यत्वश्चेत्यादि प्राङ्निरुक्तम् ।

नागचतुर्थी

कौर्मे[385]—

तिथौ युगाह्वयायाञ्च समुपोष्य यथाविधि ।
शङ्खपालादिनागानां शेषस्य च महात्मनः ॥
पूजा कार्या पुष्पगन्धक्षीराप्यायनपूर्वकम् ॥
विषाणि तेषां नश्यन्ति न च हिंसन्ति पन्नगाः ॥

युगं चतुर्थी । अत्रापि मध्याह्नः पूजाकालः ।

युगं मध्यन्दिने यत्र तत्रोपोष्य फणीश्वरान् ।
क्षीरेणाप्यायय पञ्चम्यां पूजयेत्प्रयतो नरः ।
विषाणि तेषां नश्यन्ति न च हिंसन्ति पन्नगाः ॥[386]

अत्रापि पूर्ववत् षोढा भेदे पूर्वेद्युरेव मध्याह्नव्याप्तौ पूर्वा नागचतुर्थी स्यात् । इतरेषु पञ्चसु पक्षेषु गणेशचतुर्थीवैपरीत्येनोत्तरैव, पञ्चम्यां पूजयेदित्युक्तेः पञ्चमीयोगप्राशस्त्यात्[387] । नमोऽस्तु सर्पेभ्यः इति त्रिः पूजामन्त्रः ।

384- स्मृतिसारसङ्ग्रहकालमाधवयोरस्मिन् प्रसङ्गे भाद्रशुक्लचतुर्थी-व्यवस्था नोपलभ्यते । माधवाचार्यः कालमाधवे (पृ-149) चतुर्थ्यां तु गणेशस्येतिलिङ्गपुराणवचनमुद्धरन् कथयति यथा—अतो यथोक्तरीत्या विनायकव्रते मध्याह्नव्यापित्वेनैव निर्णयः । इति ।

385- विषाणि तस्य नश्यन्ति न च तान् घ्नन्ति पन्नगाः । इति कालमाधवे (पृ-149) धृतपाठः ।

386- विषाणि तस्य नश्यन्ति न तान् हिंसन्ति पन्नगाः । इति कालमाधवे (पृ-149) देवलवचनेऽन्तिमश्लोकार्द्धपाठः ।

387- माधवाचार्यः कालमाधवे विषयमिमं स्पष्टीकरोति यथा—यदा तु

नागा यथा[388]—

कुलिकानन्तौ वासुकिशङ्खौ तक्षकमहापद्मौ ।
अम्बुजकर्कोटाविति नीला रक्ताश्च हरितः सिताः ॥

शिवचतुर्थी

मासि भाद्रपदे शुक्ला चतुर्थी शिवपूजिता ।
तस्यां स्नानं तथा दानमुपवासो जपस्तथा ॥
तावत्सहस्रगुणितं प्रसादाद्यतिनो नृप ॥

अस्य रौद्रत्वादपराह्णः पूजाकाल इति स्मृतिसारः[389] । तिथिद्वैधे युग्मात्परग्रहः ।

हरितालिकाचतुर्थी

पाद्मे—

शुक्लपक्षे चतुर्थ्यां तु सिंहे चन्द्रस्य दर्शनम् ।
मिथ्याभिशंसनं कुर्यात्तस्मात्पश्येन्न तं तदा ॥

निषेधस्य कालमात्रापेक्षत्वाच्चतुर्थ्यनन्तरं कदाचित्पञ्चमीयोगे चन्द्रदर्शनं न दोषावहमिति स्मार्त्तभट्टाचार्याः[390] ।

पञ्चाननगते भानौ पक्षयोरुभयोरपि ।
चतुर्थ्यामुदितश्चन्द्रो नेक्षितव्यः कथञ्चन ॥

पूर्वेद्युरेव मध्याह्नव्यापिनी, तदा नागचतुर्थी पूर्वा । इतरेषु तु पञ्चसु भेदेषु पञ्चमीयोगस्य प्रशस्तत्वात् उत्तरा भवति । तत्प्राशस्त्यञ्च—

चतुर्थी पञ्चमीयुक्ता नागप्रीतिविवर्द्धिनी ।
प्रीताः स्युः पूजितास्तस्यां नागास्तांस्तत्र पूजयेत् ॥

इति वचनादवसीयते । इति ।

388- स्मृतिसारसङ्ग्रहे (पृ-46) तक्षकमहान्तौ इति तक्षकमहापद्मौ-स्थाने धवलचक्रहरिद्वर्जिताः इति अन्तिमचरणे च धृतपाठः ।

389- अस्य पूजा अपराह्णे कर्त्तव्या, कुतः रौद्रत्वात् । तिथिद्वैधे पूर्वदिने कर्त्तव्यम् । इति स्मृतिसारसङ्ग्रहे (पृ 57) ग्रन्थकर्त्रा प्रतिपादितम् ।

390- स्मार्त्तभट्टाचार्यः रघुनन्दनभट्टाचार्यः । तेन तिथितत्त्वे (स्मृ० त०-I-पृ-32) विषयेऽस्मिन् कथ्यते यथा—चतुर्थ्यां दर्शननिषेधात्तत्रोदितस्य चन्द्रस्य पञ्चम्यां दर्शने तु न दोषः । इति ।

चतुर्थ्यां नेक्षितव्य इत्यन्वयः । उदितोऽयं प्रकार इत्यर्थः[391] । पञ्चाननेति स्वरसात् कृष्णचतुर्थ्यां[0] सिंहयोग एव चन्द्र[00]दर्शनं दुष्टम् । शुक्लचतुर्थ्यां तु शुक्लपक्ष इत्यधोवाक्यात्[000]सिंहरवियोगायोगयोरपि तद् दुष्टमिति तात्पर्यार्थः । ब्राह्मे[392]—

नारायणोऽभिशप्तस्तु निशाकरमरीचिषु ।
स्थितश्चतुर्थ्यामद्यापि मनुष्याय पतेच्च सः ॥
अतश्चतुर्थ्यां चन्द्रं तु प्रमादाद्वीक्ष्य मानवः ।
पठेद्वात्रेयिकावाक्यं प्राङ्मुखो वाऽप्युदङ्मुखः ॥

अभिशप्तो मिथ्यापवादाक्रान्तः । वाक्यं यथा ब्राह्मे[393]—

सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः ।
सुकुमारक ! मा रोदीस्तव ह्येष स्यमन्तकः ॥

दोषनिरासार्थमिदं वाक्यं पठेत् । गौडास्तु सिंहः प्रसेनमित्यनेनाभिमन्त्रितं जलं पीत्वाऽऽदरात् स्यमन्तकोपाख्यानं श्रव्यमित्याहुः[394] । नवशय्या नवः

391- गोविन्दानन्दो वर्षक्रियाकौमुद्याम् (पृ-517) अत्र भिन्नार्थं प्रतिपादयति यथा—ब्रह्मपुराणे चास्मिन् वचने च उदितपदाच्चतुर्थीसमये उदयाचलं प्राप्तश्चन्द्रः पञ्चम्यामपि नेक्षितव्यः, तृतीयोदितस्तु चतुर्थ्यामपि द्रष्टव्य इत्यर्थः । अन्यथा वैयर्थ्यात् । न च चतुर्थ्यामुदितश्चन्द्रश्चतुर्थ्यां नेक्षितव्य इत्यावृत्तिश्च कल्पनीया, अन्वितस्य पुनराकाङ्क्षाविरहात् । इति । एतच्चिन्त्यम् ।

392- मुद्रितब्रह्मपुराणे नोपलभ्यते, किन्तु तिथितत्त्वे (पृ-32) उद्धृतम् ।

393- ब्रह्मपुराणे-16/3 ।

394- रघुनन्दनेनापि तिथितत्त्वे (स्मृ० त०-I-पृ-32) इत्थमुपन्यस्तं यथा—अनेन मन्त्रेणाभिमन्त्रितं जलं पेयम् आचारात् स्यमन्तकोपाख्यानञ्च श्रोतव्यम् । इति ।

0- रविसिंहयोग-इति ग-पुस्तके पाठः ।

00- चन्द्रादर्शनम्-इति ग-पुस्तके पाठः ।

000- इत्यदोषवाक्यात्-इति ख-ग-पुस्तकद्वये पाठः ।

शशी मलमासेऽपि कर्त्तव्यमिति[395]वचनान्मलमासेऽपि चन्द्रदर्शनं निषिद्धम् ।

माघशुक्लचतुर्थी

नारदीये[396]—

माघशुक्लचतुर्थ्यां तु गौरीमाराधयेद् बुधः ।
चतुर्थी वरदा नाम गौरी तत्र प्रपूजयेत् ॥
सौभाग्यमतुलं कुर्यात्पञ्चम्यां श्रीरपि श्रियम्[0] ॥

अतः सौभाग्यकामोऽत्राधिकारी । व्रतसामान्यात् सोदयत्रिमुहूर्त्तोऽस्य कर्मकालः ।

जया च यदि सम्पूर्णा चतुर्थी ह्रसते यदि ।
जया सैव हि कर्त्तव्या नागविद्धां विवर्जयेत् ॥[397]

इतिवचनस्य गौरीव्रतविषयत्वेनाचार्यैरुक्तेः[398] । पञ्चमीविद्धानिषेधात् परदिने सामान्यकर्मकालव्याप्तावपि पूर्वमुन्नेयम् ।

पञ्चमी

इयं चतुर्थीयुता ग्राह्या युग्मात् ।

पञ्चमी च चतुर्थ्यां तु कार्या षष्ठ्या न संयुता ।

इति भविष्यपाद्मात्[399] ।

पञ्चमी च प्रकर्त्तव्या षष्ठ्या युक्ता तु नारद ।

इति ब्रह्मवैवर्त्तोक्तं[400] स्कन्दोपवासपरम् ।

स्कन्दोपवासे स्वीकार्या पञ्चमी परसंयुता ।[401]

395- द्रष्टव्या पादटिप्पणी-357 । विषयेऽस्मिन् स्मृतिसारसङ्ग्रहकारश्चाह (पृ-58) यथा—न तु सिंहे चन्द्रस्य दर्शनमितिवचनात् मलिम्लुचेऽपि चन्द्रदर्शने निषेधः । इति ।

396- कालसारे गौरी तत्र सुपूजिता इति चतुर्थचरणपाठः।

397- कालमाधवे (पृ-147) विवर्जयेत्-स्थाने न कारयेत् इति पाठः ।

398-जयावचनन्तु गौर्यादिव्रते चरितार्थम् । इति कालमाधवकारः(पृ-148) ।

399- कालमाधवे (पृ-152) च-स्थाने तु इति पाठः ।

400- कालमाधवे (पृ-152) च-स्थाने तु इति पाठः ।

0- स्त्रियम् इति ख-ग-पुस्तकद्वये पाठः ।

इति वाक्यशेषात् । अक्ताः शर्करा उपदधाति । तेजो वै घृतमित्यादिवत्[402] । स्कन्दषष्ठीपूर्वपञ्चम्यां स्कन्दोपासनायोपवासः स्यादिति शिष्टाः[403] । वस्तुतः षष्ठ्या युक्तेत्यकारः प्रश्लेष्यः ।

मनसादेवीपञ्चमी

देवीपुराणे[404]—

सुप्ते जनार्दने कृष्णे पञ्चम्यां भवनाङ्गणे ।
पूजयेन्मनसादेवीं स्नुहीविटपसंस्थिताम् ॥
पद्मनाभे गते शय्यां देवैः सर्वैरनन्तरम् ।
पञ्चम्यामसिते पक्षे समुत्तिष्ठन्ति पन्नगाः ॥

मनसादेवी विषहरी । स्नुही सर्जवृक्षः । देवैरिति सहार्थे तृतीया ।

401- कालमाधवे (पृ-151) उद्धृतम् ।

402- विधिवाक्यस्येतिकर्त्तव्यतायां संशयः आगच्छेत् चेत् तर्हि अर्थवाद-वाक्यस्य अभिप्रायः अपेक्ष्यते । एतदुद्देशेन जैमिनिना मीमांसादर्शने "सन्दिग्धेषु वाक्यशेषात् ।" (1/4/29) इति सूत्रितम् । अक्ताः शर्करा उपदधाति । इति विधिवाक्यम् । अत्र केन अक्ताः ? तैलेन जलेन घृतेन वा ? इति संशये उपस्थिते अर्थवादवाक्यस्य आवश्यकता उपलभ्यते । तत्र तेजो वै घृतमिति अर्थवादवाक्येन घृतेन अक्ताः इति बोध्यते । तद्वत् अत्र पञ्चमी च प्रकर्त्तव्येतिसामान्यवाक्यस्य कथनानन्तरं स्कन्दोपवासाचरणे संशये समुपस्थिते स्कन्दोपवासे स्वीकार्येति संशयच्छेदकं विशेषवाक्यं वाक्यशेषत्वं गच्छति । अतएव आचार्यैरप्युक्तं यथा—

सामान्यशास्त्रतो नूनं विशेषो बलवान् भवेत् ।
परेण पूर्वबाधो वा प्रायशो दृश्यतामिह ॥ इति ।

403- अत्र दिव्यसिंहः कालदीपे (पृ-31)—अत्र पञ्चम्यामुपवासः षष्ठ्यां स्कन्दोपासनाय । इति कथयति । कालसारकारो गदाधरोऽपि—यत्तु पञ्चमी तु प्रकर्त्तव्येति तत् स्कन्दषष्ठ्यां स्कन्दोपासनाय विहितं पञ्चम्युपवासं विषयीकरोति । इति प्रतिपादयति ।

404- तिथितत्त्वे (स्मृ० त०-I पृ-33) उद्धृतम् । अत्र विनायकव्रतवत् पञ्चमी मध्याह्नव्यापिनी ग्राह्या । इति स्मृतिसारसङ्ग्रह (पृ-46) वचनाद् व्रतेऽस्मिन्मध्याह्नः कर्मकालः ।

देवीं सम्पूज्य नत्वा च न सर्पभयमाप्नुयात् ।[405]
पञ्चम्यां पूजयेन्नागाननन्तादीन् महोरगान् ।
क्षीरं सर्पिश्च नैवेद्यं देयं सर्पविषापहम् ॥[406]

नागा यथा—

अनन्तं वासुकिं शङ्खं पद्मं कम्बलमेव च ।
तथा कर्कोटकं नागं धृतराष्ट्रं च शङ्खकम् ॥
कालीयं तक्षकं चैव पिङ्गलं मासि मासि च ।
यजेत्तानमितान्नागान् दष्टमुक्तो दिवं व्रजेत् ॥

दष्टं दंशनम् । अत्र नागचतुष्ट्युक्ता वा नागाः पूज्याः ।

रक्षापञ्चमी

रात्रौ रक्षाविधानं कार्यमाचारात् ।

भविष्ये[407]—

तथा भाद्रपदे मासि पञ्चम्यां श्रद्धयान्वितः ।
यस्त्वालिख्य नरो नागान् कृष्णवर्णादिवर्णकैः ॥
पूजयेद् गन्धपुष्पैश्च सर्पान् पायसगुग्गुलैः ।
तस्य तुष्टिं समायान्ति पन्नगास्तक्षकादयः ।
आसप्तमात्कुलात्तस्य न भयं नागतो भवेत् ॥

यः श्रावणे[408] स्रवति शीतजले सुरेन्द्र ! रक्षाविधानमिदमाचरते मनुष्यः ।
आस्ते सुखेन परमेण स वर्षमेकं पुत्रप्रियादिसहितः ससुहृज्जनश्च ॥

रक्षामन्त्रो यथा—

घण्टाकर्ण ! महावीर ! सर्वव्याधिनिवारण !
सर्वोपद्रवसङ्घातविद्रावण ! हरप्रिय !

405- कालदीपे (पृ-31) उद्धृतम् । 406- देवीपुराणे-61/9 ।

407- कालसारे उद्धृतम् । कृत्यकल्पतरु-व्रतकाण्डे (पृ.पृ-94-95) सर्पान्-स्थाने सर्पिः-इति धृतपाठः ।

408- अत्र 'श्रावणे' इति संवत्सरादिचैत्रशुक्लपक्षाभिप्रायकम् ।

कण्ठे यस्य महानीलं भूषणं यस्य पन्नगाः ।
तेजांसि तस्य देवस्य रक्षन्तु मम मन्दिरम् ॥

रज्जुधारणमन्त्रो यथा—

येन बद्धो बली राजा दानवेन्द्रो महासुरः ।
तेन त्वामपि बध्नामि रक्ष मा चरमाऽचल ॥

हरप्रिय ! कण्ठे यस्येत्यादिलिङ्गात् भैरवस्यात्र पूजाचारः । गणेशस्य तु अग्रपूज्यो गणाधिप इति सामान्यात् स्वान्यमात्रस्थले ममेतिस्थाने एतस्यैतस्य वेत्यूहः । उभयेद्युः प्रदोषे पञ्चम्याः स्पर्शेऽस्पर्शे[0] च युग्मात्पूर्वदिनग्रहः ।

ऋषिपञ्चमी

भाद्रे सितेऽपराह्णे तु पञ्चमी यत्र तिष्ठति ।
विश्वामित्रऋषिः स्त्रीभिः पूज्यः सन्तानवृद्धये ॥[409]

इतिवचनादपराह्णः पूजाकालः । स्त्र्यधिकारः पुत्रादिकामना च स्फुटम् । दिनद्वये तद्व्याप्तौ अव्याप्तौ च पूर्वा ।

षष्ठीयुक्ता पञ्चमी या महर्षेस्तत्र पूजने ।
पतिपुत्रहता नारी नरकं प्रतिपद्यते ॥

इति शतानन्दात्[410] । एतेन तिथिद्वैधे सामान्यतः पूर्वविद्धाग्रहोक्त्या परदिनमात्रे अपराह्णस्पर्शेऽपि पूर्वग्रहं सूचयन्तौ स्मृतिसारकृद्दिव्यसिंहौ[411] परास्तौ । षष्ठीयुक्तेति निषेधस्य दिनद्वये अपराह्णवचनबाधापत्तेः । अन्यथा गणेशचतुर्थ्यादावपि परदिनमात्रे मध्याह्णस्पर्शे

चतुर्थी च जयायुक्ता गणनाथसुतोषिणी ।

इति स्कान्दात् पूर्वग्रहापत्तिः । न च तिथिपदं दिनद्वयेऽपराह्णव्याप्तितदव्याप्त्यर्थकम् । तथालक्षणायां मानाभावात् क्लेशाच्च ।

409- स्मृतिसारसङ्ग्रहे (पृ-59) उद्धृतम् ।

410- कालसारे 'मृता च नरकं व्रजेत्' इति चतुर्थचरणपाठः ।

411-विश्वनाथमिश्रो दिव्यसिंहश्चात्रापराह्णप्रसङ्गमात्रं नोत्थाप्य कथयतो यथा—अत्र तिथिद्वैधे पञ्चमी पूर्वविद्धा ग्राह्या । इति ।

0- स्पर्शेऽस्पर्शत्वे इति ग-पुस्तके पाठः ।

[0]अश्वयुक्कृष्णपञ्चम्यां रेवन्तस्य रौद्रदेवत्वादपराह्णोऽस्य पूजाकाल इति शिष्टाः ।

सूतपुत्र ! नमस्तेऽस्तु नमस्ते पञ्चत्रकृत्रक !
नमो गन्धर्वदेवाय रेवन्ताय नमो नमः ॥

इति पूजामन्त्रः । तद्विधिः प्रपञ्चसंहितासु ज्ञेयः ।

[00]मार्गशीर्षकृष्णपञ्चम्यां सीताविवाहः, यथा बृहद्रामायणद्वादशाध्याये—

मार्गस्य कृष्णपञ्चम्यां नक्षत्रेऽदितिदैवते ।
सुस्थ इन्दौ गुरोर्वारे योगे वै शिवनामनि ॥
गतायामपि सन्ध्यायां रात्रौ रामो महाभुजः ।
सीताकरग्रहं चक्रे श्रौतेन विधिना शुभम् ॥

तत्र पुनर्वस्यृक्षस्यावैवाहिकत्वेऽपि दैवत्वाच्छिवविवाहवददोषः । मनुष्याधिकारिकं शास्त्रमिति सिद्धान्तात् । गतायामिति स्वरसात् प्रदोषारुणोदयान्तरात्रिकालोऽस्य कालः । दिनद्वये तद् व्याप्तौ युग्मात्पूर्वग्रहः । अयं रामोपासकैरवश्यं कार्यः । रामतत्त्वप्रकाशे तु फाल्गुनकृष्णद्वितीयोत्तरफाल्गुन्यां श्रीरामविवाह उक्तः ।

उत्तरे दिवसे बृह्मन् ! फाल्गुनीभ्यां मनीषिणः ।
वैवाहिकं प्रशंसन्ति भगो यत्र प्रजापतिः ॥[412]

इति बालकाण्डात् । भग उत्तरफाल्गुनी । प्रजापतिर्द्वितीयेति । अत्र कल्पभेदे भेदः ।

श्रीपञ्चमी

संवत्सरप्रदीपे[413]—

412- वाल्मीकिरामायणे बालकाण्डे-72/13 ।

413- तिथितत्त्वे (स्मृ० त०-I पृ-34) तदाधारं-स्थाने मत्स्याधारं-पाठः ।

0- प्रकरणमिदं ख-पुस्तके नास्ति ।

00- प्रकरणमिदं ख-ग-पुस्तकद्वये श्रीपञ्चमीप्रकरणात्परं वर्त्तते ।

पञ्चम्यां पूजयेल्लक्ष्मीं पुष्पधूपान्नवारिभिः ।
तदाधारं लेखनीञ्च पूजयेन्न लिखेत्ततः ॥
माघे मासि सिते पक्षे पञ्चमी या श्रियः प्रिया ।
तस्याः पूर्वाह्न एवेह कार्यः सारस्वतोत्सवः ॥

श्रीलक्ष्मीपदे सरस्वतीवाचके, लक्ष्मीः सरस्वती धात्रीति व्याप्तिवचनात्[414] । तदाधारं पुस्तकम् । न लिखेदिति पाठाभावस्याप्युपलक्षकम् । पूर्वाह्नः पञ्चधाविभक्तोऽत्र प्रातः कालः ।

पञ्चम्यां कुन्दकुसुमैः कौन्दी पूज्या समृद्धये ।[415]
सौभाग्यमतुलं कुर्यात् पञ्चम्यां श्रिरपि श्रियम् ॥

कौन्दी सरस्वती । समृद्धिर्विद्यासमृद्धिः । अत्र वैष्णवानां विशेषो वक्ष्यते । द्वैधे पूर्वाह्नव्यापिनी ग्राह्या । दिनद्वये तद्व्याप्त्यव्याप्तौ युग्मात् पूर्वा । रात्रौ पूजाचारो निर्मूलः ।[416]

414- सम्पूर्णं व्याप्तिवचनं तिथितत्त्वे (स्मृ० त०-I-पृ-34) यथा—
लक्ष्मीः सरस्वती धात्री वर्गसम्पद्विभूतिशोभासु ।
उपकरणवेशरचनाविधासु च श्रीरिति प्रथिता ॥ इति ।
एतेन श्रीशब्दः लक्ष्मीवाचक इत्यायाति किन्तु लक्ष्मीशब्दः सरस्वतीवाचक इति नायाति ।

415- कालसारे श्रीपञ्चमीप्रकरणे धवलसङ्ग्रहवचनमिदम् ।

416- रात्रिपूजाचारं प्रतिपादयन् कालसारकारो गदाधर आह यथा—अस्मद्देशशिष्टैः रात्रावेव सरस्वतीपूजा क्रियते । इति । नैतत्तु समीचीनम् । शिष्टैस्तन्त्रोपासकैर्नीलसरस्वतीपूजाऽत्र रात्रावाचर्यते । शिक्षासंस्थासु तु अन्तेवासिभिर्दिवस एषा पूजा क्रियते । दिवसे पूर्वाह्णेऽस्याः सरस्वतीपूजायाः कर्त्तव्यतां सूचयन्तोऽस्मद्गुरुचरणाः कालदीपतेजन्याम् (पृ-33) प्राहुर्यथा—पञ्चम्यां तु त्रिमुहूर्त्तव्यापिन्यामेव सरस्वतीपूजा कार्या । नात्र 'पूजाव्रतेषु सर्वेषु मध्याह्नव्यापिनी तिथि'रिति मध्याह्नव्याप्तिः, नापि सम्मुखीतिथित्वेन सायाह्नव्याप्तिः, न च 'अस्मद्देशशिष्टैस्तु रात्रावेव सरस्वतीपूजा क्रियते ।' इति कालसारोक्तेः प्रदोषव्याप्तिर्वा ग्राह्या । 'तस्याः पूर्वाह्न एवेह कार्यः सारस्वतोत्सव' इति पूर्वाह्नव्याप्तेः साक्षात् श्रवणात् । यत्तु कुन्दकुसुमानुरोधेन

षष्ठी

सा च सप्तमीयुता गृह्यते युग्मात् ।

एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी ।
अमावास्या तृतीया च उपोष्याः स्युः परान्विताः ॥

इति विष्णुधर्माच्च[417] । यदि च क्षयवशात् परविद्धा नाप्यते तदा पञ्चमी-विद्धाऽपि ग्राह्या ।

एकादशी तृतीया च षष्ठी चैव त्रयोदशी ।
पूर्वविद्धैव कर्त्तव्या यदि न स्यात्परेऽहनि ॥

इति वसिष्ठवचनात्[418] ।

स्कन्दषष्ठी

सत्यः[419]—

ज्येष्ठे मासि सिते पक्षे षष्ठ्यामारण्यकव्रते ।
या विन्ध्यवासिनीं देवीं पूजयेयुर्वने गताः ।
कन्दमूलफलाहारा लभन्ते सन्ततिं[0] हि ताः ॥

कन्दं सूरणादि । मूलं तद्भिन्नम् । अन्याऽपि चैत्रकृष्णषष्ठी स्कन्दषष्ठ्युच्यते । तथाहि देवीपुराणे[420] चैत्रमधिकृत्य—

रात्रिपूजनं केषाञ्चिन्मतं तदपि दूषणम् । सन्ध्यायां प्रस्फुटितस्य कुन्दकुसुमस्य सन्ध्यायां वा प्रदोषे वा चयनस्य निषिद्धत्वेन तत्कालचयने पूजायां विनियोगानर्हत्वादनुपयोगात् । पूर्वदिनसायं प्रस्फुटितकुन्दपुष्पसाधनक-पूजापक्षे पूर्वाह्ण एव श्रेयान् । तथा समाचाराच्च । यद्यपि केषाञ्चित् रात्रिपूजाचारः स्यात् तन्मतेऽपि गौरीव्रतन्यायेन सोदयत्रिमुहूर्त्तव्याप्तायां पञ्चम्यां रात्रौ पूजासमाचारो व्याख्येयः । श्रीजगन्नाथमन्दिरे तथा दर्शनात् । तत्र हि सूर्योदयवेधेन विहिताया वसन्तगुण्डिचायात्रायाः प्रत्यावर्त्तनात्परं सरस्वत्या अर्च्चनं भवति । इति ।

417- 'ता उपोष्याः परान्विताः' इति कालमाधवे (पृ-154) धृतपाठः ।

418- कालमाधवे (पृ-155) पूर्वविद्धैव-स्थाने पूर्वविद्धा तु-इति पाठः ।

419- कृत्यकौमुद्यां (पृ-20) 'लभन्ते सत्पतिं हि ताः' इति धृतपाठः ।

0- सततं हितम् इति ख-ग-पुस्तकद्वये पाठः ।

षष्ठ्यां स्कन्दस्य कर्त्तव्या पूजा सर्वोपकारिका ।
इहैव सुखसौभाग्यमन्ते विष्णुपुरं व्रजेत् ।।

अन्ये[421] तु मार्गशीर्षकृष्णामपि स्कन्दषष्ठीमाहुः । यथा भविष्ये—

येयं मार्गशिरे मासि षष्ठी भरतसत्तम !
पुण्या पापहरा धन्या शिवा शान्ता गुहप्रिया ।।

त्रिविधेयं पूर्वविद्धा कार्या[422] ।

कृष्णाष्टमी स्कन्दषष्ठी शिवरात्रिचतुर्दशी ।
एताः पूर्वयुताः कार्यास्तिथ्यन्ते पारणं भवेत् ।।

इति वसिष्ठस्मरणात्[423] ।

षष्ठीदेवीषष्ठी

षष्ठ्यां भाद्रस्य शुक्लायां षष्ठी देवी प्रपूजिता ।
जीवपुत्रा च सौभाग्यधनधान्यसमन्विता ।
तस्माद्यत्नेन नार्यश्च पूजयन्ति सदैव तु ।।

इह विशेषाभावात् सामान्यषष्ठीन्यायः ।

प्रावरणषष्ठी

420- देवीपुराणे-61/10 ।

421- रघुनन्दनभट्टाचार्यः तिथितत्त्वे (स्मृ० त०-I-पृ-35) मार्गशीर्ष-कृष्णाष्टमीं स्कन्दषष्ठीं प्रतिपादयितुं भविष्यपुराणवचनमुद्धरति, यथा—तदितरत् भविष्ये-येयं मार्गशिरे........शान्ता गुहप्रिया । इति । स्मृतिसारोद्धारे (पृ-41) ग्रन्थकर्त्रा विश्वम्भरत्रिपाठिना आषाढशुक्लषष्ठ्यां स्कन्दषष्ठी प्रतिपादिता, यथा—आषाढशुक्लषष्ठी स्कन्दषष्ठी । तत्र पञ्चम्यामुपोष्य षष्ठ्यां स्कन्दं पूजयेत् ।

आषाढे शुक्लषष्ठी तु तिथिः कौमारिकी स्मृता ।

इत्युक्तवराहपुराणवचनात् । इति ।

422- कृत्यकौमुदीकारः (पृ-20)—विषयेऽस्मिन् ज्येष्ठशुक्लपञ्चमीप्रदोषे पार्वतीविवाहानन्तरं तदुत्तरदिने या षष्ठी सोपोष्या । तिथिद्वैधे पूर्वापर-वेधलब्धे पूर्वा ग्राह्या । इति स्पष्टीकरोति ।

423- कालमाधवे (पृ-154) उद्धृतम् ।

कौर्मे—

या तु मार्गशिरे मासि शुक्ला षष्ठी नराधिप !

देवद्विजसुहृद्भ्यश्च शीतघ्नं तत्र दापयेत् ॥

शीतघ्नं पट्टकम्बलादिकम् । अस्य दानरूपत्वात् सोदयत्रिमुहूर्त्तव्यवस्था ।

सप्तमी

इयं युग्मात् षष्ठीयुता ग्राह्या ।

षष्ठीयुक्ता तु कर्त्तव्या सप्तमी सर्वदा तिथिः ।

इति स्कान्दात्[424] ।

षष्ठीसमेता कर्त्तव्या सप्तमी नाष्टमीयुता ।

इति भविष्ये[425] परनिषेधाच्च । यदा पूर्वेद्युरस्तमयावधि षष्ठी परेद्युस्तिथिक्षयवशादस्तमयादर्वागष्टमी त्रिमुहूर्त्ता तदा परविद्धाप्रतिषेधेऽपि तद्ग्रहः, पूर्वविद्धाया अलाभात् । प्रधानसाङ्गसप्तम्या लोपायोगाच्च[426] । सप्तम्यां मूलयोगे तु परविद्धानिषेधोऽपि अगण्य[0] इति आश्विनत्रिदिनपूजायां वक्ष्यामः ।

शुक्लपक्षस्य सप्तम्यां भानुवारो भवेद्यदि ।

सप्तमी विजया-नाम तत्र दानं महाफलम् ॥[427]

कुक्कुटीव्रतम्[428]

भविष्ये—

424- तिथितत्त्वे (पृ-35) षष्ठ्या युता सप्तमी च कर्त्तव्या इति धृतपाठः ।

425- तिथितत्त्वे (स्मृ० त०-I-पृ-35) उद्धृतम् ।

426- प्रधाना एवञ्चाङ्गेन सह वर्त्तमानाऽसती सप्तमी यद्यष्टमीयुक्ता प्राप्यते तर्हि तत्र सप्तमीक्रियालोपाभावं सूचयन् माधवाचार्यः कालमाधवे (पृ-157) आह यथा—शेषिलोपन्यायत्वादुत्तरविद्धा गौणकालत्वेन स्वीकर्त्तव्या । ....तेनैव न्यायेनात्राप्यष्टमीविद्धायाः स्वीकारोऽस्तु । इति ।

427- तिथितत्त्वे (पृ-35) भवेद्यदि-स्थाने यदा भवेत्-इति पाठः ।

428- अपत्यहीनाभिः व्रतमिदमाचर्यते, 'विशेषेण मृतवत्साया व्रतमिदम्' इति स्मृतिसारोद्धारोक्तेः (पृ-44) ।

0- हेयः-इति ख-ग-पुस्तकद्वये पाठः ।

भाद्रे मासि सिते पक्षे सप्तम्यां ललितालये ।
स्नात्वा शिवं लेखयित्वा मण्डले च सहाम्बिकम् ।
पूजयेच्च तदा तस्यां दुष्प्रापं नैव विद्यते ॥[429]

अत्र विशेषाभावात् सामान्यसप्तमीरीत्या द्वैधे पूर्वग्रहः । न चात्र सोदयत्रिमुहूर्त्तायामित्यनेन व्यवस्था शङ्क्या ।

सर्वत्र व्रतकल्पेषु सप्तमी पूर्वतः शुभा ।

इति ब्रह्मवैवर्त्तादिति पारम्परिकाः । वस्तुतस्तु,

युगाद्या वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया ।
रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता ॥[430]

इत्यत्र पार्वतीप्रियापदेन कुक्कुटीसप्तम्या अपि ग्रहादनेनैव व्यवस्थोचिता । उदयस्त्रिमुहूर्त्तः । दिनद्वये त्रिमुहूर्त्तव्याप्तौ तु पूर्वा, उत्तरस्यास्तिथेर्मलत्वात् । विशेषस्य तु सामान्यपरविद्धानिषेधो न बाधक इति सारम् ।

माघसप्तमी

सूर्यग्रहणतुल्या हि शुक्ला माघस्य सप्तमी ।
अरुणोदयवेलायां तस्यां स्नानं महाफलम् ॥[431]
माघे मासि सिते पक्षे सप्तमी कोटिभास्करा ।
नद्यां स्नानार्घ्यदानाभ्यामायुरारोग्यसम्पदः ॥
अरुणोदयवेलायां शुक्ला या माघसप्तमी ।
गङ्गायां यदि लभ्येत सूर्यग्रहशतैः समा ॥[432]

कोटिभास्करा कोटिसप्तमीसमा[0] । अत्रारुणोदयो वचनात् स्नानकालः ।

माघमासस्य सप्तम्यामुदयत्येव भास्करे ।
विधिवत्तु तिलस्नानं महापातकनाशनम् ॥

429- कालदीपे (पृ-37) दुष्प्रापं-स्थाने दुष्कृतं-पाठः ।

430- देवीपुराणवचनमेतदिति तिथितत्त्वे (स्मृ० त०-I-पृ 25) ।

431- भविष्यपुराणवचनमिति तिथितत्त्वे (पृ 37), विष्णुवचनमिति भट्टोजिदीक्षितकृततिथिनिर्णये (पृ-44) ।

432-'प्रयागे यदि लभ्येत कोटिसूर्यग्रहैः समा ।' इति तिथिनिर्णये(पृ-44) ।

0- ग-पुस्तके वाक्यमिदं नास्ति ।

इति मात्स्याच्च[433] । अरुणोदयोऽत्रोदयात्प्रागदण्डचतुष्टयम् ।

चतस्रो घटिकाः प्रातररुणोदय उच्यते ।
यतीनां स्नानकालोऽयं गङ्गाम्भःसदृशः स्मृतः ॥
त्रियामां रजनीं प्राहुस्त्यक्त्वाद्यन्तचतुष्टयम् ।
नाडीनां तदुभे सन्ध्ये दिवसाद्यन्तसंज्ञिते ॥

इति वैवर्त्तात् । दिनद्वयेऽरुणोदयव्याप्तौ पूर्वारुणोदयस्य सप्तमीतिथ्यादित्वेन तत्कर्माङ्गता । परारुणोदयस्याष्टमीतिथ्यादिभूतत्वमिति पूर्वारुणोदय एव स्नानम्[0] , नोत्तरत्र; अष्टम्यङ्गत्वात् । अन्यथा यदा माघकृष्णप्रतिपत् पूर्वापरारुणोदयद्वयव्यापिनी तदा परारुणोदये माघस्नाने आचारविरोधापत्तिः । यदा तु पूर्वारुणोदयं हित्वा परारुणोदये सप्तम्यादियोगस्तदा शेषिस्नानलोपायोगात् प्रधानं तिथिमात्रमुपजीव्य परारुणोदयेऽपि स्नानम् , सा तिथिस्तदहोरात्रमित्यनुपदवक्ष्यमाणत्वात् । ननु यत्र वर्षे षष्ठी द्विदिनाभिमता[00] सप्तमी च क्षीणा, क्षयदण्डश्चारुणोदयात् प्राक् चतुःपञ्चाशदादिमितः षष्ठीशेषयोगेऽप्यरुणोदयाव्यापी तद्वर्षे जयन्त्यभाववत् काम्यसप्तमीस्नानलोपापत्तिः । अनित्यत्वे न सर्ववर्षनियमादिति चेन्न । पूर्वपरारुणोदययोः सप्तम्यभावेऽपि,

सा तिथिस्तदहोरात्रं यस्यामभ्युदितो रविः ॥
सा तिथिस्तदहोरात्रं यस्यामस्तमितो रविः ॥
तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणम् ॥

इति शास्त्रदृष्ट्या परारुणोदयेऽपि तिथिसत्तामापद्य स्नायात् । शेषस्य कालस्यानुरोधे न शेषिणः स्नानस्य लोपायोगात् । अतएवार्थे न हि विपर्यास इत्यत्रोक्तम् । गुणलोपे तु मुख्यस्य क्रिया स्यात् । अन्यथा दिनद्वये मध्याह्ने चतुर्थ्याद्यलाभे गणेशव्रतरामनवम्यादिकमप्युच्छिद्येत । पूर्वशेषयुक्तक्षयदण्ड-

433- कालसारे माघसप्तमीप्रकरणे उद्धृतम् ।

0- वाक्यमिदं ख-ग-पुस्तकद्वये नास्ति ।
00- 'द्विनाडिमिता' इति ग-पुस्तके पाठः ।

स्यारुणोदयस्पर्शे तु सुतरां स्नानम् । एवं रटन्त्यामाघपूर्णिमादावपि न तु नित्यस्नानस्याप्यरुणोदये विधानात्तत्रैव सप्तम्यारब्धगुण[0] फलविधिरस्तु । अन्यथा स्नानद्वयापत्तिः । तथा च यस्मिन् वर्षे सप्तमी क्षीणा जयन्तीशून्य-वर्षे केवलजन्माष्टम्यामिव माऽस्तु गुणफलमिति चेन्न ।

य इच्छेद्विपुलान् भोगान् चन्द्रसूर्यग्रहोपमान् ।
प्रातःस्नायी भवेन्नित्यं द्वौ मासौ माघफाल्गुनौ ॥

इति विष्णुस्मृतौ[434] नित्यस्नानार्थप्रकरणे माघस्नानविधानात् "प्रकरणान्तरे प्रयोजनान्यत्वमि"त्यनेन[435] स्नानभेदसिद्धेः । अन्यथा,

---

434- मुद्रितविष्णुस्मृतौ (90/29) यदीच्छेत्-इति पाठः ।

435- प्रकरणभेदेन कर्मभेदं प्रतिपादयता भगवता जैमिनिना मीमांसा-दर्शने प्रकरणान्तरन्यायविचारे 'प्रकरणान्तरे प्रयोजनान्यत्वम् ।' इति (2/3/24) सूत्रं सूत्रितम् । तत्र भाष्यकारेण शबरस्वामिना विविच्यते यथा— कुण्डपायिनामयने श्रूयते—मासमग्निहोत्रं जुहोति, मासं दर्शपूर्णमासाभ्यां यजत इत्येवमादि । तत्र सन्दिह्यते । किं नियतेऽग्निहोत्रे नियतयोश्च दर्शपूर्णमासयोर्मासो विधीयते कालः, अथ किं नियताग्निहोत्रान्नियताभ्यां च दर्शपूर्णमासाभ्यां कर्मान्तरविधानमिति । किं तावत्प्राप्तम् । नियतेषु काल-विधिरिति । कुतः । कालविधिसरूप एष शब्दो मासमिति । कथं कालविधि-सरूपता यदग्निहोत्रं जुहोतीति विदितं, मासमित्यविदितम् । एवं चाग्निहोत्र-शब्दो दर्शपूर्णमासशब्दश्च नार्थान्तरवृत्तौ भविष्यतः । तस्मात् कालविधिः । ननु कुण्डपायिनामयनप्रकरणं बाध्येतैवम् । कामं बाध्यताम् । वाक्यं हि बलवत्तरम् । एवं प्राप्ते ब्रूमः । प्रकरणान्तरे श्रूयमाणं वाक्यं यस्य प्रकरणे तस्य वाचकं भवितुमर्हति । ननु प्रत्यक्षोऽग्निहोत्रस्य दर्शपूर्णमासयोश्च गुणविधिः । नेत्युच्यते । कथम् । उपसद्भिश्चरित्वेति ह्यनूद्येदमभिधीयते । न चोपसदोऽग्निहोत्रस्य दर्शपूर्णमासयोश्च सन्ति । तस्मादशक्यस्तत्र मासविधिः । अथोच्यत—उपसदोऽपि विधीयन्त इति । तथा गुणविधानार्थे-ऽस्मिन् वाक्येऽनेकगुणविधानाद्वाक्यं भिद्येत । अस्मिन्पक्षे पुनरतन्त्रमग्नि-होत्रशब्दो न कर्म विशेक्ष्यति । तेन वाक्यभेदो न भविष्यति । तस्मात्कर्मा-

---

0- गुणस्थाने ग-पुस्तके मुख्य-इति पाठः ।

प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः ।

अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः ॥

इति न्यायेन[436] 'तन्मे रोगश्च शोकश्च' इत्युक्तरोगशोकक्षयकरूपानेकविध्यसम्भवापत्तिः । 'उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति ।' इत्यादावुपसन्मासाद्यनेकगुणविध्यसम्भवेनाग्निहोत्रपदं तत्प्रख्यन्यायेन[437] नित्याग्निहोत्रात्

न्तरमिति सिद्धम् । इति । तन्त्रवार्त्तिककारः कुमारिलभट्टश्चाह यथा—परमार्थेन तु—

भिद्यते भावनामात्रं धात्वर्थो नायजिश्रुतेः ।

नाम्ना हि तदुपादानामासनोपायिचोदिते ॥

नामविलक्षणधातुश्रवणे हि तदर्थभेदो भवति । अत्र तु यज्यश्रवणान्नाममात्रोपनीतप्रकृतयागप्रत्यभिज्ञानात्तद्भावनामात्रभेदः । तस्मात् साधूक्तं प्रकरणान्तरे प्रयोजनान्यत्वमिति । भाष्यकार उपसद्भिश्चरित्वेति तल्लक्षितकालमेवानुपादेयरूपं भेदहेतुत्वेन दर्शयतीति द्रष्टव्यम् । अथोच्यते—उपसदोऽपि विधीयन्त इत्यादि चाभ्यासाधिकरणवदभ्युपेत्यवादेन समर्थयितव्यम् । इति । जैमिनीयन्यायमालायां (2/3/11) माधवाचार्येणाप्युक्तं यथा—

मासं जुहोत्यग्निहोत्रं गुणोऽन्यत्कर्म वा गुणः ।

अनूद्य प्राप्तकर्माऽत्र मासोऽप्राप्तो विधीयते ॥

उपसद्भिश्चरित्वेति नित्ये तासामसम्भवात् ।

अनेकस्याविधेश्चान्यत् कर्म प्रकरणान्तरात् ॥ इति ।

अत्र विस्तरव्याख्यायां सिद्धान्तोऽप्युक्तस्तेन यथा—परमार्थतस्त्वत्र प्रथमतरप्रतीतेन प्रकरणभेदेन सिद्धं कर्मभेदं गुणभेद उपोद्बलयति । ततः प्रकरणान्तरमेवात्र भेदहेतुः । इति ।

436- द्रष्टव्या पादटिप्पणी-344 ।

437- सोऽयं न्यायो जैमिनीयदर्शने 'तत्प्रख्यं चान्यशास्त्रम् ।' इति सूत्रे (1/4/3/4) विचारितः । अत्र भाष्यकारेणोक्तं यथा—अग्निहोत्रं जुहोति स्वर्गकाम इति, आघारमाघारयति इति च समामनन्ति । तत्र संशयः, किमग्निहोत्रशब्द आघारशब्दश्च गुणविधी उत कर्मनामधेये इति । गुणविधी इति ब्रूमः । कुतः । गम्यते हि, अग्नये होत्रमस्मिन्निति । तथा क्षरणसमर्थं द्रव्यं घृतादि, आघारमाघारयति इति । प्रसिद्धिरेवमनुग्रहीष्यते । गुणविधिश्च दर्विहोमे, आघारश्चोपांशुयाजे । तत्रैतयोरर्थवत्ता प्रवृत्तिविशेषकरत्वं च । न

पृथगिति हि[0] सिद्धान्तितम् । न चात्र स्नानद्वयाशङ्का, काम्येन नित्यानुष्ठान-सिद्धेः । अत्र च पूर्णमाघमासनिमित्तकमाघसप्तमीनिमित्तकयोः स्नानयोः प्रातर्विधानान्नैमित्तिकत्वेन प्रायश्चित्तवत् सकृदनुष्ठानम् । सप्तमीस्नानं तु तन्त्रि, बहुव्यापित्वात् ।

च गुणविधिपक्षे लक्षणा भवति यथा उद्भिदा यजेत इति । अग्निहोत्रे समासेनावगतं गुणविधानम् । आघारेऽपि, आघारं निवर्त्तयतीति श्रुत्यैव गुणो विधीयते । तस्माद् गुणविधी इत्येवं प्राप्ते ब्रूमः । तत्प्रख्यं चान्यशास्त्रम् । यौ गुणावेताभ्यां विधीयेते इत्याशङ्क्यते तावन्यत एवावगतौ । यदग्नये च प्रजापतये च सायं जुहोति इति देवताविधानं, चतुर्गृहीतं वा एतदभूत्तस्याऽऽघारमाघार्य इत्याघारे च द्रव्यविधिः । अविदितवेदनं च विधिरित्युच्यते । विदितं चात्रान्यतो गुणविधानम् । तस्मान्न गुणविधी, कर्मनामधेये तु सम्भवतः । यस्मिन्नग्नये होत्रं होमो भवति तदग्निहोत्रम् । दीर्घधारा क्षरणक्रिया प्रसिद्ध एवाऽऽघारः । तस्मात्कर्मनामधेये । प्रसिद्ध्यादयश्चोक्तोत्तराः । प्रजापतिनिवृत्त्यर्थमग्निविधानं भविष्यतीति चेन्नैतदेवम् । अग्निर्ह्येष विधातुं शक्नोति न प्रजापतिं प्रतिषेद्धुं, प्रतिषिध्यमानस्य च प्रजापतेर्विधानमनर्थकं स्यात् । प्रजापतिर्देवतेति गम्यते । गम्यमानं च न शक्यं मिथ्येति कल्पयितुम् । अतोऽयमसमाधिः । उच्यते । आघारमाघारयति इति द्रव्यपरा चोदना । यैस्तु द्रव्यं चिकीर्ष्यत इति । द्रव्यं ह्यनया क्रियया क्षार्यते । क्षारितं च यागं साधयति । तत्कस्य प्रधानस्य कर्मणो नामधेयमिति । उच्यते । एतदेवाऽऽघारणं प्रधानकर्म । नन्वस्य द्रव्यदैवतं नास्ति । अस्तीति ब्रूमः । तस्याघारमाघार्य, इत्याज्यं द्रव्यं, मान्त्रवर्णिकी देवता । 'इन्द्र ऊर्ध्वोऽध्वर इत्याघारमाघारयति इति मन्त्रो ह्यभिदधत्कर्म तत्साधनं वा कर्मणि समवैति । एष च मन्त्र इन्द्रमभिधातुं शक्नोति । स यदीन्द्रस्तत्साधनं भवेदेवमनेन मन्त्रेणाऽऽघारः शक्यते कर्तुम् । तस्मादिन्द्रो देवता । द्रव्यदेवतासंयुक्तमाघारणम् । तस्माद्यजतिः, तस्य यजतेर्नामधेयमिति । न्यायस्यास्य स्वरूपं तन्त्रवार्त्तिके प्रतिपादितं यथा—

विधित्सितगुणप्रापि शास्त्रमन्यद् यतस्त्विह ।
तस्मात्तत्प्रापणं व्यर्थमिति नामत्वमिष्यते ॥ इति ।

0- 'तत्रैव' इति ख-ग-पुस्तकद्वयेऽत्राधिकपाठः ।

प्रधानस्याक्रिया यत्र साङ्गं तत्क्रियते पुनः ।
तदङ्गस्याक्रियायां तु नावृत्तिर्न च तत्क्रिया ॥[438]

नावृत्तिर्न साङ्गप्रधानावृत्तिः । न च तत्क्रिया न विस्मृताङ्गस्य पुनः कृतिः ।

न स्नानमाचरेद् भुक्त्वा नातुरो न महानिशि ।
न वासोभिः सहाजस्रं नाविज्ञाते जलाशये ॥ (मनु०-4/129)

इति मनुनैकदाऽजस्रस्नाननिषेधाच्च । तीर्थभेदे त्वेकदाऽपि नानास्नानम् ,

विषुवद्दिवसे प्राप्ते पञ्चतीर्थीं विधानतः ।

इति ब्राह्मात्[439] । निष्कामविष्णुप्रीतिकामयोः सुतरां सकृत्तया । सिंह-वाजपेयिनस्तु[440] नित्यप्रातःस्नानानन्तरं पुनर्माघीयं प्रातःस्नानं काम्यं पृथक् , न तु तन्त्रानुष्ठितम् , गोदोहचमसवदेकद्वारत्वाभावात् । न च

438- कर्मकारिणां कर्मण्यधिकुर्वाणानां त्रिविधा अक्रिया मुनिभिरुक्ता, अकरणं परोक्तकरणमयथाकरणञ्चेति । तत्राकरणाज्जातसमस्यायाः समाधाने कात्यायनेन कर्मप्रदीपे (1/3/6) कथ्यते प्रधानस्याक्रियेत्यादि । तत्र परिशिष्टप्रकाश-व्याख्याकारो नारायणोपाध्यायः स्पष्टीकरोति यथा—इदानीं दैवादक्रियायां यत्कर्त्तव्यं तदाह—प्रधानस्य कर्मणो गन्धादिदानादेर्यत्राकरण-मुत्सर्गश्च तदङ्गभूतः कृतस्तत्र पुनरङ्गानुष्ठानसहितं तत्कर्म कर्त्तव्यम् । अङ्गमात्रस्य तूत्सर्गस्याकरणे प्रधानस्य कृतस्य नावृत्तिर्नाप्यङ्गानुष्ठानम् । किन्तु तत्समाधानार्थम्—

अज्ञानाद् यदि वा मोहात्प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥

इति योगियाज्ञवल्क्योक्तमनुष्ठेयम् । एवं समाप्ते प्रयोगे अन्यथा करण-ज्ञानेऽप्येतदेव समाधानमिति । अन्ये तु तदङ्गस्य साङ्गप्रधानप्रयोगाङ्गस्यो-पवीतित्वादेरकरणे न साङ्गप्रधानस्य कृतस्यावृत्तिर्नाप्युपवीतित्वादेः करणं, किन्तु विष्णुस्मरणमेव प्रायश्चित्तमित्याहुः । इति ।

439- तिथितत्त्वे (स्मृ० त०-I-पृ-39) ।

440-विषयेऽस्मिन् नित्याचारप्रदीपे (भागः-I-पृ.पृ-294-95) नरसिंह-वाजपेयिनोक्तं यथा—अत्र च य इच्छेत्....इति विष्णूक्तं मासद्वयविहितं प्रातः स्नानम् । यच्च तुलामकरमेषेषु....इति प्रातः स्नानम् । यच्च प्रातः स्नात्वा....इति काम्यतीर्थस्नानम् । एवमादिषु....विष्णुना सर्वतः स्नानोद्देशे-

सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ।

इति वचनात् सन्ध्यातः प्राक् काम्यस्नानं नास्तीति वाच्यम् । प्रातरुक्त्या तद् वाक्यस्यात्रानवकाशात् । एवं तुलादावित्याहुः । स्नानमन्त्रो यथा—

यद्यज्जन्मकृतं पापं मया सप्तसु जन्मसु ।
तन्मे रोकञ्च शोकञ्च माकरी हन्तु सप्तमी ॥

येषां येषां जन्म तत्तत्पापमित्यर्थः । रोकमिति कान्तं छिद्रार्थकमिति गौडाः[441] । उत्कलास्तु क-वर्गतृतीयान्तं पठन्ति । अर्घ्यमन्त्रो यथा—

जननी सर्वभूतानां सप्तमी सप्तसप्तिके ।
सप्तव्याहृतिके देवि ! नमस्ते रविमण्डले ॥

प्रणाममन्त्रो यथा—

सप्तसप्तिवह प्रीत सप्तद्वीपप्रदीपन ।
सप्तम्याश्च नमस्तुभ्यं नमोऽनन्ताय वेधसे ॥

एवमन्यत्र स्नानमन्त्रता ज्ञेया । यत्तु स्मृतिसारे[442]—

नारुणोदयकालविधानात् प्रातः स्नानादूर्ध्वं सन्ध्यातः पूर्वमनुष्ठानम् । न तु काम्यस्नानं नित्यस्य बाधकं गोदोहचमसवदेकद्वारत्वाभावात् । दर्शपूर्णमासात् पूर्वप्रयुक्तप्रणयननिवृत्तिर्गोदोहचमसयोर्द्वारम् । तत्रावश्यमेकस्य बाध्यत्वमिति सावकाशदूरफलत्वाभ्यां चमसबाधः । न चेह तथा द्वारं किञ्चिदस्ति द्वयोरदृष्टार्थत्वात् । किञ्च प्रातःस्नानस्य शरीरशुद्धिद्वारा कर्माधिकारसम्पादकत्वात् काम्यस्नानान्तरस्यापि प्रातःस्नानानन्तरमेव काल इति कालभेदान्न काम्य-नित्यप्रातःस्नानयोस्तन्त्रेणानुष्ठानसम्भवः । न च

सन्ध्याहीनोऽशुचिर्विप्रो ह्यनर्हः सर्वकर्मसु ।

इति वचनात् सन्ध्योत्तरं काम्यप्रातःस्नानप्रसङ्गः । इत्यादि ।

441- रोगं-स्थाने रोकमिति गौडाः पठन्ति । तत्तु 'रोकं छिद्रम्' इति रघुनन्दनेन तिथितत्त्वे (पृ 39) प्रतिपादितम् ।

442- स्मृतिसारसङ्ग्रहे (पृ-75) विषयेऽस्मिन् वचनं यथा—अरुणोदय-वचनादुभयत्रारुणोदयव्याप्तिश्चेत्तदा स्नानं कृत्वा अक्षीरादिभोजनम् । देवलः—यां तिथिं....स्नानदानजपादिषु । इति । तदा इत्यत्र देवलोक्तसाकल्य-वचनात् परदिनं बोध्यते ।

यां तिथिं समनुप्राप्य उदयं याति भास्करः ।
सा तिथिः सकला ज्ञेया स्नानदानजपादिषु ॥

इति देवलस्मृत्याऽरुणोदयद्वैधे परारुणोदये स्नानमित्युक्तं तदनेन दूषितमिति स्फुटमेव । देवलस्मृतेरन्यत्रावकाशात् ।[443]

अष्टमी

इयञ्च कृष्णा पूर्वविद्धा शुक्ला नवमीयुता ग्राह्या । यथा निगमे[444]—

शुक्लपक्षेऽष्टमी चैव शुक्लपक्षे चतुर्दशी ।
परविद्धैव कर्त्तव्या कृष्णे तु पूर्वसंयुता[0] ॥
उपवासादिकार्येषु एष धर्मः सनातनः ।

दिव्यसिंहस्तु[445] शुक्लपक्षे तथाष्टम्यामुपवासपरायणः ।
मालतीकरवीरेण बिल्वपत्रैश्च पूजयेत् ॥
दुर्गेति नाम जप्तव्यं पुरतोऽष्टशतं नृप ।
सर्वमङ्गलनामेति जप्तव्यं किल भारत ॥

इत्यादिभविष्यपुराणीयानि सामान्याष्टमीपराणि मत्वा सामान्याष्टम्यां प्रचिक्षेप । तथा वक्ष्यमाणदेवीपुराणीयान्यपि मत्स्यमांसपारणवाक्यानि ।[446]

443- देवलवचनस्यास्यावकाशः सूर्योदयव्याप्तिमाधारीकृत्य स्नानदान-जपादिषु सम्भवति । किन्तु माघसप्तमीस्नानेऽरुणोदयस्य मुख्यकर्मकालत्वा-दुभयत्रारुणोदयकालव्याप्तौ पूर्वदिवसेऽरुणोदयपरगौणकाललाभाधिक्यात् पूर्वस्यारुणोदयकालस्य परदिनाङ्गत्वात् पूर्वत्र स्नानं समुचितम् ।

444- पूर्वविद्धा न कर्त्तव्या कर्त्तव्या परसंयुता ।
इति कालमाधवे (पृ-157) प्रथमश्लोके द्वितीयार्द्धपाठः ।

445- कालदीपे (पृ.पृ-39-40) अष्टमीप्रकरणं द्रष्टव्यम् ।

446- मत्स्यमांसपारणवाक्यानि कालदीपे (पृ-40) यथा—
अष्टमीं समुपोष्यैव नवम्यामपरेऽहनि ।
मत्स्यमांसोपहारेण दद्यान्नैवेद्यमुत्तमम् ।
तेनैव विधिनान्नं तु स्वयं भुञ्जीत नान्यथा ॥ इति ।

0- 'पूर्वविद्धा न कुत्रचित्' इति ख-ग-पुस्तकद्वये चतुर्थपादपाठः ।

तदेतत् सर्वं तिथितत्त्वे महाष्टमीप्रकरणे लिखनाच्छुक्लाष्टमी सामान्यपराणीति भ्रममूलम् । भविष्ये[447]—

चतुर्दश्यां तथाऽष्टम्यां पक्षयोः शुक्लकृष्णयोः ।
योऽब्दमेकं न भुञ्जीत शिवार्च्चनपरो नरः ॥
यत्पुण्यमक्षयं प्रोक्तं सततं सत्रयाजिनाम् ।
तत्पुण्यं सकलं तस्य शिवलोकञ्च गच्छति ॥

अयमुपवासः फाल्गुनशुक्लाष्टमी-चतुर्दश्यावारभ्य प्रत्यष्टमीचतुर्दशीषु वर्षमेकम् । तस्मादारभ्य विधानादिति रघुनन्दनः ।[448]

कालिकापुराणे[449]—

अष्टम्याञ्च नवम्याञ्च पूजा कार्या विवृद्धये ।
घटेषु प्रतिमायां वा पटे मङ्गलचण्डिकाम् ॥
यः पूजयेद् भौमवारे शुभैर्दुर्वाक्षतैः शिवाम् ।
बहुशः साधकः सोऽपि काम्यमिष्टमवाप्नुयात् ॥

तत्रैव— उमया भाषितं मन्त्रं यत्पूर्वं त्वेकमक्षरम् ।
मन्त्रमस्यास्तु विज्ञेयं तेन देवीं प्रपूजयेत् ॥

एकमक्षरं मायावीजम् ।

शनैश्चरस्य वारेण वारेणाङ्गारकस्य च ।
कृष्णाष्टमीचतुर्दश्यौ पुण्यात्पुण्यतरे स्मृते ॥
सोमवारेऽप्यमावास्या आदित्याहे तु सप्तमी ।
चतुर्थ्यङ्गारके चैव अष्टमी च बृहस्पतौ ॥

अत्र मत्स्यमांसाहारिणां कृते निर्देशोऽयमुक्तः, अन्येषां कृते नेति । तेषां कृते सात्त्विकपूजायां तादृशवस्तुनोऽनुपयोगात् ।

सात्त्विकी जपयज्ञाद्यैर्नैवेद्यैश्च निरामिषैः ।

इति कालदीपतेजन्यां (पृ-40) स्कन्दभविष्यवचनपाठाच्च ।

447- तिथितत्त्वे (पृ-40) ।

448- फाल्गुनशुक्लाष्टमीचतुर्दश्योरारभ्य वर्षं यावत् प्रत्यष्टमी प्रतिचतुर्दश्युपवासव्रतम् । इति तिथितत्त्वे (पृ-41) रघुनन्दनेनोक्तम् ।

449- तिथितत्त्वे (पृ-41) अष्टम्याञ्च-स्थाने तथाष्टम्यां, बहुशः-स्थाने सततम् इति पाठः ।

अत्र यत्क्रियते पापमथवा धर्मसञ्चयः ।
षष्टिवर्षसहस्राणि प्रतिजन्म तदक्षयम् ॥[450]

अशोकाष्टमी

स्कान्दे—

मीने मधौ शुक्लपक्षे अशोकाख्यां तथाष्टमीम् ।
पिबेदशोककलिकाः स्नायाल्लौहित्यवारिणि ॥

अष्टमीति सुप्तिङुपग्रहेत्यादिवार्त्तिकेन[451] सप्तम्यर्थे द्वितीया । लौहित्यो ब्रह्मपुत्राख्यः नदः, लोहितात् सरसो जातत्वात् । अत्र ऋक्षावचनादनृक्ष-तिथावपि तत्पानम् । लिङ्गगरुडपुराणयोः[452]—

अशोककलिकाश्चाष्टौ ये पिबन्ति पुनर्वसौ ।
चैत्रे मासि सिताष्टम्यां न ते शोकमवाप्नुयुः ॥

अतएव वचनाच्छोकाभावः फलम् । विष्णुः—

चैत्रे मासि सितपक्षे वृषलग्ने पुनर्वसौ ।
स्रोतःस्नातो बुधाष्टम्यां वाजपेयफलं लभेत् ॥
अशोकैरर्च्चयेदुग्रमशोककलिकाः पिबेत् ॥

बुधाष्टमी बुधवारयुक्ताष्टमी । उग्रं शिवम् । तिथिद्वैधे वृषलग्नव्यापिनी । दिनद्वये तद्व्याप्तावव्याप्तौ[0] च शुक्लत्वात् परा ग्राह्या । यत्तु रघुनन्दने-नोक्तम्[453]— कलिकापानं दिनपञ्चमांशव्यापिन्यामष्टम्याम्, तत्पानस्य भोजनरूपत्वेनाष्टधाविभक्तदिनपञ्चमांशे भ्रातृद्वितीयायामुक्तवदिति तदसत् ।

450- षष्टिजन्मसहस्राणि इति कालदीपे (पृ-41) ज्योतिषवचनपाठः ।

451- 'व्यत्ययो बहुलम् ।' इति अष्टाध्यायी (3/1/85) सूत्रव्यवहारे कारिकावचनं यथा—

सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्त्तृयङां च ।
व्यत्ययमिच्छन्ति शास्त्रकृदेषां सोऽपि च सिध्यति बाहुलकेन ॥इति।

452- गरुडपुराणे-1/133/1 ।

453- अशोकपानं तु पञ्चमार्द्धप्रहरव्यापिन्यामष्टम्यां भ्रातृद्वितीयोक्तवत् । इति तिथितत्त्वे (स्मृ० त० I-पृ-59) रघुनन्दनेनोक्तम् ।

0- 'अव्याप्तौ' इति पदं ग-पुस्तके नास्ति ।

तृप्तिकरभोजनस्य रागप्राप्तत्वेन तस्य हि दिनपञ्चमांशे नियमविधिः । यमद्वितीयाभोजनस्य दृष्टफलतृप्तिकरत्वेन तथा नियमोऽस्तु । न हि कलिकापानं तृप्तिकरं किन्त्वदृष्टफलकमेव । अतोऽस्यापूर्वविधित्वेन[454] तत्पञ्चमांशकालापेक्षा नास्ति । किञ्च वृषलग्नस्य वाचनिकत्वेन तस्य तत्पञ्चमांशेऽसम्भवाद् विरोधः , कर्कटस्य तदानीं प्रसरात्[0] । न च स्नान एव वृषलग्नोक्त्या तत्पाने च तन्नेति वाच्यम् । स्नानशिवपूजयोस्तदङ्गत्वेन प्रधानपान एव तन्नियमस्य प्राक्कथनात् । अस्तु वा पूर्वाह्णः सामान्यकालः । अतएव तिथिद्वैधे परेति स्मृतिसार[455] उक्तम् । न वा क्वापि तथाचार[00] इत्यास्तां तावत् । पानमन्त्रो यथा—

त्वामशोक ! हराभीष्ट मधुमाससमुद्भव ।
पिबामि शोकसन्तप्तो मामशोकं सदा कुरु ॥[456]

पौराणिकत्वात् स्त्रीशूद्रयोरप्येतन्मन्त्रपाठः स्यात् । स्त्रीनपुंसकयोः पाठे ऊहाभावश्च । न प्रकृतावपूर्वत्वादिति[457] न्यायात् । व्रीहीणामेध सुमनस्य

454- मीमांसाशास्त्रे विधिस्त्रिविधः स्वीक्रियते, यथा—अपूर्वविधिः, नियमविधिः, परिसङ्ख्याविधिश्चेति । एतेषां विचार उक्तो यथा तन्त्रवार्त्तिके (1/2/4) कुमारिलभट्टेन—

विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्तौ परिसङ्ख्येति गीयते ॥ इति ।

मीमांसापरिभाषाकारेण (पृ-29) स्फुटीकृतोऽपूर्वविधिर्यथा—तत्र यो विधिरत्यन्ताप्राप्तमर्थं प्रापयति सोऽपूर्वविधिः, यथा दर्शपूर्णमासप्रकरणे 'व्रीहीन् प्रोक्षति' इति । एतद् विध्यभावे दर्शपौर्णमासीयव्रीहिषु प्रोक्षणं कथमपि न प्राप्नोति । एतद्विधिसत्त्वे तु तत्सम्बन्धिव्रीहिषु प्रोक्षणं प्राप्नोत्येव इति अत्यन्ताप्राप्तप्रोक्षणप्रापकत्वादयमपूर्वविधिः । इति ।

455- तिथिद्वैधेऽष्टमी परविद्धा ग्राह्येति प्रागुक्तम् । इति स्मृतिसारसङ्ग्रहे (पृ-35) ग्रन्थकर्त्रोक्तम् ।

456- गरुडपुराणे—1/133/2 ।

457- ऊहं प्रकृत्य कात्यायनश्रौतसूत्रे चतुर्थाध्याये चतुर्थकण्डिकायां सूत्रितमिदम् ।

0- 'प्रसरत्वात्' इति ग-पुस्तके पाठः ।

00- 'तथा समाचारः' इति ख-ग-पुस्तकद्वये ।

मान इत्यत्र यथोहाभाववत्[458] । एवम्

एकादश्यां निराहारो भोक्ष्येऽहमपरेऽहनि ।
द्वादश्याञ्च निराहारो वामनं पूजयाम्यहम् ॥

अत्र भाष्यकारेण कर्काचार्येण सप्रसङ्गं स्फुटीकृतं यथा—

वैकृतद्रव्यं प्राकृतकार्यापन्नं तद्धर्मैर्युज्यत इत्युक्तम् । तेन तन्मन्त्राभिधानमपि लभते । इदं तु सन्दिह्यते, किमूहितेनाभिधानं कर्त्तव्यमुतानूहितेनेति । किं तावत्प्राप्तम् । अर्थबाधो मा भूदित्यनूहितेनेति प्राप्ते आह—

(विकृतौ अर्थाभिधानायोहः कर्त्तव्यः)

यथार्थमूहश्चोदिते ॥ 20 ॥

चोदिते वैकृते प्रधाने द्रव्ये यथार्थमूहः कर्त्तव्यः । स यथा यथा तमर्थं प्रकाशयति तथा तथोह्यते । यत्कारणम् । प्रकृतौ तेन मन्त्रेण यागसाधनं द्रव्यमभिहितं, विकारेऽपि हि तेन तदेव कर्त्तव्यम् । न चाविपरिणतरूपः शक्नोति कर्त्तुमित्यर्थाद्विपरिणम्यते ।

प्रकृतावनेकपत्नीके यागे पत्नीशब्दस्य विपरिणामे प्राप्ते आह—

(प्रकृतौ पत्नीशब्देऽनूहः)

न प्रकृतावपूर्वत्वात् ॥ 21 ॥

इति । न प्रकृतौ विपरिणामोऽस्ति, अपूर्वत्वात्प्रकृतेः । न हि प्रकृतेरन्या प्रकृतिरस्ति, यद्विक्रियते । विकृतौ तु प्रकृतिवद्भावाद्विपरिणामः । इति ।

458- विषयोऽयं जैमिनिना मीमांसादर्शने 'प्रकृतौ यथोत्पत्तिवचनमर्थानां तथोत्तरस्यां ततौ तत्प्रकृतित्वादर्थे चाकार्यत्वात् ।' इति (9/3/1) सूत्रे विचारितः ।

भाष्यकारेण शबरस्वामिना स्फुटीकृतमेतद्यथा—

वैकृतानि कर्माण्युदाहरणम् । सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकाम इति । ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकाम इति । चित्रया यजेत पशुकाम इति । वैश्वदेवीं साङ्ग्रहणीं निर्वपेद् ग्रामकाम इति । अस्ति तु प्रकृतौ निर्वापमन्त्रः, अग्नये जुष्टं निर्वपामीति । तथा, इन्द्राय मरुत्वते नैवारमेकादशकपालं निर्वपेदिति । अस्ति तु प्रकृतौ व्रीहिलिङ्गो मन्त्रः—स्योनन्ते सदनं कृणोमि घृतस्य धारया सुशेवं कल्पयामि । तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणामेध सुमनस्य मान इति । तच्चैतच्च विकृतौ चोदकप्राप्ते सन्दिह्यते । किमविकारेण प्रयोक्तव्यमुतोहेनेति । किं प्राप्तम् । अविकारेणेति । तथा, आर्षमनुगृह्यते । यत्प्रकृतौ कर्त्तव्यं, तद्विकृताविति । प्रकृतौ चाग्निव्रीहिशब्दौ

इत्यादौ स्त्रीव्रतवाक्येऽप्यूहाभाव इति नारायणादि[0]प्राञ्चः । ब्रह्मपुत्रस्नान-मन्त्रो यथा—

ब्रह्मपुत्र महाभाग ! शान्तनोः कुलनन्दन ! ।
अमोघागर्भसम्भूत पापं लौहित्य मे हर ॥

एतद्दिने कदाचिद्रामनवमीपाते कलिकापानं काम्यत्वान्न कार्यमिति राम-नवम्यां वक्ष्यामः ।

जन्माष्टमी

इदं व्रतं नित्यं, जयन्तीव्रतत्वेन काम्यञ्च । यथा स्कान्दे[459]—

ये न कुर्वन्ति जानन्तः कृष्णजन्माष्टमीव्रतम् ।
ते भवन्ति नरा ग्राहा व्याला व्याघ्राश्च कानने ॥

प्रयुक्तौ । तस्माद्विकृतावपि तावेव प्रयोक्तव्याविति ।

एवं प्राप्ते ब्रूमः । सत्यं, प्रकृतौ यथोत्पत्तिवचनमर्थानां कृतं मन्त्रे, तथोत्तरस्यामपि ततो विकृतौ तेनैव मन्त्रेण वचनं कर्त्तव्यम् । तत्प्रकृतित्वात् । तथा प्राप्त इदमुच्यते । नैतदेवम् । अर्थे चाकार्यत्वादिति । एतावर्थौ, अग्निव्रीहिशब्दौ सूर्यं नीवारं च नाभिदध्याताम् । च-शब्दोऽत्र तु-शब्द-स्यार्थे । मन्त्राणां चार्थवचनं कार्यं, न स्वरूपम् । स्वरूपे ह्यदृष्टं कल्पयित-व्यम् । अर्थवचनेन दृष्ट उपकारः । तस्मादूहितव्याविति ।

माधवाचार्येणापि जैमिनीयन्यायमालाविस्तरे प्रतिपादितं यथा—

अग्निव्रीह्यादयो नोह्या ऊह्या वा न हि चोदनात् ।
विवक्षा देवहविषोर्दृष्टत्वादूह्यते ततः ॥

प्रकृतावग्नये जुष्टं निर्वपामीति देवताविषयो मन्त्र आम्नातः । व्रीहीणां मेध सुमनस्य मान इति द्रव्यविषयः । विकृतिषु सूर्याय जुष्टं निर्वपामीति निवाराणां मेध सुमनस्य मान इत्येवमूहो न कर्त्तव्यः । कुतः । चोदकेन यथावस्थितस्यैव मन्त्रपाठस्यातिदिष्टत्वादिति चेत् । मैवम् । प्रकृतौ देवता-हविलक्षणयोरेव विवक्षा । तथा सति तत्प्रकाशनरूपस्य दृष्टप्रयोजनस्य लाभात् । अग्निव्रीहिशब्दविवक्षायामदृष्टार्थो मन्त्रपाठः प्रसज्येत । तस्मात् सूर्यनीवारलक्षणार्थप्रकाशनायोहः कर्त्तव्यः । इति ।

459- कालमाधवे (पृ-162) ग्राहा-स्थाने ग्राह्य-इति पाठः ।

0- ख-ग-पुस्तकद्वये नारायणादि इति नास्ति ।

वर्षे वर्षे भागवतो मद्भक्तो धर्मनन्दन ॥[460]

इति वीप्साश्रवणाच्च ।

वर्षे वर्षे तु या नारी कृष्णजन्माष्टमीव्रतम् ।
न करोति महापापी सा व्याली भवति कानने ॥

इति भविष्योत्तराच्च[461] । न च

सप्तजन्मकृतात् पापान्मुच्यते नात्र संशयः ।[462]

इति वचनाज्जन्माष्टमी काम्याऽपि स्यादिति वाच्यम् । पापक्षयार्थस्याफलत्वात् । अन्यथा सन्ध्यादेरपि काम्यत्वापत्तिः । काम्यत्वञ्च यथा भविष्योत्तरे[463]—

'प्रतिवर्षं विधानेन मद्भक्तो धर्मनन्दन !
नरो वा यदि वा नारी यथोक्तं फलमाप्नुयात् ॥
पुत्रसन्तानमारोग्यं सौभाग्यमतुलं लभेत् ॥'
पर्जन्यः कामवर्षी स्यादीतिभ्यो[464] न भयं भवेत् ॥

इत्यादिफलस्य जयन्त्यां श्रवणात् । अहोरात्रमध्ये यत्र क्वापि काले रोहिण्याः कलामात्रयुक्ताऽपि तिथिर्जयन्तीसंज्ञा स्यात् ।

रोहिणी च यदा कृष्णपक्षेऽष्टम्यां द्विजोत्तम ।
जयन्ती-नाम सा प्रोक्ता सर्वपापहरा तिथिः ।

460- तिथितत्त्वे (पृ-43) संवत्सरप्रदीपधृतं सम्पूर्णवचनं यथा—
एवं यः कुरुते देव्या देवक्याः सुमहोत्सवम् ।
वर्षे वर्षे भागवतो मद्भक्तो धर्मनन्दन ॥ इति ।

461- कालसारे जन्माष्टमीप्रकरणे उद्धृतम् ।

462- कालसारे जयन्तीं प्रकृत्य सम्पूर्णं भविष्यवचनं यथा—
एकेनैवोपवासेन कृतेन कुरुनन्दन ।
सप्तजन्मकृतात्पापान्मुच्यते नात्र संशयः ॥ इति ।

463- कालमाधवे (पृ-163) लभेत्-स्थाने भवेत् इति भविष्योत्तरवचनम् ।

464-ईतिः कृषिबाधा । ताः षट् । तदुक्तं (ति०त०-पृ-117)भविष्योत्तरपुराणे—
अतिवृष्टिरनावृष्टिः शलभा मूषिकाः खगाः ।
प्रत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः ॥ इति ।

वासरे वा निशायां वा यत्र स्वल्पाऽपि रोहिणी ।
विशेषेण नभोमासि सैवोपोष्या मनीषिभिः ॥

इति पुराणात् । सिंहवशान्नभोऽन्यमासेऽपि श्रीवैष्णवानां जयन्तीपाताद्विशेषेणेत्याद्युक्तम् । इदमेवाभिप्रेत्य माधवाचार्योऽपि

अष्टमी रोहिणीयुक्ता जयन्ती सा चतुर्विधा ।[465]

इति सामान्यतो रोहिणीयुक्ताष्टमीं जयन्तीत्वेनाभिदधे । सिंहवाजपेय्यादिभिरपि तथैवानूदितमिति धारावाहिकी रथ्या । जयन्तीत्वप्रयोजनं चैकवर्षे क्रमादष्टमीजयन्त्योः पाते जयन्त्यामष्टम्यन्तर्भावात् व्रतैक्यं वक्ष्यते । गौडास्तु[466] निशीथ एव रोहिणीयुक्ताष्टमी जयन्तीसंज्ञका,

सिंहार्के रोहिणीयुक्ता नभःकृष्णाष्टमी यदि ।
रात्र्यर्धपूर्वपरगा जयन्ती-नाम सा स्मृता ॥
अर्धरात्रादधश्चोर्ध्वं कलयाऽपि यदा भवेत् ।
जयन्ती-नाम सा प्रोक्ता सर्वपापहरा तिथिः ॥[467]

इत्यादिपुराणात् । भवेदित्यत्र रोहिणीयुतेति शेषः । यद्वद्वाक्ये निशीथपदं विना जयन्तीपदं श्रूयते

रोहिणी च यदा कृष्णपक्षेऽष्टम्यां द्विजोत्तम ।
जयन्ती-नाम सा प्रोक्ता....॥[468]

इत्यादि, तत्तद्वाक्ये उक्तवाक्यसाम्याय निशीथपदं प्रक्षेप्यमित्याहुः । अन्ये तु निशीथातिरिक्ते रोहिणीयुताष्टमी जयन्ती, निशीथे तद्गुणे महाजयन्तीत्यप्याहुः । तत्सर्वं माधवादिबहुप्रामाणिकविरोधादुपेक्ष्यम् । एकवाक्ये

465- कालमाधवे (पृ-11) कारिकायामुत्तरार्धपाठो यथा—
शुद्धा शुद्धाधिकेत्येवं विद्धा विद्धाधिकेति च । इति ।

466- रघुनन्दनः तिथितत्त्वे (पृ-41) प्रतिपादयत्येवं यथा—मध्यरात्रप्राप्तावेव जयन्तीत्वं, न रोहिण्यष्टम्योर्योगमात्रे । यथा-सिंहार्के....जयन्ती कलयापि च ॥ इति ।

467- 'सर्वपापप्रणाशिनी' इति तिथितत्त्वे (पृ-47) स्कान्दे चतुर्थपादपाठः ।

468- 'सर्वपापहरा तिथिः' इति कालमाधवे (पृ-164) चतुर्थपादे ।

निशीथपदस्योपलक्षणत्वेन सामञ्जस्ये बहुवाक्येषु तदध्याहारे मानाभावात् । 'वासरे वा निशायां वा' इत्युक्तवाक्यविरोधात् । महा[0] पूर्वकत्वेन तद्भेदस्य वचनादलाभादश्रुतत्वाच्चेत्यलं बहुना । 'जयन्ती नामनाख्या स्यादित्यादौ जयन्तीप्रयोगस्तु सादृश्याद् गौणः ।

इयं जयन्ती नामनिमित्तरूपशुद्धमिश्रत्वनिर्देशैः पञ्चभिः केवलजन्माष्टमीतो भिन्ना । तथाहि

> 'संज्ञा चोत्पत्तिसंयोगादि'ति[469] सूत्रे
> शब्दान्तराभ्यासगुणैः ससंख्यैर्नाम्ना च दूरेण च सापवादः ।
> भेदः क्रियाणामिह साधितोऽयम् .... ॥

इति वचनात् 'अथैष ज्योतिरथैष विश्वज्योतिरि'तिवज्जयन्तीजन्माष्टमीशब्दाभ्यां द्वयोर्भेदः । एवं जन्माष्टम्यां तिथिनिमित्तं जयन्त्यां तु रोहिणीयोग इति निमित्तादपि भेदः । यद्यपि शब्दान्तराभ्यासादिषु निमित्तस्य भेदकत्वं

469- संज्ञया कर्मभेदं प्रकृत्य जैमिनिना मीमांसादर्शने संज्ञा चोत्पत्तिसंयोगात् (2/2/8/22) इति सूत्रं सूत्रितम् ।

भाष्यकारेणात्र स्फुटीकृतं यथा—

अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिः—एतेन सहस्रदक्षिणेन यजेत इति श्रूयते । अत्र सन्देहः । किमेभिर्नामधेयैः प्रकृतं ज्योतिष्टोमं सङ्कीर्त्य तत्र सहस्रदक्षिणादिगुणो विधीयते, अथवा वक्ष्यमाणविशेषाणि कर्मान्तराण्युपदिश्यन्त इति । किं प्राप्तम् । प्रकरणानुग्रहात् प्रकृतस्य गुणविधानमिति । ननु वाक्यसामर्थ्याज्ज्योतिरादीनामेते गुणा विधायिष्यन्ते । नैष दोषः । ज्योतिष्टोमस्यैवैतानि वाचकानि । ज्योतिरिति ज्योतिष्टोमस्य प्रतीकमुपादीयते, विश्वज्योतिरिति । त्रिवृदादीन्यस्य ज्योतींषि वाक्यशेषसङ्कीर्त्तितानि । तानि सर्वाण्यस्य । तेनासौ विश्वज्योतिः सर्वज्योतिश्च ज्योतिष्टोम इत्येवं प्राप्तम् । एवं प्राप्ते ब्रूमः । संज्ञा हि तिस्रो भेदिकाः । तेषां ज्योतिराद्याः । उत्पत्तिवाक्ये ह्येताः श्रूयन्ते । नासामिमाः पुनः श्रुतयः । तस्मादथैष ज्योतिरित्यपूर्वस्य कर्मणो विधायकं वाक्यम् । अनुवादे

0- महापदपूर्वकत्वेन-इति ग-पुस्तके पाठः ।

न गणितं तथापि तस्योपोद्बलकत्वेन भेदकत्वाक्षतिः । एवं जन्माष्टम्यां

हि सत्यप्रवृत्तिविशेषकरमनर्थकं स्यात् । प्रकृतस्य च गुणविधाने विकल्पो भवेत् । तत्र पक्षे बाधः । न च ज्योतिरादयो ज्योतिष्टोमस्य वदितारः । समुदायान्तराणि ह्येतानि । न चावयवेन समासेन समुदायान्तरं तदर्थमेव भवति । यथा शालाशब्दो गृहवचनः, तत्र न शालाशब्दसामान्यान्मालाशब्दादयोऽपि गृहवचना भवन्ति । यत्तु ज्योतिष्टोमस्य ज्योतिरिति प्रतीकमुपादयीत इति । प्रकरणसामर्थ्याद्धि तत्र ज्योतिष्टोमशब्देन परोक्षेणैकवाक्यता भवेत् । सा प्रत्यक्षं ज्योतिःशब्देन सहैकवाक्यतां बाधेत । न चैतन्न्याय्यम् । वाक्यं हि प्रकरणाद्बलीयः । अथ पुनरयं द्योतनार्थत्वाद्वा ज्योतिष्मत्त्वाद्वा कर्मान्तरे वर्त्स्यति । यश्च त्रिवृदादीनि ज्योतींषि तेषां साकल्यवचनो विश्वज्योतिः सर्वज्योतिरिति चेन्नेति ब्रूमः । न हि त्रिवृदादिषु ज्योतिःशब्दः प्रसिद्धः । एवं ब्रुवन् प्रसिद्धिं बाधेत । यत्तु वाक्यशेषाज्ज्योतिःशब्दस्त्रिवृदादिवचन इति । तस्मिन्नेव वाक्ये स तत्र प्रयुक्त इति गम्यते प्रमाणान्तरेण न शब्देन । यत्र तु तत्प्रमाणान्तरं नास्ति, न तत्र वर्त्तितुमर्हति । यथा सिंहो देवदत्त इति सिंहशब्दो देवदत्तवचनः प्रमाणान्तरेण, न तु सिंहमालभेतेति यत्र, तत्र तु तत् प्रमाणान्तरं नास्ति । तस्मान्न विश्वज्योतिः सर्वज्योतिरिति च ज्योतिष्टोमस्य वदितारौ । न चेज्ज्योतिष्टोम उच्यते, सर्वाणि कर्मान्तराणि इति ।

माधवाचार्येणापि जैमिनीयन्यायमालायां (2/2/8) स्पष्टीकृतमेतद्यथा—

अथैष ज्योतिरित्यत्र गुणो वा कर्म वा पृथक् ।
गुणः सहस्रदानात्मा ज्योतिष्टोमे ह्यनूदिते ॥
अथेति प्रकृते छिन्न एतच्छब्दोऽग्रगं वदेत् ।
सङ्ख्ययेवान्यकर्मत्वमिह नूतनसंज्ञया ॥

विस्तरेऽपि—अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेतेति श्रूयते । अत्र प्रकृतं ज्योतिष्टोममेष ज्योतिरित्यनूद्य तस्मिन् सहस्रदानलक्षणो गुणो विधीयत इति चेत् । न । प्रकृतस्य ज्योतिष्टोमस्याथेत्यनेन छिन्नत्वात् । न चैवं सत्यथैष ज्योतिरित्युक्त एतच्छब्दोऽनुपपन्न इति वाच्यम् । सन्निहितवाचिनैतच्छब्देनातीतसन्निहितस्येवागामिसन्निहितस्यापि परामर्शसम्भवात् । आगामिसन्निहितश्च ज्योतिःशब्दार्थः । स च ज्योतिःशब्दोऽतीतमपरामृशन्नपूर्वसंज्ञारूपत्वात् नूतनं किञ्चित् कर्माभिधत्ते । ततो यथा पूर्वत्र सङ्ख्यया कर्मभेदः, तथात्रापि संज्ञया कर्म भिद्यते । विश्वज्योतिःसर्वज्योतिःशब्दयोरप्ययं न्यायो द्रष्टव्यः । इति ।

केवलोपवासः स्वरूपम् , जयन्त्यां तु विशिष्टोपवासस्तत ,

ब्राह्मणान् भोजयेद्भक्त्या ततो दद्याच्च दक्षिणाम् ।

हिरण्यं मेदिनीं गावो वासांसि कुसुमानि च ॥

इति भविष्योत्तरे[470] जयन्तीप्रकरणात् । 'वाजिभ्यो वाजिनमि'ति[471]वद्रूप-भेदादपि भेदः । एवम्

जन्माष्टमी जयन्ती च शिवरात्रिस्तथैव च ।

पूर्वविद्धैव कर्त्तव्या.... ॥

इत्यादिभृगुवाक्ये[472] च-कारेण जयन्त्यास्ततः पृथगुपादानान्निर्दे शक्ततोऽपि भेद इत्युक्तम् । पञ्चलक्षणैस्तयोर्भेदः सुप्रसिद्धः । न चैवं यस्मिन् वर्षे पूर्वेद्युः केवलं जन्माष्टमी परेद्युश्चाष्टमी वृद्धिवशाद्रोहिणीयुता सा जयन्ती , तदोप-वासद्वयापत्तिरितिवाच्यम् । जयन्त्या बहुव्यापितया जन्माष्टम्या अपि तत्र

470- कालमाधवे (पृ-170) ।

471- सोऽयं न्यायो जैमिनीयदर्शने 'गुणश्चापूर्वसंयोगे वाक्ययोः समत्वात् ।' इति (2/2/9/23) सूत्रे विचारितः । माधवाचार्येणापि जैमिनीयन्यायमालायां प्रतिपादितोऽयं यथा—

गुणः कर्मान्तरं वा स्याद्वाजिभ्यो वाजिनं त्विति ।

गुणो देवाननूद्योक्तसमुच्चयविकल्पतः ॥

आमिक्षोत्पत्तिशिष्टत्वात् प्रबला तत्र वाजिनम् ।

गुणो प्रविश्य कर्मान्यत्कल्पयेद्वाजिदेवकम् ॥ इति ।

तत्र विस्तरव्याख्यायां स्फुटीकृतमेतत्तेन यथा—तप्ते पयसि दध्यानयति । सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति श्रूयते । घनीभूतः पयःपिण्ड आमिक्षा । जलं वाजिनम् । तत्रामिक्षाद्रव्यभाजो विश्वदेवा उक्ताः । ते वाजिभ्य इत्यनेनानूद्यन्ते । वाजोऽन्नमामिक्षारूपमेषामस्तीति तन्निष्पत्तेः ।ताननूद्य वाजिनद्रव्यरूपो गुणो विधीयते । तच्च द्रव्यमामिक्षाद्रव्येण सह समुच्चीयतां विकल्प्यतां वेतिप्राप्ते ब्रूमः । उत्पत्तिशिष्टेनामिक्षाद्रव्येणावरुद्धे वैश्वदेवयागे वाजिनद्रव्यस्योत्पन्नशिष्टस्य प्रवेशाभावाद् वाजिनं वाजिशब्दार्थस्य देवतान्तर-तामापादयति । ततो द्रव्यदेवतालक्षणस्य रूपस्य भिन्नत्वात् कर्मान्तरम् । इति ।

472- कालमाधवे (पृ-171) 'तिथिभान्ते च पारणम्' इति चतुर्थपादपाठः ।

प्रवेशात् जयन्त्युपवासेन तस्या गतार्थत्वात् तन्त्रेणाचारात्[0] । अतएव स्वप्नभेदेऽनेकजातीयामेध्यदर्शने[00]ऽपि 'मनोऽबद्धं मनो दरिद्रं चक्षुरि'ति नैमित्तिकत्वेनागृह्यमाणविशेषत्वात्तन्त्रेण[473] भवतीत्येकादशे निर्णीतम्[000] । कालभेदेऽपि श्रवणद्वादश्यामेकादश्यास्तन्त्रेण प्रसङ्गेन निर्वाहस्य वक्ष्यमाणत्वात् । न चैवं जयन्त्यां नित्यजन्माष्टमीफलस्य दोषाभावस्याप्रसरात् कथं गतार्थता इति वाच्यम् । बाधविकल्पव्यवस्थाभ्यः समुच्चयस्य प्राबल्येना[474]-

473- नित्यश्राद्धदेवपूजादिचिकीर्षुः स्नानादिना प्रयतो नरः चाण्डालाद्यशुचिदर्शने नैमित्तिकत्वेन यथा 'उदुत्यं जातवेदसम्' इत्यादिमन्त्रविशेषान् जपेत् तथा स्वप्नदशायामनेकजातीयाशुचिदर्शने 'मनोऽबद्धं मनो दरिद्रं चक्षुरि'त्यादि जपेत् । अत्र स्वप्नभेदेऽनेकजातीयाशुचिदर्शनेऽपि तन्त्रेण मन्त्रजपो निर्णीतः । विषयोऽयं जैमिनिना मीमांसादर्शने 'स्वप्ननदीतरणाभिवर्षणामेध्यप्रतिमन्त्रणेषु चैवम् ।' इति (11/4/18/51) सूत्रे विचारितः । अत्र माधवाचार्येण जैमिनीयन्यायमालायामुक्तं यथा—

स्वप्नादिमन्त्र आवर्त्यो नो वाऽऽद्योऽस्त्वन्तरायतः ।
कृत्स्नोद्देशप्रवृत्तत्वान्निमित्ताभेदतः सकृत् ।। इति ।

स्वकीयविस्तरव्याख्यायामपि स्फुटीकृतमेतत्तेन यथा—दीक्षितस्य स्वप्ननद्युत्तरणवृष्टिक्लेदनामेध्यदर्शननिमित्तकास्तत्तन्मन्त्रजपाः पठिताः । त्वमग्ने व्रतपा असि इत्यादिः स्वप्नमन्त्रः । देवीरापो अपां न पात्-इत्यादिर्नदीतरणमन्त्रः । उन्दतीर्बलं धत्त-इत्यादिर्वृष्टिक्लेदनमन्त्रः । अबद्धं मनः-इत्यादिरमेध्यदर्शनमन्त्रः । यदि निद्रामध्ये प्रबोधैरल्पैर्व्यवधीयते, नदी च बहुस्रोतोयुक्ता द्वीपैः, वृष्टिश्च विच्छेदैः, अमेध्यानि च देशैः, तदा तैरन्तरायैर्निमित्तेषु भिद्यमानेषु नैमित्तिका मन्त्रा आवर्त्तनीयाः-इत्येवं प्राप्ते ब्रूमः । रात्रिगतां कृत्स्नां निद्रामुद्दिश्य मन्त्रविधानान्निमित्तमेकम् । एवमितरत्रापि योज्यम् । तस्मान्नास्त्यावृत्तिः । इति ।

474- विकल्पव्यवस्था व्रीहियवन्यायव्याप्तिः । गुणानामेककार्याणामेकस्मिन् कर्मणि विकल्पः । एतदुक्तं जैमिनिना मीमांसादर्शने (12/3/4/10) यथा—

0- तत्राचरणात्-इति ख-ग-पुस्तकद्वये पाठः ।
00- अमेध्यस्पर्शनेऽपि-इति ग-पुस्तके पाठः ।
000- वाक्यमिदं ख-पुस्तके नास्ति ।

विरुद्धानां गौणमुख्यफलानां मुख्ययोगाभ्युपगमात् । अतएव सुनफानफयो-र्दुरुधरान्तर्गतत्वेऽपि तयोस्तद् विरुद्धफलानां दुरुधराफलानां च योग एवेति भगवन्नाम्नोक्तम्[0] । तदर्थं नरसिंहो माधवीये भेदसाधिकां भूयसीं युक्तिं

'एकार्थास्तु विकल्पेरन् , समुच्चये ह्यावृत्तिः स्यात्प्रधानस्य ।' इति ।

भाष्यकारेण स्फुटीकृतमेतद्यथा-'ये त्वेकार्थाः, एककार्यार्थास्ते विकल्पेरन् । यथा व्रीहियवौ, यथा खादिरादीनि यूपद्रव्याणि, बृहद्रथन्तरे च । ते विकल्पेरन् । कस्मात् ? समुच्चये ह्यावृत्तिः स्यात्प्रधानस्य । एकेन कार्ये कृते यदि द्वितीयः उपादीयते, आवृत्तिः प्रधानस्य भवेत् । सा चायुक्ता । किं कारणम् ? प्रधानं हि फलाय वा क्रियते, फलवदुपकाराय वा नाङ्गाय । सकृत्कृतेन च कृतं कार्यम् । तस्य निरर्थिका आवृत्तिः । इति ।

जैमिनीयन्यायमालाकारेण माधवाचार्येण प्रतिपादितमेतद्यथा—

समुच्चयो यवव्रीह्योर्विकल्पो वाऽत्र पूर्ववत् ।
आद्यो मैवं नैरपेक्ष्याददृष्टाभेदतोऽन्तिमः ॥ इति ।

विस्तरेऽपि स्फुटीकृतं तेन यथा—अष्टदोषनिदानविकल्पपरिहाराय प्रयोगवचनानुग्रहाय च समुच्चयः स्याद्‌द्व्याघारधर्मवत् इति चेत् । मैवम् । अदृष्टस्य कल्पयितुमशक्यत्वात् । तर्ह्यस्तु दृष्टभेद इति चेत् । एकं पुरोडाशनिष्पादनमन्तरेणान्यस्य कार्यस्यादर्शनात् । न च पेषणादौ दृषदुपलयोरिव समुच्चयः शङ्कनीयः । तद्वत् परस्परसापेक्षत्वाभावात् । अतएव व्रीहिभिर्यजेतेत्यत्र यवनिरपेक्षाणां व्रीहीणां यागसाधनत्वं विधीयते । एवं यवैर्यजेतेत्यत्रापि । तस्माद्विकल्पः । इति ।

भिन्नोपकारकाणां गुणानां सहानुष्ठानसम्भवः समुच्चयः । तदुक्तं जैमिनिना (12/3/3/9) यथा—'एककर्मणि शिष्टत्वाद् गुणानां सर्वकर्म स्यात् ।' इति । माधवाचार्येण जैमिनीयन्यायमालायां स्फुटीकृतमेतद्यथा—

ऋजुत्वादय आघारे विकल्प्यन्ते न वाऽग्रिमः ।
एकार्थत्वाददृष्टार्थभेदात् सम्भवतोऽन्तिमः ॥ इति ।

विस्तरेऽपि—दर्शपूर्णमासयोराम्नायते—ऋजुमाघारयति संततमाघारयत्यूर्ध्वमाघारयतीति । तेषामृजुत्वादीनामाघारोपकारद्वारा कार्यस्यैकत्वाद्विकल्प इति चेत् । मैवम् । दृष्टद्वारभेदाभावेऽप्यदृष्टद्वारभेदात् सहानुष्ठानसम्भवाच्च विकल्पो न । इति ।

0- ख-पुस्तके वाक्यमिदं नास्ति ।

पश्यन्नपि किमर्थं व्रतैक्यमुक्तवान्[475] स एव प्रष्टव्यः । चूडामण्यादौ[476] रूपादीनामभावाद् गुणविधित्वस्यैव न्यायत्वादित्यवधेयम् ।

अथ प्राह्यतिथिः

अर्धरात्रादधश्चोर्ध्वं कलयाऽपि यदा भवेत् ।
मुहूर्त्तो विजयो नाम यत्र जातो जनार्द्दनः ॥

इति वचनात् पूर्वापरदण्डद्वयोपेतोऽर्धरात्रोऽस्य मुख्यकालः । शिवरात्रावप्येवं निशीथो वक्ष्यते । अन्यथा तु दुर्वचत्वापत्तिः । यद्वर्षे रोहिणीयोगो नास्ति तद्वर्षे केवलाष्टमी ।

शुद्धा च सप्तमीविद्धेत्येवं जन्माष्टमी द्विधा ।
शुद्धायां नास्ति सन्देहो विद्धा च त्रिविधेष्यते ।
निशीथ-योगः पूर्वेद्युः परेद्युर्वा द्वयोरुत ॥
पूर्वैव प्रथमे पक्षे परैवोत्तरपक्षयोः ।[477]

शास्त्रदीपिकाकारोऽपि 'उभयोर्भिन्नकार्यत्वे समुच्चयः ।' इत्युक्तवान् । अतः बाधविकल्पव्यवस्थाभ्यः समुच्चयस्य प्राबल्यम् ।

475- कालमाधवे (पृ-172-173) जन्माष्टमी-जयन्तीप्रकरणे भेदसाधिका युक्तिः प्रतिपाद्यते माधवाचार्येण यथा—जन्माष्टम्या रोहिणी-निरपेक्षत्वेन व्यतिरेक उपलभ्यतां नाम । जयन्त्यास्तु योगरूपत्वेन रोहिण्यामिवाष्टम्यामपि सापेक्षत्वेन कथं व्यतिरेकशङ्काऽवकाशः । तस्माद् व्रतद्वयपक्षे न कोऽप्यस्ति दोषः । किञ्च , यदा रोहिणीयोगोऽस्ति तदा जन्माष्टमी-जयन्त्योः सह प्रयोगस्यावश्यम्भावित्वेन जयन्तीव्रत एव जन्माष्टमीव्रतमन्तर्भवति । तस्मादपि नोपवासद्वयप्रसङ्गः । तदेवं व्रतभेदे दोषाभावात् तत्साधकानाञ्च नामभेदादीनां पञ्चानां हेतूनां सद्भावाद् व्रतभेद एवावश्यमभ्युपेयः । इति । नरसिंह-वाजपेयिना तु नित्याचारप्रदीपे (भागः-II-पृ-442) अत्र व्रतैक्यं विविच्यते यथा—सैव जन्माष्टमी रोहिणीयोगगुणसंयोगेन जयन्तीसंज्ञां लभते । न संज्ञया कर्मभेदः, ऐकान्तिकोत्पत्तिवाक्यगतत्वनिर्णयाभावेन भेदवीजाभावात् । दाक्षायणादिवत् गुणसंज्ञोपबन्धन इति नीत्या भेदेनोपपत्तौ भेदस्यापूर्वभेदापादकस्याकल्पनात् । इति ।

476- चूडामणियोगो यथा कालमाधवे (पृ-288) व्यासः—

रविग्रहः सूर्यवारे सोमे सोमग्रहस्तथा ।
चूडामणिरिति ख्यातस्तदाऽनन्तफलं भवेत् ॥ इति ।

प्रथमद्वितीययोर्निशीथयोगे हेतुः । तृतीये तदुभयसाम्येऽपि सङ्कल्पकालमारभ्यास्तकालेऽष्टमीसम्बन्धो हेतुः । एवमुभयेद्युर्निशीथयोगाभावेऽपि परग्रहः । सरोहिणीकाष्टम्यां विशेषः । षष्टिदण्डमितायां शुद्धाष्टम्यां रोहिण्याः पूर्णयोगो निशीथयोगो यत्किञ्चिद्दण्डयोगो वा इति त्रैविध्यम् । एषां त्रिपक्षाणां फलभूमाल्पत्वेऽपि दिनान्तराभावान्न व्रते संशयः । एवम्

शुद्धाष्टमी दिनद्वये वर्त्तते चेच्छुद्धाधिका ।

सा त्रिविधा । पूर्वेद्युरेव सरोहिणीका, परेद्युरेव सरोहिणीका, उभयेद्युस्तथेति । प्रथमे पूर्वेद्युः । द्वितीये परेद्युः,

प्राजापत्यर्क्षसंयुक्ता कृष्णा नभसि चाष्टमी ।
मुहूर्त्तमपि लभ्येत सैवोपोष्या महाफला ॥

इति विष्णुरहस्यात् ।

उदये चाष्टमी किञ्चित् सकला नवमी यदि ।
सा पुनर्बुधसंयुक्ता प्राजापत्यर्क्षसंयुता ॥
अपि वर्षशतेनापि लभ्यते वा न वा विभो ॥

इति वचनाच्च । यत्तु ईदृशतिथिद्वैधे पूर्वदिनस्य सम्पूर्णत्वात् सङ्कल्पास्तमयनिशीथव्याप्तत्वाच्च परदिनस्य सर्क्षत्वेऽपि तिथिमलत्वादेतादृशस्य भावाच्च पूर्वेद्युरेव व्रतमिति स्ववंशप्राचीनविद्याकर[0] मवलम्ब्य पूर्वेद्युरेव[478] व्रतमाचरन्ति परांश्च ऋजुधियस्तथैव प्रवर्त्तयन्ति तत्तु

477- कालमाधवकारिका (पृ-11) । तत्र प्रथमेऽधिकपाठः—

सप्तमी चेन्निशीथात्प्राग्विद्धा, शुद्धाऽन्यथा भवेत् । इति ।

478- विद्याकरवाजपेयी विषयेऽस्मिन् नित्याचारपद्धतौ (पृ-600,— प्रजापत्यर्क्षसंयुक्ता........इत्यनेन प्रतिवर्षकर्त्तव्यताभिधानाच्च रोहिणीयोगाभावेऽपि कर्त्तव्यम् ।........रोहिणीयोगे तु

कार्या विद्धा तु सप्तम्या रोहिणीसहिताष्टमी ।

इति मात्रं कथयति । नरसिंहवाजपेयी नित्याचारप्रदीपे (भागः-II,पृ-443) कथयति यथा—भेदेन पूर्वदिनेऽष्टमीनिशीथव्याप्तावपि 'उदये चाष्टमी....'-

---

0- दिवाकर-इति ग-पुस्तके पाठः ।

मुहूर्त्तमप्यहोरात्रे यस्मिन् युक्तं हि लभ्यते ।
अष्टम्यां रोहिणीऋक्षं तां पुण्यां समुपावसेत् ॥
उदये चाष्टमी किञ्चित्.... ।

इत्यादिविरोधान्माधवाद्यसम्मतेश्चोपेक्ष्यम् । तृतीये पूर्वेद्युः, प्रधानतिथेर्निशीथास्तमयव्याप्तिगुणाधिक्यात् । उदये चाष्टमी किञ्चिदित्यादिना परेद्युः किं न स्यादिति चेन्न । तस्यां पूर्वाष्टम्यां रोहिण्यभावे चरितार्थात् । निशीथादर्वाक् सप्तम्या युता सप्तमीविद्धा अत्रापि शुद्धावत् सम्पूर्णा रोहिणी । निशीथे वा रोहिणी तदन्यत्किञ्चिन्मुहूर्त्ते वा सेति । इहापि दिनान्तरे रोहिण्यभावात् पूर्वा, मुहूर्त्तमप्यहोरात्र इत्यादिवचनात् । निशीथादर्वाक् सप्तम्या युता परेद्युरपि विद्यमाना विद्धाधिका । इहापि पक्षत्रयम् । पूर्वेद्युरेव रोहिणीयुता, परेद्युरेव सरोहिणीका, उभयेद्युस्तथेति । प्रथमे पूर्वेद्युः,

जयन्ती शिवरात्रिश्च कार्ये भद्राजयान्विते ।[479]

इति वचनात् । द्वितीये परा, मुहूर्त्तमप्यहोरात्र इति वचनात् । उभयेद्यु रोहिणीयुता विद्धाधिका चतुर्धा । पूर्वेद्युरेव निशीथे तिथिनक्षत्रयोगवती, परेद्युरेव निशीथे तिथिनक्षत्रयुता, उभयत्र निशीथे तथा , उभयेद्युर्निशीथे तद्रहिता चेति । प्रथमे पूर्वोपोष्या,

---

'अपि वर्षशतेनापि'.... तथा 'मुहूर्त्तमप्यहोरात्रे....' इत्युक्तनीत्या उत्तरदिने जयन्तीव्रतकरणे पूर्वदिने जन्माष्टमीव्रतं पृथक् कर्त्तव्यं स्यात् । न चेष्टापत्तेः । समाचारविरोधात् । द्वयोर्नित्यत्वे त्यागे मानाभावात् । भेदपक्षे चोत्तरदिने जन्माष्टमीव्रतस्य कालाभावात् । तस्मात्....केवलाष्टम्यां फलकथनात् ।

मासि भाद्रपदे कृष्णपक्षेऽष्टम्यां कलौ युगे ।
अष्टाविंशतिमे जातः कृष्णोऽसौ देवकीसुतः ॥

तस्मात् स तत्र सम्पूज्य इति रोहिणीयोगबुधवारादियोगयोर्गुणयोरेव फलसम्बन्धः । इति ।

479- कालमाधवे (पृ-180) सम्पूर्णं विष्णुधर्मोत्तरवचनं यथा—

जयन्ती शिवरात्रिश्च कार्ये भद्रा जयान्विते ।
कृत्वोपवासं तिथ्यन्ते तथा कुर्यात्तु पारणम् ॥

इति । जयन्ती भद्रान्विता शिवरात्रिः जयान्विता च कर्त्तव्ये ।

सप्तमीसहिताष्टम्यां निशीथे रोहिणी यदि ।
तत्रोपवासं कुर्वीत........ ।।

इति वह्निपुराणात् ।

कार्या विद्धाऽपि सप्तम्या रोहिणीसहिताष्टमी ।[480]

इति पाद्माच्च । शेषत्रिपक्षेषु परेद्युरुपवासः । उभयेद्युर्निशीथयोगे परेद्युः सङ्कल्पास्तमयकालव्याप्तित्वात् ।

सा सर्क्षाऽपि न कर्त्तव्या सप्तमीसहिताष्टमी ।

इति वैवर्त्ताच्च । दिनद्वये निशीथे तद्योगे तदयोगे वा चेत्परग्रहस्तर्हि सुतरां परेद्युरेव निशीथे तद्योगे परग्रहसिद्धिः । दिनद्वये निशीथे रोहिणी-योगराहित्यं त्रिधा । पूर्वेद्युर्निशीथादूर्ध्वं प्रवृत्तं तिथ्यृक्षद्वयं परेद्युः निशीथादर्वाक्समाप्तमित्येकः प्रकारः । तथा पूर्वदिने रोहिणी भूयसी परेद्युः स्वल्पा अष्टमी तु निशीथादूर्ध्वं प्रवृत्तत्वात् स्वल्पा सती परेद्युर्बह्वी इति सोऽयं द्वितीयप्रकारः । एवं पूर्वदिने अष्टमी अधिका परेद्युश्चाल्पा रोहिणी तु निशीथादूर्ध्वं प्रवृत्तत्वात् परेद्युर्भूयसीति तत्त्वक्षयः, सोऽयं तृतीयपक्षः । तत्राद्ये परेद्युर्व्रतम्, तिथ्यृक्षयोगस्य सङ्कल्पकालव्याप्त्याधिक्यात् । 'सा सर्क्षाऽपि न कर्त्तव्ये'ति वचनात् । द्वितीयेऽपि परा, परेद्यु रोहिण्यल्पत्वेऽपि

कलाकाष्ठामुहूर्त्ताऽपि यदा कृष्णाष्टमी तिथिः ।
नवम्याञ्चैव सा ग्राह्या सप्तमीसंयुता नहि ।।

इति पाद्मात् । तृतीयेऽप्यतएव परा,

सप्तमीसहिताष्टम्यां भूत्वा ऋक्षं द्विजोत्तम ।
प्राजापत्यं द्वितीयेऽह्नि मुहूर्त्तार्द्धं भवेद्यदि ।
तदाष्टयामिकं ज्ञेयं प्रोक्तं व्यासादिभिः पुरा ।।

इति वचनाच्च ।[481]

480- कालमाधवे (पृ-180) पाद्मे उत्तरार्द्धवचनं यथा—
तत्रोपवासं कुर्वीत तिथिभान्ते च पारणम् । इति ।

481- कालमाधवे (पृ-181) स्कान्दवचने संयुताष्टम्याम् इति पाठः ।

ननु यदा पूर्वेद्युः सरोहिणीकाष्टमी षष्टिदण्डमिता परेद्युरपि सरोहिणीका बुधसोमान्यतरयुता च किञ्चिद्वर्धते तदा दिनद्वये जयन्तीयोगसाम्येऽपि 'उदये चाष्टमी किञ्चिदि'त्यादिना

मुहूर्त्तमप्यहोरात्रे यस्मिन् युक्तं हि लभ्यते ।
अष्टम्यां रोहिणीऋक्षं तां पुण्यां समुपावसेत् ।।

इत्यादिना च परैव गृह्यते । न च पूर्वेद्युर्निशीथाधिक्यात् पूर्वैव स्यादिति वाच्यम्, वारस्य ऋक्षसमानत्वेन निशीथादिखण्डकालापेक्षया प्रबलत्वात् । अन्यथा निशीथयोगो रोहिणीयोगमपि बाधेतेति चदत्राहुः, 'उदये चाष्टमी किञ्चिदि'त्यस्य यथाप्राप्तजन्माष्टम्यनुवादेन वारयोगप्राशस्त्यबोधकत्वात् । विधेयगतस्य तिथ्येकत्वादेर्ग्रहेऽपि 'उदये चाष्टमी किञ्चित्' इत्यस्यानुवाद्यविशेषणत्वेनाविवक्षितत्वात् । तस्मात् 'प्रेतयोनिगतानां चे'त्यादिवाक्यतुल्यार्थकं तत् न तु वारयोगानुसाराद् व्यवस्थापकमिति सिंहवाजपेयिनः[482] । वस्तुतस्तु पञ्चाङ्गे तिथिर्मूलम् । तत्समञ्च ऋक्षमित्येताभ्यामेव निर्णयो युज्यते । विशेषतस्तत्रस्य जन्मतिथित्वात् तिथ्यृक्षयोः समबलत्वमुक्तम् । वारयोगादेस्तिथ्यृक्षन्यूनत्वान्न तद्वशाद् ग्राह्यतिथिभेदः स्यात् । अन्यथा शिवरात्र्यादौ वक्ष्यमाणशिवयोगादेरपि ग्राहकता स्यादिति ध्येयम् ।

482- विषयेऽस्मिन् नरसिंहवाजपेयी नित्याचारप्रदीपे (भागः-II-पृ पृ- 446-47) कथयति यथा—उदते चाष्टमी....प्राजापत्यर्क्षसंयुता ।। इति स्कान्दवचनात् । बुधवारयोगनिमित्त एव अष्टम्या अल्पत्वेऽपि परविद्धास्वीकारः प्रतिभातीति चेत्, अस्य यथाप्राप्तजन्माष्टम्यनुवादेन बुधवासरयोगप्राशस्त्यकथनपरत्वात् । उदये किञ्चिदित्यस्यानुवाद्यविशेषणत्वेनाविवक्षितत्वात् । तथा च प्रेतयोनिगतानामित्यादिवाक्यसमानार्थत्वमेव । अतएवास्य बुधवारयोगपरत्वात् शुद्धाधिकायां पूर्वदिनेऽर्द्धरात्रेऽष्टमीयोगसत्त्वेन पूर्वदिने प्राप्ते न बाधकत्वम् अन्यपरत्वात् । विद्धाधिकायां पूर्वदिनेऽर्द्धरात्रेऽष्टमीयोगाभावेन 'पूर्वविद्धाऽष्टमी या त्वि'ति स्कान्दवचनेनोत्तरदिनस्यार्द्धरात्रयोगाभावेऽपि ग्राह्यत्वमिति विशेषः । तेन माधवाचार्यानुसारेण उक्तेषु जयन्तीभेदेषु वारयोगेन प्राशस्त्यं, न तु वारयोगानुसारेण व्यवस्था । इति ।

अथ पारणम्

पारणशब्दस्य 'पार-तीर-कर्मसमाप्ताव़ि'ति समाप्तिशक्यत्वेऽप्युपवासोत्तरभोजने निरूढलक्षणम् । तच्च व्रताङ्गम्,

'पारणान्तं व्रतं ज्ञेयमि'त्यादिपुराणात् ।[483]

'जयन्त्यां कृत्वोपवासं ततः कुर्यात्तु पारणम् ।'

'तिथ्यन्ते चोत्सवान्ते वा व्रती कुर्यात्तु पारणम् ।'[484]

इति विष्णुधर्मोत्तर[0]गारुडादावुपवासवत्पारणस्याप्यन्ते विधानात् । न च तद्रागप्राप्तभोजनानुवादकं तिथ्यृक्षनिषेधकं चेति शङ्क्यम् । तथा सति भोजनशब्दप्रयोगापत्तेः । भोजने क्लिष्टलक्षणाया अयोगाच्च । अतएव

अद्भिश्च पारयित्वा तु पुनर्भुक्तं न दोषकृत् ।

इति कात्यायनाद्युक्तं[485] पुनर्भोजनमपि सफलम् । तच्चोपवासाव्यवहितोत्तरदिने, उपवासस्याहोरात्रसाध्यत्वात् ।

'पारणं त्वपरेऽहनि ।' इति स्मृतेः ।[486]

अर्चयित्वोपवासेन भोक्ष्येऽहमपरेऽहनि ।[487]

483- कालमाधवे (पृ-183) सम्पूर्णमादित्यपुराणवचनं यथा—

पारणान्तं व्रतं ज्ञेयं व्रतान्ते तद्धि भोजनम् ।
असमाप्ते व्रते पूर्वे नैव कुर्याद् व्रतान्तरम् ॥ इति ।

484- कालसारे सम्पूर्णं गारुडवचनं यथा—

जयन्त्यां पूर्वविद्धायामुपवासं समाचरेत् ।
तिथ्यन्ते चोत्सवान्ते वा व्रती कुर्यात्तु पारणम् ॥ इति ।

485- तिथितत्त्वे (स्मृ०त-I-पृ-52) कात्यायनोक्तवचनं यथा—

सन्ध्यादिकं भवेन्नित्यं पारणन्तु निमित्ततः ।
अद्भिस्तु पारयित्वा तु नैत्यकान्ते भुजिक्रिया ॥ इति ।

486- तिथितत्त्वे (पृ-52) हेमाद्रिधृतसम्पूर्णवचनं यथा—

तिथ्यृक्षयोर्यदा च्छेदो नक्षत्रान्तस्य एव वा ।
अर्द्धरात्रेऽथवा कुर्यात्पारणन्त्वपरेऽहनि ॥ इति ।

0- विष्णुपुराण-इति ग-पुस्तके पाठः ।

इति मन्त्रलिङ्गाच्च । तस्मात् पारणस्याङ्गत्वादकरणे उपवासभङ्गः स्यादिति माधवरघुनन्दनादयो[488] बहवः । जीमूतवाहनस्तु[489] 'तिथिभान्ते च पारणमि'ति न तद्द्वयान्ते पारणकर्त्तव्यताबोधकम्, किन्तु तिथ्यृक्षयोः पारणाभावद्योतकं तत् । न चैवं श्रुतत्यागाश्रुतकल्पनाप्राप्तबाधरूपशब्दार्थ-दोषत्रयग्रस्तायां परिसङ्ख्यायां[490] गौरवं स्यादिति वाच्यम् । भ्रमादिना पारणविघ्नेऽप्युपवासफलक्षयादर्शनादगत्या स्वीकारात् । 'मुक्ते शशिनि

487- तिथितत्त्वे (पृ-53) पूर्वार्द्धपाठो यथा—

अद्य कृष्णाष्टमीं देवीं नभश्चन्द्रसरोहिणीम् । इति ।

488- विषयेऽस्मिन् कालमाधवे (पृ पृ-182-83) माधवाचार्यः कथयति यथा—यथोक्तरीत्या विहिततिथावुपवासं कृत्वा परेद्युः पारणेनोपवासं समापयेत् । 'पार तीर-कर्मसमाप्तौ' इत्यस्माद्धातोर्निष्पन्नः पारणशब्दः । यद्यप्यसौ समाप्तिमात्रमभिदधाति, तथाप्युपवाससमाप्तावेव लोकशास्त्रयोः प्रयोगात् पङ्कजादिशब्दवद्योगरूढो द्रष्टव्यः । तथा च योगरूढ्योपवासस्य चरमाङ्गं भोजनमभिधत्ते । अङ्गत्वञ्चोपवासविधिवाक्येषु 'तिथिभान्ते च पारणम्' इति विधानादवगन्तव्यम्।........किञ्च, यदि पारणमङ्गं न स्यात्तदा प्रतिनिधिविधानं नोपपद्यते, तद्विधानञ्च द्वादशीप्रस्तावे देवलेन स्मर्य्यते—

सङ्कटे विषमे प्राप्ते द्वादश्यां पारयेत् कथम् ।
अद्भिस्तु पारणं कुर्यात् पुनर्भुक्तं न दोषकृत् ।।

इति । अतः पारण-शब्दबलात् प्रतिनिधिबलाच्च पारणस्याङ्गत्वं द्रष्टव्यम् । इत्यादि ।

रघुनन्दनोऽपि तथैव विचारयन् तिथितत्त्वे (पृ-52) कथयति यथा— किञ्च, यदि पारणमङ्गं न स्यात् तदा प्रतिनिधिविधानं नोपपद्यते । इत्यादि ।

489- विषयेऽस्मिन् कालनिर्णयकार-जीमूतवाहनस्य मतं तिथितत्त्वे (पृ-52) रघुनन्दनेन उद्धृतं यथा—जीमूतवाहनस्तु नहि तिथिभान्ते च पारणमिति पारणकर्त्तव्यतापरं येन तदन्त एव विधिः । किन्तु, तिथिनक्षत्रे-तरकाले पारणं कुर्यादिति वा विधिः । इति ।

490- विधिस्त्रिविधः, अपूर्वविधिः, नियमविधिः परिसङ्ख्याविधिश्चेति । तत्र कस्यचन विधानस्य उभयत्र समुच्चित्यप्राप्तौ इतरनिवृत्तिपरकः विधिः परिसङ्ख्या कथ्यते । परिसङ्ख्योदाहरणं यथा चयनप्रकरणे—'इमामगृभ्णन् रशनामृतस्य इत्यश्वाभिधानीमादत्ते' । इति ।

भुञ्जीते'[491] अत्र यथा मुक्त्यन्यग्रासकाले भोजनं नेति हि तस्यार्थः । अन्यथा व्रतानन्तरमहानिशोत्तरनाडीचतुष्टये तिथ्यक्षान्ते नियमतः पारणे तच्चतुष्टयस्य

त्रियामां रजनीं प्राहुस्त्यक्त्वाद्यन्तचतुष्टयम् ।[492]

इति वचनात् परदिनादित्वेन परदिने सन्ध्यादिनित्यकर्मलोपापत्तिः । अर्च्चयित्वेति क्त्वा-प्रत्ययेन वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेत्यादौ वाजपेयव्यवहितोत्तरकालवदुपवासार्च्चनाव्यवहितदिनस्यैव भोजनाङ्गत्वविधानाच्च । वस्तुतस्तु,

तदङ्गस्याक्रियायां तु नावृत्तिर्न च तत्क्रिया ।

इति वचनादङ्गस्यापि पारणस्य मोहादिना त्वकरणे न व्रतलोपः, किन्तु तद्वैगुण्यहानाय विष्णुस्मरणमाह योगी याज्ञवल्क्यः—

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

अतएव सर्वशक्त्यधिकरणे[493] यत्किञ्चिदङ्गाकरणे[0]ऽपि नित्ये प्रधानापूर्वसिद्धि-

---

सेयं परिसङ्ख्या दोषत्रयदुष्टा । ते च दोषाः—स्वार्थत्यागः, परार्थस्वीकारः, प्राप्तबाधश्चेति । तदुक्तं यथा—

श्रुतार्थस्य परित्यागादश्रुतार्थस्य कल्पनात् ।
प्राप्तस्य बाधादित्येवं परिसङ्ख्या त्रिदूषणा ॥ इति ।

अत्र 'अश्वाभिधानीमादत्ते' इति वाक्यस्य 'इमामगृभ्णन्' इत्यनेन मन्त्रेण अश्वरशनाऽऽदानं कुर्यादिति श्रुतः स्वार्थः, तस्य स्वार्थस्य परित्यागः । गर्दभरशनातो मन्त्रनिवृत्तिरश्रुतः परार्थः, तस्य परार्थस्य स्वीकारः । तथा च गर्दभरशनायामपि लिङ्गात् प्राप्तस्य मन्त्रस्यानेन बाध इति ।

491- मुक्ते सर्शिनि भुञ्जीत यदि न स्यान्महानिशा ।
इति तिथितत्त्वे (पृ-53) धृतपाठः ।

492- तिथितत्त्वे (पृ-53) सम्पूर्णं ब्रह्मवैवर्त्तवचनं यथा—

त्रियामां रजनीं प्राहुस्त्यक्त्वाद्यन्तचतुष्टयम् ।
नाडीनां तदुभे सन्ध्ये दिवसाद्यन्तसंज्ञिते ॥ इति ।

493- नित्ये यथाशक्त्यङ्गानुष्ठातुरप्यधिकाराधिकरणमत्र सर्वशक्त्यधि-

---

0- अङ्गासिद्धावपि-इति ग-पुस्तके पाठः ।

करणम् । विषयोऽयं जैमिनिना मीमांसादर्शने (6/3/1) सूत्रितो यथा—
सर्वशक्तौ प्रवृत्तिः स्यात्तथाभूतोपदेशात् ॥ 1 ॥ अपि वाऽप्येकदेशे स्यात्प्रधाने ह्यर्थनिवृत्तिर्गुणमात्रमितरत्तदर्थत्वात् ॥ 2 ॥ तदकर्मणि च दोषस्तस्मात्ततो विशेषः स्यात्प्रधानेनाभिसंबन्धात् ॥ 3 ॥ कर्मभेदं तु जैमिनिः प्रयोगवचनैकत्वात् सर्वेषामुपदेशः स्यादिति ॥ 4 ॥ अर्थस्य व्यपवर्गित्वादेकस्यापि प्रयोगे स्याद्यथा क्रत्वन्तरेषु ॥ 5 ॥ विध्यपराधे च दर्शनात् समाप्तेः ॥ 6 ॥ प्रायश्चित्तविधानाच्च ॥ 7 ॥ इति ।

भाष्यकारेण शबरस्वामिना स्फुटीकृतमेतत् सर्वं यथा—

बह्वृचब्राह्मणे श्रूयते, यावज्जीवमग्निहोत्रं जुहोति, यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति । नित्यमग्निहोत्रं नित्यौ च दर्शपूर्णमासौ । तत्र यत्तत्कामश्रवणादन्यकामश्रवणं द्वितीयं, तत्र सन्देह किं यः कात्स्न्येंन विधिमुपसंहर्तुं शक्नोति तस्यैवाधिकार उत विगुणमपि तत्प्रयोक्तव्यमिति । एकादशे कामसंयुक्ते प्रथमे श्रवणे चिन्तयिष्यते, साङ्गे । इह नित्ये श्रवणे द्वितीय इति । किं प्राप्तम् । सर्वशक्तौ प्रवृत्तिः स्यात्तथाभूतोपदेशात् । यः कात्स्न्येंन विधिमुपसंहर्तुं शक्नोति, स एवानुतिष्ठेत् । तथाभूतोपदेशात् । यथाभूतं हि तत्कामसंयुक्तं श्रुतं, तथाभूतमेव नित्यमप्युपदिश्यते । तस्मात् सर्वाङ्गोपहारेण प्रयोगः कर्त्तव्यः । दर्शपूर्णमासशब्दश्च साङ्गस्यैव वाचकः । कथम् । पौर्णमास्याममावास्यायां च साङ्गं विधीयते । यच्च पौर्णमास्यां विहितं सा च पौर्णमासी । यदमावास्यायां विहितं सा चामावास्येति । साङ्गममावास्यायां विहितं पौर्णमास्यां च । तस्मात् साङ्गं दर्शपूर्णमासशब्देनोच्यत इति ॥ 1 ॥ अपि वेति पक्षव्यावृत्तिः । अप्येकदेशेऽङ्गानां स्यादेव प्रयोगः । यतः साङ्गस्याप्यनङ्गस्यापि प्रयुज्यमानस्य प्रधानादेवायमर्थो निष्पद्यते । गुणमात्रं सर्वाङ्गप्रयोगेण भवति । को गुणः । साङ्गात्स्वर्गाभिनिर्वृत्तिः, प्रधानमात्रादिदमन्यत्फलम् । तस्मात् स्वर्गप्राप्त्यर्थं सम्पूर्णाङ्गं करिष्यामीत्यारब्धम् । यदि कानिचिदङ्गानि न शक्नोति कर्त्तुं, तथाप्यस्मादेकदेशाङ्गगुणयुक्तात् प्रधानात्फलं भविष्यति । तस्मात्प्रधानमात्रस्य प्रयोगमाह नाङ्गानाम् । दर्शपूर्णमासशब्दकोऽग्निहोत्रशब्दकश्च प्रधानपदार्थोऽन्यान्यङ्गानि तदर्थानीति ॥ 2 ॥ प्रधानातिक्रमे दोषः । प्रधानातिक्रमे दोषं ब्रुवँस्तस्य नित्यतां दर्शयति ॥ 3 ॥ सर्वेषामुपदेशकः, पौर्णमास्यां पौर्णमास्या यजेत, अमावास्यायाममावास्यया यजेतेति ॥ 4 ॥ एकाङ्गप्रयोगेऽपि

रित्युक्तम् । प्रधानैकतराभावे प्रधानान्तरसिद्धिस्तु न विरुद्धा । एवम्

सायमाद्यन्तयोरह्नोः सायं प्रातश्च मध्यमे ।
उपवासफलप्रेप्सुर्जह्याद्भक्तचतुष्टयम् ॥

स्याद्विगुणादपि फलमित्यर्थः । कुतः । अर्थस्य व्यपवर्गित्वात् । व्यपवृक्तमङ्गेभ्यः प्रधानम् । अग्निहोत्रसंज्ञकाद्दर्शपूर्णमाससंज्ञकाच्च फलमिह भवति । तद्धि कर्त्तव्यतयोपदिश्यते । यत्पौर्णमास्यामुपदिष्टं सा पौर्णमासी, यदमावास्यायां साऽमावास्या । यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवतीति । तस्मादग्नये पुरोडाशोऽग्नीषोमाभ्यां च, आज्यं चाग्नीषोमादिभ्यः पौर्णमास्याम् । आग्नेयसांनाय्यादीनाममावास्यायाम् । यदुक्तं पौर्णमास्यां पौर्णमास्या यजेत, अमावास्यायाममावास्यया यजेतेति, साङ्गस्य विधानात् साङ्गं दर्शपूर्णमासशब्देनाभिधीयत इति । नैतदेवम् । सिद्धे हि दर्शार्थे पूर्णमासार्थे च साङ्गं फलं विधीयते । तस्मान्न साङ्गमग्निहोत्रपदवाच्यं दर्शपूर्णमासपदवाच्यम् । यच्चाग्निहोत्रं तदिह चोद्यते कर्त्तव्यतया, यौ च दर्शपूर्णमासौ । तस्माद्विगुणमपि कर्त्तव्यमेवाग्निहोत्रं दर्शपूर्णमासौ च । यथा क्रत्वन्तरेषु-प्रकृतिविकृतिषु परस्य धर्माः परस्य न भवन्ति, एवं न कामसंयुक्तस्य धर्मा नित्यस्य भवितुमर्हन्ति ॥ 5 ॥ विध्यपराधेषु च समाप्तिं दर्शयति । तदेव यादृक् होतव्यमिति विगुणस्य समाप्तिं दर्शयति ॥ 6 ॥ विध्यपराधे च प्रायश्चित्तानि विधीयन्ते, निमित्ते कर्माङ्गभूतानि । यथा—भिन्ने जुहोतीति । विगुणे निष्फले सति कस्याङ्गभूतैः प्रयोजनं स्यात् । तस्माद्विगुणानामपि प्रयोगः कर्त्तव्य इति ॥ 7 ॥

जैमिनीयन्यायमालाविस्तरे माधवाचार्येणाप्युक्तमेतद्यथा—

नित्ये सर्वाङ्गसंहारः शक्त्या वाऽऽद्यः फलित्वतः ।
शक्त्या त्यागासम्भवेन निमित्ते जीवने स्थिते ॥

यावज्जीवमग्निहोत्रं जुहोतीत्यादौ नित्ये कर्मणि सर्वाण्यङ्गान्युपसंहृत्य तद्विशिष्ट एव प्रयोगः कर्त्तव्यः । कुतः । भावनांशस्य कथम्भावस्य समुचितैः सर्वैरङ्गैः परिपूरणेन सर्वाङ्गोपेतस्यैव प्रधानस्य फलवत्त्वादिति चेत् । मैवम् । अग्निहोत्रदर्शपूर्णमासादिशब्दवाच्यं प्रधानम् । तस्य च स्ववाक्यगतजीवननिमित्तेनान्वयात् सति जीवने प्रधानं कर्म त्यक्तुमशक्यम् । ततो वाक्यान्तरात्तेष्वङ्गेष्वशक्यं किञ्चिदङ्गं परित्यज्यापि शक्यैरङ्गैरुपेतं प्रधानं कर्मानुष्ठेयम् । इति ।

इति अङ्गिरःसिद्धोपवासस्य प्राक्परैकभोजनरूपाङ्गाभावेऽपि उपवासः सफलः स्यात् । यद्वा सति सम्भवे परदिने पारणम् । असम्भवश्च महानिशावशान्महानिशोत्तरनाडीनां तत्परदिनार्द्धत्वेन तद्दिनकर्मलोपभयाद् बन्धरोगादिवशाच्चेत्यादि । द्वादशीरामनवम्यादिपारणं तु प्रतिनिधिश्रवणात् अकरणे व्रतभङ्गकमिति विशेषः ।

इदञ्च पारणम्

उपवासेषु सर्वेषु पूर्वाह्णे पारणं भवेत् ।

इति देवलोक्त्या[494] सामान्यतः प्राप्तमपोद्यते । वैवर्त्ते[495]—

अष्टम्यामथ रोहिण्यां न कुर्यात्पारणं क्वचित् ।
तिथिरष्टगुणं हन्ति नक्षत्रञ्च चतुर्गुणम् ।
तस्मात्प्रयत्नतः कुर्यात्तिथिभान्ते च पारणम् ॥ इति ।

तदशक्तावेकतरान्ते[0]ऽप्याह नारदीये[496]—

तिथ्यृक्षयोर्द्वयोर्योग उपवासो यदा भवेत् ।
पारणं तु न कर्त्तव्यं यावन्नैकस्य संक्षयः ॥

किञ्च, तिथ्यृक्षयोर्यदा च्छेदो नक्षत्रान्तमथापि वा ।
अर्द्धरात्रेऽपि वा कुर्यात्पारणं तु परेऽहनि ॥

तेन सर्वेष्वेवोपवासेषु दिवा पारणमिष्यते ।
अन्यतिथ्यागमो रात्रौ तामसस्तैजसो दिवा ॥

इत्यादि वैवर्त्तगारुडोक्तो[497] निशाकृतनिषेधोऽत्राकिञ्चित्करः । अतो

494- अन्यथा तु फलस्यार्द्धं धर्ममेवोपसर्पति ।
इति तिथितत्त्वे (पृ-52) उत्तरार्द्धपाठः ।

495- हन्यात् पुराकृतं कर्म उपवासार्जितं फलम् ।
इति कालमाधवे (पृ-183) प्रथमवचनस्य उत्तरार्द्धपाठः ।

496- तिथिनक्षत्रसंयोगे इति कालमाधवे (पृ-184) धृतपाठः ।

497- कालमाधवे (पृ-184) वैवर्त्तवचनेन सह स्मृत्यन्तरवचनं यथा—

0- एकतरान्ते-इति पदं ख-ग-पुस्तकद्वये नास्ति ।

महानिशादावपि तन्न विरुद्धमिति माधवादयः[498] । अन्ये तु

न रात्रौ पारणं कुर्यादृते वै रोहिणीव्रतात् ।
तत्र निश्यपि कुर्वीत वर्जयित्वा महानिशाम् ॥

इति ब्रह्माण्डान्महानिशां निषेधन्ति । वस्तुतो महानिशायामप्यशितानशितं जलपारणमुचितम् । महानिशा तु रात्रौ सार्द्धयामोत्तरं यामद्वयम् ।

महानिशा तु विज्ञेया मध्यमं प्रहरद्वयम् ।[499]

इति वा मतान्तरम् । अत्यन्ताशक्तौ तूपवासान्ते[0] पारणम् ,

तिथ्यन्ते चोत्सवान्ते वा व्रती कुर्यात्तु पारणम् ।

इति वचनात् । प्रातः पूजानन्तरं पारणमित्यर्थः । तदुक्तम्—

तिथ्यृक्षयोर्द्वयोरन्त उत्तमं पारणं भवेत् ।
एकस्यान्ते मध्यमं स्यादुत्सवान्तेऽधमं स्मृतम् ॥[500]

'सर्वेष्वेवोपवासेषु दिवा पारणमिष्यते ।
अन्यथा पुण्यहानिः स्यादृते धारण-पारणम् ॥' इति ।
'अन्यतिथ्यागमो रात्रौ तामसस्तैजसो दिवा ।
तामसे पारणं कुर्वंस्तामसीं गतिमश्नुते ॥' इति ।

498- विषयेऽस्मिन् माधवाचार्यस्य विचारः कालमाधवे जयन्तीपारणनिर्णये (पृ-185) यथा—दिवसे यद्युभयान्तस्तदा पारणम् इति मुख्यः कल्पः । नक्षत्रान्तमित्यनेनैकतरान्तत्वं विवक्षितम् । सोऽयमनुकल्पः । यदि रात्रौ निशीथे उभयान्त एकतरान्तो वा भवति, तदा दिवसे मुख्यानुकल्पयोरुभयोरप्यसम्भवाद्रात्रौ च पारणस्य निषिद्धत्वादर्थादुपवासप्राप्तौ पारणस्य प्रतिप्रसवः क्रियते, 'अर्द्धरात्रेऽपि वा कुर्यात्' इति । इति ।

499- मन्वर्थमुक्तावल्यां (मनु०-4/129) देवलोक्तमहानिशा यथा—

महानिशाऽत्र विज्ञेया मध्यस्थं प्रहरद्वयम् ।
तस्मिन् स्नानं न कुर्वीत काम्यनैमित्तिकादृते ॥ इति ।

500- कालमाधवकारिकावचनमिदम् । पूजोपवासजागरणरूप उत्सवः । तदन्ते तत्समाप्तौ परदिने प्रातःकाले इत्यर्थः ।

0- तूत्सवान्ते-इति ण-पुस्तके पाठः ।

सभर्तृकस्त्रीणामशक्तौ ब्राह्मम्[501]—

ततः प्रविश्य च गृहं यवान्नं भुञ्जते च ताः
युक्तमिक्षुविकारैश्च मध्वाज्यमरिचैः सह ॥

स्त्रीणां भर्तृसुतपित्राद्यनुज्ञया[0] व्रतमाह मार्कण्डेयः[502]—

नारी खल्वननुज्ञाता भर्त्रा पित्रा सुतेन वा ।
निष्फलं तु भवेत्तस्याद्यत्करोति व्रतादिकम् ॥

इति । आदिना प्रतिष्ठोपवासादिसङ्ग्रहः ।

अथ वैष्णवजन्माष्टम्यां भेदः ।

इयमष्टमी त्रिविधा, शुद्धा सप्तमीविद्धा नवमीविद्धा चेति । यद्यपि षट्त्रिमुहूर्त्तादिनानावेधः प्राज्ञैरुक्तस्तथाप्यत्र कलाकाष्ठादिसाहित्यमात्रेणापि विद्धत्वव्यवहारः ।

लववेधेऽपि विप्रेन्द्र सप्तम्यां चाष्टमीं त्यजेत् ।
सुराया विन्दुना स्पृष्टं गङ्गाम्भ इव निर्मलम् ॥
विना ऋक्षेण कर्त्तव्या नवमी संयुताष्टमी ।
पूर्वमिश्रा तथा त्याज्या प्राजापत्यर्क्षसंयुता ॥
सा सर्क्षाऽपि न कर्त्तव्या सप्तमीसंयुताऽष्टमी ।

इति स्कान्दवैवर्त्तादिषु लववेधमिश्रयुतादिपदैस्तदाविष्कारात् । सर्क्षाऽपीत्यपि मानृक्षात्यागः कैमुतिकन्यायसिद्धः । ननु यद्वर्षे किञ्चित्सप्तम्यनन्तरमष्टमी क्षीणा, पूर्वस्य सप्तमीवेधादुत्तरत्र चाष्टम्यभावाद्व्रतलोपापत्तिः, न चागत्या शुद्धनवम्यां तद्व्रतं स्यादिति वाच्यम् । तदपेक्षया तद्वर्षे व्रतलोपस्य रामनवम्यादाविव विद्धायामुपवासस्य वा वरत्वादिति चेन्न ।

जन्माष्टमीं पूर्वविद्धां सऋक्षां सकलामपि ।
विहाय नवमीं शुद्धामुपोष्य व्रतमाचरेत् ॥

501- तिथितत्त्वे (पृ-54) । 502- कालमाधवे (पृ-209) ।

0- भर्तृमित्राद्यनुज्ञया—इति ग-पुस्तके पाठः ।

इत्यादिना शुद्धनवम्यामप्येकादशीवत् कार्यत्वात् , नित्यत्वेन तल्लोपायोगाच्च । यत्तु साधनदीपिकायां नित्यविषये वैष्णवैः सप्तमीविद्धा हेया काम्ये तु नेति तन्मन्दम् , विद्धनिषेधवचनस्य सकामाकामपरत्वादसङ्कोचात् । वैष्णवानां नित्यजयन्तीसम्भवे धनारोग्यादिफलकतत्करणायोगाच्च असमाचाराच्च । अन्यथा रामनवम्यादावप्येवं स्यात् ।

अथ नवमीविद्धा ।

अयमपि वेधः प्राग्वत् साहित्यमात्रेण 'सोपोष्या नवमीयुते'त्यादिवक्ष्यमाणवचनैस्तद्ध्रौव्यात् । यथा सप्तमीविद्धोत्तरा नवमीविद्धा शुद्धनवमी वा व्रतार्हेति निरूपितं तथा शुद्धाधिकामपि पूर्वां सर्क्षामनृक्षां वा हित्वा परदिने सर्क्षेऽनृक्षे वा व्रतम् ।

इन्दुः पूर्वेऽहनि ऋ वा परे चेद्रोहिणीयुता ।
केवला चाष्टमीवृद्धा सोपोष्या नवमीयुता ॥[503]
किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदा ॥[504]

इति शुद्धाधिकाप्रकरणे हरिभक्तिविलासे लिखनात् । च-कारो वाऽर्थकः । रोहिणीयुता अनृक्षा वा वर्द्धमाना परैवोपोष्येति तदर्थः । स्मार्त्तमते रोहिणीयोगवन्नवमीयोगस्यैतन्मते प्राधान्यात् । न च

शुद्धा तु रोहिणीयुक्ता पूर्वेऽहनि परत्र च ।
अष्टम्युपोष्या पूर्वैव तिथिभान्ते च पारणम् ॥[505]

इति वचनविरोध इति वाच्यम् , अपूर्वेत्यकारप्रश्लेषात् । अन्यथा इन्दुः पूर्वेऽहनीति विरोधापत्तिः । न च विकल्पः, तस्याष्टदोषत्वात् । पाद्मेऽपि—

मुहूर्त्तेनापि संयुक्ता सम्पूर्णा याऽष्टमी भवेत् ।
किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदा ॥

503- हरिभक्तिविलासे (5/354) भविष्यपुराणवचनम् ।
504- हरिभक्तिविलासे (15/351) पद्मपुराणवचनं यथा—
किं पुनर्बुधवारेण सोमेनापि विशेषतः ।
किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदा ॥ इति ।
505- हरिभक्तिविलासे (15/374) स्कन्दपुराणवचनम् ।

इति मुहूर्त्तेनापि या नवमीयुताष्टमी सा सम्पूर्णा पूर्णाऽष्टमीवद्ग्राह्या । मुहूर्त्तादधिकनवमीयुताष्टमी मुक्तिदेति किं ब्रूमः, अपितु कैमुतिकन्याय-सिद्धमिति भावः । अतएव हरिभक्तिविलासटीकायां[506] केचिद्वैष्णवाः मध्यदेशीयाः पूर्णाष्टमीं पूर्वां हित्वा स्वल्पामपि नवमीयुताष्टमीमुपवसन्तीत्यत्र समाचार एव मूलमित्युक्तम् । अस्तु वा समाचारः । तथाप्युत्तरदिने व्रतं निर्बाधम् । न चेन्दुः पूर्वेऽहनीति सप्तमीविद्धानिषेधानुवादकम् । वृद्धेत्य-सङ्गतेः । आकारे इत्यशुद्धैव लिखितेत्युपसंहाराच्च ।

अष्टमी नवमीविद्धा उमामाहेश्वरी तिथिः ।
सैवोपोष्या सदा पुण्याकाङ्क्षिभीरोहिणीं विना ॥[507]

इति गौतमीयतन्त्राच्च । न चेदमपि सप्तमीविद्धाविषयकम्, मानाभावात् ।

परविद्धा सदा कार्या पूर्वविद्धां तु वर्जयेत् ।[508]

इति वाक्यशेषेण पूर्वविद्धात्यागसिद्धेश्च । यदा त्वष्टमी किञ्चित् सती नवमी च क्षीणा तदाऽपि क्षीणदिने व्रतम्, पूर्वस्यायोग्यत्वात् । पारणादिकं शेषं स्मार्त्तवत् । परन्त्वेषामुत्सवान्तपारणं वृद्धाचारः[0] । तदेवं सनकसम्प्रदाय-वैष्णवजयन्ती निर्णीता । लक्ष्मीनारायणसम्प्रदाये[00] तु कर्कटभाद्रे[000] जयन्तीपाते सिंहमासीयाष्टम्यां तदाचारः । एवं मीनचैत्रे[0000] रामनवमीं-हित्वा मेषमासनवम्यां तत्क्रिया । तथा च पञ्चरात्रे—

506- हरिभक्तिविलास (15/373) टीकाकारः सनातनगोस्वामी विषयेऽस्मिन् प्रतिपादयति यथा—इयं प्रामाणिकैः कृष्णदेवाचार्यादिवैष्णवैः व्यवस्थाऽन्या च निर्णीता लिखिताऽऽचारतः सताम् ।....जन्माष्टमीव्रतविषया प्रामाणिकैः सर्वलोकादरणीयैराप्ततमैरित्यर्थः ।....किन्तु मया सतामाचारतः.... निर्णीतेत्यन्वयः । यद्वा न केवलं तत्तत्पद्धतिग्रन्थदृष्ट्या लिखिता, किन्तु सतामाचारतश्चेति, मध्यदेशीयानां वैष्णवानां विद्धावर्जननियमेन प्रायः परदिने व्रताचरणात् । इत्यादि ।

507, 508- गौतमीयतन्त्रे आराधनविधिप्रसङ्गे—31/85-86 ।

0- 'प्रायःसामाचारिकम्' इति ग-पुस्तके पाठः ।

00- श्रीसम्प्रदाये इति ख-ग-पुस्तकद्वये पाठः ।

000- कर्कटमासे इति ग-पुस्तके पाठः ।

0000- चैत्र-पदं ख-ग-पुस्तकद्वये नास्ति ।

मेषे सिंहे च सङ्क्रान्तौ नवमीसंयुताऽष्टमी ।
कर्त्तव्या वैष्णवैः सर्वैर्न तु कर्कटमीनयोः ॥

नवमीसंयुताऽष्टमी रामनवमी जन्माष्टमी वेत्यर्थः । तदेतन् रामार्च्चनचन्द्रिकाहरिभक्तिविलासाद्यलिखनादप्रमाणम् । प्रामाण्ये वा देशान्तरीयगृहत्यागिश्रीवैष्णवैरिदं पालनीयम् , तथा

अष्टम्यां वा नवम्यां वा दशम्यां वाऽपि रोहिणी ।
अग्निविद्धा न कर्त्तव्या सप्तमी संयुताऽष्टमी ॥

इति पाद्मात् सप्तमीविद्धावत् कृत्तिकाविद्धाऽप्येतत्सम्प्रदाये त्यज्यते । अग्निविद्धा कृत्तिकायुता उदये । गोविन्दराजस्तु वृद्धिवशाद्दशम्युदयेऽपि कृत्तिकासत्त्वे एकादश्यां जयन्तीत्युक्तवान् । तथा चाग्निसप्तमीयुताष्टम्यादितिथिं हित्वा तदन्याव्यवहितोत्तरदिनर्क्षे जयन्ती कार्येत्येतावान् विधिः । अष्टमीनवमीदशमीत्रयं रोहिणी च ईषदर्थे क्रियायोग इत्यादिवदवयुत्यानुवादः । उपवासतन्त्रं शुद्धिसर्वस्वे वक्ष्यामः । इति संक्षेपः ।

जन्माष्टम्यतिकष्टा स्मार्त्तश्रीसनकसम्प्रदायानाम् । मतिभेदाद्द्विविधा एनां बुधा धियाऽवधतां साधु (?) उक्तञ्च वेत्ति जयन्ती ऋत्तीरष्टास् कुण्डमेव चक्रान्नम्. यः साकल्यात् सबुधो निखिलस्मृत्यागमे निपुणः (?) । कृष्णजन्म तु स्मार्त्तवैष्णवयोः स्मार्त्तयोग्यदिन एव , कृष्णस्यावैष्णवत्वात् अतएव पुरुषोत्तमक्षेत्रे[509] स्मार्त्तजयन्तीदिने हरिजन्माचारः । न च

अविद्धायां सऋक्षायां जातो देवकीनन्दनः ।[510]

इति वाक्यात् संगतिः । अविद्धायां व्रतक्रियोपरतौ उत्सवकरणे मानाभावात् ।

509- उत्कलदेशे श्रीपुरुषोत्तमक्षेत्रे जन्माष्टमी-जयन्त्योर्वैक्यमिति परम्परा । 'यथा वारयोगेन व्यवस्था न क्रियते तथा उत्कलदेशे साम्प्रतिकस्मार्त्तपरम्परायां रोहिणीयोगेनापि स्वतन्त्रा व्यवस्था नाचर्यते । केवलमष्टम्या निशीथयोगेन ग्राह्यतिथिर्निरूप्यते । श्रीजगन्नाथमन्दिरेऽपि तथैव समाचारः ।' इति कालदीपतेजनीकाराः (पृ-49)अस्मद् गुरुचरणाः अत्र प्रमाणम् ।

510- अविद्धायान्तु सर्क्षायामिति तिथितत्त्वे (पृ-49) ब्रह्मवैवर्त्तवचनपाठः ।

एवं रामनवमीनृसिंहजन्मादौ वैष्णवाचारो दुस्त्यज इति चेत्तूष्णीं भवामः[0] ।

दूर्वाष्टमी

इदं व्रतं नित्यं काम्यञ्च ।

प्राप्ते भाद्रपदे मासि शुक्लाष्टम्याञ्च भारत ।
या न पूजयते दूर्वां मोहादिह यथाविधि ॥
त्रीणि जन्मानि वैधव्यं लभते नात्र संशयः ।।
तस्मात् संपूजनीया सा प्रतिवर्षं वधूजनैः ।
सुखसन्तान[511]जननी भ्रातृसौख्यप्रदा च सा ।।

इति वचनात् । अत्र वधूजनैः, वैधव्यमिति स्त्र्यधिकारः ।

ब्रह्मन् ! भाद्रपदस्यैव शुक्लाष्टम्याञ्च भारत ।
दूर्वाष्टमीव्रतं पुण्यं यः करोतीह मानवः ॥
न तस्य क्षयमाप्नोति सन्तानं साप्तपौरुषम् ।।

इत्यादिभविष्यात् पुमधिकारिकञ्च ।

ब्रह्मन् ! भाद्रपदे मासि शुक्लाष्टम्यामुपोषितः ।
महेशं पूजयेद्यस्तु दूर्वया सहितं नरः ।।[512]

इत्यादि भविष्यात् दूर्वाभिर्महेशपूजा विज्ञेया । तिथिद्वैधे पूर्वा ।

श्रावणी दुर्गनवमी तथा दूर्वाष्टमी च या ।
पूर्वविद्धैव कर्त्तव्या शिवरात्रिर्बलेर्दिनम् ॥
अन्या दूर्वाष्टमी कृष्णा सावित्री वटपैतृकी ।
अनङ्गत्रयोदशी रम्भा कर्त्तव्या सम्मुखी तिथिः ।।

इति ब्राह्मात् ।

आधुनिकवैष्णवाः भाद्रशुक्लाष्टम्यां राधाजन्मव्रतमाचरन्ति । एवं

511- सुखसन्तानं सुखपरम्परा ।

512- 'सहितं मुने' इति कालमाधवे (पृ-159) धृतपाठः ।

0- इति संक्षेपः....भवामः । इति भागः ख-ग-पुस्तकद्वये नास्ति ।

रामोपासका वैशाखशुक्लाष्टम्यां⁰सीताजन्मव्रतमपि । तत्र तत्पूजापूर्वकं फलमूलाद्यशनम् । अनयोः सप्तमीविद्धायामष्टमीक्षयं विनाऽऽचारनिषेधः । वचनाभावात् जन्माष्टम्यतिदेशावलम्बनभ्रौव्येऽष्टमीक्षये शुद्धनवम्यामेव राधाजन्मेति बहवः । यद्यपीदं हरिभक्तिविलासे नास्ति तथापि साधनदीपिकायां सत्त्वात् किञ्चिदुच्यते । भविष्योत्तरे—

भद्रे भाद्रपदे मासि शुक्लाष्टम्यां युधिष्ठिर ।
प्रातः स्नानं महानद्यां कृत्वा सङ्गृह्य बालुकाम् ।
सोपवासः प्रयत्नेन तत्र देवीं प्रपूजयेत् ॥

देवीं व्रजदेवीम् । कालादर्शे—

भाद्रेऽकृष्णाष्टमी ज्येष्ठानक्षत्रेण समन्विता ।
महती कीर्त्तिता तस्यां ज्येष्ठां देवीं प्रपूजयेत् ॥

ज्येष्ठर्क्षयोगात् ज्येष्ठेति राधानाम । यथा गोपालोपनिषदि—

तासां हि मध्यमे गान्धर्वी ज्येष्ठा श्रेष्ठा चेति ।
'मध्याह्ने जन्म सम्भाव्य महास्नानञ्च कारयेत् ।
चन्दनागुरुकर्पूरमुशीरं कुङ्कुमं तथा ।
गोरोचना जटामांसी राधागन्धाष्टकं विदुः ॥
जीवनं धान्यकञ्चैव कुसुम्भं कुङ्कुमं तथा ।
निष्पावाः पावनतिला लवणं शर्करायुतम् ॥

निष्पावाः काष्ठशिम्बफलानि । पावनतिला भर्जनतिलाः । ततः स्नपयित्वा पूजयेत् । भविष्योत्तरे—

पादयोश्चपलायै नमः । जानुनि चञ्चलायै नमः । कट्यां कमलवासिन्यै नमः । नाभौ रक्षायै नमः । स्तनयोर्मन्मथवासिन्यै नमः । भुजद्वये ललितायै, कण्ठे उत्कण्ठायै, मुखे माधव्यै, शिरसि श्रियै नमः । इति सम्पूज्य नैवेद्यं दद्यात् ।

0- कृष्णाष्टम्याम् इति ग-पुस्तके पाठः ।

भाद्रशुक्लाष्टम्यां दुर्गाशयनम्

कालिकापुराणे—

सर्वदेवोत्थिता तिष्ठेद् दुर्गा लोकहिताय वै ।
स्वपेद्भाद्रसिताष्टम्यां पञ्चत्रिदिवसात्परम् ॥
उत्तिष्ठत्यर्च्चिता देवी षोडशेऽह्नि न रात्रितः ॥
दिवा स्वापे भवेद्रोगो निश्युत्थाने जनक्षयः ।
न वर्द्धयेत् स्वापदिनं तिथिवृद्धौ कदाचन ॥

अत्र विहितस्वापस्य भवेद्रोग इति दिवा स्वापनिषेधलिङ्गेन वाऽऽपस्त्यनुमानेन वा रात्रेः शयनकालत्वलाभः । अतएव 'अथ भाद्रसिताष्टमीनिशायां शयनारम्भमहोत्सवो भवान्याः' इति[513] वर्द्धनेनाप्युक्तम् । तेन

प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा ।[514]

इति वचनात् शिवरात्रिकौमुदीपूर्णिमादाविव प्रदोषव्यापिनी तिथिर्ग्राह्या ।

प्रदोषस्त्रिमुहूर्त्तः स्याद्भानावस्तं गते सति ।

इति स्कान्दात् प्रदोषमानम् । दिनद्वये प्रदोषव्याप्तौ परा, सङ्कल्पास्तमयव्याप्तेः शुक्ले पराष्टमीग्रहात् च । उभयेद्युः प्रदोषाव्याप्तौ पूर्वा,

अहःसु तिथयः पुण्याः कर्मानुष्ठानतो दिवा ।
नक्तादिव्रतयोगेषु रात्रियोगो विशिष्यते ॥[515]

इति वचनाच्च । तिथिक्षये तु न चतुर्दशनियमः । क्षयोत्तरं पुनस्तन्मध्ये दिनान्तरवृद्धौ पञ्चदशानामपि क्वचित्सम्भवात् । पञ्चदशाधिक्याभाव एव तात्पर्यात् । रात्रितः रात्रिं विहायेति ल्यब्लोपे पञ्चमी । षोडशदिने दिवाभागे उत्थानम्, निश्युत्थाने जनक्षयादिति भावः । यद्दिने उत्थानं तद्दिन एव

513- वर्द्धनमहापात्रप्रणीता-दुर्गोत्सवचन्द्रिकायाम् (पृ-23) ।

514- कालमाधवे (पृ-107) सम्पूर्णं वत्सवचनं यथा—

प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा ।
एकादशीं विना सर्वा शुक्ले कृष्णे तथा स्मृता ॥ इति ।

515- कालमाधवे (पृ-174) जाबालि-वृद्धगौतमवचनम् ।

षोडशपूजायोग्यतिथिलाभे तत्पूजा कार्या । तदलाभे तथाचारात् सहस्रकुम्भ-स्नानमात्रं कृत्वोत्तरदिने तत्पूजेत्युन्नेयम् ।

आश्विनकृष्णाष्टम्यां दुर्गापूजा

य एवं यजनं कुर्याद्वर्षे वर्षे युधिष्ठिर ।
यो वै न पूजयेत् सम्यक् चण्डिकां भक्तवत्सलाम् ।
भस्मीकृत्यास्य पुण्यानि निर्दहत्यवमानिता ॥ (देवीपु०)
यदा दैववशादस्मिन् मासे पूजा न जायते ।
तदा तु कार्त्तिकाष्टम्यां कर्म चैतत् प्रकीर्त्तितम् ॥
कृष्णाष्टमीं समारभ्य यावच्छुक्लाष्टमी भवेत् ।
दिवसे दिवसे पूर्वप्रोक्तं कर्म प्रशस्यते ॥
आश्विने कार्त्तिके वाऽपि कृष्णाष्टम्यां समारभेत् ।
सर्वकामार्थसिद्ध्यर्थं कर्मेदं दुर्ल्लभं स्मृतम् ॥ (दुर्गाकल्प०)

इत्यादिवचनात् दुर्गापूजा नित्या काम्या च । तत्र

दिनैः षोडशभिर्नवभिरथ पञ्चभिस्त्रिभिर्द्वाभ्याम् ।
एकेन च यद्विहितं क्रमशः प्रस्तौमि तद्विधानमहम् ॥ (आगमसं०)

एवं शरत्कालीनदेवीपूजायां षट्पक्षसम्भवे कुलाचारात् तत्तत्पूजापक्षाश्रये फलतारतम्यम् । चान्द्रत्वात् क्वचित् षोडशन्यूनोऽप्याद्यः ।एवमन्यत्[0] । तत्र

सप्तम्यामुदिते[516] सूर्ये परतश्चाष्टमी यदि ।
तत्र दुर्गोत्सवं कुर्यान्न कुर्यादपरेऽहनि ॥
वृथा पशुघ्नतां याति नवमीवासरार्च्चिते ।
अष्टमीनिशि सन्तुष्टा पूजां गृह्णाति पार्वती ॥
अष्टमी नवमीविद्धा तत्र पूजां न कारयेत् ।
पूजयन् क्लेशभागी स्यात्तथा वज्रहतो गिरिः ॥

516- सप्तम्यामुदित इति कथनेन दुर्गोत्सवे उदयवेधो वारितः, परतश्चाष्टमी-त्यनेनास्तमयवेध आदृतः ।

0- ख-ग-पुस्तकद्वये नास्ति ।

इत्यादिवचनात् पूर्वविद्धा ग्राह्या । परतः सूर्यास्ते । अष्टमीसप्तमीयुक्ते दिवाभागे उत्पद्य निश्यपि यदि स्यादिति भावः । अष्टम्यां यदि च दिवाकरोऽस्तमेतीति वर्द्धनसामात् । अष्टमी नवमीविद्धेति वक्ष्यमाणस्वरसाच्च । एतेन केवलरात्रिगताष्टम्यां पूजा निवारिता । अष्टमीनिशीत्यपि तदनुवादकम् । सूर्यास्ते सप्तमीसत्त्वे निशायां प्राप्तत्वात्[0] । इयं पूजा षोडशदिनसाध्याऽप्येकैव,

शरत्काले महापूजा क्रियते या च वार्षिकी ।[517]

इति एकवचननिर्देशात् । तेनान्तराशौचेऽपि न पूजनायोग्यता । एवं नवपञ्चदिनादौ । नवपञ्चैकदिनपक्षेषु षोडशवत् पूर्वविद्धा ग्राह्या,

पञ्चमी सप्तमी चैव दशमी च त्रयोदशी ।
प्रतिपन्नवमी चैव कर्त्तव्या सम्मुखी तिथिः ॥

इति पैठीनसिवचनात्[00] । नवाहपक्षो यथा—

आश्विने मासि शुक्ले तु कर्त्तव्यं नवरात्रकम् ।
प्रतिपदादिक्रमेण यावच्च नवमी भवेत् ॥[518]

यावच्च नवमीत्यविधिना चान्द्रत्वात् कदाचिन्न्यूनाधिकत्वम् । एवं पञ्चदिनादौ । तुर्यपञ्चमयोस्तु ग्राह्यभेदः[000] ।

'वृती प्रपूजयेन्नित्यं सप्तम्यादिदिनत्रये ।
द्वाभ्यां चतुरहोभिर्वा ह्रासवृद्धिवशात्तिथेः ॥' (भविष्य०)
चेरुर्हविष्यं भुञ्जानाः कात्यायन्यर्च्चनव्रतम् ॥[519]

517- मार्कण्डेयपुराणवचनमेतत् तिथितत्त्वे (पृ-64) ।
518- भविष्योत्तरपुराणवचनमेतत् कालसारे दुर्गोत्सवप्रकरणे ।
519- श्रीमद्भागवते (10/22/1-2) सम्पूर्णवचनं यथा—

हेमन्ते प्रथमे मासि नन्दव्रजकुमारिकाः ।
चेरुर्हविष्यं भुञ्जानाः कात्यायन्यर्च्चनव्रतम् ॥
आप्लुत्याम्भसि कालिन्द्या जलान्ते चोदितेऽरुणे ।
कृत्वा प्रतिकृतिं देवीमानर्चुर्नृप सैकतीम् ॥ इति ।

0- 'परतः सूर्यास्ते ।.... प्राप्तत्वात् ।'-नास्ति ख-ग-पुस्तकद्वये ।
00- 'नवपञ्चैक....वचनात् ।'-नास्ति ख-ग-पुस्तकद्वये ।
000- ग्राह्यभेद-स्थाने विशेष इति ख ग-पुस्तकद्वये ।

इति भागवतादस्यं वृतत्वम् । अत्र तस्य कल्पे उदयावच्छिन्ना तिथिर्ग्राह्या,

युगाद्या वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया ।

रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता ॥[520]

इति वचनात् । दिनद्वये उदयावच्छिन्नतिथिलाभे पूर्वा, सङ्कल्पकालमारभ्यास्तमयव्याप्तित्वात् , उत्तरस्य तिथिमलत्वाच्च । उदयोऽत्र त्रिमुहूर्त्तः ।

न च पञ्चमी सप्तमीत्यनेन पूर्वविद्धा स्यादिति वाच्यम् । युगाद्या इति विशेषेग सामान्यस्य तस्य बाधात् । पार्वतीप्रियेत्यनेनास्यापि ग्रहात् । वस्तुतस्तु,

भगवत्याः प्रवेशादिविसर्गान्ताश्च याः क्रियाः ।

तिथावुदयगामिन्यां सर्वास्ताः कारयेद् बुधः ॥[521]

इत्यादौ याः क्रियाः इति बहुत्वेन नवपञ्चादिष्वप्युदय[0]विद्धा प्रतीयते । मूलसत्त्वे तूदयावच्छिन्नाऽपि तिथिर्ग्राह्या,

मूलाऽभावेऽपि सप्तम्यां केवलायां प्रवेशयेत् ।

तथा तिथ्यन्तरेष्वेवमृक्षेषु तु फलोच्चयः ॥ इति लैङ्गात्[522] ।

तिथिनक्षत्रयोर्योगे द्वयोरेवानुपालनम् ।

योगाभावे तिथिर्ग्राह्या देव्याः पूजनकर्मणि ॥

इति देवलस्मृतेश्च[523] । दिनद्वये मूलयोगे तु प्रागवत् पूर्वेत्यादि बोध्यम् । इदञ्च नित्यम् ,

प्रतिसंवत्सरं कुर्यात् स्थापनञ्च विसर्जनम् ।[524]

520- देवीपुराणवचनमिति तिथितत्त्वे (पृ-25) ।

521- नन्दिकेश्वरपुराणवचनमिति तिथितत्त्वे (पृ.पृ-86-87) ।

522, 523- तिथितत्त्वे (स्मृ० त०-I-पृ-74) ।

524- तिथितत्त्वे (पृ-89) सम्पूर्णं देवीपुराणवचनं यथा—

चरलग्ने चरांशे वा देव्या नियतमानसः ।

प्रतिसंवत्सरं कुर्यात् स्थापनञ्च विसर्जनम् ॥ इति ।

0- उदयविद्धा-स्थाने उत्तरविद्धा-इति ख-ग-पुस्तकद्वये ।

इति वचनात् । शस्त्रास्त्रवीणापुस्तकादीनामप्येतद्दिने पूजा , 'विद्याः समस्तास्तव देवि भेदाः' इति मार्कण्डेयपुराणे[525] तेषामपि तद्रूपत्वात् । अष्टम्यादिदिनद्वये तु

पूर्वाषाढायुताष्टम्यां पूजाहोमाद्युपोषणम् ।[526]

इत्यादिवचनात् तद्युतायां पूजा । दिनद्वये तद्योगे शुक्लाष्टमीत्वात् परेत्यादि प्राग्वत् । एवञ्च

आर्द्रायां बोधयेद्देवीं मूलेनैव प्रवेशयेत् ।
पूर्वोत्तराभ्यां सम्पूज्य श्रवणेन विसर्जयेत् ॥[527]

इत्यादीनि केवलनक्षत्रवाक्यानि तत्तत्सप्तम्याद्युपलक्षकाणि । तदृक्षाणां प्रायशस्तत्र पतनात् । न तु केवलर्क्षे पूजा । देशान्तरे तु जन्मर्क्ष इव ऋक्षाणां तिथिसमतामाश्रित्य केवलर्क्षेऽपि पूजाचारः । यत्तु

ऋक्षत्रयेऽपि मूलादौ सप्तम्यामाश्विने सिते ।
चण्डिकामुपहारैश्च पूजयेद्राष्ट्रसिद्धये ॥ (रुद्रयामल०)

इति तत्र केवलसप्तम्यां पूजा नित्या । ऋक्षयुक्ता नित्यकाम्या, राष्ट्रफलात् । केवलाष्टमी जयन्तीवत्[0] । यत्तु दिव्यसिंहेनोक्तम्[528]—'पञ्चमी सप्तमी

525- मार्कण्डेयपुराणे देवीमाहात्म्ये (सप्तशतीचण्डी-11/6) वचनं यथा—

विद्याः समस्तास्तव देवि भेदाः स्त्रियः समस्ताः सकला जगत्सु ।
त्वयैकया पूरितमम्बयैतत् का ते स्तुतिः स्तव्यपरा परोक्तिः ॥ इति ।

526- तिथितत्त्वे (पृ-92) । 527- तिथितत्त्वे (पृ-101) ।

528- विषयेऽस्मिन् कालदीपे (पृ.पृ-53-54) दिव्यसिंहेनोक्तं यथा—

नवरात्रिसम्बन्धि पूजादिकं कर्म ।........

पञ्चमी सप्तमी चैव दशमी च त्रयोदशी ।
प्रतिपन्नवमी चैव कर्त्तव्या सम्मुखी तिथिः ॥........

इति पूर्वविद्धा ग्राह्या । उपरितनेषु चतुर्ष्वपि पक्षेषु इयमेव व्यवस्था उन्नेया ।.... ऋक्षत्रयेऽपि मूलादौ....इति वचनात् राष्ट्रसिद्धिकामस्तु मूलादिनक्षत्रत्रये पूजां कुर्यात् । तदापि काम्ये कृते नित्यमनुष्ठितं स्यादिति न्यायात् नित्यपूजा-सिद्धिः । इति ।

0- वाक्यमिदं ख ग-पुस्तकद्वये नास्ति ।

चैव' इति पैठीनसिवचनात् पञ्चसु षोडशेतरपक्षेषु पूर्वविद्धाग्रहः । न च मूलर्क्षवशात्पूर्वां हित्वा परा स्यादिति वाच्यम् नक्षत्राणां गुणफलत्वेन प्रधानतिथावेव तन्निर्वाहात् । अन्यथा आर्द्रावशात् षोडशपक्षे परविद्धाष्टमीग्रहापत्तिः । न च पञ्चमी सप्तमी चैवेत्यनेन नवपञ्चत्र्येकदिनेषु पूर्वविद्धाग्रहेऽपि अष्टमीद्विदिनपक्षे कथं तद्ग्रह इति वाच्यम् । षोडशातिदेशेन द्विदिनपक्षेऽपि तथौचित्यात् ।

अष्टमी नवमीविद्धा तत्र दुर्गां न पूजयेत् ।

इति सामान्यतः पूर्वाष्टमीग्रहाच्च ।

ऋक्षत्रयेऽपि मूलादौ सप्तम्यामाश्विने सिते ।

इत्यादिना राष्ट्रसिद्धिकामेन तिथिं विना मूलादित्रयेऽपि पूजनीया । तदापि काम्ये कृते नित्यमनुष्ठितं स्यादिति नित्यपूजा सिद्धिरिति । तदसत् । 'युगाद्या वर्षवृद्धिश्च' 'भगवत्याः प्रवेशादि' 'प्रातरावाहयेद्देवीमि'त्याद्युक्तवचनैः 'पञ्चमी सप्तमी चैवे'ति वाक्यं बाधित्वा उत्तरविद्धायां तत् समाचरेत् । मूलादिसत्त्वे तु

तिथिनक्षत्रयोर्योगे द्वयोरेवानुपालनम् ।

इत्युक्तदिशा सुतरामुत्तरविद्धाग्रहाच्च । अपि च षष्ठीयुक्तसप्तम्यामह्न्यप्राप्तिसप्तम्यां तत्पूजायां चतुर्दिनापत्तौ ह्रासवृद्धिवशादिति हेतुरसङ्गतः स्यात् । किञ्च त्रिदिनपूजाविधिवाक्ये 'द्वाभ्यां चतुरहोभिर्वे'ति द्वाभ्यामित्यसङ्गतिः । अष्टमीक्षये द्विदिनसम्भवेऽपि तन्मते क्षयपूर्वदिनग्रहणे तदसम्भवात् । द्विदिनसम्भवार्थं तदा परग्रह इति चेत् सर्वत्र तथास्तु मा भूत् उक्तवाक्यविरोधः । किञ्चाष्टम्यादिद्विदिनपक्षस्य पञ्चमी सप्तमी चैवेत्यनेन गतार्थत्वाभावादुपरितनेषु चतुर्षु पक्षेषु एवमेव व्यवस्थेति स्वग्रन्थासङ्गतिः । प्रत्युत शुक्लाष्टमीत्वात् परग्रहौचित्यम् । पूर्वाषाढानुरोधात् परग्रह इत्याशय इति चेन्न, सामान्यतस्तिथिमात्रोक्तेः । तन्मते नक्षत्राणां गुणत्वेन प्रधानतिथावेव तद्वर्णनात् । न च 'तिथिनक्षत्रयोर्योग' इत्यादीनां गौडग्रन्थोक्तत्वादनादर इति वाच्यम् , तद्वाक्यस्यार्षत्वेनोपेक्षानर्हत्वात् । यद्यपि

ऋक्षत्रयेऽपि मूलादौ सप्तम्यामाश्विने सिते ।

इत्यादिना राष्ट्रसिद्धिकामेन तिथिं विना मूलादिऋक्षत्रये पूजा कार्या, तद्वा काम्ये कृते नित्यमनुष्ठितं स्यादिति , तदप्यसत् । सप्तमीपूजायां मूलर्क्षस्य दाक्षायणादिवद् गुणविधित्वेनो[529]पपत्तौ ऋक्षत्रये पृथक् पूजाविधिकल्पने गौरवात् । राज्ञां राष्ट्रकामनायाः प्राधान्येन मूलवशात् षष्ठ्यां पूजायां

529-दाक्षायणादीनां गुणतां सूचयन् जैमिनिः (मीमांसा०-2/3/4/10)सूत्रयति यथा—गुणात् संज्ञोपबन्धः । इति । अत्र दाक्षायणं प्रतिपादयति भाष्यकारो यथा—दक्षस्य इमे दाक्षाः, तेषामयनं दाक्षायणम् । कः पुनर्दक्षः ? उत्साही । इति । तन्त्रवार्त्तिककारेण स्पष्टीकृतमेत यथा—दक्ष इति च उत्साही शीघ्रकारी यजमानः । तदीया ऋत्विजो दाक्षाः, तेषामयनं प्रयोगः यज्ञाश्रितत्वात् दाक्षायण इत्युच्यते । इति । अयमेव दाक्षायणयज्ञः दर्शपूर्णमासयोरेव अभ्यासरूपगुणविकारः । इति संकर्षकाण्डे (1/3/6) प्रतिपादितम् । दाक्षायणादीनां गुणविधित्वं विचार्यते माधवाचार्येण जैमिनीयन्यायमालायां (2/3/4) यथा --

यद्दाक्षायणयज्ञेन स्वर्गकामो यजेत तत् ।
कर्मान्तरं गुणो वोक्तदर्शादौ फलसिद्धये ॥
गुणस्यास्याप्रसिद्धत्वात् कर्मभेदोऽत्र संज्ञया ।
गुणो व्युत्पत्तिशेषाभ्यामावृत्त्याख्यो न नाम तत् ॥

विस्तरेऽपि स्फुटीकृतं तेन यथा—दर्शपूर्णमासप्रकरणे श्रूयते—दाक्षायणयज्ञेन स्वर्गकामो यजेतेति । तत्र दाक्षायणशब्दवाच्यस्य कस्यचिद् गुणस्य लोके प्रसिद्ध्यभावादुद्भिदादिवद् यजिसामानाधिकरण्येन कर्मनामत्वात् अथैष ज्योतिरित्यादिवदपूर्वसंज्ञायां कर्मान्तरविधिरिति चेत् । न । दाक्षायणशब्दस्याऽऽवृत्तिवाचकत्वात् । तच्च शब्दनिर्वचनाद्वाक्यशेषाद्वाऽवगम्यते । तथा हि-अयनमित्यावृत्तिरुच्यते । दक्षस्येमे दाक्षाः, तेषामयनमिति तन्निर्वचनम् । दक्ष उत्साही पुनःपुनरावृत्तावनलस इत्यर्थः । तदीयानां प्रयोगाणामावृत्तिर्दाक्षायणशब्दार्थः । तथा चाऽऽवृत्त्या युक्तः प्रकृतो दर्शपूर्णमासात्मको यज्ञो दाक्षायणयज्ञः । आवृत्तिप्रकारस्तु 'द्वे पौर्णमास्यौ यजेत । द्वे अमावास्ये ।' इत्यादिवाक्यशेषादवगम्यते । ततो दध्यादिवत् प्रसिद्धार्थत्वाद्दर्शपूर्णमासयोः प्रकृतयोरयं स्वर्गफलसिद्ध्यर्थमावृत्त्याख्यगुणविधिः, न तूद्भिदादिवत् कर्मनामधेयम् । एवं 'साकंप्रस्थायीयेन यजेत पशुकामः' इत्यत्रापि द्रष्टव्यम् । अमावास्यायोगे द्वौ द्वौ दोहौ सम्पाद्य चतसृणां दधिपयसोः कुम्भीनां

समाचारविरोधाच्च । तस्माद्युक्त्याचारविरोधादतिहीनमिदं मतमित्युत्कलीयैर्नाभिनिवेष्टव्यम् । द्विदिनमर्चनं तु पूर्वाषाढायोग इति प्रागुक्तम् ।

अष्टम्याञ्च नवम्याञ्च जगन्मातरमम्बिकाम् ।
पूजयित्वाश्विने मासि विशोको जायते नरः ॥[530]

इत्यादिवचनादनृक्षतिथावपि पूजा । तिथिनक्षत्रयोर्योग इत्यादि प्राग्वत् ।

निशायामष्टमी यत्र तत्र दुर्गोत्सवो भवेत् ।
अष्टम्यां यत्र नवमी तत्र पूजां विवर्जयेत् ॥ (भगवतीपु०)

इति तु षोडशपूजाद्यष्टमीपरम् । केचित्तु[531] द्विदिनपूजामप्युक्तवाक्यात् पूर्वविद्धायामाहुः । एकाहपक्षे—

मासि चाश्वयुजे वीर शुक्लपक्षे त्रिशूलिनीम् ।
नवम्यां पूजयेद्यस्तु तस्य पुण्यफलं शृणु ॥
अश्वमेधसहस्रस्य वाजपेयशतस्य च ।
तत्फलं लभते वीर देवीदेवगणैर्वृतः ॥
आश्विने मासि चाष्टम्यां नवम्यां निशि चण्डिकाम् ।
पूजयेच्छत्रुनाशः स्याद्राष्ट्रं तरति लीलया ॥
दुर्गां सम्पूज्य दुर्गाणि नवम्यां तरतीच्छया ।
सङ्ग्रामे व्यवहारे च सदा विजयमश्नुते ॥
प्रावृट्काले विशेषेण आश्विने ह्यष्टमीषु च ।
महाशब्दो नवम्याञ्च लोके ख्यातिं गमिष्यति ॥
यः करोत्युपवासन्तु नवम्यां विधिवन्नृप ।
स फलं प्राप्नुयात् सर्वं राजसूयाश्वमेधयोः ॥
अश्वयुक्शुक्लपक्षस्य नवम्याञ्च वरानने ।

सहप्रस्थापनं साकंप्रस्थायः । तद्युक्तो दर्शयागः साकंप्रस्थायीयः । तथा सति प्रकृते दर्शयागे पशुफलाय साकंप्रस्थायाख्यो गुणो विधीयते । इति ।

530- कालसारे भविष्यस्कान्दवचनमेतत् ।

531- कालसारकारेणापीत्थं प्रतिपादितम्, यथा—अर्द्धरात्रे दिनद्वयेऽष्टमीसम्बन्धे पूर्वेद्युः पूजादिकं, परेद्युरुपवाससिद्धम् । इति ।

उपवासपरो भूत्वा यस्तत्रां पश्यति भक्तितः ॥
तस्य पापक्षयं याति तमः सूर्योदये यथा ॥
मासि चाश्वयुजे शुक्ले नवमी या नराधिप ।
तस्यां यत्क्रियते वीरैर्नरैः स्नानादिकं प्रभो ॥
तत्सर्वमक्षयं तेषां सर्वसिद्धिकरं तथा ।
महानवम्यां पूजेयं सर्वसिद्धिप्रदायिका ॥
सर्वेषु सर्ववर्णेषु तव शक्त्या प्रकीर्त्तिता ।
कृत्वाप्नोति यशो राज्यं पुत्रायुर्धनसम्पदः ॥

अत्र निशि चण्डिकामित्युक्त्या प्रदोषः पूजाकालः । दिनद्वये तद्व्याप्तावव्याप्तो च

श्रावणी दुर्गनवमी तथा दूर्वाष्टमी च या ।
पूर्वविद्धैव कर्त्तव्या.... ॥ इति पाद्मात् ।
अष्टमी नवमीविद्धा नवमी चाष्टमीयुता ।
अर्द्धनारीश्वरप्राया.... ॥[532]

इति वचनात् प्रतिपन्नवमीत्यादितश्च पूर्वा ग्राह्या ।

महाष्टमीव्रतम्

कालिकापुराणे महाष्टमीप्रकरणे[533]—

सप्तम्यां पत्रिकापूजा अष्टम्याञ्चाप्युपोषणम् ।

तिथितत्त्वे (स्मृ० त०-I-पृ-90) भविष्ये महाष्टमीप्रकरणे च

शुक्लपक्षे तथाष्टम्यामुपवासपरायणः ।
मालतीकरवीरेण बिल्वपत्रैश्च पूजयेत् ॥

532- 'उमामाहेश्वरी तिथिः' इति कालमाधवे (पृ-160) पाद्मे चतुर्थ-चरणपाठः ।

533- कालिकापुराणे (60/20) सम्पूर्णवचनं यथा—

सप्तम्यां पत्रिकापूजा अष्टम्याञ्चाप्युपोषणम् ।
पूजाजागरणञ्चैव नवम्यां विधिवद् बलिः ॥ इति ।

पत्रिकाश्च नव, यथा तिथितत्त्वे (पृ-77)—

कदली दाडिमी धान्यं हरिद्रा मानकं कचुः ।
बिल्वोऽशोको जयन्ती च विज्ञेया नव पत्रिकाः ॥ इति ।

इति महाष्टम्यां पूजोक्ता ।[0]

निशायामष्टमी प्रोक्तं दुर्गोत्सवं तु कारयेत् ।

अन्यत्र चोपवासादौ न च विद्धाष्टमी भवेत् ॥

अष्टमीनिशि सम्पूज्या पूजां गृह्णाति पार्वती ॥

विद्धा सप्तमीविद्धा, निशायामष्टमीत्यनेन पूर्वविद्धाया एव लाभात् ।

अष्टमी नवमी यत्र तत्र पूजां विवर्जयेत् ।

इत्यर्च्चत्यागेन उपवासक्रिया सूचिता । एतेन यत्र महानिशायां महाष्टमी ततः पूर्वा सप्तमी तत्र पूजा कार्येति परिशेषात् परदिने उपवास इत्याह । वर्द्धनोऽप्येवम् (दुर्गोत्सवचन्द्रिकायां समर्च्चनविधौ)—

महाष्टमी भाद्रपरस्य शुक्ला पूर्वेण विद्धार्च्चनकर्मशुद्धा ।

व्रतोपवासादिपरिग्रहाय परेण विद्धां निगदन्ति वृद्धाः ॥ इति ।

भाद्रात्परस्योत्तरस्याश्विनस्येति यावत् । तदेवमुत्कलग्रन्थकृतां पूर्वविद्धायां पूजा परविद्धायामुपवास इति स्थिता व्यवस्था । रघुनन्दनस्तु[534]

कन्यासंस्थे रवावीषे या शुक्ला तिथिरष्टमी ।

तस्यां रात्रौ पूजितव्या महाविभवविस्तरैः ॥[535]

534- रघुनन्दनः तिथितत्त्वे (पृ-85)—

कन्यासंस्थे रवावीषे शुक्लाष्टम्यां प्रपूजयेत् ।

सोपवासो निशार्द्धे तु महाविभवविस्तरैः ॥ इति देवीपुराणवचनं प्रतिपादयति । तत्र प्रदोषविचारो नास्ति । अनन्तरं तिथितत्त्वकारः (पृ-88) प्रतिपादयति यथा—ततश्च सप्तमीपूजावन्महाष्टम्यादिकृत्यमपि षष्टिदण्डात्मिकायामेव न तु परदिवसीयखण्डतिथौ किन्तु पूर्वोक्तसन्ध्यरोधान्निशादाविव खण्डतिथावपि सन्धिपूजेति । एवञ्च यस्मिन् दिने महाष्टमीपूजा तस्मिन् दिन एव उपवासः, न तु सन्धिपूजादिने अष्टमीत्वेनोपवासविधेः पूर्वमुक्तत्वात् । इति ।

535- मुद्रितकालिकापुराणे 60/23) 'रवौ पूजा' इति पाठः ।

0- 'अत्र विश्वनाथः' इति ख-ग-पुस्तकद्वयेऽत्राधिकपाठः ।

इति कालिकापुराणाद्रात्रिरूपं प्रदोषमुक्त्वा[0] 'शुक्लपक्षे तथाष्टम्यामि'त्युक्त-भविष्यवाक्ये पूजोपवासावेकदिने संसूच्य 'यस्मिन् दिने महाष्टमीपूजा तस्मिन् दिन एव उपवास' इति ग्रन्थेन पूजोपवासादिकं दिनैक्य एवाभिदधे । तथा

अष्टमीं समुपोष्यैव नवम्यामपरेऽहनि ।

मत्स्यमांसोपहारेण दद्यान्नैवेद्यमुत्तमम् ॥ (देवीपु०)

इति नवमीपारणलिङ्गेन पूर्वविद्धायामुपवाससूचनाच्च । एवकारस्य नवम्यामन्वयेन रामनवमीकृतदशमीपारणवत् तत्पारणलाभात् । समुपोष्यैवे-त्यन्वये तु सोपवासस्यैव मत्स्यादिना नवमीपूजा स्यान्नान्यस्येत्याचार-विरोधः । तदेवं रघुनन्दनमते एकदिने पूजोपवासौ । दिव्यसिंहस्तु[536]

नक्तकाले तु संप्राप्ते मण्डलं कारयेद्व्रती ।

इति वचनात् प्रदोषोऽस्य कालः । तेन तिथिद्वैधे प्रदोषव्यापिनी ग्राह्या । उभयेद्युः प्रदोषव्याप्तौ शुक्लाऽष्टमीत्वात् परा । उभयेद्युस्तदव्याप्तौ तु

नक्तादिव्रतयोगे तु रात्रियोगो विशिष्यते ।

इति वचनात्पूर्वग्रह इति वदन् रघुनन्दनमतमनुससार । इदानीन्तना उत्कलबालास्तु प्रायशो दिव्यसिंहमतमाश्रयन्त इति सुधियो विविच्याचरन्तु । अयं पूजाङ्गभूतो महाष्टम्युपवासः पुत्रवतो निवार्यते,

उपवासं महाष्टम्यां पुत्रवान्न समाचरेत् ।[537]

इति देवीपुराणात् । तेन

चतुर्दश्यां तथाष्टम्यां पक्षयोः शुक्लकृष्णयोः ।

योऽब्दमेकं न भुञ्जीत.... ॥

536- दिव्यसिंहः कालदीपे (पृ-56) दुर्गाष्टमीव्रतप्रकरणे—

नक्तकाले तु सम्प्राप्ते मण्डलं कारयेद् व्रती ।

इति वचनाद् दुर्गाष्टमीव्रते प्रदोषः कर्मकालः । उभयदिने कर्मकालव्याप्तौ शुक्लाष्टमीत्वात् परविद्धा ग्राह्या ।' इति केवलं कथयति ।

537- तिथितत्त्वे (पृ-88) कालिकापुराणवचनमेतत् ।

0- कन्यासंस्थे....मुक्त्वा— भागो नास्ति ख-पुस्तके ।

इति भविष्यपुराणीयवर्षावधिकप्रत्यष्टमीकृतोपवासस्य न निषेधः । एवञ्च तिथितत्त्वे महाष्टमीप्रकरणमनवधाय

शुक्लपक्षे तथाष्टम्यामुपवासपरायणः ।
अष्टमीं समुपोष्यैव.... ।

इति उपवासपारणवाक्ये सामान्याष्टमीपरे लिखतो दिव्यसिंहस्य भ्रम इति प्रावादिष्म । तथाऽऽचाराभावाच्च ।

अष्टमी नवमीमिश्रा कर्त्तव्या भूतिमिच्छता ।[538]

इति स्कान्दवाक्यस्योपवासार्थकत्वात् पुत्रिणोऽपि पूजां विना केवलोपवासः, भूतिपदस्य धनपुत्रार्थकत्वात् । पूजाङ्गोपवासार्थकत्वे तु पुत्रिणस्तदुपवास-विकल्पः । नवमीमिश्रेत्युभयेद्युः प्रदोषव्याप्तिविषयकम् । इयं महाष्टमी वैष्णवैर्न पाल्यते हरिभक्तिविलासादावभावात् ।

पारणम्—
रामनवम्यां दशमीपारणवदत्र नवमीपारणं नियतम् ।

अष्टमीं समुपोष्यैव नवम्यामपरेऽहनि ।
मत्स्यमांसोपहारेण दद्यान्नैवेद्यमुत्तमम् ॥
अनेन विधिनान्नन्तु स्वयं भुञ्जीत नान्यथा ॥

इति देवीपुराणात् । एवकारस्तु नवम्यन्वयीत्युक्तमधस्तात् । भुञ्जीतेति भोजनस्य नान्यथेत्यनेन व्रताङ्गत्वनिश्चयेन रागप्राप्तानुवादकत्वाभावात् । अन्ये तु एवकारस्य रागार्थकत्वादुपवासान्वयाद्वा नान्यथेत्यस्याप्युपवास-मात्रदार्ढ्यकारित्वात् तत्पारणमनियतं ब्रूवते । गङ्गादौ मांसत्यागिनो निषेधदिने तदाघ्राणमात्रं भुक्तिः, 'आघ्राणं चार्द्धभोजनमि'ति वचनात् । स्त्रीणां त्वत्र मत्स्येनैव पारणं न तु मांसेन, भागवते[539] पञ्चमस्कन्धे

538- कालमाधवे (पृ-158) सम्पूर्णं स्कान्दवचनं यथा—

अष्टमी नवमीमिश्रा कर्त्तव्या भूतिमिच्छता ।
सप्तम्या चाष्टमी चैव न कर्त्तव्या शिखिध्वज ॥ इति ।

माधवाचार्यमतानुसारं शुक्लपक्षविषयतया योजनीयमेतत् ।

539- श्रीमद्भागवते—5/26/31 ।

निषेधात्—

'याश्च स्त्रियो नृपशून् खादन्ति ताश्च ते पशव इव निहता यमसदने यातयन्तो रक्षोगणाः सैनिका इव स्वधितिनावद्यायासृक् पिबन्ति । इति । स्वधितिः परशुः ।

गोष्ठाष्टमी

कौर्मे कार्त्तिकशुक्लमधिकृत्य—

गोष्ठाष्टम्यां गवां पूजा गोग्रासो गोप्रदक्षिणम् ।
गवानुगमनं कार्यं सर्वान् कामानभीप्सता ॥

इदञ्च काम्यं स्फुटम् । चतुर्थपादे सर्वपापविशुद्धय इति गौडपाठे[540] तु नित्यम् । वैष्णवानामपीयं काम्यं स्यात् ।

मार्गशीर्षकृष्णा-प्रथमाष्टमी

उत्कलेदेशे ज्येष्ठापत्यस्यायुर्वृद्ध्यर्थं गणपत्यादिपञ्चदेवतापूजापूर्वकं नीराजनं कुर्वन्ति[541] । देशान्तरे तु नास्ति, वचनाभावात् ।

मध्याह्नादधिकं किञ्चित् परतः प्रथमाष्टमी ।
तत्र पूजादिकं कार्यं न कुर्यात्पूर्ववासरे ॥[542]

इति तु निर्मूलम् । तिथिद्वैधे कृष्णाष्टमीत्वात्पूर्वग्रहः । एतदाचारस्योत्कलीयत्ववदुत्तरविद्धाचारोऽपि तथेत्यपरे ।

540- 'सर्वपापविमुक्तये' इति तिथितत्त्वे (पृ-55) धृतान्तिमपादपाठः ।

541- उत्कलदेशाचारप्रचलितमिदं व्रतम् । व्रतस्यास्य क्रियोक्ता पण्डितसर्वस्वे (पृ-75) यथा—

समाचारान्मार्गशीर्षकृष्णाष्टम्याञ्च सर्वदा ।
गणेशादीन् पूजयन्ति ज्येष्ठस्यायुर्विवृद्धये ॥
आशीर्गृह्णन्ति वस्त्रादि दधत्यभिनवं पुनः ॥ इति ।

वीरसर्वस्वेऽपि (पृ-91)—

शस्यते यत्र पूर्वाह्णे देशाचारप्रमाणतः ।
कुर्युः प्रथमपुत्रस्य मङ्गलारोपणादिकम् ॥ इति ।

542- 'न्यूनं चेत्पूर्ववासरे' इति कालसारे चतुर्थपादपाठः ।

भद्राष्टमी

शतानन्दः— पौषे मासि यदा विप्र शुक्लाष्टम्यां बुधो भवेत् ।
तदा तस्मान्महापुण्या अहोरात्री प्रकीर्त्तिता ॥
तस्यां स्नानं तथा दानं तर्पणं विप्रभोजनम् ।
मत्प्रीतये कृतं देवि ! शतसाहस्त्रिकं भवेत् ॥

भीष्माष्टमी

भविष्योत्तरे[543]— शुक्लाष्टम्यां तु माघस्य दद्याद्भीष्माय यो जलम् ।
संवत्सरकृतं पापं तत्क्षणादेव नश्यति ॥

धवलस्मृतौ[544]— अष्टम्यां तु सिते पक्षे भीष्माय सतिलोदकम् ।
अन्नञ्च विधिवद्दद्युः सर्वे वर्णा द्विजातयः ॥

द्विजातय इति सम्बोधनम् । द्वितीये विश्वजिन्न्यायेन[545] स्वर्गस्य पापक्षयस्य वा फलकल्पनान्नित्यम् ।

543, 544- तिथितत्त्वे स्मृ० त०-I-पृ-58) धृतपाठः ।

545- विश्वजिदादीनां फलकल्पनात्मको विश्वजिन्न्यायो विचार्यते माधवाचार्येण जैमिनीयन्यायमालाविस्तरे (4/3/5-7) यथा—

नैवास्ति विश्वजिद् यागो फलमस्त्युत नाश्रुतेः ।
भाव्यापेक्षाद् विधेः कल्प्यं फलं पुंसः प्रवृत्तये ॥

इदमाम्नायते—विश्वजिता यजेतेति । तत्र फलस्याश्रुतत्वान्नास्ति विश्वजिद् यागे फलमिति । नैवम् । फलस्य कल्पनीयत्वात् 'विश्वजिन्नाम्ना यागेन कुर्यादि'त्युक्ता भावना भाव्यमपेक्षते । किं कुर्यादित्याकाङ्क्षाया अनिवृत्तेः । अतो भाव्याकाङ्क्षापूरणाय किञ्चित् फलमवश्यमध्याहर्त्तव्यम् । अध्याहृते च तत्कामिनः पुरुषस्यात्र प्रवृत्त्या यागानुष्ठानं सिध्यति । अन्यथा निरधिकारित्वादननुष्ठाने विधिर्निरर्थकः स्यात् । तस्मात् फलं कल्पनीयम् ।

सर्वं फलमुतैकं स्यात् सर्वमस्त्वविशेषतः ।
एकेन तन्निराकाङ्क्षमतोऽनेकं न कल्प्यते ॥

तस्मिन् विश्वजिति पशुपुत्रवीर्येन्द्रियादिकं सर्वं फलत्वेन कल्पनीयम् । कुतः । 'एतदेवास्य फलमि'त्यत्र विशेषहेतोरभावादिति चेत् । मैवम् । लाघवस्यैव विशेषहेतुत्वात् ।

माघे मासि सिते पक्षे सलिलं भीष्मवर्मणे ।
श्राद्धञ्च ये सदा कुर्युस्ते स्युः सन्ततिभागिनः ।।[546]

इति सन्ततिफलात् काम्यञ्च । यत्तु दिव्यसिंहेन[547] संवत्सरकृतमितिवाक्यं काम्ये दर्शितं तन्न, पापक्षयस्य नित्यताद्योतकत्वात् । अन्यथा सन्ध्यादेरपि काम्यतापत्तिः । अतएव

सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति ।

इत्यादिवाक्यं जन्माष्टम्यां नित्यतासूचकमिति माधवेनोक्तम्[548] । सर्वे वर्णा इति चतुर्वर्णाधिकारिकम् ।

सवर्णेभ्यो जलं देयं नासवर्णे कथञ्चन ।

इति मरीचिवचनं भीष्मेतरपरम् ।

ब्राह्मणाद्यास्तु ये वर्णा दद्युर्भीष्माय नोदकम् ।

एकं यत्किञ्चिदथवा नियतं न नियामकम् ।
तस्मादाद्यः सर्वपुंसामिष्टत्वात् स्वर्ग एव तत् ।।

विश्वजिति कल्प्यमानं यदेकं फलं तदिदमेवेति नियामकं नास्ति । तस्मादिच्छया केनचित् कस्मिंश्चित् फले कल्प्यमानेऽर्थात् सर्वफलत्वे गौरवमेव स्यादिति चेत् । नैवम् । स्वर्गस्य पश्वादिफलवद् दुःखमिश्रितत्वाभावान्निरतिशयसुखाच्च सर्वपुरुषाणामिष्टत्वात् स्वर्ग एव विश्वजितः फलम् । इति ।

546- स्मृतिसारोद्धारे (पृ-84) सूर्यसेनोक्तवचनं यथा—
माघे मासि सिताष्टम्यां सलिलं भीष्मवर्मणे ।
श्राद्धञ्चैव सदा कुर्युस्ते स्युः सन्ततिगामिनः ।। इति ।

547- श्राद्धदीपे (पृ.पृ 71-73) भीष्माष्टमीप्रकरणे दिव्यसिंह आह यथा— शुक्लाष्टम्यां तु माघस्य दद्याद्भीष्माय भोजनम् । संवत्सरकृतं पापं....श्राद्धञ्च ये सदा कुर्युस्ते स्युः सन्ततिभागिनः । इतिवचनात् काम्यञ्च । इति ।

548- माधवाचार्येण कालमाधवे नेदं वचनमुक्तम्, प्रत्युत अकरणे प्रत्यवायश्रवणाद् व्रतस्यास्य नित्यत्वं सूचितम् । तद्यथा कालमाधवे (पृ-163)—एवं जन्माष्टम्या अकरणे प्रत्यवायाज्जयन्त्याः फलविशेषाच्चोभयोः क्रमेण नित्यत्वं काम्यत्वञ्चाभ्युपेतव्यमिति । इति ।

संवत्सरं कृतं पुण्यं तेषां नश्यति सत्तम ॥[549]

इति वचनात् । न चैवं ब्राह्मणस्यात्र विकल्पः, व्यवस्थाप्राबल्यात् । इमे तर्पणश्राद्धे विप्रैः स्वपितृतर्पणश्राद्धानन्तरं वर्णज्येष्ठत्वात् कार्ये । अन्यवर्णैस्तु पित्र्यात्पूर्वमिति संवत्सरप्रदीपकाररघुनन्दनादयः[550] । अन्ये तु

वसून् रुद्रान् तथाऽऽदित्यान्नमस्कारस्वधान्वितान् ।
एते सर्वस्य पितर एष्वायत्ताश्च मानुषाः ॥

इति स्मृतेर्वस्वन्तर्गतस्य देवतात्मकभीष्मस्य सर्वपितृत्वात् पितृकृत्यात्पूर्वं भीष्मतर्पणश्राद्धं विप्राणामपीत्याहुः । यत्तु स्मृतिसारे[551] शुक्लाष्टम्यां तु माघस्ये'त्यधोवाक्ये पापक्षयकामनावशाज्जीवत्पितृकस्यापि भीष्मतर्पणेऽधिकारोऽस्तीति निरुक्तं तदयुक्तम्, पापक्षयस्य नित्यत्वपर्यवसाने प्रागुक्तेः । काम्यत्वेऽपि प्रकृतिश्राद्धसाहित्येन मृतपितृकस्यैव विकृतौचित्यात् । अतएव हरिभक्तिविलासे[552]—

न जीवत्पितृकः कुर्यात्तर्पणं यमभीष्मयोः ।

इत्युक्तम् ।[0] वैष्णवास्तु

549- नोदकं-स्थाने नो जलम् इति तिथितत्त्वे (पृ-58) ।

550- रघुनन्दनेन तिथितत्त्वे (पृ-58) विषयेऽस्मिन् कथ्यते यथा—पितृकर्मरीत्या ब्राह्मणः पितृतर्पणानन्तरं क्षत्रियादिकस्तु तत्पूर्वं तर्पयेत् इति संवत्सरप्रदीपादयः । अत्र बीजं वर्णज्येष्ठम् ।' इति ।

551- 'शुक्लाष्टम्यां तु माघस्येतिपापक्षयवचनात् जीवत्पितृकस्यापि तर्पणमात्रेऽधिकारोऽस्ति ।' इति विश्वनाथमिश्रः स्मृतिसारसङ्ग्रहे (पृ-76) कथयति ।

552- हरिभक्तिविलासकारो भीष्माष्टमीप्रकरणे (14/172) प्रतिपादयति नित्यतर्पणतः इत्यादि । तत्र व्याख्याने सनातनगोस्वामी स्पष्टीकरोति यथा—तद्विधिं लिखति नित्येति । तत्र च जीवत्पितृपितामहको भीष्मतर्पणं न कुर्यादिति ज्ञेयम् ।

जीवत्पिता न कुर्वीत तर्पणं यमभीष्मयोः ।

इति पाद्माभिधानात् । इति ।

0- 'वैष्णवास्तु....ऊचिरे'-भागो नास्ति ख-पुस्तके ।

नित्यतर्पणतः पश्चात् सलिलान्तरुदङ्मुखः ।

निवीती तर्पणं कुर्याद् गाङ्गेयस्य महात्मनः ॥

इति वचनाद् द्विजशूद्राणां सर्वेषां स्वपित्रनन्तरं भीष्मतर्पणश्राद्धे उचिते । तन्मन्त्रो यथा—

वैयाघ्रपद्यगोत्राय सांकृतिप्रवराय च ।

अपुत्राय ददाम्येतत् सलिलं भीष्मवर्मणे ॥

तस्यैकोद्दिष्टश्राद्धत्वात्तद् व्यवस्थोन्नेया । निवीती तर्पणं कुर्यादित्युक्तवैष्णव-शास्त्रातिदेशात् स्मार्त्तानामपि श्राद्धतर्पणयोः निवीतित्वम् । अत्र वैष्णवानां भीष्माष्टमीमारभ्य दिनपञ्चकं तर्पणम् । तदशक्तौ केवलाष्टम्यां वेति[553] वक्ष्यते ।

नवमी

इयञ्चाष्टमीयुता ग्राह्या युग्मात् ।

न कुर्यान्नवमीं तात दशम्याऽत्र कदाचन ।

इति ब्राह्माच्च । भविष्ये[554]—

मासैश्चतुर्भिर्यत्पुण्यं विधिना पूज्य चण्डिकाम् ।

तत्फलं लभते वीर नवम्यां कार्त्तिकस्य च ॥

नवम्यां नववर्षाणि राजन् पिष्टाशनो भवेत् ।

तस्य तुष्टा तदा देवी सर्वकामप्रदा शुभा ॥

श्रीरामनवमी

अगस्त्यसंहितायाम्[555]—

प्राप्ते श्रीरामनवमीदिने मर्त्यो विमूढधीः ।

उपोषणं न कुरुते कुम्भीपाकेषु पच्यते ॥

553- विषयेऽस्मिन् हरिभक्तिविलासकारेण (14/171) कथ्यते यथा—

माघस्य चाष्टमीं शुक्लामारभ्य दिनपञ्चकम् ।

तर्पयेदथवाऽष्टम्यां भीष्मं भागवतोत्तमम् ॥ इति ।

554- 'तस्य तुष्टा भवेद् गौरी' इति तिथितत्त्वे (पृ-59) धृतपाठः ।

555- तिथितत्त्वे (पृ-61), रामार्च्चनचन्द्रिकायाम् (पृ 135) ।

यश्च रामनवम्यान्तु भुङ्क्ते मोहाद्विमूढधीः ।
कुम्भीपाकेषु घोरेषु पच्यते नात्र संशयः ॥

इतिवचनादेतद् व्रतं नित्यम् ।

मुमुक्षवोऽपि हि सदा श्रीरामनवमीव्रतम् ।
न त्यजन्ति सुरश्रेष्ठो देवेन्द्रोऽपि विशेषतः ॥[556]

सदा-पदं कालदेहाशौचेऽपि क्रियार्थम् । न त्यजन्तीत्यपि तथा । एवमन्य-नित्यजयन्त्याम् । केचित्तु रामोपासकानामेवैतन्नित्यमाहुः । तन्न । साधारण्येनोक्तेर्विशेषाप्रतीतेः । अतएव साधनदीपिकायां सर्वसाधारण्येनेद-मुक्तम् ।

'कुर्याद्रामनवम्यान्तु उपोषणमतन्द्रितः ।
मातुर्गर्भमवाप्नोति नैव रामो भवेत् स्वयम् ॥
सूर्यग्रहे कुरुक्षेत्रे महादानैः कृतैर्मुहुः ।
यत्फलं तदवाप्नोति श्रीरामनवमीव्रतात् ॥
श्रीरामनवमी प्रोक्ता कोटिसूर्यग्रहाधिका ।
तस्मिन् दिने महापुण्ये राममुद्दिश्य भक्तितः ॥
उपोषणं जागरणं पितॄनुद्दिश्य तर्पणम् ।
तस्मिन् दिने तु कर्त्तव्यं ब्रह्मप्राप्तिमभीप्सुभिः ॥
तस्मात् सर्वात्मना सर्वे कृत्वैव नवमीव्रतम् ।
मुच्यन्ते पातकैः सर्वे यान्ति ब्रह्म सनातनम् ॥'[557]

इत्यादिवचनात् संयोगपृथक्त्वन्यायेन[558] काम्यञ्च । अत्र सर्व इति वचनात् चतुर्वर्णाधिकारः ।

556- रामार्च्चनचन्द्रिकायाम् (पृ-134) । 557- तत्रैव (पृ-134) ।

558- न्यायोऽयं जैमिनीयमीमांसादर्शने 'एकस्य तूभयत्वे संयोगपृथक्त्वम् । शेष इति चेत् । नार्थपृथक्त्वात् ।' इति (4/3/3,5-7) सूत्रेषु विचारितः । जैमिनीयन्यायमालाविस्तरकारेण माधवाचार्येण स्फुटीकृतमेतद्यथा—

दध्ना त्विन्द्रियकामस्य नित्येऽन्यदुत तद्धि ।
अन्यत् स्यात् पूर्ववन्नैवं संयोगस्य पृथक्त्वतः ॥

चैत्रे मासि नवम्यान्तु शुक्लायां हि रघूद्वहः
प्रादुरासीत् पुरा ब्रह्मन् परंब्रह्मैव केवलम् ।।[559]

इतिवचनादनृक्षनवम्यामपि व्रतम् ।

[0]पुनर्वसृक्षसंयुक्ता सा तिथिः सर्वकामदा ।।[560]

स्वल्पोऽपीत्यपिना सर्वशब्दाच्च[561] रोहिणीवदस्य ऋक्षस्य ग्राहकता मध्याह्ना-द् बलवत्त्वञ्च वक्ष्यते । एवं कर्कटलग्नोपलक्षितमध्याह्नयोगेऽपि फलाधिक्यम् ।

सैव मध्याह्नयोगेन महापुण्यतमा भवेत् ।
ततो मध्याह्नवेलायां सञ्जातो हि जगत्पतिः ।।
मेषं पूषणि संप्राप्ते लग्ने कर्कटकाह्वये ।
आविरासीत् सकलया कौशल्यायां परः पुमान् ।।

इति अगस्त्यसंहितावचनात्[562] । पञ्चधाविभक्तदिनस्य तृतीयांशरूपमुहूर्त-त्रयं मध्याह्नः । सोऽस्य कालः, गणेशचतुर्थ्यादिवत्[00] । कर्कटकाह्वय इति

अग्निहोत्रे श्रूयते – दध्नेन्द्रियकामस्य जुहुयादिति । तत्र दध्नः काम्यत्वान्नि-त्येऽग्निहोत्रे पूर्वन्यायेन न तद्दधि प्रयोक्तव्यम् । किन्त्वन्यदेव किञ्चिद् द्रव्य-मिति चेत् । मैवम् । दध्ना जुहोतीत्यस्मिन् वाक्यान्तरे कामसंयोगमन-पत्यस्य नित्यहोमसंयोगेन दधिविधानात् । तस्मादेकस्यापि दध्नो वाक्यद्वयेन नित्यत्वं काम्यत्वं चाविरुद्धम् । एवमग्नीषोमीयपशौ 'खादिरे बध्नाति', 'खादिरं वीर्यकामस्य यूपं कुर्वीत' इत्युदाहरणीयम् । इति ।

559- रामार्च्चनचन्द्रिकायां (पृ-134) रघूद्वहः-स्थाने रघूत्तमः-पाठः ।

560- चैत्रे मासि नवम्यान्तु जातो रामः स्वयं हरिः ।
इति रामार्च्चनचन्द्रिकायां (पृ-134) पूर्वार्द्धम् ।

561- तिथितत्त्वे (पृ.पृ -59-60) वचनं यथा—
पुनर्वसृक्षसंयोगः स्वल्पोऽपि यदि दृश्यते ।
चैत्रशुक्लनवम्यान्तु सा तिथिः सर्वकामदा ।। इति ।

562- 'ततो....जगत्पतिः ।' इति विना रामार्च्चनचन्द्रिकायाम् (पृ-134) ।

0- 'चैत्रे मासि नवम्यां तु जातो रामः स्वहं हरिः ।'
इति ख-ग-द्वयेऽत्राधिकपाठः ।

00- गणेश....इति नास्ति ख-ग-पुस्तकद्वये ।

श्रवणात् कर्कटविशिष्टः स मुख्यः । वामनजन्मादौ त्ववशिष्टः स इति भेदः । कर्कटस्य मध्याह्नस्वरूपोपलक्षणत्वान्महापुण्यतमा भवेदिति मध्याह्नस्य महापुण्योन्नायकत्वेन कर्कटात् प्रबलत्वम् । तेन नवम्याः पूर्वेद्युः कर्कटमात्रस्पर्शे परेद्युश्च कदाचित् कर्कटशुद्धमध्याह्नव्याप्तौ च परैवेति बोध्यम् । एतद्द्वाभ्यामृक्षं बलीयः, स्वल्पोऽपीत्यपिशब्दात् । जन्माष्टमीरोहिण्यादौ तथा दर्शनात् । अतएव पञ्चाङ्गे ऋक्षस्य तिथिसाम्याद्विकल्प इति वर्षवृद्धावक्ष्यामः । अतएव रामार्च्चनचन्द्रिकायाम्[563]—

> विद्धैव चेदृक्षयुक्ता कथं तत्र व्रतं भवेत् ।
> विद्धानिषेधश्रवणान्नवमी चेति वाग्यतः ॥
> दशम्यादिषु वृद्धिश्चेद्विद्धा त्याज्यैव वैष्णवैः ।
> तदन्येषां तु सर्वेषां व्रतं तत्रैव निश्चितम् ॥

इति पूर्वविद्धायाः सर्क्षत्वात् स्मार्त्तव्रतकर्त्तव्यता दर्शिता । वृद्धिर्नवमीक्षयाभावः । आदिना दशमीक्षयाभावश्च । तत्क्षये ग्राह्यपारणतिथ्योरभाव इति वक्ष्यामः । तदन्येषां स्मार्त्तानाम् । तत्रैव सर्क्षपूर्वविद्धे एवेत्यर्थ इति दिक् ।

इयं द्विविधा, शुद्धा विद्धा चेति । उदयादागामिसूर्योदयव्यापिनी शुद्धा । सा त्रिविधा, समा न्यूनाऽधिका चेति । षष्टिदण्डमिता समा, षष्टितः किञ्चिद्धीना न्यूना, षष्टितः किञ्चिद् बह्वी अधिका । त्रिविधेयं पुनर्वसुयोगवियोगाभ्यां षड्विधा । एवमष्टम्या सहिताऽष्टमीविद्धा, न तु सोदयत्रिमुहूर्त्तीया मध्याह्नात् पूर्वगतया वा अष्टम्या युतैव । वैष्णवानां जन्माष्टम्येकादश्योरिव पूर्वतिथिकलाकाष्ठादिस्पर्शमात्रेणापि विद्धत्वव्यवहारात् । न च

> लववेधेऽपि विप्रेन्द्र दशागन्धो भवेद्यदि ।

इत्यादिवाक्ये लवगन्धादिपदात् साहित्याश्रयेऽप्यत्र किं मानमिति वाच्यम् । 'एकत्र निर्णीतः प्रकारोऽन्यत्र प्रसरेत् ।' इति न्यायात् सङ्क्रान्त्यादौ निशीथविद्धेव शास्त्रे वेधपदस्य स्पर्शे निरूढलक्षणया योगमात्रेणापि पूर्वविद्धाचारात् । अन्यथा 'सप्तमी चेन्निशीथादर्वागितिरीत्या मध्याह्नव्याप्यष्टम्यु-

---

563- रामार्च्चनचन्द्रिकायाम् (पृ-135) ।

त्तरनवम्या विद्धत्वाभावेन तस्यां व्रतापत्तिः । एवं यदा त्रिमुहूर्त्तोनाष्टम्यन-न्तरं प्रवृत्ता नवमी परेद्युरपि किञ्चिद् विद्यते तदाऽपि पूर्वस्याविद्धत्वात्तत्र व्रतं स्यात् । तथा चाचारविरोधः । किञ्चैतत्प्रकारद्वयस्याविद्धत्वे पूर्वोक्त-शुद्धत्वस्याप्यभावात् तृतीयभेदापत्तौ शुद्धा विद्धेतिविभागद्वयोक्तिरानन्दवना-दीनां प्राचां व्याहन्येत । न च विद्धाभिन्नत्वं शुद्धत्वमितिलक्षणाश्रयात् तत्प्रकारद्वयं शुद्धान्तर्गतं स्यादिति वाच्यम् । विनिगमनाविरहेणारुणोदयात् प्रवृत्ता शुद्धा । तदन्या विद्धेति विद्धत्वस्यापि तत्र सुवचत्वात् ।

आदित्योदयवेलाया आरभ्य षष्टिनाडिकाः ।
या तिथिः सा हि शुद्धा स्यात्.... ॥

इति नारदीयविरोधाच्च । अस्तु वा तद् द्वयं विद्धाभिन्नम् । तथापि अष्टमी-सहिता वैष्णवानां सा हेयैव । न चैवंरीत्या साहित्यमात्रेणापि विद्धग्रहे शुद्धाधिकायां विद्धा चेत् परविद्धैवेति वक्ष्यमाणवाक्येन दशमीयुक्ता मलनवमी गृह्यते इति वाच्यम् । विद्धा चेदितिस्वारस्येन पूर्वपरविद्धाद्वयस्थल एव तदव-काशात् । परविद्धापदस्य पूर्वविद्धोत्तरपरविद्धार्थे पर्यवसानाच्च । एवमन्य-जयन्त्यां पूर्वविद्धत्वमुन्नेयम् ।

अथ ग्राह्यतिथिः—

समन्यूननवम्यामसन्देहः । शुद्धाधिकायां परस्य तिथिमलत्वान्मध्या-ह्नास्तमयव्यापिनी पूर्वा ग्राह्या । अष्टमीविद्धा चतुर्धा, पूर्वेद्युर्मध्याह्नव्यापिनी, परेद्युरेवमध्याह्नव्यापिनी, उभयत्र तादृशी, नोभयत्र तथेति । आद्ये पूर्वा, जन्ममध्याह्नकालस्य पूजाकालत्वेन तन्नियामकत्वात् , युग्मात् ।

नवम्येकादशी चैव दशाविद्धा यदा भवेत् ।
तदा वर्ज्या विशेषेण गङ्गाम्भः सुरया यथा ॥

इति पाद्मे सामान्यतो दशाविद्धानिषेधाच्च । द्वितीये परा, मध्याह्नबलात् , सङ्कल्पकालव्याप्तेश्च । नवम्येकादशीत्युक्तनिषेधस्तु मध्याह्नाव्यापिनवम्यां सावकाशम् । तृतीयेऽपि परा,

द्वयोर्मध्याह्नयुक्ता चेन्नोपोष्या पूर्वसंयुता ।

इति पूर्वनिषेधात् । तुर्ये परा,

श्रीरामजन्मनवमी सम्पूर्णा फलदा सदा ।

विद्धा चेत्परविद्धैव कर्त्तव्या तु विशेषतः ।

इति वचनात् । पूर्वविद्धे पुनर्वसुसत्त्वे परविद्धे तदभावे च पूर्वग्रहाद्विशेषत इति । इदं वाक्यं पूर्वेद्युर्मात्रे कर्कटयोगेऽपि परग्राहकम् । तिथ्यृक्षे विना वारयोगलग्नादीनां फलमात्रबोधकत्वेऽपि ग्राहकत्वनियमस्य प्रागुक्तत्वात् । इदञ्च विशेषत्वाद् दशाविद्धनिषेधस्य सामान्यस्य बाधकम् । यद्यपि 'द्वयोर्मध्याह्नयुक्ता चेत्' 'श्रीरामजन्मनवमी'त्येतद् वाक्यद्वयं रामार्च्चनचन्द्रिकायां नास्ति, तथापि प्रामाणिकोपन्यासादाहर्त्तव्यमेव । वस्तुतस्तु, 'विद्धा चेत्परविद्धैवे'त्यनेन द्वितीयवचनेनैव सिद्धौ 'द्वयोर्मध्याह्नयुक्ता' चेतिवाक्यं व्यर्थं तदनुवादकं वेति बोध्यम् ।

पुनर्वसुयुतायां तु नवम्यां भेद उच्यते । शुद्धयोः समन्यूननवम्योर्मध्याह्नादौ यत्र क्वापि काले पूर्णाल्पपुनर्वसुयोगे त्वसन्देहः, दिनान्तराभावात् शुद्धाधिकायां परेद्युर्वृद्धिकलादेः सत्त्वेऽपि पूर्वा, सङ्कल्पास्तमयव्यापित्वात् परस्य च तिथिमलत्वात् । पुनर्वस्यृक्षसंयोग इत्यस्य कालातिरिक्तेऽवकाशात् । यद्यपि जन्माष्टम्यामीदृशशुद्धाधिकायां पूर्वां हित्वा परदिनमात्रे रोहिणीयोगे परेद्युर्जयन्ती क्रियते, तथापि तत्र 'उदये चाष्टमी किञ्चि'न्मुहूर्त्तमप्यहोरात्र' इत्यादिवचनात्तथाचारः । जयन्त्याः काम्यत्वरूपबहुव्यापित्वेन तस्यां शुद्धजन्माष्टम्यन्तर्भावात् । न चात्र तादृशं वचनम्, न वा पुनर्वसुयोगेऽपि संज्ञान्तरं पश्यामः । तादृशविद्धा मध्याह्नयुता त्रिविधा, पूर्वेद्युरेव मध्याह्ने तिथिनक्षत्रयुता, परेद्युरेव तथा, उभयेद्युस्तथेति । आद्ये पूर्वा, पुनर्वस्यृक्षेत्यादिनार्क्षबलस्योक्तत्वात् ।

प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः ।
अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः ॥

इति न्यायेन पुनर्वसुमध्याह्नरूपगुणद्वयविशिष्टतिथेरेव ग्रहणार्हत्वात् । अतएव

ज्येष्ठशुक्लदशम्यां तु हस्तयोगेन जाह्नवी ।

इत्यत्रानेन न्यायेन यद्दिने हस्तदशमीरूपगुणद्वयलाभस्तद्दिन एव गङ्गास्नानमित्युक्तमभियुक्तैः । न च पूर्वेद्युर्मध्याह्ने तिथ्यृक्षयोगे परेद्युर्मध्याह्ने तिथिमात्रयोगे द्वयोर्मध्याह्नयुक्ता चेदित्यनेन परा गृह्यत इति वाच्यम् ।

ऋक्षबलेन पूर्वमहात् । द्वयोर्मध्याह्नयुक्ता चेदित्यस्य दिनद्वयर्क्षे तदभावे चावकाशात् । द्वितीये प्राग्वत् परा । तृतीयेऽपि परेद्युः, 'द्वयोर्मध्याह्नयुक्ता चे'ति प्राग्वचनात् । मध्याह्नातिरिक्ते नक्षत्रयोगश्च द्विधा, परेद्युरेव मध्याह्नातिरिक्ते ऋक्षयुता, दिनद्वये तथा चेति । पक्षद्वये परा, 'विद्धा चेत्परविद्धैवे'ति उक्तवचनात् । प्रथमे ऋक्षबलाच्च मध्याह्नभिन्नकालश्च उदयास्तान्यतररूपः ।

तन्नक्षत्रमहोरात्रं यस्मिन्नस्तमितो रविः ।

यस्मिन्नुदेति सविता तन्नक्षत्रं दिनं भवेत् ॥

इति मार्कण्डेयवचनात् । उदयास्तमयौ त्रिमुहूर्त्ताविति माधवाचार्याः । जयन्त्यां यत्र क्वापि काले रोहिणीयोगाद्ग्रहे तु 'मुहूर्त्तमप्यहोरात्र' इत्यादिवाक्यं नियामकम् । नात्र तथेति विशेषः । एवमपराजितानृसिंहजयन्त्यादावुदयास्तमयर्क्षयोगे नियामको न तु निशामात्र इत्यूहनीयम् । एतद्दिने ज्योतिष्टोमादिप्रवृत्तौ यागाङ्गहविष्याशनं स्यादेवं नवमीव्रतं तु प्रतिनिधिना निर्वाह्यम् । एवं नृसिंहजयन्त्यादावन्यत्र । एतत् सर्वं स्मार्त्तानां दशमीपारणसम्भवे एव निर्वहेत् ।

उपोषणं नवम्यां वै दशम्यामेव पारणम् ।

इति अगस्त्यवाक्ये दशमीपारणानतिक्रमात् । न चैवशब्देन जन्माष्टम्यादिवत् कदाचिदुत्सवान्तपारणव्युदासो न तु दशम्यां तन्नियम इति वाच्यम् । अशक्तानां तस्यापि दशमीक्षये वक्तव्यत्वात् । सर्वे निपाता द्योतका इति शाब्दिकसिद्धान्ताद्दशमीपदस्य दशमीभिन्नदिने पारणशब्दस्य स्वाभावे च विरोधिलक्षणया व्रतदिने पारणव्युदास फलिते 'पारणन्त्वपरेऽहनी'तिसामान्याद्दशमीभोजननियमाच्च । यद्वा दशमीपदस्य स्वभिन्नदिने लक्षणा । पारणपदस्य च स्वाभावप्रतियोगिपारणे । सप्तम्यर्थाधेयत्वस्य पदार्थैकदेशेऽपि स्वाभावेऽन्वयः । तथा च दशमीभिन्नदिनवृत्तिस्वाभावप्रतियोगिपारणमित्यर्थो निष्पन्नः । अत एवोक्तम्—

दशम्यामेव शब्देन दशमीं नैव लङ्घयेत् ।[564]

564- 'तदन्येषां तु सर्वेषां व्रतं तत्रैव निश्चितम् ।'

इति । तेनाष्टमीयुतनवमीक्षये स्मार्त्तवद्वैष्णवानामपि व्रतमिति निर्णेष्यामः । इति स्मार्त्तरामनवमीनिर्णयः ।

वैष्णवैस्तु सर्क्षानृक्षा वाऽष्टमीयुक्ता सा नवमी वर्ज्या ।

नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः ।

उपोषणं नवम्यां वै दशम्यामेव पारणम् ॥

इति अगस्त्यस्मरणात् । जयन्त्यादाविव सर्क्षानृक्षसाधारणमिदं वचनम्, अविशेषात् । यत्तु रघुनन्दनेनोक्तम्[565]— अगस्त्येन मुनिना वैष्णवानां पूर्वविद्धानिषेधानुक्तेर्विधिद्वयकल्पने गौरवाद् विष्णुपरायणपदं न वैष्णवार्थकम्, किन्तु सर्वस्मार्त्तवैष्णवैरष्टमीविद्धा त्याज्या । दशमीपारणसम्भव इति शेषः । तद्दिने विष्णुपरायणैर्भवितव्यमिति उपदेशपरमिति । तदसत् । जन्माष्टमी-नृसिंहचतुर्दशी-शिवरात्र्यादौ पूर्वविद्धानिषेधस्य वैष्णवानामेवोक्तेः स्मार्त्तानां क्वाप्यदर्शनात् । एकादश्यां पूर्वविद्धात्यागस्य[566] वचनबलात्तेषां सम्भवत्वेऽप्यन्यत्रानुपलम्भात् । विष्णुपरायणत्वे विधिकल्पने गौरवस्य तुल्यत्वाच्च । अनुवादकत्वे तदीयविधिवाक्यानुपलम्भस्तत्पदवैयर्थ्यञ्च । किञ्च सर्वैर्जनैर्वेत्यादिपदसत्त्वे तदर्थः संगच्छेत । अध्याहारे तु क्लेशः, वाक्यभेदापत्तिश्च । अपि च

नित्यं भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः ।

दशम्यामेव शब्देन दशमीं नैव लङ्घयेत् ।
निश्चित्यैवं विचारेण नवमीव्रतमाचरेत् ॥

इति तिथितत्त्वे (पृ-60) रामार्चनचन्द्रिकायां (पृ-137) च अगस्त्यवचनम् ।

565- विषयेऽस्मिन् तिथितत्त्वे (पृ पृ-60-61) रघुनन्दनेनोक्तं यथा— वस्तुतस्तु दशमीपारणसत्त्वे सर्वैरेवाष्टमीविद्धा नोपोष्या । विष्णुपरायणैरिति तु विष्णुपरायणत्वेन भवितव्यमित्युपदेशपरं न तु कर्त्तृविशेषणम्, अगस्त्येनावैष्णवस्य विद्धोपवासानुपदेशात् । कर्त्तृभेदे विधिद्वयकल्पनापत्तेश्च । इति ।

566- कालमाधवे (पृ-205) भविष्यपुराणवचनमत्र यथा—

अरुणोदयकाले च दशमी यदि दृश्यते ।
तत्र नैकादशी कार्या धर्मकामार्थनाशिनी । इति ।

इत्यादिवाक्येषु विष्णुपरायणशब्दस्य वैष्णवार्थकत्वं स्वग्रन्थ[567] एकादशी-प्रकरणे दर्शितमिति स्वोक्तिविरोधः । अतएव रामार्च्चनचन्द्रिका[568]-हरिभक्तिविलासवैष्णवग्रन्थे तत्पदं वैष्णवार्थकं महावैष्णवलक्षणमुपन्यस्तम् । एवञ्च 'विद्धा चेत्परविद्धैवे'त्यत्र विशेषपदमपि सार्थकमिति प्रागुक्तं सिद्धम् । किञ्च, पूर्वेद्युरष्टमीविद्धाऽपि नवमी मध्याह्नयुता चेत्तर्हि सैव स्मार्त्तैः पाल्यते, न परदिने मध्याह्नव्यापिन्यपि विरुद्धा सेत्याचारविरोधः । न च दशमीपदं मध्याह्नावृत्तनवम्यर्थकम् । तथा सति मध्याह्नबलादेव सिद्धेः वचनवैयर्थ्यान्मानाभावाद् गौरवाच्च । यद्यपि तेनोक्तम्[569]—

चैत्रे शुद्धा तु नवमी पुनर्वसुयुता यदि ।
सैव मध्याह्नयोगेन महापुण्यतमा भवेत् ॥

अत्र शुद्धेतिवचनात् शुद्धायामृक्षादरो न विद्धायाम् । तेनाष्टमीविद्धा सनक्षत्राऽपि नोपोष्या । सैव तादृश्येव, न तु विद्धेति । तदपि तुच्छम् । शुक्लेति कादिलान्तसंयोगपाठस्थाने धकारद्वयसंयोगस्यागस्त्यसंहितायामभावेनाशुद्धत्वात् । अस्तु वा धकारद्वयसंयोगपाठः । तस्याप्ययमर्थः ।

567- तिथितत्त्वे (पृ 104) रघुनन्दनेनोक्तवचनं यथा—
वैष्णवस्य तु यावत् कृष्णायामुपवासमाह नारदः —
नित्यं भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः ।
पक्षे पक्षे च कर्त्तव्यमेकादश्यामुपोषणम् ॥ इति ।

568- रामार्च्चनचन्द्रिकायां पृ-137) महावैष्णवलक्षणं यथा—
सदीक्षाविधिसन्यासं मन्त्रराजं सयन्त्रकम् ।
सहस्राक्षरसंयुक्तं मूलव्यूहादिभेदतः ॥
पञ्चायतनरूपं वा ये विप्रा समुपासते ।
महावैष्णवसंज्ञास्ते महाविष्णोरतिप्रियाः ॥ इति ।

569- तिथितत्त्वे (पृ-60) रघुनन्दनेनोक्तं यथा— अगस्त्यसंहितायाम्— चैत्रे शुक्ला तु नवमी....दशम्यामेव पारणम् ॥ एतद्वचनद्वयं कालमाधवीयेऽपि । किन्तु, महापुण्येत्यत्र महाफलेतिपाठः । शुद्धेतिश्रवणात् सर्वत्र शुद्धायामृक्षादरो न विद्धायामिति । अत्र एवाष्टमीविद्धा नवमी सनक्षत्राऽपि नोपोष्येति माधवाचार्यः । सैव तादृश्येव न तु विद्धा ।' इति ।

सैवेत्येवकारस्तु मध्याह्नेत्यनेन सम्बध्यते । तृतीयावैशिष्ट्यमर्थः । तेन मध्याह्नसम्बन्धवैशिष्ट्यात् योगव्यवच्छिन्नेति फलितम् । एवं विधा सा यदि पुनर्वसुयुता तदा महापुण्यतमा स्यादिति । केवला सा पुण्या, मध्याह्नयुक्ता पुण्यतमा । तत्रापि पुनर्वसुयोगे महापुण्यतमेति सर्वपदानां सार्थक्यम् । तदर्थे तु मध्याह्नयोगेनेत्यस्य शुद्धायामव्यभिचारेणार्थलभ्यत्वात् कण्ठतस्तद्वच-नानौचित्यं महत्तमपदद्वयवैयर्थ्यञ्च । किञ्च, यदा अष्टमी किञ्चित् सती ततः सर्क्षा नवमी क्षीणा तदा तन्मते त्वियमग्राह्या स्यात् । एवकारेण शुद्धामात्रग्रहे विद्धा निषेधिता । चैत्रे शुद्धेत्यादिवचनद्वयं माधवीयेऽपीति व्युदासात् । अस्याविद्धत्वस्य प्राङ्निर्णयात् । न च दिनान्तराभावादगत्या साम्यादिति वाच्यम् । जयन्त्यादिवत् परदिने तद्धर्षे लोपस्य वा सुवचत्वात् । अस्तु वा तथा । तथापि सन्दर्भाशुद्धिर्वज्रलेपा इति । यदपि पुनस्तेनोक्तम् । अतएव माधवाचार्येण सामान्यत एव विद्धा निषेधिता । चैत्रे शुद्धेत्यादि-वचनद्वयं माधवीयेऽपीति । तदपि मन्दम् । माधवग्रन्थे सामान्यनिषेधस्य तद्वाक्यद्वयस्य चाभावात् । देशान्तरपुस्तके सत्त्वे तु विद्धानिषेधोक्तिर्वैष्णव-परैव न तु स्मार्त्तसाधारणी, रामार्च्चनचन्द्रिकाविलासादिविरोधात् । माधवे-नाप्येकादश्यां वैष्णवमतोपन्यासेन क्वचित् क्वचित् तस्येष्टत्वाच्च । तस्मा-च्च कृत्याचारप्राचीनग्रन्थविरोधात् रघुनन्दनः शाक्तो महानपि वैष्णवविषये भ्रान्तवानिति सिद्धम् । एतेन तदनुयायिनः शाक्ताः स्वल्पवेदिनो दिव्य-सिंहादयोऽप्यपास्ता इति सुधिभिः प्रातर्विजने विवेचनीयम् । अयमत्र संक्षेपः । शुद्धासु समन्यूनाधिकासु नवमीषु पूर्वेद्युर्व्रतम् । पूर्वेद्युर्मध्याह्नव्यापिविद्धायां पूर्वेद्युः । परेद्युरेव दिनद्वये च मध्याह्नव्यापिन्यां तादृशविद्धायां परदिने । उभयेद्युर्मध्याह्नव्यापिन्यामपि तस्यां परदिने । पुनर्वसुयुतासु तिसृषु शुद्धासु प्राग्वत्पूर्वदिने । पुनर्वसुमध्याह्नोभययोगेऽपि केवलमध्याह्नयोगवत् । परेद्युरेव मध्याह्नातिरिक्तकाले तिथिनक्षत्रयोगे परेद्युः । उभयेद्युस्ता-दृशयोगेऽपि परेद्युः सर्क्षाऽनृक्षाष्टमीविद्धोत्तरनवम्यां वैष्णवानां व्रतम् । साष्टमीकनवमीक्षयदिने स्मार्त्तवैष्णवव्रतम् । तृतीये पारणदिने सदशमीकैका-दशीक्षयपाते पूर्वेद्युः स्मार्त्तानां व्रतम् । परेद्युश्च वैष्णवानाम् । मतान्तरे

परेद्यु र्द्वयोर्व्रतमिति। गृहत्यागिश्रीवैष्णवानान्तु 'सिंहे मेषे च सङ्क्रान्ताविं'-तिवचनात् मीनपतितरामनवमीत्यागेन मेषनवम्यां व्रतमिति जन्माष्टम्यामुक्तम्। इह रामनवम्यां कदाचिदशोकाष्टमीपाते कलिकापानं काम्यत्वान्न कार्यम्, तदाघ्राणं वा।

अथ पारणम्—

'पारणान्तं व्रतं ज्ञेयमि'त्यादिना पारणमङ्गमुपवासस्येत्युक्तम्। अस्मिंश्च प्राप्ते दशम्यामेव पारणमिति वचनात् दशमीरूपकालनियमविधिः। तेन

तिथ्यृक्षयोर्द्वयोरन्त उत्तमं पारणं स्मृतम्।

इति स्थितेऽपि यद्वर्षेऽनृक्षा दशमी दिवा पारणे न लभ्यते तदा रात्रौ तन्निषेधात् सर्क्षदशम्यामप्युत्तरपारणं, 'न रात्रौ पारणं कुर्यादि'ति निषेधस्य प्राग्वचनात्। एवं दशमीनियमे यद्वर्षे सर्क्षनवमीको दशमीक्षयस्तद्वर्ष एव उत्सवान्तपारणं सम्भाव्यते।

दशम्यादिषु वृद्धेश्चेद् विद्धा त्याज्यैव वैष्णवैः।

इति चन्द्रिकामते[570] तु अष्टमीविद्धे व्रतादुत्सवान्तपारणाभावः। तथाहि दशम्यां किञ्चिन्नवमी वृद्धा वा दिनैकादश्यां किञ्चिद्दशमीवृद्धौ चाष्टमीविद्धा हेया, दशमीपारणप्राप्तेः। साष्टमीकनवमीक्षये सनवमीकदशमीक्षये च प्राप्ततिथिदशमीपारणानुरोधात् विद्धा कार्येति हि कारिकार्थः। यदा नवमीद्वैधे द्वितीयदिनमृक्षवशात् व्रतयोग्यं तृतीये सदशमीकैकादशीक्षयस्तदा स्मार्त्तानां पूर्वदिने वैष्णवानाञ्च परदिने व्रतद्वयभेदः। क्षीणैकादश्या अपि स्मार्त्तानां व्रतायोग्यत्वपक्षे यद्वा योग्यत्वेऽपि तत्र दशमीकलायामशितानशितजलपारणे तु सनवमीकोक्तदशम्यां वैष्णवस्मार्त्तानां तुल्यव्रतम्। क्षीणैकादश्याः पुत्रिणो व्रतायोग्यत्वं वक्ष्यते। वस्तुतस्तु सनवमीकदशमीक्षये भवतु वा पारणार्थं स्मार्त्तानां पूर्वविद्धे व्रतम्। वैष्णवानां प्रायश उत्सवान्तपारणदर्शनात् विद्धानिषेधवाक्यं ब्रह्मणाऽपि दुर्वारमिति दशमीक्षये व्रतं कृत्वा मध्याह्नानन्तरमुत्सवान्तपारणं जलपारणं वा युक्तम्। अत एव गोपालनारायणभट्टादिभिर्नवमीक्षय एव

570- रामार्चनचन्द्रिकायाम् (पृ-137)।

पूर्वविद्धे व्रतं लिखितं, न तु सनवमीकदशमीक्षये इति दिक् । शेषं जन्माष्टमीवत् ।

दशमी

शुक्ला दशमी परविद्धा कृष्णा च पूर्वविद्धा ग्राह्या ।

सम्पूर्णा दशमी ग्राह्या पूर्वया परयाऽथवा ।

इति अङ्गिरःस्मृत्या[571] पूर्वपरयोरैच्छिकविकल्पेनाष्टदोष[572]साम्येऽपि

उदासीने च शास्त्रार्थे पुरुषार्थो नियामकः ।

इति वचनाच्छास्त्रमूलविकल्पो ज्यायान् । शास्त्रञ्च[573]—

शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः ।
कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः ॥

इति । अतः शुक्ला दशमी परविद्धा, कृष्णा तु पूर्वविद्धा ग्राह्येति निष्पन्नम् । एवमन्यत्र ।

571- तिथितत्त्वे (पृ 62) सम्पूर्णमङ्गिरोवचनं यथा—

सम्पूर्णा दशमी ग्राह्या पूर्वया परयाऽथवा ।
युक्ता न दूषिता यस्मादिति सा सर्वतोमुखी ॥ इति ।

572- अव्यवस्थितविकल्पे दोषाष्टकम् । तदुक्तं यथा—

प्रमाणत्वाप्रमाणत्वपरित्यागप्रकल्पने
प्रत्युज्जीवनहानिभ्यां विकल्पे त्वष्टदोषता ॥ इति ।

एतद्विचार्यते मीमांसापरिभाषाकारेण (पृ.पृ-91-92) यथा—

स च अष्टदोषदुष्टः । तथा हि पूर्वं व्रीहिप्रयोगे यवशास्त्रस्य स्वार्थानुष्ठापकत्वलक्षणप्रामाण्यपरित्यागः, अननुष्ठापकत्वलक्षणाप्रामाण्यस्वीकारः, ततो द्वितीयप्रयोगे यवानुष्ठाने पूर्वं त्यक्तं यत् प्रामाण्यं तत्स्वीकारः, स्वीकृतं यदप्रामाण्यं तत्परित्यागश्चेति यवशास्त्रे चत्वारो दोषाः । एवं पूर्वं यवप्रयोगे व्रीहिशास्त्रस्य स्वार्थानुष्ठापकत्वलक्षण यत्प्रामाण्यं तत्परित्यागः, अननुष्ठापकत्वलक्षणं यदप्रामाण्यं तत्स्वीकारः, पुनर्द्वितीयप्रयोगे व्रीह्यनुष्ठाने व्रीहिशास्त्रस्य त्यक्तप्रामाण्यस्वीकारः, स्वीकृताप्रामाण्यपरित्यागश्चेति व्रीहिशास्त्रे चत्वारो दोषाः । इति । अत एवोक्तम्—

एवमिष्टोऽष्टदोषोऽपि यद् व्रीहियववाक्ययोः ।
विकल्प आश्रितस्तत्र गतिरन्या न विद्यते ॥ इति ।

दशहरा, ज्येष्ठशुक्लदशमी

स्कान्दे[574]—

ज्येष्ठस्य शुक्लदशमी संवत्सरमुखी स्मृता ।
तस्यां स्नानं प्रकुर्वीत दानञ्चैव विशेषतः ॥
यां काञ्चित् सरितं प्राप्य दद्याद्दर्भतिलोदकम् ।
मुच्यते पातकैः सर्वैः सुमहापातकोपमैः ॥

अत्र केवलदशम्यां नदीमात्रे स्नानतर्पणदानादिना दशविधपापक्षयः । हस्तर्क्षभौमवारयोगे फलातिशयः ।

ज्येष्ठशुक्लदशम्यां तु भवेद्भौमदिनं यदि ।
ज्ञेया हस्तर्क्षसंयुक्ता सर्वपापहरा तिथिः ॥

इति भविष्यात्[575] । स्मार्त्तभट्टाचार्यास्तु[576]

ज्येष्ठशुक्लदशम्यां तु हस्तयोगेन जाह्नवी ।

इत्यादिभविष्ये जाह्नवीपदश्रवणात् गङ्गेति वक्ष्यमाणमन्त्र लिङ्गाच्च गङ्गास्नान एव दशविधपापक्षयो न तु नदीमात्रस्नाने, यां काञ्चिन् सरितमिति गङ्गास्तावकम्, अन्यथा कुल्यादिस्नानेऽपि दशविधपापक्षयापत्तिरित्याहुः । दशपापान्याह विश्वामित्रः[577]—

'पारुष्यमनृतञ्चैव पैशुन्यं वाऽपि सर्वशः ।
असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम् ॥
परद्रव्येष्वभिध्यानं मनसाऽनिष्टचिन्तनम् ।
वितथाभिनिवेशश्च त्रिविधं कर्म मानसम् ॥

573- विष्णुधर्मोत्तरवचनमेतत् तिथितत्त्वे (पृ-62) ।

574- कृत्यकौमुद्यां (पृ-21) 'मुच्यते दशभिः पापैः' इति धृतपाठः ।

575- कृत्यकौमुद्यां (पृ-21) कालसारे च दशहराप्रकरणे ।

576- विषयेऽस्मिन् तिथितत्त्वे (पृ पृ-62·63) रघुनन्दन आह यथा— यां काञ्चिदिति तु जाह्नवीस्तावकम् । अन्यथा कुल्यास्नानेऽपि दशविधपापक्षयः स्यात्, मन्त्रलिङ्गे जाह्नवीपदश्रवणाच्च । इति ।

577- कृत्यकौमुद्यां (पृ-22), स्मृतिसारसङ्ग्रहे (पृ 40) धृतपाठः ।

अदत्तानामुपादानं हिंसा चैवाविधानतः ।
परदारोपसेवा च कायिकं त्रिविधं स्मृतम् ॥'

मन्त्रो यथा— दशपापहरेत्येवं स्तूयसे त्वं सुरासुरैः ।
हर तानि सदा गङ्गे पापानि मज्जतो मम ॥

शङ्खः[578]— ज्येष्ठे मासि क्षितिसुतदिने शुक्लपक्षे दशम्यां
हस्ते शैलान्निरगमदियं जाह्नवी मर्त्यलोकम् ।
पापान्यस्यां हरति च तिथौ सा दशेत्याहुरार्याः ।
पुण्यं दद्यादपि शतगुणं वाजिमेधायुतस्य ॥

इत्यादि वाक्याच्च गङ्गास्नान एव दशपापक्षय इति भट्टाचार्योक्तं[579] युक्ततरम् ।
दशहराधिकारे ब्राह्मे (63/16)—

यस्तस्यां हलिनं कृष्णं पश्येद्भद्रां सुसंयतः ।
सर्वपापविनिर्मुक्तो विष्णुलोकं व्रजेन्नरः ॥

तिथिद्वैधे हस्तर्क्षयुता ग्राह्या । दिनद्वये हस्तयोगे तदभावे वा शुक्लदशमीत्वात् परा । एतेन सर्क्षानृक्षसाधारण्येन परा ग्राह्येति वदन्तौ स्मृतिसारकृद् दिव्यसिंहौ[580] परास्तौ । स्मृतिशास्त्रे प्रायशोऽनृक्षदिनं हित्वा सर्क्षस्यैव ग्रहात् । रघुनन्दनेन[581] चात्र 'प्राप्ते कर्मणी'ति रामनवमीरीत्या हस्तयुतैव ग्राह्येत्युक्तम् ।

आश्विनशुक्लदशमी

इयं कुष्माण्डदशमीसंज्ञका । शाम्बपुराणे[582]—

578- मुद्रितशङ्खस्मृतौ नास्ति, किन्तु तिथितत्त्वे (पृ-63) उद्धृतम् ।
579- भौमहस्तायुक्तदशम्यां गङ्गास्नानाद्दशविधपापक्षयः । इति तिथितत्त्वे (पृ-63) रघुनन्दनोक्तिः सुरुचिराऽत्र ।
580- 'अत्र तिथिद्वैधे परविद्धा ग्राह्या ।' इति प्रतिपादयतः स्मृतिसारसङ्ग्रहकारः (पृ-40) विश्वनाथः, कालदीपकारः (पृ-61) दिव्यसिंहश्च ।
581- अत्र तिथितत्त्वे (पृ-63) रघुनन्दनोक्तिर्यथा—हस्तानक्षत्रगङ्गारूपगुणद्वयविशिष्टदशमीविधेयस्मिन्नहनि तल्लाभस्तत्र स्नानम्, उभयदिने तु तल्लाभे परदिन एव । इति ।
582- कालसारे चैत्र-स्थाने तत्र-पाठः ।

आश्विनस्य सिते पक्षे दशम्यां नियतः शुचिः ।
प्रातः स्नानादिकं कर्म कृत्वा पश्चादनन्तरम् ॥
एवं न्यासविधिं कृत्वा ततः पूजां समाचरेत् ।
शिवं दशरथञ्चैव लक्ष्मीदेवीं प्रपूजयेत् ॥
बहिः कुष्माण्डकुसुमैर्दशाहं दशभिः क्रमात् ।
पूजयेद्विधिवत्तावद् यावत्कृष्णचतुर्थिका ॥
तस्यामर्घ्यं शशाङ्काय दत्त्वा न विधवा भवेत् ॥

विधवेति लिङ्गात्स्त्र्यधिकारिकमिदम् । इयं शुक्लदशमीत्वात् परा ग्राह्येति स्मृतिसारः[583] ।

एकादशीयुतायां तु दशम्यामुत्सवादिकम् ।
शुक्लायामाश्विने मासि कुरु त्वं भरतर्षभ ॥
मार्त्तण्डस्योदये पुण्या दृश्यते दशमी तिथिः ।
आश्विने शुक्लपक्षे तु सा भवेज्जयदा नृणाम् ॥
ईषस्य दशमीं शुक्लां पूर्वविद्धां विवर्जयेत् ।
श्रवणेनापि संयुक्ताम्.... ॥

इत्यादि वचनात् । श्रवणेनापीत्यपिना अनृक्षायाः सुतरां त्यागः । 'प्रातः स्नानादिकं कर्म'-'मार्त्तण्डस्योदये पुण्ये'त्यादिवचनात त्रिमुहूर्त्तपूर्वाह्णोऽत्र कालः । अत्र सोमनाथपूजायास्त्वाचारात् प्रदोषः कालः । यत्त्वत्र दिने देवीविसर्गदिग्वेधनृपयात्रादिकं विहितं, तत्सर्वमपराजितायाम् । तदाह शतानन्दः—

श्रवणेन युता चेत् स्याद्दशमी चापराजिता ।
तत्र दुर्गोत्सवं कृत्वा यात्रा कार्या जिगीषुणा ॥

वाल्मीकिरपि[584]—

दुर्गोत्सवानन्तरवैष्णवर्क्षे तिथौ दशम्यामपराजितायाम् ।
रामो जिगीषुर्दशदिक्षु वेधं कृत्वा जगामारिपुरं प्रवीरः ॥

583- मुद्रितस्मृतिसारसङ्ग्रहे वचनमिदं नोपलभ्यते ।
584- कालसारे अपराजितादशमीप्रकरणे धृतपाठः ।

अन्यत्रापि—आश्विने दशमी शुक्ला श्रवणेन समन्विता ।

विजयादशमी प्रोक्ता सा चैवात्यन्तदुर्लभा ॥

नास्ति पराजिता पराजयो यस्यां विशिष्टो जयो यत्रेत्यपराजिताविजयाशब्दान्वर्थौ । क्वचिद्वर्षेऽपराजितायोगाभावेऽप्यनृक्षदशम्यां यात्रोक्ता सुप्रकाशे कश्यपेन—

आश्विने शुक्लदशमी सर्वदा विजयाऽभिधा ।

विजयस्तत्र यातॄणां सिद्धित्वे न पराजयः ॥

सर्वदा श्रवणाभावेऽपीत्यर्थे नैतन्मते श्रवणाहीनाऽपि विजयाख्या ।

दशमीं यः समुल्लङ्घ्य प्रस्थानं कुरुते नृपः ।

तस्य संवत्सरं राज्ये न क्वापि विजयो भवेत् ।

अत्र सायंकालो मुख्यः । विजयनामैकादशमुहूर्तोऽनुकल्पः,

आश्विनस्य सिते पक्षे दशम्यां सर्वरात्रिषु ।

सायंकाले शुभा यात्रा दिवा वा विजयक्षणे ॥

इति वचनात् ।

वारशूलादि हित्वा तु दिक्षु प्रस्थानमाचरेत् ।[585]

वारशूलादिदोषमगणय्येत्यर्थः । आदिना क्षयतिथिषष्ठाहादधिकादिसङ्ग्रहः । अत्र विष्टि-वैधृति-व्यतीपातानां सर्वथा पतनाभावः । अष्टमचन्द्रषष्ठाधिकतिथियोगक्षयशूलगण्डादावपि यात्रायामदोषः । सर्वराशिष्विति वारशूलादि हित्वेत्यादिवचनैरिति तात्पर्यार्थः । अन्यथा पुनर्वसृक्षाच्छ्रवणस्य निधनत्वेन लङ्काया दक्षिणत्वेन च तदानीं श्रीरामस्य यात्रा नापत्तिः । सायंकालश्चात्र विजयसाहचर्यात् सन्ध्योत्तरमुहूर्तः प्रदोषरूप इत्येके,

आश्विनस्य सिते पक्षे दशम्यां तारकोदये ।

स कालो विजयो ज्ञेयः सर्वकार्यार्थसिद्धये ॥

लसत्सन्ध्यामतिक्रान्तः किञ्चिदुद्भिन्नतारकः ।[586]

इति वचनात् ।

585- शमीमभ्यर्चयेद् देशयात्रानिर्विघ्नसिद्धये ।
इति कालसारे पूर्वार्द्धवचनम् ।

586- विजयो नामे कालोऽयं सर्वकार्यार्थसाधकः ॥
इति कालदीपे (पृ-62) उत्तरार्द्धपाठः ।

जपन्नासीत सावित्रीं प्रत्यगातारकोदयात् ।[587]

इति याज्ञवल्क्यात् सन्ध्यायास्तारकावधित्वात् किञ्चिदुद्धिन्नेत्युक्तम् । सन्ध्या चाहोरात्रसन्धिमुहूर्त्तो नृसिंहजयन्त्यां वक्ष्यते । तेनात्र सायंविजयोभयकालव्यापिनी तिथिर्ग्राह्या । तदभावे विजयैकादशमुहूर्त्तव्यापिनीति क्रमाद् बलीयस्त्वम् । यदि च पूर्वदिने सायंमात्रव्याप्तिस्तदा परदिने विजयव्याप्तावपि पूर्वैव ग्राह्या,

नवमीसंयुता कार्या सर्वदा जयकाङ्क्षिभिः ।
सायं काले यदा न स्याद्दशमी चापरेऽहनि ॥
'नवमीशेषसंयुक्तदशम्यां विजयोत्सवम् ।
कुरु राम त्वमित्युक्तं वसिष्ठेन महात्मना ॥'[588]

इति वचनात् । मुख्ययोगात्प्राप्तानुवादकमिदम् । उभयेद्युः सायंकालव्याप्तौ तदव्याप्तौ परेद्युर्गौणविजयव्याप्त्याधिक्यादिषट्कल्के पूर्वदशमीनिषेधाच्च परा । सर्वमिदं श्रवणर्क्षाभावे निर्णीतम् । तद् योगे तु पूर्वेद्युर्मात्रे श्रवणे पूर्वा, परेद्युश्च परा । ऋक्षाणां खण्डकालापेक्षया बलवत्त्वस्य रामनवम्यादौ निर्वचनात्। दिनद्वये श्रवणे तु सायंव्यापिनी । सर्क्षोभयेद्युः सायं व्याप्ता-वव्याप्तौ च पूर्ववर्जनाद् विजययोगाच्च परैवेत्यादि प्रागुवत् ।

तन्नक्षत्रमहोरात्रं यस्मिन्नस्तमितो रविः ।
यस्मिन्नुदेति सविता तन्नक्षत्रं दिनं भवेत् ।

इतिवचनात् त्रिमुहूर्त्तरूपोदयास्तार्थतरावच्छिन्न एवात्र श्रवणयोगो ग्राहकः, रामनवमीवत् । शिष्टाः पठन्ति—

अथ विजयदशम्यां पूर्वभाजिप्रयत्नात्
क्षितिपतिरपराह्णे पूजयेदीशकोणे ।
सकलभुवनवन्द्यां चण्डिकामिष्टसिद्ध्यै
श्रवणभसहिता चेत् प्राक् पराह्णात्तु पूर्वम् ॥

अप्यर्थक-तु-शब्दात् परमपीत्यर्थः । यद्यपि स्मृतिसारे यात्रोपवासादिसाधारण्येन तिथिद्वैधे परग्रहणमुक्तं तथाप्युत्कलबालैर्देशान्तरीयदिव्यसिंहानी-

587- याज्ञवल्क्यस्मृतौ—1/24 । 588- कालदीपे (पृ·63) ।

तवाक्यैरित्थं व्यवहृतमिति दुस्त्यजमेतत् । नृपाणां गमनाशक्तौ राजमार्त्तण्डे खड्गादियात्रोदिता—

कार्यवशात् स्वयमगमे भूभर्त्तुः केचिदाहुराचार्याः ।
छत्राद्यायुधाद्यमिष्टं वैजयिकं निर्गमे कुर्यात् ॥

शस्त्रास्त्रवीणापुस्तकादिजीविकानां देवीरूपत्वस्य त्रिदिनपूजायामुक्तेर्देवी-वत्तेषामप्यपराजितायां विसर्गः । विसर्जनस्थापने तु स्थिरलग्ने निषिद्धे ।

राज्ञो विनाशमिच्छेत्तु स्थिरलग्ने शिवार्थकः ।

इति दोषात् । धनुर्लग्नादौ स्वाद्यं स्थिरांशं हित्वा अन्त्यश्च स्थिरांशो ग्राह्यः ।

शोभनं खञ्जनं पश्येज्जलगोगोष्ठसन्निधौ ।

शोभनं निर्दोषम् । तदाह वसन्तराजः[589]—

गजाश्वशालोपवनान्तरेषु प्रासादहर्म्यप्रसिताम्बरेषु ।
दध्यादिभाण्डेऽप्युपलिप्तभूमौ सुवर्णराजान्तिकचामरेषु ॥
सच्छायरम्याङ्कुरपत्रपुष्पफलावनम्रेषु शुभद्रुमेषु ।
येनोपविष्टः प्रथमेऽह्नि दृष्टस्तस्य श्रियं खञ्जनको ददाति ॥
नद्यादितीराम्बुजगोपुरीषं गोपृष्ठदूर्वानृपमन्दिरेषु ।
अट्टालजम्बालफलप्रवालक्षीरद्रुमोपष्कृततोरणेषु ॥
एतेषु शून्येऽहनि खञ्जरीटो दृष्टोऽतिदृष्टः सहसोपविष्टः ।
भोज्यान्नपानप्रियगोऽश्ववस्त्रलाभाय रोगोपशमाय चेष्टः ॥
तुरङ्गमातङ्गमहोरगेषु सरोजगोच्छत्रवृषेषु येन ।
पूर्वत्र दृष्टोऽहनि खञ्जरीटो निःसंशयं तस्य भवेन्नृपत्वम् ॥
वल्लीदृषत्कण्टकिशुष्कवृक्षदग्धास्थिशूलामृतभाजनेषु ।
शून्यालये लोमसु गेहकाले बुसे पलाशे सिकतासु यूपे ॥
एतेषु देशेष्वथ चापरेषु यदीदृशेषूपहतेषु दृष्टः ।
कुमूर्त्तिचेष्टः स तदा करोति न्यक्कारभीरुककलहाद्यनर्थान् ॥ इत्यादि ।

589- मुद्रितशाकुनवसन्तराजे (10/11-15, 20-21) रम्याङ्कुर-स्थाने हृद्याङ्कुर, शून्येऽहनि-स्थाने चाद्येऽहनि, पूर्वत्र-स्थाने पूर्वे च' इति पाठः ।

पौषशुक्लदशम्यां क्वचित् कोरविपूजासमाचारः (?) प्रथमाष्टमीवद्-दृश्यते। तत्र कालविशेषाभावात् शुक्लदशमी परेति शरणीकरणीयम् ।

एकादशी

एकादश्युपवासो नित्यः, 'उपोष्यैकादशीं नित्यम्[590]' 'एकादशी सदोपोष्या[591]' इति कौर्मात् सदा-पदाच्च । काम्यत्वमपि कौर्मे[592]—

यदीच्छेद्विष्णुसायुज्यं श्रियं सन्ततिमात्मनः ।
एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ॥

यत्तु, वनस्थयतिधर्मोऽयं, शुक्लामेव सदा गृही ।[593]

एवम्, शयनी-बोधनीमध्ये या कृष्णैकादशी भवेत् ।
सैवोपोष्या गृहस्थेन नान्या कृष्णा कदाचन ॥[594]

इत्यादि, तत्तु स्मार्त्तानां न तु वैष्णवानां 'यथा शुक्ला तथा कृष्णेत्युभयत्र[595] व्रतस्य वैष्णवानां वक्ष्यमाणत्वात्। गृहस्थेनेत्यत्र गृहस्थपदं पुत्रवत्परमिति रघुनन्दनः[596] । सपुत्रापुत्रगृहिमात्रसमानमिति माधवादयः[597] । अकरण

590- उपोष्यैकादशी नित्यं पक्षयोरुभयोरपि ।
इति कालमाधवे (पृ-189) गरुडपुराणवचनम् ।

591- कालमाधवे (पृ-189) सनत्कुमारसंहितावचनं यथा—
एकादशी सदोपोष्या पक्षयोः शुक्लकृष्णयोः । इति ।

592- कालमाधवे (पृ 192) ।

593- बृहन्नारदीयपुराणे—21/4 । अपिच निर्णयसिन्धौ (पृ पृ-25-26) सम्पूर्ण देवलवचनं यथा—
एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ।
वनस्थयतिधर्मोऽयं, शुक्लामेव सदा गृही ॥ इति ।

594- ब्रह्मवैवर्त्तवचनमेतत् तिथितत्त्वे (स्मृ०त०-I-पृ-104) ।

595- तिथितत्त्वे (पृ 104) तत्त्वसागरवचनं यथा—
यथा शुक्ला तथा कृष्णा यथा कृष्णा तथेतरा ।
तुल्येति मन्यते यस्तु स वै वैष्णव उच्यते ॥ इति ।

596- विषयेऽस्मिन् तिथितत्त्वे (पृ-104) रघुनन्दनेनोक्तं यथा—कृष्णायां पुत्रवतो गृहस्थस्य निषेधमाह ब्रह्मपुराणम्—आदित्येऽहनि । इत्यादि । अस्यैव शयनी-बोधनीमध्ये प्रतिप्रसवमाह ब्रह्मवैवर्त्तः—शयनी-बोधनीमध्ये.... इत्यादि ।

इवासमापनेऽपि दोषः, यथा विष्णुरहस्ये[598]—

परिगृह्य व्रतं सम्यगेकादश्यादिकं नरः ।
न समापयते यस्तु गतिं पापियसीं भजेत् ॥
उपवासो गृहस्थस्य शुक्लायामेव पुत्रिणः ।
शयनी-बोधिनीमध्ये.... ।

इत्यादिनिषेधस्तु गृहिणां नित्योपवासस्यापि, अविशेषात् । कृष्णानिषेधो व्रतपर इति सिंहवाजपेयिनोक्तम्[599] । तत्तु चिन्त्यम् । गृहिणां काम्यवन्निष्कामोपवासस्यापि कृष्णायामभावेन किञ्चिद् भक्ष्यं कल्प्यमिति माधवेनोक्तत्वात्[600] । समाचाराच्च । न हि कृष्णासूपवासः कैश्चिल्लिखितो दृश्यते वा । कृष्णायां तु काम्योपवासोऽस्ति ।

'पितॄणां गतिमन्विच्छन् कृष्णायां समुपोषयेत् ॥'
'एकादश्यां तु कृष्णायामुपोष्य विधिवन्नरः ।
पुत्रानायुःसमृद्धिञ्च सायुज्यञ्च स गच्छति ॥'

इति स्कान्दमात्स्यात्[601] । विधवानां तु सर्वथेदं व्रतं नित्यम् ।

विधवा या भवेन्नारी भुञ्जीतैकादशीदिने ।
तस्यास्तु सुकृतं नश्येद् भ्रूणहत्या दिने दिने ॥

597- माधवाचार्यः कालमाधवे (पृ-211) विषयेऽस्मिन् सपुत्रापुत्रप्रसङ्गं नोत्थाप्य साधारण्येन 'गृहस्थस्य तु शुक्लायामेव नित्योपवास इत्युक्तम् । नैमित्तिककाम्योपवासौ तु कृष्णायामपि कर्त्तव्यौ ।' इति मात्रं कथयति ।
598- 'गतिः पापीयसी भवेत्' इति कालमाधवे (पृ-191) धृतपाठः ।
599- अत्र कृष्णानिषेधो व्रतविषयः । इति नित्याचारप्रदीपे (भागः-II-पृ-432) ।
600- कालमाधवे (पृ-212) माधवाचार्येणोक्तं यथा—फलमत्रोपवासव्यतिरिक्तदानादिजन्यं द्रष्टव्यम्, उपवासस्य निषिद्धत्वात् । ईदृशे विषये किं कर्त्तव्यमित्याकाङ्क्षायां वायुपुराणे पठ्यते—

उपवासे निषिद्धे तु भक्ष्यं किञ्चित् प्रकल्पयेत् ।
न दुष्यत्युपवासेन उपवासफलं लभेत् ॥ इत्यादि ।

601- कालमाधवे (पृ-211) । 602- तिथितत्त्वे (पृ-105) ।

इति कात्यायनात्[602] । चातुर्वर्णिकञ्चैतत् ,

एकादशी व्रतं नाम कर्त्तव्यं सार्ववर्णिकम् । इति भविष्यात्[603] ।

यानि कानि च पापानि ब्रह्महत्यादिकानि च ।
अन्नमाश्रित्य तिष्ठन्ति सम्प्राप्ते हरिवासरे ॥[604]

एकादश्यन्नकामस्य निष्कृतिः क्वापि नोदिता ।
एकादश्यन्नकामस्तु पितृभिः सह मज्जति ॥[605]

इति सर्वसामान्येन नित्यत्वाभिधानात् । एतद्वाक्यानि स्मार्त्तपक्षे कृष्णायां सङ्कोचनीयानि, वैष्णवपक्षे नेति मन्तव्यम् । पाद्मे—

भुङ्क्ष्व भुङ्क्ष्वेति यो ब्रूयात् सम्प्राप्ते हरिवासरे ।
यो ब्राह्मणं स्त्रियं वाऽपि जहीति वदति क्वचित् ।
मद्यं पिबेति यो ब्रूयात्तेषामिवास्याधोगतिः ॥

गौतमः[606]—आदित्येऽहनि सङ्क्रान्त्यामसितैकादशीषु च ।
व्यतीपाते कृते श्राद्धे पुत्री नोपवसेद् गृही ॥

पुत्री-पदं पुत्रवतो दोषविशेषार्थकम् । अपुत्रगृहिणां न निषेध इत्यपरे ।

कौर्मे[607]— सङ्क्रान्त्यां कृष्णपक्षे च रवि-शुक्रदिने तथा ।
एकादश्यां न कुर्वीत उपवासञ्च पारणम् ॥

इति । अयञ्च निषेधः सङ्क्रान्तिरविवारकृतस्यैवोपवासस्य न त्वेकादशी-जन्यस्यापि ।

तन्निमित्तोपवासस्य निषेधोऽयमुदाहृतः ।

603- 'नित्यमेकादशीव्रतं कर्त्तव्यं सार्ववर्णिकम् ।' इति तत्रैव (पृ-105) ।

604- बृहन्नारदीयपुराणे—21/8 ।

605- कालमाधवे (पृ-190) सम्पूर्णं सनत्कुमारवचनं यथा—

निष्कृतिर्मद्यपस्योक्ता धर्मशास्त्रे मनीषिभिः ।
एकादश्यन्नकामस्य निष्कृतिः क्वापि नोदिता ॥
मद्यपानान्मुनिश्रेष्ठ ! पातैव नरकं व्रजेत् ।
एकादश्यन्नकामस्तु पितृभिः सह मज्जति ॥ इति ।

606- कालमाधवे (पृ-210) । 607- कालमाधवे (पृ-210) ।

नानुसङ्गकृतो ग्राह्यो यतो नित्यमुपोषणम् ॥

इति जैमिनि[608]वचनात् । कात्यायनः[609]—

उपवासो यदा नित्यः श्राद्धं तत्र कथं भवेत् ।
उपवासं प्रकुर्वीत आघ्राय पितृसेवितम् ॥

'आघ्राणं चार्द्धभोजनम्' इतिवचनात् । सर्वश्राद्धशेषभोजने नियमविधेर्विज्ञाने-श्वरोक्तत्वेन[610] तदकरणे दोषात् । एकादश्यां फलमूलादिभोजिनां तु अन्नादिसर्वपितृशेषभोजनमेव । उपवासवतामेव तच्छेषाघ्राणवचनादन्यत्र तच्छेषाशननियमभङ्गे मानाभावात् । उपवासनिषेधे नक्तं हविष्यान्नमित्या-देर्वक्ष्यमाणत्वेन हविष्यश्राद्धशेषाशनस्योभयार्थत्वाच्च । एवं चतुर्थषष्ठकाला-दिभोजनमप्याघ्राणरूपेण निर्वाह्यम् । यद्वा प्रकारान्तरं स्कान्दे[611]—

असामर्थ्ये शरीरस्य व्रते च समुपस्थिते ।
कारयेद्धर्मपत्नीं वा पुत्रं वा विनयान्वितम् ।
भ्रातरं पितरं शिष्यं ब्राह्मणं दक्षिणादिभिः ॥

608- तिथितत्त्वे (स्मृ०त०-I-पृ-104) ।

609- तिथितत्त्वे (पृ 105) कात्यायनवचनं यथा—

उपवासो यदा नित्यः श्राद्धं नैमित्तिकं भवेत् ।
उपवासं तदा कुर्यादाघ्राय पितृसेवितम् ॥ इति ।

610- श्राद्धशेषभोजनार्थं याज्ञवल्क्येन (1/249) उक्तं यथा—

प्रदक्षिणमनुव्रज्य भुञ्जीत पितृसेवितम् ।

इति । विज्ञानेश्वरेणात्र स्फुटीकृतं यथा— ....पितृसेवितं श्राद्धशिष्टमिष्टैः सह भुञ्जीत । नियम एवायं, न परिसङ्ख्या । मांसे तु यथारुचि इति द्विजका-म्यया इत्यत्रोक्तम् । इति ।

611- कालमाधवे (पृ-213) विष्णुरहस्यवचनमेतत् । क्रियाकर्त्तुरसामर्थ्ये प्रतिनिधित्वेन पत्न्यादीनां ग्रहणविचारः प्रदर्शितः, यथा कृत्यकौमुद्यां (पृ-209) स्कन्दपुराणे—

आत्मा पुत्रः पुरोधाश्च भ्राता पत्नी सखा पिता ।
यात्रायां धर्मकार्येषु जायन्ते प्रतिहस्तकाः ॥
एभिः कृतं महादेवि ! स्वयमेव कृतं भवेत् ॥ इति ।

व्रते चतुर्थषष्ठकालप्राजापत्यादौ । अत्र पञ्चमकालभोजनाभावविशिष्टचतुर्थ-षष्ठकालीनभोजनस्यैव फलसम्बन्धात् पयसो ज्योतिष्टोमाङ्गत्व[612]वद् भोजनस्य व्रताङ्गत्वेन तदभावे व्रतक्षयात् । अन्यथाऽग्निष्टोमप्रथमदिने एकादश्यां 'भुञ्जीयतामपराह्णे हविष्यान्नं निरामिषमि'ति भोजनमपि लुप्येतेत्याचार-हानिः । श्रौतं स्मार्त्तात्प्रबलमि[613]त्यस्य कथाचित्कयुक्तिमूलत्वात् । व्रतस्थोऽ-प्येकादश्यां न भुञ्जीतेति साक्षाद्वचने तु एकादश्यां द्वादश्यां चाभुक्त्वा त्रयोदश्यां भोक्तव्यमिति तु सिंहवाजपेयिनः । अन्यार्थमुपवासे कर्त्तुरपि फलमाह—

612- पयसो ज्योतिष्टोमाङ्गत्वं स्वीक्रियते । तत्र पयसो व्यवहारवैशिष्ट्यं विचार्यते माधवाचार्येण जैमिनीयन्यायमालायां (9/4/13) यथा—

मिश्रणे पय आदीनां सोमधर्मा न वाऽग्रिमः ।
प्रदातुं मेलनान्नैवं संस्कारार्थत्वतः श्रुतेः ॥

विस्तरेऽपि स्फुटीकृतं तेन यथा—ज्योतिष्टोमे पयःप्रभृतिभिर्द्रव्यैर्ग्रहपात्र-निष्ठस्य सोमस्य मिश्रणमाम्नातम्—पयसा मैत्रावरुणं श्रीणाति, सक्तुभिर्म-न्थिनम्, धानाभिर्हारियोजनम्, हिरण्येन शुक्रम्, आज्येन पात्नीवतम् इति । तत्र मिश्रणं सोमेन सह प्रदानार्थम् । ततः प्रदेयस्य सोमस्य ये धर्माः क्रयादयः, ते पयःप्रभृतिषु कर्त्तव्याः । इति चेत् मैवम् । मेलनस्य सोमसं-स्कारार्थत्वात् 'मैत्रावरुणम्' इत्यादिभिर्द्वितीयाश्रुतिभिः सोमस्य प्राधान्यं गम्यते । पयसा-इत्यादिभिस्तृतीयाश्रुतिभिः पयःप्रभृतीनां तादर्थ्यम् । ततः संस्कारकाणां प्रदेयत्वाभावान्न तद्धर्माः सन्ति । इति ।

613- श्रुतिस्मृतिविरोधे स्मृत्यर्थो नादरणीयः, श्रुतेः प्राबल्यात् । तदाह जाबाल —

श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी ।
अविरोधे सदा कार्यं स्मार्त्तं वैदिकवत् सदा ॥ (मन्वर्थमु०-2/13)

इति । श्रुतेः प्राबल्यं 'जैमिनिना 'विरोधे त्वनपेक्षं स्यात्, असति ह्यनुमानम् ॥' इति (1/3/2/3) मीमांसासूत्रे विचारितम् । जैमिनीयन्याय-मालायां माधवाचार्येणेदं प्रतिपादितं यथा—

औदुम्बरी वेष्टनीया सर्वेत्येषा स्मृतिर्मितिः ।
अमितिर्वेति संदेहे मितिः स्यादष्टकादिवत् ॥

'कर्त्ता दशगुणं पुण्यं प्राप्नुयान्नात्र संशयः ।'
भवेद्दशम्यामेकाशी द्वादश्याञ्च मुनीश्वराः ।
एकादश्यां निराहारो यदि मुक्तिमभीप्सति ॥

अशक्तस्य त्वाह—

विशेषनियमाशक्तोऽहोरात्रं भुक्तिवर्जितः ।
उपोष्यैकादशीं पापान्मुच्यते नात्र संशयः ॥

विशेषनियमः पूर्वपरैकभोजनत्यागः । वाराहे[614]—

सूतकेऽपि नरः स्नात्वा प्रणम्य मनसा हरिम् ।
एकादश्यां न भुञ्जीत व्रतमेतन्न लुप्यते ॥
मृतकेऽपि न भुञ्जीत नारी दृष्टे रजस्यपि ॥

अत्यन्ताशक्तानां तु मार्कण्डेयः[615]—

एकभक्तेन नक्तेन तथैवायाचितेन च ।
उपवासेन दानेन न निर्द्वादशिको भवेत् ॥

दानेन वक्ष्यमाण-ब्रह्मवैवर्त्तोक्तेन 'यद् भुक्ताद् द्विगुणं भवेदि'त्यनेन ।

मच्छयने मदुत्थाने मत्पार्श्वपरिवर्त्तने ।
फलमूलजलाहारी हृदि शल्यं ममार्पयेत् ॥ (मार्कण्डेयपु०)

अनुकल्पान्तराणि वैवर्त्ते—

औदुम्बरीं स्पृशन् गायेदिति प्रत्यक्षवेदतः ।
विरोधान्मूलवेदस्याननुमानादमानता ॥

विस्तरव्याख्याने स्फुटीकृतमपि तेन यथा—ज्योतिष्टोमे सदो नामकस्य मण्डपस्य मध्ये काचिदौदुम्बरी शाखा निखन्यते । तस्याश्च वाससा वेष्टनं स्मर्यते—औदुम्बरी सर्वा वेष्टयितव्या । इति । सा स्मृतिः प्रमाणम्, अष्टकादिस्मृतिष्विव मूलवेदस्यानुमातुं शक्यत्वादिति प्राप्ते ब्रूमः । 'औदुम्बरीं स्पृष्ट्वोद् गायेत्' इति प्रत्यक्षवेदवचनेन स्पर्शो विधीयते । न च सर्ववेष्टने स्पर्शः सम्भवति । अतो मूलवेदानुमानं कालात्ययापदिष्टम् । अतो विप्रलम्भकवाक्यवन्निर्मूला स्मृतिरप्रमाणम् । इति ।

614- नित्याचारप्रदीपे (भागः-II-पृ-433) ।
615- नित्याचारप्रदीपे (तत्रैव) ।

उपवासासमर्थश्चेदेकं विप्रं तु भोजयेत् ।
तावद्धनानि वा दद्याद् यद् भुक्ताद् द्विगुणं भवेत् ॥
सहस्रसम्मितां देवीं जपेद्वा प्राणसंयमान् ।
कुर्याद् द्वादशसङ्ख्यकान् यथाशक्ति व्रते नरः ॥

देवीं गायत्राम् । वायुपुराणे[616]—

उपवासे निषिद्धे तु भक्ष्यं किञ्चित्प्रकल्पयेत् ।
मूलं फलं पयस्तोयमुपभोग्यं भवेच्छुभम् ।
न चैवं भोजनं कैश्चिदेकादश्यां प्रकीर्त्तितम् ।
नक्तं हविष्यान्नमनोदनं वा फलं तिलाः क्षीरमथाम्बु चाज्यम् ।
यत्पञ्चगव्यं मुनयो वदन्ति प्रशस्तमत्रोत्तरमुत्तरं स्यात् ॥
'दन्तखाद्यं भवेद्यत्तदोदनं परिकीर्त्तितम् ॥'[617]

इत्योदनं चर्व्यभिन्नम् । अङ्गिराः—

सायमाद्यन्तयोरह्नोः सायं प्रातश्च मध्यमे ।
उपवासफलं प्रेप्सुर्जह्याद्भक्तचतुष्टयम् ॥
'शाकं मांसं मसूरांश्च पुनर्भोजनमैथुने ।
द्यूतमत्यम्बुपानञ्च दशम्यां वैष्णवस्त्यजेत् ॥'
सकृद्भोजनसंसक्ताद् द्वादश्याञ्च भविष्यथ ।

मसूरपदं विप्रे निषेधात् शूद्रपरम् । एतत्सर्वमत्यशक्तपरम् ।

अष्टवर्षाधिको मर्त्यो ह्यपूर्णाशीतिवत्सरः ।
एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ॥[618]

616- 'न दुष्यत्युपवासेन उपवासफलं लभेत् ।' इति कालमाधवे (पृ-212) प्रथमश्लोकस्योत्तरार्द्धपाठः । द्वितीयश्लोके 'मुनयो वदन्ति'स्थाने 'यदि चापि वायुः' 'स्यात्' स्थाने 'च'-इति धृतपाठः ।

617- कृत्यकौमुद्यां (पृ 209) सम्पूर्णं भविष्यवचनं यथा—
दन्तखाद्यं भवेद्यत्तु तदोदनमिति स्मृतम् ।
भक्ष्यं चोष्यं तथा लेह्यमोदनं त्रिः प्रकीर्त्तितम् ॥ इति ।

618- द्वितीयचरणे 'ह्यशीतिन्यूनवत्सरः', तृतीयचरणे 'एकादश्यामुपवसेत्' चेति कालमाधवे (पृ-209) कात्यायनवचनपाठः ।

पत्यनुज्ञया सधवाऽप्येकादश्यधिकारिणी, यथा कात्यायनः[619]—

भार्या भर्त्तृमतेनैव व्रतादीनाचरेत् सदा ।

'भर्त्रा पित्रा सुतेन वे'ति[620]प्रागुक्तं क्रमात् प्रबलं सन्निधिपरञ्च ।

पत्यौ जीवति या नारी उपोष्य व्रतमाचरेत् ।
आयुष्यं हरते भर्त्तुर्नरकञ्चैव गच्छति ॥

इति विष्णुवाक्यं[621] भर्त्राद्यननुज्ञापरम् ।

काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके च सः ।
काम्येऽप्युपक्रमादूर्ध्वं केचित् प्रतिनिधिं विदुः ॥[622]

एकादशीद्वैधे विचारः

यद्यपि वैष्णवानामरुणोदये दशमीवेधत्यागो वक्ष्यते तथापि स्मार्त्तैः सूर्योदय एव तद् विद्धा हेया ।

अतिवेधा महावेधा ये वेधास्तिथिषु स्मृताः ।
सर्वेऽप्यवेधा विज्ञेया वेधः सूर्योदये मतः ॥ इति स्मृतेः[623] ।

यत्रोदये कला काष्ठा मुहूर्त्तमपि दृश्यते ।
सैवैकादश्युपोष्या स्यान्न तु पूर्वा कथञ्चन ॥[624]

इति वचनात् सूर्योदयगता ग्राह्या ।

उदयोपरि विद्धा तु दशम्यैकादशी यदा ।
दानवेभ्यः प्रीणनार्थं दत्तवान् पाकशासनः ॥

इति कण्व[625]निषेधाच्च । दिनद्वयेऽप्युदययोगे तु एकादशीवत् परत्र द्वादशी-वृद्धौ सर्वेषामुत्तरा । द्वादश्यवृद्धौ तु

619- पत्युर्मतेनैव इति कालमाधवे (पृ-210) धृतपाठः ।

620- स्मृतिसारोद्धारे (पृ-101) सम्पूर्णं मार्कण्डेयवचनं यथा—

नारी या त्वननुज्ञाता भर्त्रा पित्रा सुतेन वा ।
निष्फलं तु भवेत्तस्या यत्करोति व्रतादिकम् ॥ इति ।

621- कालमाधवे (पृ-209) । 622- कालमाधवे (पृ-214) ।

623- कालमाधवे (पृ-201) । 624- कालसारे एकादशीद्वैधप्रकरणे ।

625- कालमाधवे (पृ-197) ।

सम्पूर्णैकादशी यत्र प्रभाते पुनरेव सा ।
द्वादशी च त्रयोदश्यां नास्ति चेत्तत् कथं भवेत् ।
उत्तरां तु यतिः कुर्यात्पूर्वामुपवसेद् गृही ॥

इति वाक्यान्निर्णेयम् । निष्कामस्तूत्तरां वसेत् ।

विधवायाश्च तत्रैव परतो द्वादशी न चेत् ॥[626]

इति वाक्याद्विधवानामपि परेद्यु रुपवासः । वसेदुपवसेत्, उपसर्गाणां द्योतकत्वात् । न च द्वादशीक्षयं विनेदृश्येकादशी न सम्भवतीति वाच्यम् । प्राचां मते ईदृशस्य कङ्कणाचार्येण कथनात् । यत्तु कृत्यकौमुद्याम्[627]—

एकादशीमुपोष्यैव द्वादशीमप्युपोषयेत् ।

इति कृत्वा-प्रत्ययेनोपवासद्वयं विहितम्, तच्च विधवां प्रत्येव;

विधवा या भवेन्नारी भुञ्जीतैकादशी दिने ।

इत्यादिनिषेधात् इति तत्तु माधवादिबहुग्रन्थविरोधादुपेक्ष्यमिति स्मृतिसारः[628]।

626- तिथितत्त्वे (पृ.पृ-105-106) गरुडपुराणवचनं यथा—
पुनः प्रभातसमये घटिकैका यदा भवेत् ।
तत्रोपवासो विहितो वनस्थस्य यतेस्तथा ।
विधवायाश्च तत्रैव परतो द्वादशी न चेत् ॥ इति ।

627- कृत्यकौमुद्यां (पृ-202) बृहस्पतिनोक्तं यथा— सौरधर्मोत्तरे—
एकादशीमुपोष्यैव द्वादशीमप्युपोषयेत् ।
विमिश्रां वाऽपि कुर्वीत न दशम्या युतां क्वचित् ॥

द्वादशीमेकादशीसहिताम् । अत्रोपोष्येति कृत्वा-प्रत्ययनिर्देशात् उपवासद्वयं विहितम् । तदुपवासद्वयविधानं विधवां प्रत्येव प्रतिपत्तव्यम् । विधवानामेवैकादशीदिने भोजननिषेधवाक्यस्य कात्यायनेनाभिहितत्वात् । तथा च—
विधवा या भवेन्नारी भुञ्जीतैकादशीदिने ।
तस्यास्तु सुकृतं नश्येद् भ्रूणहत्या दिने दिने ॥ इति ।

628- कृत्यकौमुदीकारमतं खण्डयित्वा विश्वनाथमिश्रः स्मृतिसारसङ्ग्रहे कथयति यथा—यत्तु कृत्यकौमुद्याम् उभयाधिक्ये उपवासद्वयविधानं विधवां प्रति लिखितं तत् बहुनिबन्धकारैरलिखितत्वात् प्रत्यक्षशास्त्रविरुद्धत्वान्नादृतम् । .... सर्वस्मृतिकारसम्मतत्वात् शिष्टसमाचाराच्च सकृदुपवासः कर्त्तव्य एव । इति ।

एकादशीदिन इत्येकादशीपदस्य वृतयोग्यैकादश्यर्थकत्वात् । अन्यथैकादश्यां तु यो भुङ्क्त इत्यादिवशात् सर्वार्थमपि स्यात् । उक्तोपवासद्वयवाक्यं श्रवणद्वादशीपरमिति वक्ष्यते । वस्तुतस्तु, द्वादशीक्षयं विना ईदृश्येकादशी न पतेदेव । अवमदिनस्य यदा सूर्योदयात् प्राक् एका तिथिश्छन्ना अपरा च सूर्योदयानन्तरं जाता सती द्वैकोनषष्टिनाडिमिता तदा दिन एव सैव । पूर्वापरयोरिति वारप्रवृत्तिवशादवमदिनत्वमाश्रित्य प्राचां मतं कङ्कणेन दूषितम् । अस्तु वा तथापि पूर्वत्र गृहिणां मतमिति न सम्यक् । गृहि-यति-शब्दयोः सकामनिष्कामार्थस्य नृसिंहाचार्यैरुक्तत्वात् ।

निष्कामस्तु गृही कुर्यादुत्तरैकादशीं सदा ।
प्रातर्भवतु वा मा वा द्वादशी च द्विजोत्तम ! ॥

इति स्कान्दाच्च ।[629]

सर्वत्रैकादशी कार्या द्वादशीमिश्रिता नरैः ।
प्रातर्भवतु वा मा वा यतो नित्यमुपोषणम् ॥[630]

इति वाक्याच्च । यद्वा सकामानां गृह्यादीनां पूर्वेद्युरुपवासो निष्कामानां तूत्तरत्रैव,

पूर्वामुपवसेत्कामी निष्कामस्तूत्तरां वसेत् ।[631]

इति मार्कण्डेयात् । न च 'द्वादशीमिश्रिता नरैः', 'पूर्वामुपवसेद् गृही'ति[632]-विरोधे गृहिणां पूर्वपराविकल्पोऽस्तीति वाच्यम् । विकल्पस्याष्टदोषत्वेन हेयत्वात् । बाधविकल्पव्यवस्थानामुत्तरोत्तरप्राबल्येन व्यवस्थया 'निष्कामस्तु गृही कुर्यादि'तत्साम्याय नर-पदस्य निष्कामगृहि-नरार्थकत्वात् । यदा

629- वीरमित्रोदयसमयप्रकाशे (पृ-70) ।
630- तत्रैव (पृ 72) मदनरत्ने ।
631- वीरमित्रोदयसमयप्रकाशे (पृ-70) सम्पूर्णवचनं यथा—
सम्पूर्णैकादशी यत्र प्रभाते पुनरेव सा ।
पूर्वामुपवसेत्कामी निष्कामस्तूत्तरां वसेत् ॥ इति ।
632- वीरमित्रोदयसमयप्रकाशे (पृ-73) प्रचेतोवचनं यथा—
एकादशी विवृद्धा चेच्छुक्ले कृष्णे विशेषतः ।
उत्तरां तु यतिः कुर्यात् पूर्वामुपवसेद् गृही ॥ इति ।

तूदये स्वल्पा दशमी, क्षीणा चैकादशी तद्वैतद् व्रतस्य नित्यत्वात् परदिन एकादश्याश्चाभावात् तत्क्षय एवोपवासः ।

एकादशी भवेत्काचिद्दशम्या दूषिता तिथिः ।
वृद्धिपक्षे भवेद्दोषः क्षयपक्षे तु पुण्यदा ॥

इति विष्णुरहस्यात् ।[633]

कलार्द्धेनापि विद्धा स्याद्दशम्येकादशी यदि ।
तदाऽप्येकादशीं हित्वा द्वादशीं समुपोषयेत् ॥[634]

इत्यादिकं तु (दशमीविद्धनिषेधपरम्) ।

एकादशी यदा लुप्ता परतो द्वादशी भवेत् ।
उपोष्या द्वादशी तत्र यदीच्छेत् परमां गतिम् ॥

इत्यस्य स्मृतिसारे[635] वैष्णवपरत्वमुक्तम् । एवमन्यत् । यत्तु सिंहवाजपेयिना[636] कलार्द्धेनेत्यादिवाक्यं

द्वादश्यामुपवासं तु ये वै कुर्वन्ति मानवाः ।
वत्स ! मामेव ते यान्ति मम व्रतपरायणाः ॥

इति काम्यद्वादश्या अवयुत्यानुवादकम्, न तु क्षीणैकादशीनिषेधकमित्युक्तं तन्मन्दम् । काम्यद्वादशीकरणेऽपि श्रवणद्वादशीस्थल इवाशक्तानां चोपपत्तौ श्रुतैकादशीत्यागापलापे मानाभावात् । अन्य'थैकादशी यदा लुप्ते'त्यादिबहूनां तथानुवादकत्वकल्पनेऽनौचित्यं ग्रन्थान्तरविरोधश्च । अस्तु वा मतान्तरे पुत्रिणामेकादशीक्षये दोषाद् द्वादशीव्रतबोधकं तत् । सर्वथा नैकादशीनिषेधपरमिति युक्तिस्तु न क्षोदक्षमेत्यास्तां तावत् । माधवादयस्तु—

633- कालमाधवे (पृ-204) । 634- कालमाधवे (पृ 198) ।

635- स्मृतिसारसङ्ग्रहे (पृ-26) विश्वनाथमिश्रेणोक्तं यथा—एकादशी यदा लुप्ता....यदीच्छेत्परमां गतिम् ॥ एतद्वैष्णवविषयम् । इति ।

636- नित्याचारप्रदीपे (भागः-II-पृ-435) नरसिंहवाजपेयिनोक्तं यथा—एवञ्च कलार्द्धेनापि विद्धा....तावदेकादशीं....समुपोषयेत् ॥ तत्काम्यद्वादशीव्रतनिमित्तेन दशमीविद्धनिषेधपरम्, न तु एकादशीव्रतनिषेधपरम् । काम्यं शस्तं द्वादशीव्रतम् । द्वादश्यामुपवासं तु....मम व्रतपरायणाः ॥ अन्यथा दशाविद्धोपवासविधायकवाक्यानामनवकाशप्रसङ्गात् । इति ।

एकादशी दशाविद्धा परतोऽपि न विद्यते ।
गृहिभिर्यतिभिश्चैव सैवोपोष्या सदा तिथिः ॥

इति वायुपुराणान्नित्योपवासस्तत्क्षये सर्वेषामेव काम्यस्य तु निषेध इत्याहुः ।
अनन्तभट्टीकारादयस्तु—

एकादशीदिनक्षय उपवासं करोति यः ।
तस्य पुत्रा विनश्यन्ति मघायां पिण्डदो यथा ॥

इत्यादि पैतामहादेकादशीक्षये नित्यकाम्यव्रतनिषेधः पुत्रवद् गृहिपरः । अतएव

दशम्येकादशी यत्र गान्धार्या समुपोषिता ।
तस्याः पुत्रशतं नष्टं तस्मात्तां परिवर्जयेत् ॥

इति नारदेनोक्तम् ।

उपवासे निषिद्धे तु भक्ष्यं किञ्चित् प्रकल्पयेत् ।
द्वादश्यां वा व्रतं कृत्वा त्रयोदश्याञ्च पारणम् ॥

इत्यादिप्राग्वदित्याहुः । गौडास्तु—

कुर्यादलाभे संयुक्तां नालाभेऽपि प्रवेशिनीम् ।
उपोष्या द्वादशी तत्र त्रयोदश्यां तु पारणम् ॥

इति कौर्मात्तत्क्षये द्वादश्यां सर्वेषां काम्यमकाम्य वा व्रतम् ।

उदयात् प्राग्दशम्यास्तु शेषः संयोग इष्यते ।
उपरिष्टात् प्रवेशस्तु तस्मात्तां परिवर्जयेत् ॥

इति वचनात् । संयुक्तामरुणोदये दशमीयुक्ताम् । श्रवणयोगे तु
क्षीणैकादश्यां सर्वेषां गृहियत्यादीनां व्रतम् ।
दशम्येकादशी यत्र सा नोपोष्या भवेत्तिथिः ॥
श्रवणेन तु संयुक्तामाशुभाजयकामदा ॥

इति वह्निपुराणात् । क्षयार्थदशाविद्धैकादश्याश्च सुतरामयोग्यत्वमित्याहुः । यदा च पूर्वेद्युः सा दशाविद्धा परेद्युश्चैकादशी स्वल्पा द्वादशी क्षीणा तदा दशाविद्धापूर्वदिने गृहिणामुपवासः, क्षयदिने परे च यत्यादीनामिति कालादर्शः । केचित्तु[637]—

637- कालसारकारो गदाधरः प्रतिपादयत्येवं यथा—यदा तूदये एकादशी,

एकादशी द्वादशी च रात्रिशेषे त्रयोदशी ।

त्र्यहस्पृक् तदहोरात्रं नोपोष्यं तत्सुतार्थिभिः ॥

इति पाद्मात् यद्यप्युपवासो निषिद्धस्तथापि

तत्र नक्तं प्रकुर्वीत नोपवासं गृहाश्रमी ।

एकादशी दशाविद्धा द्वादशी च क्षयं गता ।

दानं वाऽप्येकभक्तं वा तत्र कुर्यादयाचितम् ॥

इति वचनाद् गृहिणां नक्तदानादिकम्, यत्यादीनां तूपवासः । मनुवादिकं हित्वाऽर्थिपदात् सपुत्रापुत्रगृहिपरमित्येके । कौमुद्यादौ[638] तु विद्यमानपुत्रपरमिदमुक्तम् ।

एकादशीकलायुक्तामुपोष्य द्वादशीं नरः ।

त्रयोदश्यां तु भुञ्जानो विष्णुसायुज्यमृच्छति ॥

इति वाक्यं यत्यादिपरम् ।

एकादशीकलाऽप्येका द्वादश्यनुगता भवेत् ।

दिनक्षयेऽपि सा पूज्या यतीनामुत्तमा तिथिः ॥

इति स्कान्दादिति वदन्ति । कौमुदीकारस्तु[639]—

तदुत्तरं द्वादश्याः क्षयः, परदिने त्रयोदशी तदा गृहस्थस्य— एकादशी द्वादशी च.... नोपोष्यं तत्सुतार्थिभिः ॥ इति पाद्मोक्त्या उपवासनिषेधात् किञ्चिद्भक्षणपूर्वकं व्रतम् । तथा च कालादर्शधृता स्मृतिः—एकादशी दशाविद्धा.... तदा कुर्यादयाचितम् ॥ इति ।

638- कृत्यकौमुद्यां (पृ-199) 'एकादशी द्वादशी च रात्रिशेषे त्रयोदशी ।' इति विष्णुवचनं साधारण्येनोक्तम् । तत्र (पृ.पृ-195-96) यतिविषये उक्तं यथा—बौधायनः—

एकादशीकलायुक्तामुपोष्य द्वादशीं नरः ।
त्रयोदश्यां तु भुञ्जानो विष्णुसायुज्यमृच्छति ॥

विष्णुसायुज्यमृच्छतीतिवचनान्मोक्षकाङ्क्षिणां यतीनामेवेदं वेदितव्यम् । तथा च स्कन्दपुराणे—

कलाऽप्येकादशी यत्र द्वादश्यनुगता भवेत् ।
दिनक्षयेऽपि सा पूज्या यतीनामुत्तमा तिथिः ॥ इति ।

एकादशी द्वादशी च तत्र सन्निहितो हरिः ।
तमेवोपवसेत्कालमकामो विष्णुतत्परः ॥

इति मात्स्याद् विष्णुप्रीतेरकामत्वान्निष्कामोपवासः स्यात् । सकामत्वे दानमेकभक्तादिकं वेत्याह ।

अथ वैष्णवैकादश्यां विशेषः

गारुडस्कान्दयोः[640]—

दशमीशेषसंयुक्तो यदि स्यादरुणोदयः ।
नैवोपोष्यं वैष्णवेन तद्दिनैकादशीव्रतम् ॥

शेष-पदं कलालवाद्यवधिकम् । स्कान्दे[641] अरुणोदयमानं यथा—

'उदयात्प्राक् चतस्रस्तु नाडिका अरुणोदयः ।'
'आदित्योदयवेलायाः प्राङ्मुहूर्त्तद्वयान्विता ।
एकादशी तु सम्पूर्णा विद्धाऽन्या परिकीर्त्तिता ॥'

इति भविष्ये[642] । 'हरिवासरवर्जिता'[643] इत्यत्र चाप्ययं भावः । यद्यरुणोदयविद्धा हीयते तर्हि किं सूर्योदयविद्धेति प्राप्तमेतत् ।

'अरुणोदयवेधः स्यात् सार्द्धं तु घटिकात्रयम् ।
अतिवेधो द्विघटिकः प्रभासंदर्शनाद्रवेः ॥
महावेधोऽपि तत्रैव दृश्यतेऽर्को न दृश्यते ।
तुरीयस्तत्र विहितो योगः सूर्योदये बुधैः[644] ॥'

639- कृत्यकौमुद्यां (पृ- 197) ग्रन्थकारेण बृहस्पतिना 'एकादशी द्वादशी चेतिमात्स्यवचनमुपन्यस्तमकामत्वे । एकादशीव्रतस्य सकामत्वे दानमेकभक्तादिकमुक्तं तेन ।

640- कालमाधवे (पृ-196) गारुडवचनम् । 641- कालमाधवे (तत्रैव) ।

642- कालमाधवे (पृ-205) परिकीर्त्तिता-स्थाने परिकल्पिता-पाठः ।

643- कालमाधवे (पृ-81) सम्पूर्णं स्कान्दवचनं यथा—
प्रतिपत्प्रभृतयः सर्वा उदयादोदयाद्रवेः ।
सम्पूर्णा इति विख्याता हरिवासरवर्जिता ॥ इति ।

644- कालमाधवे (पृ-196) बुधैः इत्यत्र सति इति ब्रह्मवैवर्त्तवचनम् ।

केषाञ्चिद[645]र्द्धरात्रादूर्द्ध्वं दशमीवेधोऽपि दूषकः । यथा कौर्मे[646]—

अर्द्धरात्रमतिक्रम्य दशमी दृश्यते यदि ।
तदा त्वेकादशीं त्यक्त्वा द्वादशीं समुपोषयेत् ॥

किञ्च, अर्द्धरात्रात् परा यत्र एकादश्युपलभ्यते ।
तत्रोपवासः कर्त्तव्यो न तु वै दशमीकला ॥[647]

इति अर्द्धरात्रात्परदशमीकलायुतेतिभावः। इदं मतं यद्यपि माधव[648]गोपाल-भट्टादिभिर्वै वर्त्तमुपन्यस्य दूषित तथाहि—

अर्द्धरात्रे तु केषाञ्चिद्दशम्या वेध इष्यते ।
अरुणोदयवेलायां नावकाशो विचारणे ॥
कपालवेध इत्याहुराचार्या ये हरिप्रियाः ।
न तन्मम मतं यस्मात् त्रियामा रात्रिरिष्यते ॥

645- अत्र निर्णयसिन्धु (पृ-29)कारः शोभनमाह । तद्यथा—हेमाद्रिस्तु केषाञ्चिदर्द्धरात्रेऽपि दशमीवेधमाह—अर्द्धरात्रे तु केषाञ्चित्....इति ब्रह्मवैवर्त्तात् । अस्यार्थः—अनद्यतने लङ् इत्यत्र अतीताया रात्रेः पश्चिमयामद्वयमागामिन्या रात्रेः पूर्वयामद्वयं दिवसश्च सकल एषोऽद्यतनः काल इत्युक्तं महाभाष्ये । स एष वर्त्तमानः काल एकादश्यहोरात्र उपोष्यः । तन्मध्ये दशमीप्रवेशे विद्धा, सा त्याज्या । अत एव हेमाद्रौ—दशम्याः सङ्गदोषेण अर्द्धरात्रात् परेण तु । वर्जयेच्चतुरो यामान् सङ्कल्पार्च्चनयोः सदा ॥ इति दोष उक्तः । चतुरो यामान् दिवसस्येत्यर्थः । स्वमते तु रात्रेस्त्रियामत्वात् प्रहरत्रयं पूर्वशेषः । तेन चतुर्थप्रहर एव वेधो युक्तः । सोऽप्यरुणोदय एव । सूर्योदयं विना नैव स्नानदानादिकः क्रमः । इति मार्कण्डेयपुराणात् । इति ।

646- हरिभक्तिविलासे (12/354) द्वितीयपादे 'दशमी यदि दृश्यते, चतुर्थपादे 'दशमीं समुपोषयेत्' इति धृतकूर्मवचनपाठः ।

647- कालमाधवे (पृ 197) स्मृतिवचनमेतत् ।

648- कालमाधवे (पृ-197) माधवाचार्य आह यथा—नन्वरुणोदयात्पूर्वमर्द्धरात्रात्परतोऽपि यदि दशमीकला विद्यते तदा नोपवासः कर्त्तव्यः । तदभावे तूपवासः कर्त्तव्यः । तथा च स्मृतिः—अर्द्धरात्रात्....दशमीकला ॥ इति । अतो यथानिर्दिष्टेभ्योऽन्योऽपि कश्चिद्वेधोऽस्तीति चेत् मैवम् । अर्द्धरात्रवेधोऽपि यदा वर्ज्यस्तदा किमु वक्तव्यमरुणोदयवेध इति वक्तुमर्द्धरात्रवेध उपन्यस्तो न तु वेधाभिप्रायेण । तदेव ब्रह्मवैवर्त्ते शौनकेन स्पष्टीकृतम्—अर्द्धरात्रे तु केषाञ्चि....त्रियामा रात्रिरिष्यते ॥ इति ।

इति तथाप्येतद्दूषणं सनकसम्प्रदायपरमिति रामतारकोपासकैः कैश्चिन्नारायणोपासकैश्च कपालवेधेन व्यवह्रियत एव । अन्यथा समबलानां स्मृतीनां पुराणादीनां चान्योन्यबाधायोगेन षोडशिग्रहाग्रहवद् [649] विकल्पप्राप्तौ कपालवेधदेशालाभः श्रीसम्प्रदायाचारविरोधश्चापद्येत । कपालं पूर्वनिशार्द्धं तदुत्तरवर्त्तिवेध इति मध्यपदलोपी समासः । निशापञ्चचत्वारिंशन्नाड्युत्तरं दशमीयोगः कपालवेध इति बहवः । अन्ये तु तत्कालीननिशार्द्धमानेन चतुर्दश-षोडशादिनाऽपि दशावेधं तमाहुः । नारायणभट्टस्तु—

अर्द्धरात्रं स्पृशेत् पूर्णा पक्षवृद्धिर्यदग्रतः ।
कपालवेधनी सा च शुद्धां भद्रामुपोषयेत् ॥ [650]

649- अतिरात्रे षोडशिग्रहनिषेधस्य विकल्परूपताधिकरणे जैमिनिना 'शिष्ट्वा तु प्रतिषेधः स्यात् ।' (10/8/3) इति सूत्रं सूत्रितम् । माधवाचार्येण जैमिनीयन्यायमालायां प्रतिपादितमेतद्यथा—

नातिरात्रे पर्युदासो वादो वाऽथ निषेधनम् ।
आद्योऽनुयाजवन्नैवं विध्येकविषयत्वतः ॥
अत एवार्थवादोऽपि न युक्तः पशुसोमवत् ।
निषेधः स्याद्विकल्पोऽत्र व्रीह्यादाविव युज्यते ॥

विस्तरेऽपि स्फुटीकृतं तेन यथा—ज्योतिष्टोमस्य संस्थाविशेषे श्रूयते—'अतिरात्रे षोडशिनं गृह्णाति', 'नातिरात्रे षोडशिनं गृह्णाति' इति । तत्र यथा अनुयाजेषु 'ये यजामहे' इति विधिनिषेधयोः समावेशः पर्युदासः, एवमत्रापि । इति चेत् मैवम् । एकविषयत्वेन व्याहतिप्रसङ्गात् । 'अतिरात्रव्यतिरिक्तेऽतिरात्रे' इत्युक्तेः कथं न व्याहन्येत । दृष्टान्ते-विधिः सर्वविषयः, निषेधोऽनुयाजमात्रविषयः, इत्यनुयाजपर्युदासेऽपि न विधेर्निर्विषयत्वम् । तर्हि 'न पशौ करोति' इत्यत्र 'न सोमे'—इतिवदर्थवादोऽस्तु । इति चेत् न । स्तुत्यस्तावकयोर्विधिनिषेधयोरेकविषयत्वेन व्याहतितादवस्थ्यात् । 'अपशवोऽन्ये गोअश्वेभ्यः' इत्यत्र पश्वन्तरनिषेधेन गोअश्वविधेः स्तुतिर्दृष्टा । इह तु षोडशिनिषेधेन षोडशिन इव स्तुतौ स्पष्टो व्याख्यातः । तस्मात् प्रतिषेधः इति तृतीयः पक्षोऽस्तु । न चात्रापि व्याघातः शङ्क्यः । अनुष्ठानविकल्पाङ्गीकारेण भिन्नप्रयोगविषयत्वात् । सत्स्वप्यष्टसु दोषेषु गत्यन्तराभावाद् व्रीहियववद्विकल्पोऽभ्युपेयः । तस्मात् प्रतिषेधः, इति राद्धान्तः । इति ।

650- हरिभक्तिविलासे (12/358) पाद्मवचनमेतत् ।

इति पाद्मात् कपालवेधसहितैव पक्षवर्द्धिनी सर्ववैष्णवानां दूषिका न तु केवलाऽपीति बूते । यदा स्वल्पनवम्यनन्तरं दशमी क्षीणा तदा पञ्चाङ्ग-पञ्जिकागतं क्षयदण्डं सम्यक् संसाध्य तस्मिन्नवमीशेषयोगाद्रुणोदयवेधः कपालवेधो वा विचार्यः । क्षयदण्डसाधनञ्च—

'उदयगतघटीभिर्घातयेदिन्दुभुक्तिम् ।'

इति स्फुटे लिखितम् । यदा तु स्वल्पदशम्यनन्तरमेकादशी क्षीणा तदा तां हित्वा जयन्तीवच्छुद्धद्वादश्यामुपोष्य त्रयोदश्यां पारयेत् ।

तस्मादेकादशी त्याज्या दशमीलवमिश्रिता ।
उपोष्या द्वादशी शुद्धा त्रयोदश्यां तु पारणम् ॥
दिनक्षये तु सम्प्राप्ते उपोष्या द्वादशी भवेत् ।
दशमीशेषसंयुक्तां न कुर्वीत कदाचन ॥
एकादश्यां तु विद्धायां नोपवासव्रतादिकम् ।
द्वादश्यामेव तु कुर्यात्त्रयोदश्यां तु पारणम् ॥

इति भविष्यकौर्मस्कान्दात् । यत्तु माधवीये[651]—

दिनत्रयमृते देवि ! नोपोष्या दशमीयुता ।
सैवोपोष्या सदा पुण्या परतश्चेत् त्रयोदशी ॥

इति पुराणात् सदशमीका क्षीणैकादश्यपि वृद्धिद्वादश्यास्त्रयोदश्यामसत्त्वे वैष्णवैः कार्येति, तद्वैष्णवाचारविरुद्धम् । दशमीविद्धाया आसुरत्वेन सर्वथा

651- माधवाचार्येणात्र कालमाधवे (पृ.पृ.-207-208) प्रतिपाद्यते यथा—तत्र यद्यवृद्धिस्तदा यथोक्तं दिनत्रयमुपोष्यम् । तदुक्तं स्कन्दपुराणे-दिनत्रयमृते देवि...परतश्चेत् त्रयोदशी ॥ इति । द्वादशीवृद्धौ 'एकादशी यदा लुप्ता' इत्यनेन व्यासवचनेन परेद्युरुपवास इति पूर्वमेव निर्णीतम् । यदा त्वाद्यन्त-योरेकादशी त्रयोदश्योर्मध्ये द्वादशीत्येतादृशं दिनत्रयं तदा नारदेन स्मर्यते—

एकादशी द्वादशी च रात्रिशेषे त्रयोदशी ।
तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणम् ॥
एकादशी द्वादशी च रात्रिशेषे त्रयोदशी ।
त्रिस्पृशा नाम सा प्रोक्ता ब्रह्महत्यां व्यपोहति ॥

इति । तदेतद्वैष्णवविषयं यतिविषयं वा द्रष्टव्यम् । गृहस्थे तु तन्निषिद्धम् । इति ।

त्यागाद् विलासादावलिखितत्वाच्च । न च तस्मात्तद्विपक्षिकम् , त्रयोदश्यां द्वादशीसत्त्वे इति नियमासङ्गतेः । तत्स्थाने 'एकादशी यदा लुप्ता' इति वैष्णवप्रकरणोपन्यासाच्च ।

अथोन्मीलिनी[652]

उदयात् प्राग्यदा विप्र ! मुहूर्त्तद्वयसंयुता ।
सम्पूर्णैकादशी नाम विद्धाऽन्या परिकीर्त्तिता ॥

इति गारुडादरुणोदयमात्रगतावधीषत्तत्पूर्वगाऽपि नन्दा पूर्णा । अधिकं प्रविष्टं न तु तद्धानिरितिन्यायेन प्रकृतार्थाबाधात् । अन्यथा अरुणोदयपूर्वस्थतादृशनन्दाया विद्धत्वे त्यागापत्तिः । शुद्धाविद्धाऽन्यतृतीयभेदाभावात् । यदि परदिनेऽप्युदयोत्थितायास्तिथेः सत्त्वे शुद्धत्वाद् बाधस्तर्हि विनिगमनाविरहात् पूर्वेद्युरपि वृद्धौ तथैव । 'उदयादोदयाद्वैरि'तिवाक्यस्योभयेद्युर्वृद्धौ साम्यात् । शुद्धाधिकत्वे शुद्धत्वानपायाच्च । अत एव 'सम्पूर्णैकादशी'त्यादिवाक्ये सम्पदसार्थक्यम् । यत्र स्थले नन्दाऽरुणोदयात् प्राक् किञ्चिदसती तन्मात्रं व्याप्य प्रवृत्ता तत्स्थले सम्पदे द्योत्यार्थाभावः । अरुणोदयात् प्राक् किञ्चित् सत्यां नादृशनन्दायां तु सम्पदं पूर्णाधिक्यद्योतकम् । न चेषत्पूर्वगेतीषदाधिक्यं दुर्वचमिति वाच्यम् । नन्दाया अरुणोदयात् प्राग्यावन्नाडिवृद्धौ परारुणोदयपर्यन्तव्यापित्वात् बाधस्तावद् वृद्धेरेव नियमत्वात् । सा च वृद्धिः पञ्चदण्डमिता । अत एव हेमाद्रौ गारुडे—

उदयात् प्राक् त्रिघटिकाव्यापिन्येकादशी यदा ।
सम्पूर्णैकादशी नाम............ ॥

इत्युक्तम् । त्रिघटिकाऽर्द्धोनत्रिघटिकापञ्चदण्डाधिकेत्यर्थः । अरुणोदयपूर्वस्थतन्मात्रगतिर्न द्वयोरनुगमायारुणोदयात् प्राक् पञ्चदण्डानधिकेति फलितार्थः[0] ।

---

652. उन्मीलिनी-लक्षणं यथा धर्मशास्त्रशब्दकोषे (पृ-119)—

एकादशी तु सम्पूर्णा वर्द्धते पुनरेव सा ।
द्वादशी च न वर्द्धेत कथितोन्मीलिनी च सा ॥ इति ।

0- 'यत्र स्थले नन्दा....फलितार्थः ।' इति भागो नास्ति ग-पुस्तके ।

अन्यथा वक्ष्यमाणानि वञ्जुली-पक्षवर्द्धिन्यादीनि बहून्युच्छेद्येरन् । तथा चारुणोदयात् प्राक् पञ्चदण्डानधिकत्वे सत्यरुणोदये एकादश्याः पूर्णत्वमिति निष्कर्षः । अरुणोदयात् प्राक् पञ्चदण्डाधिकवृत्तिर्नन्दा निरासाय सततम् । दशमीविद्धाऽरुणोदयकनन्दाव्यावृत्त्यर्थं वृत्तित्वान्तम् । अरुणोदयात् किञ्चिदनधिका पञ्चदण्डाधिकाऽपि च नन्दासत्यन्तविशेषणाक्रान्तेत्युक्तम् । हरिवासरवर्जिता इत्यस्याप्ययं भावः । ईदृशी षट्पञ्चादिनाडिन्यूना खण्डाऽप्येकादशी पारिभाषिकी पूर्णा स्यात् । किन्तु इयं द्वादश्यरुणोदयास्पर्शित्वान्नोन्मीलिनी । एतदुत्तरा त्रयोदश्यरुणोदयगता भद्रा वञ्जुलीति वक्ष्यामः ।

सम्पूर्णैकादशी यत्र द्वितीयेऽह्नि प्रवर्द्धते ।
उन्मीलिनीति सा प्रोक्ता.... ॥[653]

द्वितीयेऽह्नि द्वादश्यरुणोदये । नारदः—

सम्पूर्णैकादशी यत्र प्रभाते पुनरेव सा ।
तत्रोपोष्या द्वितीया तु-परतो द्वादशी यदि ॥[654]

स्कान्दे[655]—एकादशीकला यत्र परतो द्वादशी भवेत् ।
तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणे ॥
'सम्पूर्णैकादशी यत्र द्वादश्यां वृद्धिगामिनी ।
द्वादश्यां लङ्घनं कार्यं त्रयोदश्यां तु पारणम् ।।'[656]

परतो द्वादशीत्येतद् द्वयं स्वारुणोदयार्थकम्, अन्यवाक्यसाम्यात् । अन्यथोक्तखण्डैकादश्यामिति व्याप्तिः । एवमन्यत्र येषु येषु वाक्येषु प्रभातादिपदं नास्ति तेषु तेषु वेधत्वमाहार्यम्, यथा—

एकादशीकलायुक्ता उपोष्या द्वादशी नरैः ।[657]

653- पापपङ्कौघनाशिनी इति हरिभक्तिविलासे (13/321) पाद्मे गौतमवचनेऽन्तिमपादपाठः ।

654- कालमाधवे (पृ-201) भृगुवचनमेतत् ।

655- कृत्यकौमुद्यां (पृ-197) 'कलाऽप्येकादशी यत्र' इति धृतपाठः ।

656- नारदवचनमेतत् कालमाधवे (पृ-200) ।

657- कृत्यकौमुद्याम् (पृ-195) एतदनुकूलं बौधायनवचनं यथा—

एकादशी द्वादशी च तत्र सन्निहितो हरिः ।[658]

इत्याद्युन्मीलिनीवाक्येषु । एतद्वचनानि पूर्णैकादशीमात्रवृद्धौ पूर्णानन्दाद्वादश्युभयवृद्धौ च विश्राम्यन्तीति द्विविधोन्मीलिनी । न च

एकादशी तु सम्पूर्णा वर्द्धते पुनरेव सा ।
द्वादशी च न वर्द्धेत कथितोन्मीलिनीति सा ॥[659]

इति गोपालभट्टधृतवचनविरोध इति वाच्यम् । च-काराद्वर्द्धते इत्यस्यापि सङ्ग्रहात् ।

द्वादशीमिश्रिता ग्राह्या सर्वत्रैकादशी तिथिः ।
द्वादशी च त्रयोदश्यां विद्यते यदि वा न वा ॥[660]

इति पाद्मे उन्मीलिनीप्रकरणे निरुक्तेश्च । त्रयोदश्यां त्रयोदश्यरुणोदये ।

सर्वत्रैकादशी कार्या द्वादशीमिश्रिता नरैः ।
प्रातर्भवतु वा मा वा.... ॥

इति उन्मीलिन्यां गोपालभट्टोक्तेः[661] । उभयाधिक्ये माधवीयेऽपि[662] परत्र कृताच्च । एतेन दशमीवेधशून्यैकादशीमात्रवृद्धावुन्मीलिनीति साधनदीपिका निरस्ता । उभयाधिक्यपक्षस्य क्वाप्यगणनाच्च[0] । न चेयं वञ्जुली,

---

एकादशीकलायुक्तामुपोष्य द्वादशीं नरः ।
त्रयोदश्यां तु भुञ्जानो विष्णुसायुज्यमृच्छति ॥ इति ।

658- हरिभक्तिविलासे (12/369) सम्पूर्णं पाद्मवचनं यथा—

एकादशी द्वादशी च तत्र सन्निहितो हरिः ।
उपोष्य रजनीमेकां ब्रह्महत्यां व्यपोहति ॥ इति ।

659- हरिभक्तिविलासे (13/267) । 660- तत्रैव (12/362) ।

661- तत्रैव (12/363) 'यतो नित्यमुपोषणम्' इति चतुर्थपादपाठः ।

662- माधवाचार्यस्य वचनं कालमाधवे (पृ-13) यथा—

विद्धा त्याज्या वैष्णवेन शुद्धाऽप्याधिक्यसम्भवे ।
एकादशी द्वादशी वाऽधिका चेत् त्यज्यतां दिनम् ।
पूर्वं, ग्राह्यं तूत्तरं स्यादेष वैष्णव-निर्णयः ॥ इति ।

वा शब्देनात्रोभयाधिक्यबोधः । आधिक्यञ्चात्र द्वितीयदिने निःसरणमात्रम् ।

0- उभयाधिक्यपक्षातिरेकाच्च । इति ग-पुस्तके पाठः ।

द्वादश्येव विवर्द्धेत न चैवैकादशी यदा ।

सा वञ्जुली.......

इति ब्रह्मवैवर्त्त[663]विरोधात् । द्वादशीमात्रवृद्धावुन्मीलिनीति[0] स्वग्रन्थ-विरोधाच्च । तस्माद्[00]द्विविधोन्मीलिनीति साधूक्तम् । एतेन स्वारुणोदय-गामिसम्पूर्णनन्दाका द्वादश्युन्मीलिनीति लक्षणं निष्पन्नम् । यद्यपि पूर्णाया विद्धाया वा नन्दाया भद्राप्रभातवृद्धिरवे परेद्युर्वृते साम्यं, तथापि विद्धो-त्तरभद्रायामुन्मीलिनीपूजाऽऽचारात् त्रयोदशीपारणादिफलाभावार्थं लक्षणे पूर्णपदमुपात्तम्[000] । एवमन्यत्र ।

अथ वञ्जुली

पाद्मे[664]— सम्पूर्णैकादशी यत्र द्वादशी च ततो भवेत् ।

त्रयोदश्यां मुहूर्त्तार्द्धं वञ्जुली सा हरिप्रिया ॥

शुक्ले पक्षेऽथवा कृष्णे यदा भवति वञ्जुली ।

एकादशीदिने भुक्त्वा द्वादश्यां कारयेद् व्रतम् ॥

पारणं द्वादशीमध्ये त्रयोदश्यां न कारयेत् ॥

त्रयोदश्यां त्रयोदश्यरुणोदये । मुहूर्त्तार्द्धमिति कलाकाष्ठाद्युपलक्षणम् ।

हेमाद्रौ—

सम्पूर्णैकादशी त्याज्जा परतो द्वादशी यदि ।

उपोष्या द्वादशी वृद्धा द्वादश्यामेव पारणम् ॥

663- वञ्जुली तु भृगुश्रेष्ठ ! कथिता पापनाशिनी ।
इति हरिभक्तिविलासे (13/268) उत्तरार्द्धपाठः ।

664- हरिभक्तिविलासे (13/356-358) ततो-स्थाने यदा-पाठः ।

0- वञ्जुलीनीति-इति ग-पुस्तके ।

00- नन्दामात्रवृद्धौ नन्दाभद्रोभयवृद्धौ चेति'—इति ग-पुस्तकेऽधिकपाठः ।

000- ....मुन्मीलिनीवाक्यप्रसरात्तत्पूजाचारफलाद्यतार्थपूर्णपदमुपात्तम् । इति ग-पुस्तके अत्र पाठः ।

षष्ट्यूननन्दाया अपि पारिभाषिकपूर्णत्वोक्त्या[0] तदुत्तरा भद्रा वञ्जुली स्यादेवेत्यप्युक्तम् । कालिकापुराणे[665]—

एकादशी यदा पूर्णा परतो द्वादशी भवेत् ।
उपोष्या द्वादशी शुद्धा तिथिवृद्धिः प्रशस्यते ॥

शुद्धा स्वारुणोदये एकादश्ययुता ।[00] अन्यथोन्मीलिन्यां व्यभिचारापत्तिः । तिथिवृद्धिर्जयाऽरुणोदयगा षष्ट्यधिका भद्रा न तु षष्ट्यधिकामात्रम् । नन्दापेक्षया षष्ट्यधिका भद्रा वा 'त्रयोदश्यां मुहूर्त्तार्द्धमि'ति स्वरसात् । तेन स्वारुणोदयात् प्राग्द्विदण्डा नन्दा यदा भद्राऽरुणोदयात् प्राक् छिन्ना द्विषष्टिनाडिका ततो भद्रा जयाऽरुणोदयव्यापिन्येकषष्टिमितदण्डा तस्यां वञ्जुल्यां नन्दान्यूनत्वेऽपि न व्याप्तिः, तादृशनन्दायाः पूर्णत्वस्य प्राक्कथनात् । न वा यदा नन्दा स्वारुणोदयादेकोनषष्टिनाडिकाऽप्युक्तपूर्णा । तत आरभ्य भद्रा जयाऽरुणोदयात् प्राक् निवृत्तैकषष्टिदण्डा । तस्यां नन्दाधिकायामतिव्याप्तिः । एवञ्च 'द्वादश्येव विवर्द्धेते'त्यत्र सर्वस्यारुणोदयवृत्त्यवच्छिन्नजयाऽरुणोदयगामित्वरूपवृद्धिमतीत्यर्थापत्तीयम्, न तु नन्दातोऽधिकमात्रमिति उक्तदोषात् । एवमन्यत्र ।

पूर्णाऽप्येकादशी त्याज्या वर्द्धते द्वितयं यदि ।[666]

इत्यादिवचनान्तरैर्भद्राजयाऽरुणोदयावृत्त्योर्नन्दाभद्रयोर्द्वयो'र्भद्रा चैव विवर्द्धते'

665- कालमाधवे (पृ-207) शुद्धा-स्थाने तत्र-इति धृतपाठः ।

666- गृहस्थोऽपि परां कुर्यात् पूर्वान्नोपवसेत् सदा ।
इति कालमाधवे (पृ-203) स्मृत्यन्तरवचने पूर्वार्द्धपाठः ।

0- मुहूर्त्तार्द्धमिति....पूर्णत्वोक्त्या' इति ग-पुस्तके नास्ति । तत्र 'षष्ट्यूनापि नन्दा पूर्णेति प्रागुक्तम् । अतस्तदुत्तराप्युक्तभद्रा वञ्जुली स्यादेव ।' इति ग-पुस्तके पाठः ।

00- एतेनोन्मीलिनीभेदः सूचितः । अतएवारुणोदयात्प्राक् सूर्योदयाद्वा द्विमुहूर्त्ताधिकाऽपि शुद्धेति पूर्णालक्षणे कथितम् । इति ग-पुस्तकेऽत्र अधिकपाठः ।

इत्यादि-माधवीयादिवचनैः प्रत्येकं वा षष्ट्यधिकत्वे शुद्धद्वादश्यां मतान्तरे वृतस्वीकारेऽपि तस्या वञ्जुलीत्वात् पारणपूजाफलाद्यभावः पूर्ववत् । द्वितयं पूर्णनन्दा पूर्णभद्रा चेति द्वयम् । यद्यपि माधवीये[667] पूर्णापूर्णयोर्भद्रयोर्नन्दयोश्च षष्ट्यधिकत्वमेकादशीत्यागे हेतुरुक्तस्तथाप्यस्य वैष्णवग्रन्थेष्वभावाद्-वैष्णवानाचाराच्चापूर्णनन्दभद्रयोराधिक्यं सङ्कोच्य लिखितम् ।

सम्पूर्णैकादशी यत्र द्वादशी च ततो भवेत् ।
उपोष्या द्वादशी शुद्धा द्वादश्यामेव पारणम् ।।

शुद्धा स्वारुणोदये एकादश्ययुतेत्युक्तम् । द्वादशीपारणञ्च सूर्योदये द्वादशी-सम्भवपरम् । अरुणोदये तत्सत्त्वे तु जलतुलसीपारणं वा । इदमप्युन्मीलिनी-भेदकम् । एवं वञ्जुल्यप्यत्र द्विधा सिद्धा । षष्ट्यूनपूर्णनन्दोत्तरं जयाऽरुणोदयगा षष्ट्यधिका भद्रेत्येका,

एकादशी यदा लुप्ता परतो द्वादशो भवेत् ।

इति व्यासोक्त[668]वञ्जुल्यां लुप्ता षष्ट्यूनेत्यर्थात् । षष्टिदण्डपूर्णनन्दोत्तरं षष्टिदण्डाधिका भद्राऽन्येति द्वे । तेन स्वारुणोदयावृत्तिः पूर्णनन्दकत्वे सति जयाऽरुणोदयगा द्वादशी वञ्जुलीति लक्षणं फलितम् ।

अथ त्रिस्पृशा

पाद्मे — एकादशी द्वादशी च रात्रिशेषे त्रयोदशी ।
तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणम् ।।
द्वादशीसंयुता यत्र भवत्येकादशीकला ।
दिनक्षयेऽपि सा पूज्या दशमी न कदाचन ।।

667- माधवाचार्यस्य विचारोऽत्र कालमाधवे (पृ.पृ-206-207) यथा— सम्पूर्णैकादशीपरित्यागविषयाणि कानिचिद्वचनान्युपलभ्यन्ते । तद्यथा.... गरुडपुराणे—

पूर्णा भवेद्यदा नन्दा भद्रा चैव विवर्द्धते ।
तदोपोष्या तु भद्रा स्यात् तिथिवृद्धिः प्रशस्यते ।। इति ।

ईदृशानि सर्वाणि वैष्णवविषयाणि ।

668- उपोष्या द्वादशी तत्र यदीच्छेत् परमां गतिम् ।
इति कालमाधवे (पृ-204) उत्तरार्द्धपाठः ।

त्रिस्पृशैकादशी यत्र तत्र सन्निहितो हरिः ॥

तिथित्रयस्य स्पृशा त्रिस्पृशेति योगरूढ़ः । इगुपधत्वात् कः । उन्मीलिन्युत्तरं त्रिस्पृशासम्भवे तु विद्धोत्तरेति विशेषणीयम्, त्रिस्पृशोन्मीलिनीपूजादिद्वयसमुच्चयो वा । एवं पक्षवर्द्धिन्याम् ।[0]

अरुणोदय आद्या स्याद् द्वादशी सकलं दिनम् ।
अन्ते त्रयोदशी चैव त्रिस्पृशां समुपोषयेत् ॥

इत्यत्रारुणोदयपदं सूर्यार्थकम् । अन्यथोन्मीलिन्यामतिप्रसङ्गो योगार्थश्च भज्येत । इयं पुत्रार्थिस्मार्त्तानां त्याज्ये[669]त्यवोचामः ।

अथ पक्षवर्द्धिनी

वैवर्त्ते— दर्शश्च पौर्णमासी च सम्पूर्णा वर्द्धते यदि ।
द्वितीयेऽह्नि नृपश्रेष्ठ ! सा भवेत् पक्षवर्धिनी ॥
कुहूराके यदा वृद्धिं प्रयाते पक्षवर्द्धिनी ।
विहायैकादशीं तत्र द्वादशीं समुपोषयेत् ॥[670]

द्वितीयेऽह्नि प्रतिपत्सूर्योदये । अरुणोदयार्थे तु स्वारुणोदयमीषत् स्पृशति परसूर्योदयास्पर्शिनी । पक्षान्तेऽतिप्रसङ्गः । इष्टापत्तौ तादृशाचाराभावः । वृद्धिं प्रयाते इत्यत्र पराह्नः सूर्योदय इति शेषः । विहायेत्यर्थपूर्णामविद्धां वेत्यध्याहार्यम् । पक्षवर्द्धिन्यां विद्धैकादश्यां विद्धोत्तरोन्मीलिन्यामिव पूजाफलाद्यभावात् । सम्पूर्ण इति पदं सूर्योदयात् सूर्यास्तपक्षान्तार्थकम्, न तु चतुर्दशीमिश्रपक्षान्तार्थकम् । सर्वमिदं नृसिंहपरिचर्याविलासानुसारेणो-

---

669- एतदुक्तं कालमाधवे (पृ-208) पद्मपुराणे यथा—
एकादशी द्वादशी च रात्रिशेषे त्रयोदशी ।
त्र्यहस्पृक् तदहोरात्रं नोपोष्य तत् सुतार्थिभिः ॥ इति ।

670- हरिभक्तिविलासे (12/390, 13/270) ।

0- 'इगुपधत्वात्....पक्षवर्द्धिन्याम्' इति स्थाने ग-पुस्तके पाठमात्रं यथा— यदि चोन्मीलिन्युत्तरं काचित् त्रिस्पृशाऽसम्भवेत्तदा तत्र व्यभिचारवारणाय दशमीविद्धोत्तरेतिविशेषणीयम् । इति ।

क्तम् । पूजादिप्रकारश्च तत्रैव । पूर्वपराह्णोभयवृद्धौ तूक्तरीत्या पक्षवर्द्धिनी स्यादेव । तेन प्रतिपत्सूर्योदयवृद्धौ स्वपक्षान्तप्राचीभावकालीना शुद्धनन्दोत्तरा भद्रा पक्षवर्द्धिनीति लक्षणम् ।

एता उन्मीलिन्यादयश्चतस्रः क्रमात् पुष्यश्रवणाद्यृक्षैर्जयाविजयादिसंज्ञां लभन्ते । रोहिण्येव जयन्तीसंज्ञाम्, यथा वैवर्त्ते[671]—

उन्मीलिनी वञ्जुली च त्रिस्पृशा पक्षवर्द्धिनी ।
जया च विजया चैव जयन्ती पापनाशिनी ॥
पुष्यश्रवणपुष्याद्यरोहिणीसंयुतास्तु ताः ।
उपोषिताः समफला द्वादश्योऽष्टौ पृथक् पृथक् ॥

ता उन्मीलिन्यादयः । पुष्याद्यं पुनर्वसु । ऋक्षयोगाज्जयादिरूपेण चतस्रस्तु तदृक्षशून्याश्चतस्र इति एकादशीप्रतिनिधयो द्वादश्योऽष्टावित्यर्थः । जया यथा ब्राह्मे[672]— द्वादश्यां तु सिते पक्षे ऋक्षं यदि पुनर्वसु ।
नाम्ना सा तु जया ख्याता तिथीनामुत्तमा तिथिः ॥
तामुपोष्य नरो घोरे नरके नैव मज्जति ॥

इयं माघशुक्ले कदाचित् फाल्गुनशुक्ले वा सम्भवेत् । ब्राह्मे —

यदा तु शुक्लद्वादश्यां नक्षत्रं श्रवणं भवेत् ।
तदा सा तु महापुण्या द्वादशी विजया स्मृता ॥
होमस्तत्रोपवासश्च सहस्रगुणितो भवेत् ॥

इयं भाद्रशुक्ले कदाचिदाश्विने शुक्ले वा पतेत् । ये तु शुद्धैकादश्युत्तरां वक्ष्यमाणश्रवणद्वादशीं विजयां मन्वानाः पूर्वशुद्धनन्दायां न व्रतमाचरन्ति तत्र वैष्णवाः स्थूलधियो मन्दाः ।

श्रीद्वादशीचतुष्कस्य महतोऽसौ विनिर्णयः ।

इति गोपालभट्टकारिकया[673] पृथगनुक्त्या चतुष्कान्तर्भावसूचनाज्जयाविजया-

---

671- तत्रैव (13/265, 271) ।
672- तत्रैव (13/485, 486) द्वितीयश्लोकोत्तरार्द्धपाठो यथा—
अग्निष्टोमादियज्ञानां फलमाप्नोत्यसंशयम् । इति ।
673- तत्रैव (13/292) स्कान्दवचनमेतत् ।

त्वादेर्वञ्जुलीत्वादित्व्याप्यत्वात् । तद्भिन्नवक्ष्यमाणश्रवणद्वादश्याः कृष्णपक्षेऽपि सम्भवात् फलभेदाद् विष्णुशृङ्खलादिरूपत्वाच्च ततुप्राक्शुद्धनन्दात्यागे वीजाभावात् । अशक्तानां त्याग इति चेदस्तु । शक्तानां त्यागस्त्ववाचनिकः । माधवनारायणादिभिस्तथैवोक्तेरिति स्फुटीकरिष्यते । अन्यथेदृशरीत्या जयाजयन्त्यादावपि शुद्धनन्दात्यागे वैष्णवाचारविरोध इत्यलं बहुना । अष्टाविति जयादिरूपं यथा श्रुतं चतुष्टयमभिप्रेत्य । वस्तुतस्त्वेकाऽप्युन्मीलिनी जयाविजयादिरूपेण चतुर्धा । एवं वञ्जुल्यादित्रयमिति षोडशधा । ऋक्षशून्यानां चतसृणां मेलने तु विंशतिः । अनृक्षचतुर्विधानामपि पुष्यार्द्रादिवशादनेकत्वेऽपि फलान्तराभावात् गौरवाच्च सङ्ख्या नोक्ता । इयांस्तु भेदः । उन्मीलिनीवञ्जुल्यादौ भ्रमादिना पूर्वेकादशीव्रतकरणे फलाभावो न तु दोषः । दशमीविद्धायां भ्रमादिना व्रते तु दोषमाह कौर्मे—

आचरन्त्यबुधा ये त्वेकादशीं दशमीयुताम् ।
शुचये तन्मुखं पश्यन् सूर्यदर्शनमाचरेत् ॥
नमो नारायणायेति जपेद्वाष्टाक्षरं मन्त्रम् ॥

अत्र विद्धव्रतकर्त्तृमुखदर्शने यत् प्रायश्चित्तमुक्तं कर्त्तुस्तदधिकमनादिष्टप्रायश्चित्तमूह्यते । तच्च गायत्रीनारायणमन्त्रसहस्रजपादिकमपराधभञ्जक[0]पूर्णगीता-तदध्यायमात्रपाठादिकं वा । वैष्णवैकदेशिनस्तु यत्र पञ्जिकाद्यशुद्धिवशात् पूर्वपरदिनद्वये एकादशीव्रतसन्देहस्तत्र परदिन एव व्रतम्, पूर्वदिनस्य विद्धत्वशङ्कया त्यागौचित्यात् ।

एकादशी द्वादशी च द्वावेतौ मम वासरौ ।

इत्येकादश्यनुकल्पेन द्वादश्यौचित्याच्चेत्याहुः ।[00]

भान्यर्कोदयमारभ्य प्रवृत्तान्यधिकानि चेत् ।
समानि तानि वा सन्तु ततोऽमीषां व्रतौचिती ॥
किं वा सूर्योदयात् पूर्वं प्रवृत्तान्यधिकानि चेत् ।

0- 'गीताध्यायपाठादिकं वा' इति ग-पुस्तके पाठः ।

00- वैष्णवैकदेशिनस्तु....चेत्याहुः । इति भागो नास्ति ग-पुस्तके ।

समानि वा तदाऽप्येषां व्रताचरणयोग्यता ॥
श्रवणाव्यतिरिक्तेषु नक्षत्रेषु खलु त्रिषु ।
सूर्यास्तमनपर्यन्तं कार्यं द्वादश्यपेक्षणम् ॥
श्रवणे त्वस्तमनतो द्वादश्याञ्च समाप्तताम् ।
गतायामपि तत्रैव व्रतस्योचितता भवेत् ॥[674]

अथैषां पारणम्

वृद्धौ भतिथ्योरधिका तिथिश्चेत् पारणं ततः ।
अन्ते स्याच्चेत्तिथिन्यूना तिथिमध्ये तु पारणम् ॥
द्वादश्यननुवृत्तौ तु वृद्धौ ब्रह्माच्युताक्षयोः ।
तन्मध्ये पारणं वृद्धौ शेषयोस्तदतिक्रमे ॥[675]

तिथिमध्य इति शिवरात्र्यां चतुर्दशीपारणवत् सम्भवपरं फलातिशयकारि, असम्भवे तु शुद्धजयायामेव पारणमिति भावः । ब्रह्माच्युताक्षे रोहिणीश्रवणे । शेषयोः पुष्यपुनर्वस्वोः ऋक्षयोरन्ते पारणम् , न तु तन्मध्य इति भावः ।

श्रीद्वादशीचतुष्कस्य महतोऽसौ विनिर्णयः ।
नृसिंहपरिचर्यादिग्रन्थदृष्ट्या निरूपितः ॥

स्मार्त्तेभ्यो विशेषं सङ्क्षेपादूचे गोपालभट्टः—

एवञ्च द्वादशीवृद्धौ पूर्वोपोष्येति यद्वचः ।
तथा त्याज्या त्रिस्पृशा च कृष्णाऽप्येकादशीति यत् ॥[676]
उपोष्या द्वादशीमिश्रा क्षीणैकादश्यपीति यत् ।
एतत् सर्वं तथान्यच्च वचनं वैष्णवेतरान् ।
गृहस्थान् पुत्रवित्तादीन् तत्परान् प्रतिमन्यताम् ॥[677]

कृष्णा शयनीबोधनीमध्याऽन्या । अन्यच्च वचनं 'पूर्वामुपवसेद् गृही' त्यादिकम् , एकादश्यां श्राद्धवचनं च । श्राद्धतिथौ वृद्धिवशान्मन्दधियां सन्देहे प्राह[678]—

674- तत्रैव (13/286-289) स्कान्दवचनमेतत् । आद्यं तत्र यथा—
जयादीनां चतसृणां तथा व्यक्तं निरूप्यते । इति ।

675- तत्रैव (13/290, 291) स्कान्दवचनमेतत् । 676-तत्रैव (12/398) ।

677- तत्रैव (12/403) गोभिलवचनमेतत् । 678- तत्रैव (12/416) ।

इतिहासपुराणज्ञाः स्मृतिसिद्धान्तवेदिनः ।
वासुदेवप्रिया ये च तदुक्तं वैदिकं भवेत् ॥

एवं यत्रैकादशी स्वारुणोदयात् प्राक् किञ्चित् सती भद्रारुणोदयात् प्राक् छिन्ना षष्ट्यधिका, भद्रा तु जयारुणोदयाव्यापिनी षष्टिनाडिका यदि वा पूर्वोक्त-नन्दा षष्ट्यधिका भद्राऽपि स्वारुणोदयात् प्राक् किञ्चित् सती जयारुणोदया-स्पर्शिनी तदेतत्पक्षद्वयस्योन्मीलिनीवञ्जुलीव हि भावेऽपि पूर्णा तामेकादशीं हित्वा द्वादशीं व्रतयेत् ।

पूर्णाऽप्येकादशी त्याज्या वर्द्धते द्वितयं यदि ।
भद्रा चैव विवर्द्धते........ ॥

इत्यादिवचनैः पूर्णाऽन्यतरोभयवृद्धौ नन्दात्यागात् । न चैतद्वाक्यमुन्मीलि-न्यार्थकम्, मुख्यार्थत्यागे मानाभावात् । माधवीये सामान्यतस्तद्वृद्धौ निषेधार्थस्य तथाचाराच्चेति दिक् । तदुक्तं दिनम् । उन्मीलिनीवञ्जुल्यादौ पूर्वं स्मार्त्तदिनं परदिने विघ्नाशङ्कायां तस्यैवौचित्यात् । तादृशान्यदिनस्य सन्देहायोग्यत्वात् । परन्तु दशमीविद्धात्यागः ।

अथ निर्जला ज्येष्ठशुक्लैकादशी

वृषस्थे मिथुनस्थेऽर्के शुक्ला ह्येकादशी हि या ।
ज्येष्ठे मासि प्रयत्नेन सोपोष्या जलवर्जिता ॥
स्नाने चाचमने चैव वर्जयित्वोदकं बुधः ।
अप्रयत्नादवाप्नोति द्वादशद्वादशीफलम् ॥[679]

द्वादशमासकृतद्वादशीपारणफलमित्यर्थः ।

ततः प्रभाते विमले द्वादश्यां स्नानमाचरेत् ।
जलं सुवर्णं दद्यात्तु द्विजातिभ्यो यथाविधि ॥
भुञ्जीत कृतकृत्यस्तु ब्राह्मणैः सहितो वशी ।
तासां फलमवाप्नोति पुत्र मे नास्ति संशयः ॥[680]

679- तत्रैव (15/20-22) पाद्मवचने तृतीयपङ्क्तिपरमधिक पाठः—
उपयुञ्जीत नैवान्यद् व्रतभङ्गोऽन्यथा भवेत् ॥
उदयादुदयं यावद्वर्जयित्वा जलं बुधः । इति ।

680- तत्रैव (15/23-25) पाद्मवचने तृतीयपङ्क्तिपरमधिकपाठः—

एकादश्यां श्राद्धनिषेधः

पाद्मे[681]— एकादश्यां यदा राम श्राद्धं नैमित्तिकं भवेत् ।
तद्दिनं तु परित्यज्य द्वादश्यां श्राद्धमाचरेत् ॥

तत्रैव[682]— एकादश्यां तु प्राप्तायां मातापित्रोर्मृतेऽहनि ।
द्वादश्यां तत्प्रदातव्यं नोपवासदिने क्वचित् ॥

वैवर्त्ते[683]— ये कुर्वन्ति महीपाल ! श्राद्धं त्वेकादशीदिने ।
त्रयस्ते नरकं यान्ति दाता भोक्ता परेतकः ॥

भोक्ता श्राद्धब्राह्मणः । अत्र श्राद्धशेषभक्षणे व्रतभङ्गादकरणे बीजम् । तेन नवश्राद्धे शेषभक्षणनिषेधान्नवश्राद्धं विना श्राद्धमर्थादेकादशीदिने न कर्त्तव्यम् । यद्यपि स्मार्त्तवत् पितृशेषाघ्राणेऽपीदं निर्वहेत् तथापि निरङ्कुशानि वचनानि नोपपत्तिमवलम्बन्त इति न्यायाददोषः । द्वादश्यां तत्प्रदातव्यमित्यनेनापि पूर्वनिषेधे सिद्धे नोपवासदिन इति पुनर्वचनम् उपवासयोग्यदिनोपलक्षणार्थम् । नक्षत्रं दृष्ट्वा वाचं विसृजेदितिवन्नुम्-ग्रहणं स्वानुस्वारोपलक्षणत्ववत् । तेनैकादशीमात्रवृद्धौ पूर्वपूर्णैकादश्यां न श्राद्धनिरासः, पूर्वस्य व्रतायोग्यत्वात् । न वा वञ्जुलीद्वादश्यामेकादशीक्षयोत्तरशुद्धद्वादश्यां च श्राद्धम्, तयोर्व्रतयोग्यत्वात् । एकादश्यां प्राप्तसङ्क्रान्त्यादिश्राद्धस्य त्वशौचमध्यपतितवल्लोपः । मृतेऽहनीतिस्वारस्यान्मृताहविहितमासिकवार्षिकादीनां तु द्वादश्यां क्रिया, अशौचान्तदिनवत् । श्राद्धान्नं सर्वं विष्णुनिवेदितं कृत्वा पितृभ्यो देयम्,

पितृशेषं तु यो दद्याद्धरये परमात्मने ।
रेतोदाः पितरस्तस्य भवन्ति क्लेशभागिनः ॥ इति नारदीयात्[684] ।
अनिवेद्य हरिं भुञ्जन् सप्तजन्मनि नारकी । इति पाद्माच्च[685] ।

एवं कृतेषु यत्पुण्यं भीमसेन शृणुष्व तत् ।
संवत्सरस्य या मध्ये एकादश्यो भवन्ती हि ॥ इति ।

681- तत्रैव (12/69) । 682- तत्रैव (12/70) ।
683- तत्रैव (12/72) । परेतकः परलोकगतः पितृपुरुषः ।
684- तत्रैव (9/323) ।
685- तत्रैव (9/340) सम्पूर्णपाद्मवचनं यथा—

पितृभ्यो दीयते यत्तु विष्णुनैवेद्यवर्जितम् ।
पितरस्तन्न गृह्णन्ति निःश्वासं पातयन्ति च ॥
"विष्णोर्निवेदितान्नेन यष्टव्यं देवतान्तरम् ।
पितृभ्यश्चापि तद्दद्यात्तद्धयानन्त्याय कल्पते ॥"[686]

देवतान्तरं ब्रह्मशिवसूर्यभिन्नदेवम् । इयं रीतिः स्मार्त्तानामपि समा । वैष्णवविधवाब्राह्मणीनां तु स्मार्त्तयोग्यदिन एवैकादशीजयन्तीरामनवम्याद्युपवासः । वैष्णववाक्येषु बहूषु पुंलिङ्गनिर्देशेन तत्स्त्रीणामग्रहात् । त्रिकः प्रातिपदिकार्थ इति निष्कर्षे 'पशुना यजेते'त्यादिवल्लिङ्गग्रहनियमाच्च । क्वचिद्वैष्णववाक्ये स्त्रीसत्त्वेऽपि बहुविरोधादविवक्षितं तत् । शक्तविधवानां वा स्मार्त्तवैष्णवदिनद्वये व्रतमस्तु । सर्वथा स्मार्त्तात्यागः । इति वैष्णवैकादशीभेदः समाप्तः सोन्मीलिन्यादिः ।

अथ पारणम्

'पारणान्तं व्रतं ज्ञेयमि'त्यादिवचनाद्द्वादशीपारणमत्र मूलम् । तथाहि पाद्मे[687]— महाहानिकरी ह्येषा द्वादशीलङ्घिता नृणाम् ।
कौर्मेऽपि[688]—कलाद्वयं त्रयं वाऽपि द्वादश्यां न त्वतिक्रमेत् ।
त्रयोदश्यां न तत् कुर्याद्द्वादशद्वादशीक्षयात् ॥
विष्णुधर्मोत्तरे[689]—द्वादश्याः प्रथमः पादो हरिवासरसंज्ञकः ।
तमतिक्रम्य कुर्वीत पारणं विष्णुतत्परः ॥
एकादश्यन्त्यपादश्च द्वादश्याः पूर्व एव हि ।
हरिवासर इत्याहुर्भोजनं न समाचरेत् ॥

अम्बरीषगृहे पक्वं यदभीष्टं सदात्मनः ।
अनिवेद्य हरेर्भुञ्जन् सप्तकल्पानि नारकी ॥ इति ।

686- तत्रैव (9/297) पाद्मवचने दद्यात्-स्थाने देयं-पाठः ।

687- करोति धर्महरणमस्नातेव सरस्वती ।
इति तत्रैव (13/238) उत्तरार्द्धपाठः ।

688- तत्रैव (13/241,242) पाठो द्रष्टव्यः ।

689- तत्रैव (13/258,259) ।

प्रथमपाद इत्यस्य वैष्णवग्रन्थे सत्त्वाद् विष्णुतत्परशब्दस्य च वैष्णवार्थकत्वान्न स्मार्त्तपरमिदम् । देवीरहस्ये[690]—

अल्पा चेद् द्वादशी कुर्यान्नित्यं कर्मारुणोदये ।
अत्यल्पा चेन्निशीथोर्द्ध्वं सा माध्याह्निकमेव तत् ॥

स्कान्दे[691]— यदा भवेदतीवाल्पा द्वादशी पारणादिने ।
उषःकाले द्वयं कुर्यात् प्रातर्माध्याह्निकं च यत् ॥

असामर्थ्ये कात्यायनः[692]—

सन्ध्यादिकं भवेन्नित्यं द्वादश्यां पारयेत् कथम् ।
अद्भिस्तु पारयित्वाऽथ नैत्यकान्ते भुजिर्भवेत् ॥

देवलोऽपि[693]— सङ्कटे विषमे प्राप्ते द्वादश्यां पारयेत् कथम् ।
अद्भिस्तु पारणं कुर्यात् पुनर्भुक्तं न दोषकृत् ॥

एतत्प्रतिनिधिदर्शनादेतत्पारणमावश्यकमित्युक्तं प्राक् । इदं स्मार्त्तवैष्णवसमम् ।

शयनपरिवर्त्तनोत्थापनकालाः

मात्स्ये[694]—शेते विष्णुः सदाऽऽषाढे भाद्रे च परिवर्त्तते ।
कार्त्तिके प्रतिबुध्येत शुक्लपक्षे हरेर्दिने ॥

हरेर्दिने एकादश्याम् ।

पञ्चमासान् हरौ सुप्ते देशे तत्र भयं भवेत् ।
ब्रह्महा स भवेद्राजा सङ्ग्रामे भयमाप्नुयात् ॥
स्वपेन्नारायणो देवश्चतुर्थे मासि सङ्क्षयया ।
न वर्द्धयेत् स्वापदिनं तदा लोकः सुखी भवेत् ॥
ततो विबुध्यते विष्णुः श्रीमान् शङ्खगदाधरः ।
कार्त्तिकशुक्लपक्षस्य एकादश्यां तथा सुत ॥

690- तत्रैव (13/245) ।
691- कालमाधवे (पृ-221) च यत्-स्थाने तदा-पाठः ।
692- तत्रैव (पृ 221) 'पारणन्तु निमित्ततः' इति द्वितीयपादपाठः ।
693- तत्रैव (पृ-222) ।
694- तिथितत्त्वे (पृ-112) प्रतिबुध्येत-स्थाने परिबुध्येत-पाठः ।

तस्मिन् समुत्थिते विष्णौ क्रियाः सर्वाः प्रवर्त्तयेत् ॥[696]

स्वापदिनं शयनमासम्, मासस्य त्रिंशद्दिनरूपत्वात् । श्रावणे मलमासे पाते तन्मलशुक्लैकादश्यां हरिशयनम् । भाद्रे मलमासे तु शुद्धश्रावणशुक्लैकादश्यां तत् । एवमाश्विने मलपातेऽपि । पार्श्वपरिवर्त्तनं त्वाश्विनशुक्ल इति भेदः । अयं प्रकारो यद्यपि स्मृतिसार-तिथितत्त्वादौ नास्ति तथापि ऋतुमतिभिः निरङ्कुशोत्कलबालैः[696]

पञ्चमासान् हरौ सुप्ते चतुर्थे मासि सङ्ख्यया ।

इत्यादिदिव्यसिंह[697]धृतवचनवशात् प्रसारितेयं रीतिः । वस्तुतस्त्वसङ्गतमिदम् ।

पञ्चमासान् हरौ सुप्ते चतुर्थे मासि सङ्ख्यया ।

इत्यादेः श्रामण्येऽपि मार्गशीर्षादिपञ्चमासात्रविशयने दोषसूचनात् सार्थकतासिद्धेव । किञ्च,

षष्ट्या तु दिवसैर्मासः कथितो वादरायणैः ।

इति मलमासयुक्तशुद्धमासस्यैकमासत्वमिति पञ्चमासशङ्काऽपि नास्ति । अतएव स्मृतिसारे[698] भविष्योत्तरम्—

मिथुनस्थे सहस्रांशौ स्वापयेन्मधुसूदनम् ।
तुलाराशिगते सूर्ये पुनरुत्थापयेद् ध्रुवम् ॥
अधिमासेऽपि पतिते ह्येष एव विधिः स्मृतः ॥

राजमार्त्तण्डेऽपि—

श्रावणादित्रये मासि अधिमासो भवेद् यदि ।
मिथुनेर्के हरेः स्वापः श्रावण्यां स्यादुपाकृतिः ॥

अपि च श्रावणे मलमासपाते आषाढशुक्लैकादशीतः श्रावणामावास्यावधि-यावद्दिनानि तावतां याम्यायनहरिशयनदोषानाक्रान्तत्वाद् विवाहप्रतिष्ठा-

---

695- कालदीपे (पृ-74) विष्णुः-स्थाने देव, तस्मिन् स्थाने तथा-पाठः ।
696- कालसारकारेण गदाधरेणापीत्थमुपन्यस्तं, यथा—आषाढशुक्लैकादशीमारभ्य कार्त्तिकशुक्लैकादशीपर्यन्तं मासचतुष्टयं हरिशयनम् । इति ।
697- कार्त्तिकान्तमासचतुष्टये शयनं कार्यम् । इति तत्रैवाह दिव्यसिंहः ।
698- स्मृतिसारसङ्ग्रहे (पृ-45) सूर्ये-स्थाने तस्मिन्-पाठः ।

व्रतादिविषयः सुखेन प्रवर्त्तेरन् । न चेष्टापत्तिः, समाचारविरोधात् । एवम्

'ईशानस्य बलिर्विष्णोः शयनं परिवर्त्तनम् ।'

इति मलमासे हरिशयनोत्थापननिषेधक-कालादर्शासङ्गतिः । अन्यथा विनिगमनाविरहात् श्रावणादित्रये मलमासपाते आषाढशुक्ले शयनं कृत्वा आश्विनशुक्लैकादश्यामुत्थापनमिति किं न ब्रूषे । 'कार्त्तिके प्रतिबुध्येते'त्यादिविधिविरोध इति चेत् 'शेते विष्णुः सदाऽऽषाढ' इति त्वन्मते विधिविरोध इति समम् । त्वन्मते आश्विने मलपाते भाद्रे च परिवर्त्तत इति विधिविरोधः । अस्मन्मते च भाद्रे मलमासे इत्यप्युभयं तुल्यम् । न चाश्विनमले पक्षेऽपि परिवर्त्तने भाद्रसितैकादश्यबाधितेति वाच्यम्, मासैक्ये परिवर्त्तनानौचित्यात् । तथात्वेऽप्यस्मत्साम्याच्च । प्रत्युतास्मन्मते पूर्वोक्तव्रतप्रतिष्ठादिदोषशङ्काऽपि नास्तीति वरमाश्विने उत्थापनम् । एवम्

मच्छयने मदुत्थाने मत्पार्श्वपरिवर्त्तने ।[699]

इत्येकम् । तप्तमुद्राधारणमप्यभिन्नमितिलाघवमाचाराविरोधश्च । तथा 'शेते विष्णुः सदाऽऽषाढ' इति सदा-पदमपि सार्थकम् । एवं 'सुप्ते देवे विसर्जयेदि'तिवक्ष्यमाणनिष्पाववृन्ताकादित्यागोऽप्यभिन्नः ।

शयनी-बोधनीमध्ये या कृष्णैकादशी भवेत् ।

इत्यादिकमपि । हेमाद्रिणाऽपि—

अधिमासेऽपि पतिते त्वेष एव विधिक्रमः ।

इत्यादिनाऽऽषाढशुक्ले शयनमुक्तमित्यलं पल्लवितेन । तस्मात् 'पञ्च मासान् हरौ सुप्ते' इति वाक्यलिखनादिकं मार्गमासोत्थापनादिव्यावृत्त्यर्थमित्युल्लेखनाच्च दिव्यसिंहोऽप्यत्र सन्दिग्धदोषस्तदनुगामिनां स्थूलधियामेतत्कदाचारो निश्चितदोषो वेति सम्यग्विभावनीयम् ।

ब्रह्मादीनां शयनकालो यथा राजमार्त्तण्डे[700]—

वह्निः स्कन्दपुरन्दरौ गणपतिः श्रीधर्मराड्भास्करौ

699- फलमूलजलाहारी हृदि शल्यं ममार्पयेत् ।
इति कालसारे ब्रह्मवैवर्त्तवचने उत्तरार्द्धपाठः ।
700- राजमार्त्तण्डे-श्लोकः—1133 (पृ-109) ।

वायुः पर्वतपुत्रिका वसुमती तोयाधिपः केशवः ।
ब्रह्मा विष्णुशिवादयः प्रतिपदारम्भे तिथौ शेरते
उत्तिष्ठन्त्यमुना क्रमेण वरदाः स्वे स्वे दिने पूजिताः ॥
विष्णुर्दिवा न स्वपिति न च रात्रौ प्रबुध्यते ।[701]

एवमन्येषां देवानाम् । भविष्ये[702]—

मैत्राद्यपादे स्वपितीह विष्णुर्वैष्णव्यमध्ये परिवर्त्तते च ।
पौष्णावसाने च सुरारिहन्ता प्रबुध्यते मासचतुष्टयेन ॥
निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्त्तनम् ।
अन्यत्र पादयोगेऽपि द्वादश्यामेव कारयेत् ॥

अन्यत्र दशमीप्रतिपदो रात्र्यादीतरकाले ।

किं तन्मैत्राद्यपादेन दशम्यंशेन यो दिवा ।
पौष्णशेषेण किं तेन प्रतिपद्यथ यो निशि ॥

यो मैत्राद्यपादो दिवा प्राप्तस्तेन किम् । दशम्या अंशो यत्र पादे तेन पादेन वा किमित्यर्थः । अत्र दशमीप्रतिपदोर्वर्जनादन्येष्वेकादश्यादिपञ्चतिथिषु ऋक्षपादलाभे द्वादशीं विनाऽपि हरिशयनादिः पाक्षिक इति केचित्[703] । वाराहे[704]—

द्वादश्यां सन्धिसमये नक्षत्राणामसम्भवे ।
आ-भा-का-सितपक्षेषु शयनावर्त्तनादिकम् ॥
मैत्राद्यश्च दिवाभागे द्वादश्यां चेत् समाप्यते ।
मैत्रे निश्येव शयनं तत्र रात्रेः प्रधानता ॥

अन्यत्रापि[705]—रेवत्यन्तो यदा रात्रौ द्वादश्या च समायुतः ।
तदा विबुध्यते विष्णुर्दिनान्ते प्राप्य रेवतीम् ॥

701- द्वादश्यामृक्षसंयोगे पादयोगो न कारणम् ।
इति तिथितत्त्वे (पृ-112) विष्णुधर्मोत्तरवचने उत्तरार्द्धपाठः ।
702- तत्रैव (स्मृ० त०-I-पृ-112) ।
703- रघुनन्दनोऽपि तिथितत्त्वे (पृ-112) इत्थं प्रतिपादयति ।
704- तत्रैव (पृ-112) । 705- तत्रैव (पृ-112) ।

दिनान्ते त्रिधाविभक्तदिनतृतीयांशे । एवं द्वादशीसन्ध्यायां श्रवणमध्येऽपि न परिवर्त्तनम् , किन्तु तत्र सन्ध्याकाले श्रवणाद्यभागे;

द्वादश्यामृक्षसंयोगे पादयोगो न कारणम् ।
अप्राप्ते द्वादशीमृक्षे उत्थानशयने हरेः ।
पादयोगेन कर्त्तव्येनाहोरात्रं विचिन्तयेत् ।।

इति विष्णुधर्मसामान्यवचनात् ।

शतानन्दः[706]—

यस्य यस्य तु देवस्य यन्नक्षत्रं तिथिश्च या ।
तस्य देवस्य तस्मिंस्तु शयनवर्त्तनादिकम् ।।

शयनमन्त्रो यथा—

शेषपर्यङ्कवर्येऽस्मिन् फणामणिगणामले ।
श्वेतद्वीपान्तरे देव कुरु निद्रां नमोऽस्त्विति ।।

प्रार्थना यथा—

सुप्ते त्वयि जगन्नाथे जगत् सुप्तं भवेदिदम् ।
विबुद्धे त्वयि बुध्येत प्रसन्नो मे भवाच्युत ! ।।

परिवर्त्तनमन्त्रो यथा—

वासुदेव ! जगन्नाथ ! प्राप्तेयं द्वादशी तव ।
पार्श्वेन परिवर्त्तस्व सुखं स्वपिहि माधव ! ।।

सुप्ते त्वयीति प्रागवत् । विबोधमन्त्रो यथा—

उत्तिष्ठोत्तिष्ठ गोविन्द ! त्यज निद्रां जगत्पते ! ।
त्वयि चोत्थीयमाने तु उत्थितं भुवनत्रयम् ।।

सुप्ते त्वयीति प्रागवत् । इदं वैष्णवानामपि समम् ।

माघशुक्ला भैम्येकादशी

माघमासे शुक्लपक्षे पुष्यर्क्षेण युता पुरा ।
एकादशी तथा चैव भीमेन समुपोषिता ।।

706- स्मृतिसारसङ्ग्रहे (पृ-45) ।

अभ्यर्चयंस्तु वृतं कृत्वा पितृणामनृणो भवेत् ।
भीमद्वादशीविख्याता प्राणिनां पुण्यवर्द्धिनी ॥
नक्षत्रेण विनाऽप्येषा ब्रह्महत्यां विनाशयेत् ॥[707]
अतः पुण्यामिमां भीमतिथिं पापप्रणाशिनीम् ।
उपोष्य विधिनाऽनेन गच्छेद् विष्णोः परं पदम् ॥[708]

द्वादशी

इयं पूर्वविद्धा गृह्यते युग्मात् ।

द्वादशी च प्रकर्त्तव्या एकादश्या युता विभो ! ।[709]

द्वादश्यामुपवासेन सिद्धार्थो नृप ! सर्वशः ।
चक्रवर्त्तित्वमतुलं संप्राप्नोत्यतुलां श्रियम् ॥[710]

पिपीलकद्वादशी

वैशाखे शुक्लपक्षे तु द्वादशी वैष्णवी तिथिः ।
तस्यां शीतलतोयेन स्नापयेत् केशवं शुचिः ॥[711]

चम्पकद्वादशी

भविष्ये[712]—

ज्येष्ठे मासि सिते पक्षे द्वादश्यां चम्पकैः शुभैः ।
पुष्पैरभ्यर्च्य गोविन्दं नरः किमनुशोचति ॥

द्वैधे सामान्यन्यायः । बृहन्नारदीये मार्गादिशुक्लद्वादशीमात्रे विशेषो ज्ञेयः ।

श्रवणद्वादशी

शुक्ला वा यदि वा कृष्णा द्वादशी श्रवणान्विता ।
तयोरेवोपवासश्च त्रयोदश्यां तु पारणम् ॥[713]

707- कालसारे गारुडवचनमेतत् ।
708- तिथितत्त्वे (पृ-113) कालसारे च मात्स्यवचनमेतत् ।
709- कालमाधवे (पृ-224) स्कान्दवचने उत्तरार्द्धपाठो यथा—
सदा कार्या च विद्वद्भिर्विष्णुभक्तैश्च मानवैः । इति ।
710- तत्रैव (पृ-225) मार्कण्डेयवचनमेतत् । 711- तिथितत्त्वे (पृ 114) ।
712- कालसारे पुष्पैः- स्थाने शुद्धैः-पाठः ।

शुक्ला तु प्रायशो भाद्रे स्यात् , आश्विने तु कदाचित् । कृष्णा फाल्गुन-चैत्रयोः । मात्स्ये—

द्वादशी श्रवणायुक्ता सर्वपापहरा तिथिः ॥
मासि भाद्रपदे शुक्ला श्रवणेन समन्विता ।
महती द्वादशी ज्ञेया उपवासे महाफला ॥
सङ्गवे सरितां पुण्ये सुस्नातस्तामुपोषितः ।
अयत्नादेव चाप्नोति द्वादशद्वादशीफलम् ॥
शुक्ला भाद्रपदे स्वर्गं कृष्णा कलुषसंक्षयम् ।
फाल्गुने कुरुते मोक्षमपि ब्रह्मवधान्नृणाम् ॥

अत्र स्वर्गपापक्षयमोक्षाणां मिलितानामेव शुक्लकृष्णयोः प्रत्येकं फलत्वम् , यथासङ्ख्याभावात् । तेन नित्यकाम्यमिदम् । यद्यपि

द्वादश्यां तु भवेद् योगः श्रवणस्य दिवैव हि ।
तदोपवासः कर्त्तव्यो वैष्णवैः सर्वदाऽपि च ॥

इति दिवामात्रे ऋक्षेऽप्येतद् व्रतसूचकमिदं वाक्यं दिव्यसिंहेनो[714]पन्यस्तं तदेतन्माधव-रघुनन्दन-विश्वनाथादिमहाप्रामाणिकैरनुक्तेः सन्दिग्धप्रामाण्यकम् । प्रामाण्ये वा बुधवारवद्रात्र्यपेक्षया दिवसे फलाधिक्यद्योतकम्[715] ।

तिथिनक्षत्रयोर्योग इत्याद्यं यत्तु दर्शितम् ।
तेनाल्पकालसंयोगेऽप्यष्टयामिकतेष्यते ॥[716]

इति वचनात् ।

तिथिनक्षत्रयोर्योगे योगश्चैव नराधिप ।
द्विकलो यदि लभ्येत स ज्ञेयो ह्यष्टयामिकः ॥

इति श्रवणद्वादशीं प्रकृत्य नारदीयाच्च[717] । एवञ्च

713- कालसारे नारदीयवचनमेतत् । 714- कालदीपे (पृ-76) ।
715- बुधवारयुक्तश्रवणद्वादश्यां फलाधिक्यं यथा कालदीपे (पृ-75)—
द्वादशी श्रवणोपेता सर्वपापहरा तिथिः ।
बुधवारसमायुक्ता ततः शतगुणा भवेत् ॥ इति ।
716-हरिभक्तिविलासे (15/601) मात्स्यवचनमेतत् । 717-तत्रैव(15/589) ।

रात्रौ च श्रवणं नैव दिवा चैव कलां स्पृशेत् ।
सा तिथिः सर्वकाम्या स्यात्तत्कृतं चाक्षयं भवेत् ॥

इति कौर्मवाक्यमपि दिवा फलाधिक्यबोधकम् । एततसाम्यात् सर्वपदाच्च । अतएव कालनिर्णयदीपिकायामुक्तम्—निशि तु भेऽप्यह्नो मुखे कल्पनमिति । अह्नो मुखे प्रभाते सङ्कल्प इत्यर्थः ।

पारणं तिथिवृद्धौ तु द्वादश्यामुडुसङ्क्षयात् ।
वृद्धौ कुर्यात् त्रयोदश्यां तत्र दोषो न विद्यते ॥

इति वचने वृद्धाविल्यस्य नक्षत्रवृद्ध्यर्थत्वादनृक्षद्वादशीवृद्धावुत्तरद्वादश्यां पारणम् । सक्षद्वादशीवृद्धौ तु त्रयोदश्यामिति वदतः कौमुदीकार[718]स्याप्ययं पक्षोऽभिप्रेतः । हेमाद्रिणाऽपि 'मुहूर्त्तमप्यहोरात्र' इति जन्माष्टमी-रोहिणी-न्यायं प्रदर्श्य द्वादश्या यत्र क्वापि मुहूर्त्ते श्रवणाया ईषद्योगेऽपि श्रवणद्वादशी-त्यभिहितं जयन्तीवत् । तस्माद्दिवैवास्तमनप्रदोषादौ श्रवणेऽपि श्रवणद्वादशी । दिवामात्रे तु फलाधिक्यम् । वस्तुतः श्रवणयोगेऽत्रोदयास्तमनार्थेतराव-च्छिन्न एव रामनवम्यादिवदिति तत्त्वम् । यत्तु रघुनन्दनेनोक्तम्[719]—'यद्येकादशीव्रतदिने श्रवणं नास्ति किन्तु द्वादशीमात्रे तत् तदैव श्रवणद्वादश्यु-पवासः', दिनद्वये श्रवणे तु न स इति तच्च वचनाभावान्माधव-स्मृतिसार-कारादिप्रधानैरलिखितत्वाच्च नादरणीयम् । तथापि वामनजयन्तीकृतोपवासस्य नित्यत्वेन दुर्निवारत्वाच्च । न च कृतैकादशीव्रतसद्वादश्यां पारणाभावे व्रतभङ्ग इति शङ्क्यम् ।

एकादशीमुपोष्यैव द्वादशीं समुपोषयेत् ।
न चात्र विधिलोपः स्यादुभयोर्देवता हरिः ॥

इति विष्णुधर्मोत्तरात् । एवकारस्य समुपोषयेदित्यन्वयो वक्ष्यते । विधिलोपः

718- 'वृद्धौ च नक्षत्रस्येति शेषः' इति कृत्यकौमुद्याम् (पृ-76) उक्तम् ।

719- यदा त्वेकादश्युपवासदिने श्रवणं नास्ति परदिने द्वादश्यां तत् तदोप-वासः.... । उभयदिने तल्लाभे तु एकादशीयुता ग्राह्या । इति तिथितत्त्वे (पृ-114) ।

पारणाभावकृत एकादशीव्रतलोपः हि शेषः,

असमाप्ते व्रते पूर्वे नैव कुर्याद् व्रतान्तरम् ।
एकदैवतमुद्दिश्य कर्त्तव्यं नान्यथा क्वचित् ॥[720]

इति वचनाच्च । एकादश्यसामर्थ्येऽपीदमावश्यकम् ।

एवमेकादशीं त्यक्त्वा द्वादश्यां समपोषणात् ।
पूर्ववासरजं पुण्यं हन्त्यपुण्यं पुरा कृतम् ॥
उपोष्य द्वादशीं पुण्यां विष्णुऋक्षेण संयुताम् ।
एकादश्युद्भवं पुण्यं नरः प्राप्नोत्यसंशयम् ॥[721]

तेनात्रोदकपारणमपि नेति वक्ष्यामः । विष्णुपुराणे—

द्वादश्यां तु यदा विप्र नक्षत्रं श्रवणं भवेत् ।
द्वादशी च तदोपोष्या सन्त्यज्यैकादशीतिथिम् ॥

अन्यत्र च—एकादश्या विशुद्धत्वे द्वादश्याश्च परेऽहनि ।

श्रवणे सति शक्तस्य व्रतयुग्मं विधीयते ॥[722]

शक्तस्येति नपुंसकैकशेषः । एवं सति यदा स्वल्पैकादशीयुक्ता श्रवणद्वादशी क्षीणा तदा द्वयोस्तन्त्रणैकोपवासः । स च श्रवणद्वादशीकृत एव । नित्यकाम्यत्वादेकादशीं हित्वैतत्क्रियावचनेनास्याबलवत्त्वाच्च । तेन कृष्णैकादशीत्रिस्पृशानिषेधशङ्काऽत्र गृहिभिर्न विधेयेति मन्तव्यम् । इयं शुद्धाधिका पूर्वोपोष्या, परस्य मलत्वात् । द्वादशीवृद्धिकलायां पारणस्य वक्ष्यमाणत्वाच्च । विष्णुशृङ्खले त्विदमप्यन्तर्गतं वक्ष्यते । इदं व्रतं स्मार्त्तवैष्णवतुल्यम् ।

श्रवणेन युता चेत्स्याद् द्वादशी सा हि वैष्णवैः ।
स्मार्त्तैश्चोपोषणीया स्यात्त्यजेदेकादशीं तदा ॥

इति माधवीयात्[723] । वैष्णवानां प्रायशोऽत्रैकादशीत्यागाचारः । स च

720- तिथितत्त्वे (पृ-114) ।

721- हरिभक्तिविलासे (15/587,585) नारदवचने प्रथमश्लोके चतुर्थपादे 'सर्वं प्राप्नोत्यसंशयम्' इति पाठः ।

722- तत्रैव (15/581) यमवचनमेतत् । 723-कालमाधवे (पृ-14) ।

शाक्तानामयुक्तः । लक्ष्मीनारायणोपासकाः केचिदुत्तराषाढविद्धां पूर्वां श्रवणद्वादशीं हित्वा परां तामुपवसन्ति । परेद्यु स्तदसत्त्वे पूर्वामेव । फाल्गुन-कृष्णायामस्यां विध्यन्तरं कल्पतरावुक्तम्—

कृष्णायां फाल्गुने मासि द्वादश्यां श्रवणे सति ।
चकार भगवान् विष्णुः पिण्डनिर्वपणं महत् ॥
पितामहेभ्यः श्राद्धं तु तिलैश्च कृतवान् पुरा ।
सोपवासो हरिं तस्यां तत्र सम्पूजयेत्तिलैः ॥
तिलैरभ्यर्च्चयेद्देवांस्तिलैश्च जुहुयात्तदा ।
तिलतैलेन दीपांश्च दद्यादेव गृहेष्वपि ॥
तिलान् दद्याच्च विप्रेभ्यः पितृभ्यश्च तिलोदकम् ।
तिलांश्च भक्षयेत्तत्र धर्मवृद्ध्यर्थमात्मनः ॥ इति ।

अथैतत् पारणम्

दशमीद्वादश्यादिपारणवदस्यास्त्रयोदशीपारणं नित्यम् ।

त्रयोदश्यां तु शुद्धायां पारणं पृथिवीफलम् ।
शतयज्ञाधिकं वाऽपि नरः प्राप्नोत्यसंशयम् ॥

इति नारदीयात्[724] ।

उपोष्या द्वादशी शुद्धा त्रयोदश्यां तु पारणम् ।

इति मार्कण्डेयाच्च । तच्च श्रवणावसाने शुद्धत्रयोदश्यामिति गोपालभट्टः,

त्रयोदश्यां पारणं हि श्रवणेऽपि निषिध्यते ।[725] इति ।

एतद् द्वादशीपरदिने तद् वृद्धिकलायां पारणम् ।

कलाद्वयं त्रयं वाऽपि द्वादशीं न त्वतिक्रमेत् ।
पारणे मरणे नृणां तिथिस्तात्कालिकी स्मृता ॥

इति नारदीयात्[726] । यदि द्वित्रिकलाऽनतिक्रमस्तदा किमु दण्डादेरिति ।

724- तत्रैव (पृ-222) ।

725- हरिभक्तिविलासे (15/606) निषिध्यते-स्थाने निषेत्स्यते-पाठः ।

726- कालमाधवे (पृ-221) ।

इदञ्च पारणं सर्क्षायामनृक्षायां वा वृद्धिकलायामिति माधवाचार्यमतम्[727], पारणवाक्ये विशेषाभावात् । कौमुदीकारस्तु[728] द्वादशीवृद्धिकलाया अनृक्षत्वे तत्र पारणम् । सर्क्षत्वे तु त्रयोदश्यां तत् ।

पारणं तिथिवृद्धौ तु द्वादश्यामुडुसङ्क्षयात् ।

वृद्धौ कुर्यात्त्रयोदश्यां ततो दोषो न विद्यते ॥

इति वचनात् । वृद्धौ ऋक्षस्य वृद्धावित्याचष्टे । अन्नाद्यसम्भवे जलपारणम्, 'सङ्कटे विषम' इति प्राग्वत् । एकादशीमुपोष्य श्रवणद्वादश्यामशितानशितं जलपारणमिति स्मृतिसारः[729] । तदसत् । 'एकादशीमुपोष्यैवे'त्येवकारस्य समुपोषयेदेवेत्यन्वयेन तस्याविधेयत्वात् । अन्यथा 'न चात्र विधिलोपः स्यादि'-त्युत्तरासङ्गतिः । अतएव

असमाप्ते व्रते पूर्वे नैव कुर्याद् व्रतान्तरम् ।

इत्यस्याप्यत्र न प्रसरः ।

727- तत्रैव (पृ.पृ-221-222) माधवाचार्यः कथयति यथा—यदा त्रयोदश्यां द्वादश्याः कलाद्वयञ्चाप्युदये सम्भवति तदा द्वादशीकाल एव पारणं कार्यम् ।.... ननु द्वादश्यतिक्रमेऽपि नास्ति दोषः, 'सा तथिः सकला ज्ञेया' इति वचनेन साकल्याभिधानादिति चेत् । नैवम्, साकल्यस्य स्नानादिविषयत्वात् । वाक्यशेषे 'स्नानदानजपादिषु' इत्यभिधानात् । पारणे तु न साकल्यवचनं प्रवर्त्तते, 'तिथिस्तात्कालिकी स्मृता' इति वचनात् ।....यदा कलयाऽपि द्वादशी नास्ति तदा त्रयोदश्यामपि पारणं कुर्यात् । इति ।

728- कृत्यकौमुद्याम् (पृ-76) ।

729- स्मृतिसारसङ्ग्रहे (पृ-99) ग्रन्थकर्त्रोक्तं यथा—नन्वेकं व्रतमसमाप्य व्रतान्तरमनुष्ठातुमशक्यम्,

असमाप्ते व्रते पूर्वे नैव कुर्याद् व्रतान्तरम् ।

इति शास्त्रात् । समाप्तिश्च विधिलोपं प्राप्नोति । नैवम् । अद्भिः पारणं कृत्वा द्वितीयोपवासस्योपवासानन्तरं शक्यत्वात् । तादृशं पारणमशितानशितोभयात्मकम् । तत्राशितानशितत्वात् पूर्वोपवासं परिसमापयति, अनशितरूपत्वेनोत्तरोपवासं न निन्दति । तथाहि—

अशिताऽनशिता यस्मादापोविन्दुभिरीरिता ।

इति स्मरणात् उदकपारणेनोपवासद्वयं निर्वाह्यम् । इति ।

वामनजन्म

नभस्ये शुक्लपक्षे च द्वादश्यां श्रवणोडुनि ।
बलेस्तु बन्धनार्थाय मध्याह्ने वामनो ह्यभूत् ॥
जयन्ती वामनाख्या स्यात् सैवोपोष्या नरोत्तमैः ।
सर्वपापप्रशमनी सर्वकामप्रदायिनी ॥

उत्तमपदस्य सुज्ञानचारार्थकत्वेन जातिपरत्वाभावः । तेन वक्ष्यमाणसामान्यतरपदार्थेन न विरोधः । रामनवम्यादिवत् सर्वमिहानेयम् । मध्याह्ने जन्मकालः । श्रवणे फलाधिक्यम् ।

द्वादश्याञ्च निराहारो वामनं पूजयाम्यहम् ।

इति भविष्योत्तर[730]वाक्यलिङ्गात् केवलद्वादश्यामप्युपवासः ।

श्रवणद्वादशीयोगे समुपोष्य जनार्द्दनम् ।[731]

इति वचनाच्छ्रवणान्वितायामपि । मध्याह्नश्रवणं बलवत्, खण्डकालापेक्षया नक्षत्रप्राबल्यस्य प्रागुक्तेः । द्वादशीद्वैधे मध्याह्नव्यापिनी ग्राह्या । उभयेद्युर्मध्याह्नव्याप्तौ तदव्याप्तौ च युग्मात् पूर्वग्रहः । एवं सश्रवणे पूर्वेद्युर्मध्याह्नव्याप्तौ परेद्युर्मध्याह्नाव्याप्तौ श्रवणे च परा, ऋक्षाणां जन्मस्थाने प्राबल्यात् । श्रवणं चोदयास्तान्यतरावच्छिन्नं प्रागुक्तम् ।

अथ वैष्णवश्रृङ्खले विशेषः ।

विष्णुधर्मोत्तरे[732]—

एकादशी द्वादशी च वैष्णव्यमिति तत्तु वै ।
तद् विष्णुश्रृङ्खलं नाम विष्णुसायुज्यकृद्भवेत् ॥
तस्मिन्नुपोष्य विधिवद् गच्छेच्छ्वेतपुरं नरः ॥
द्वादश्यामुपवासोऽत्र द्वादश्यामेव पारणम् ।
निषिद्धमपि कर्त्तव्यमाज्ञेयं परमेश्वरी ॥

730- कृत्यकौमुद्यां (पृ-74) वचनस्यास्य पूर्वार्द्धपाठो यथा—
निषिद्धमपि कर्त्तव्यं त्रयोदश्याञ्च पारणम् । इति ।

731- कृत्यकौमुद्यां (पृ-75) वह्निपुराणवचने उत्तरार्द्धपाठो यथा—
अर्च्चयित्वा विधानेन अन्नं भक्षे परेऽहनि ॥ इति ।

732- तत्रैव (पृ-76) श्वेतपुरं-स्थाने विष्णुपुरं-पाठः ।

वैष्णव्यं श्रवणा । श्वेतपुरं श्वेतद्वीपम् । एकादश्यादित्रयाणामेकस्मिन् दिवसे मेलने विष्णुशृङ्खलं न त्वेकरात्रिमात्रे, श्रवणद्वादश्या एव नन्दायुक्तत्वे विष्णुशृङ्खलसंज्ञत्वात् । श्रवणद्वादश्याश्च दिवा निर्वचनात् । अन्यथा सदशमीकैकादशीक्षये सश्रवणेऽन्ते द्वादशीयोगादतिव्याप्तिः स्यात्, क्षयतिथेस्त्रिस्पृशत्वात् । यद्वा 'एकादशी द्वादशी चे'त्यत्र कामस्त्रयोदशी । दीर्घे पूर्वान्तवद्भावे नञन्तत्वात् सु-लोपः । एवकारेण व्यवच्छेदः सजातीयतिथे र्दशम्या एव, नान्यर्क्षयोगादेव । एतन्मेलनं ऋद्व्यवायवद् यथासम्भवम् । तेन सदशमीकनन्दाक्षये विष्णुशृङ्खलत्वव्युदासः । एवञ्चास्य रात्रियोगः अप्यव्याहतः । स्पृशेदेकादशीमिति वक्ष्यमाणैकादशीजहितत्रयोदशीमित्यर्थः । तेन द्वयोः साम्यम् । तथाहि मात्स्ये[733]—

> द्वादशी श्रवणास्पृष्टा स्पृशेदेकादशीं यदि ।
> स एव वैष्णवो योगो विष्णुशृङ्खलसंज्ञितः ॥

तेनोत्तरदिने मध्याह्ने तदतिरिक्तकाले वा श्रवणद्वादश्या योगेऽपि विष्णुशृङ्खल एव बहुव्यापिप्राधान्यात्तन्त्रेणोपवासो नोत्तरदिने । जयन्त्यपराजितादाविव केवलाद्योगस्य बलवत्त्वादिति साम्प्रदायिकाः ।

> शुक्ला वा यदि वा कृष्णा द्वादशी श्रवणान्विता ।
> तयोरेवोपवासश्च त्रयोदश्यां तु पारणम् ॥

इति नारदीयात् । न च

> मुहूर्तत्रितयं वाऽपि सङ्गवान्तमथापि वा ।
> श्रवणद्वादशी चैव सङ्गवे त्वनुवर्त्तते ।
> श्रवणद्वादशी सा स्यादुपोष्या विष्णुतत्परैः ॥

इति श्रवणद्वादशीकृतमुपवासान्तरं स्यादिति वाच्यम् । द्वादश्यामेव पारणमित्येवकारेण सति सम्भवे द्वादशीपारणस्य वक्ष्यमाणत्वात् । जयन्त्यां जन्माष्टम्या इव विष्णुशृङ्खले श्रवणद्वादश्या अन्तर्भावेन पृथक्तत्करणानौचित्याच्च । न चात्रापि द्वादशीपारणविधाने एकादश्या अपि संयोगात्

733- तत्रैव (पृ-76) ।

तदन्तर्गता किं न स्यादिति वाच्यम् । श्रवणद्वादश्या एकादशीतो बलवत्त्वस्य प्राक्कथनेन प्रधानं द्वादश्यैव, तदौचित्यात् ।

द्वादश्यामुपवासोऽत्र द्वादश्यामेव पारणम् ।

इत्यनेन द्वादश्या एव प्राधान्यप्रत्ययाच्च । अतएव कालनिर्णयदीपिकाया-मुक्तम्—

नन्दायुग्यदि विष्णुशृङ्खलमिति ख्याता श्रुतिद्वादशी
तत्रोपोष्य तिथेस्तिथिश्रवणयोर्वाऽन्ते व्रतं पारयेत् ।

तेन विष्णुशृङ्खले त्रिस्पृशाकृष्णैकादशीशङ्का नेत्युक्तम् । नापि वामनजन्म-कृतं तिथिभान्तपारणमिति, वामनजन्मव्रतस्यैकादशीवदत्रान्तर्भावात् ।

न च विष्णुशृङ्खले एकादश्या अन्तर्भावेऽपि परेद्युः श्रवणद्वादशी-सत्त्वेन वामनजन्मकृतं व्रतान्तरं प्रसज्यताम् ।

द्वादश्यामुपवासोऽत्र द्वादश्यामेव पारणम् ।

इति त्वन्यत्र गतार्थमिति वाच्यम् ।

द्वादशी च प्रकर्त्तव्या एकादश्या युता विभो ।

इति सामान्यात्तज्जयन्त्या अप्येकादशीवदत्रान्तर्भावात्, विष्णुशृङ्खले वामनावताराच्च । अस्तु वा मतान्तरे रामनवम्यां दशमीक्षय इवात्रापि मध्याह्ने वामनजयन्तीकृतं पारणमिति सन्तुष्यताम् । इदं विष्णुशृङ्खलं फाल्गुनचैत्रकृष्णेऽपि स्यात् । वैष्णवैकदेशिनस्तु विष्णुशृङ्खलेऽपि परदिने श्रवणद्वादश्योर्योगे व्रतद्वयम्, परदिनद्वादश्यां श्रवणाविरहे त्वेकमेव व्रतं पूर्वेद्यु-स्तत्रोपात्तमित्याचक्षते । तन्मते तिथेस्तिथिश्रवणयोर्वाऽन्ते व्रतं पारयेदिति नृसिंहाचार्योक्तं तिथिभान्तपारणमनुकूलमपि द्वादश्यामेव पारणमितिवाक्य-विरोधाद् विष्णुशृङ्खले श्रवणद्वादश्या गतार्थत्वात् ।

तिथिक्षयेण भोक्तव्यं द्वादशीं नैव लङ्घयेत् ।

इति गोपालभट्टकारिका[734]विरोधाच्च नादेयम् । इदं बुधवारे देवदुन्दुभि-

734- हरिभक्तिविलासे (15/619) नारदीयवचने पूर्वार्द्धं यथा—
विशेषेण महीपाल ! श्रवणं वर्द्धते यदि । इति ।

नामकम् । यथा[735]—

द्वादश्येकादशी सौम्यः श्रवणञ्च चतुष्टयम् ।

देवदुन्दुभि नामाऽयं यज्ञायुतफलप्रदः ॥

विष्णुशृङ्खले वामनजन्मान्तर्भावं स्पष्टमाचष्टे गोपालभट्टः[736]—

दिनद्वयेऽपि श्रवणाभावे तद्योगहानितः ।

एकादश्यामुपोष्यैव द्वादश्यां वामनं यजेत् ॥

तयोर्विष्णुशृङ्खलश्रवणद्वादश्योर्यजेत् । वामनजन्मकृतं पृथक्कुर्यात् । अन्यथा पूर्वयोगेऽन्तर्भूतमितिभावः ।

पारणम्

इदं पारणं शिवरात्रौ चतुर्दशीपारणवद् द्वादश्यां प्रशस्तम् ।

द्वादश्यामुपवासोऽत्र द्वादश्यामेव पारणम् ।

इति पूर्वं दर्शनात् निषिद्धम् । तिथिभान्ते च पारणमि'त्यादिना स्वतियौ निषिद्धमित्यर्थः । तथाहि हरिभक्तिविलासे विष्णुशृङ्खले गौतमीयम्[737]—

यदृक्षं वा तिथिर्वाऽपि रात्रिं व्याप्य व्यवस्थिता ।

दिवसे पारणं वाऽपि अन्यथा पतनं भवेत् ॥

किञ्च,

ऋक्षस्य सति चाधिक्ये तिथिमध्ये च पारणम् । इति ।

इदञ्च सम्भवपरम् । तेन द्वादशीक्षये विष्णुशृङ्खले त्रयोदश्यामेव पारणं स्यात् । तदाह गोपालभट्टः[738]—

योगोऽयमन्यो द्वादश्याः क्षय एवेति लक्ष्यते ।

द्वादश्यामुपवासाच्च त्रयोदश्याञ्च पारणात् ॥

त्रयोदश्यां पारणं हि श्रवणेऽपि निषिध्यते ॥ इति ।

एतेन 'तत्रोपोष्य तिथेस्तिथिश्रवणयोर्वाऽन्ते व्रतं पारयेदि'ति नृसिंहाचार्योक्तं तिथिभान्तपारणं द्वादशीक्षयपरतया वा कथञ्चित् समाधेयम् ।

735- तत्रैव (15/607) विष्णुधर्मोत्तरवचने देवदुन्दुभियोगोऽयं-पाठः ।

736- तत्रैव (15/611) विष्णुधर्मोत्तरवचनमेतत् । 737- तत्रैव(15/628) ।

738- तत्रैव (15/606) विष्णुधर्मोत्तरवचने निषिध्यते-स्थाने निषेत्स्यते ।

शक्रोत्थापनम्

द्वादश्यां तु सिते पक्षे मासि भाद्रपदे तथा ।
शक्रमुत्थापयेद्राजा विश्वश्रवणवासरे ॥[739]

विश्वमुत्तराषाढा । अविश्वे विश्वशून्येऽकारप्रश्लेषः । श्रवणयुक्तद्वादश्यामित्यर्थः । सश्रवणद्वादश्यलाभे यत्तिथौ श्रवणं युज्येत तत्रैतत्कार्यम् ।

भाद्रे मासि सिते पक्षे श्रवणाद्वादशी यदि ।
शक्रमुत्थापयेत्तत्र श्रवणे तद् वियोगतः ॥ (बृह्माण्डपु०)

इतिवचनात् । तद् वियोगतः सार्वविभक्तिकस्तसिः[740] । श्रवणद्वादश्यलाभे त्रयोदश्यादिश्रवण इत्यर्थः । भविष्ये—

श्रवणाभरणीं यावत् पूजां कृत्वा विधानतः ।
रात्रौ विसर्जयेदेवं मन्त्रेणानेन पाण्डव ॥

कालिकापुराणे[741]—एवं कृत्वा दिवाभागे शक्रोत्थापनमादितः ।

श्रवणर्क्षयुतायां तु द्वादश्यां पार्थिवः स्वयम् ।
अन्तपादे भरण्यां तु निशि शक्रं विसर्जयेत् ॥

739- कृत्यकौमुद्यां (पृ-70) बृह्माण्डपुराणवचनमेतत् । अत्र कृत्यकौमुदीकारो बृहस्पतिः-विश्वसङ्कुलो यः श्रवणवारस्तु तत्र । विश्वे तविशेषणाच्छ्रवणाद्वादशीयोगाप्राप्तौ तिथ्यन्तरेऽपि श्रवणाद्यपाद एव शक्रमुत्थापयेदित्यिवगम्यते । अथ विश्वश्रवणावासरव्यतीपाते उत्तराषाढाश्रवणाधनिष्ठानामन्यतमे नक्षत्रे इत्यर्थः । यदा तु श्रवणाद्यपादो रात्रावेव न च कत्रचिद्दिवाभागे तदोत्तराषाढाधनिष्ठयोरन्यतमे नक्षत्रे । द्वादश्यामन्यतिथावपि रात्रेर्दिवाभागे श्रवणाऽऽद्यपादलाभस्तदा तिथ्यन्तरेऽपि श्रवणाऽऽद्यपाद एव शक्रोत्थापनम्, श्रवणे तस्य बहुसम्मतत्वात् । इत्यत्र यदाह तत् समीचीनम्,

सर्वे देवाश्च तिथ्यादौ तिथ्यन्ते च महेश्वरः ।
शक्रो विष्णुस्तथा ऋक्षे आद्यन्ते च विबुध्यते ॥

इति राजमार्त्तण्ड (पृ-109) वचनानुकूल्यात् । श्रवणायोगविधानं कालसारकारेण यन्न स्वीकृतं तच्चिन्त्यम् ।

740- तसिश्च—पाणिनीयाष्टाध्यायां तद्धितशैषिकप्रकरणे (4/3/113) ।

741- तिथितत्त्वे (पृ पृ-116-117) ।

एवं यः कुरुते पूजां वासवस्य महात्मनः ।
न तस्य राज्ये दुर्भिक्षं नेतयो नाप्यधर्मकृत् ।।
"अष्टाहे विसृजेच्छक्रं तदर्द्धेन तु पार्वतीम् ।
न्यूनाधिकं न कर्त्तव्यं राज्ञो राष्ट्रधनक्षयात् ।।"

इति तु देशान्तरपरम् । ईतयश्च—

"अतिवृष्टिरनावृष्टिः शलभा मूषिकाः खगाः ।
प्रत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः ।।"
शक्रध्वजसमुत्थानं प्रमादान्न कृतं यदि ।
तदा द्वादशवर्षे तु कर्त्तव्यं नान्तरा पुनः ।। [742]

उत्थापनपूजादिविधिश्च कालिकापुराणीयस्तिथितत्त्ववराहसंहितादौ द्रष्टव्यः ।

भीमद्वादशी

मार्गशीर्षे शशधरे माघे मासि प्रजापते ।
एकादश्यां सिते पक्षे सोपवासो जितेन्द्रियः ।
द्वादश्यां षट्तिलाचारं कृत्वा पापात् प्रमुच्यते ।।
तिलस्नायी तिलोद्वर्त्ती तिलहोमी तिलोदकी ।
तिलभोक्ता च दाता च षट्तिली नावसीदति ।।
सकृच्च षट्तिली भूत्वा सर्वपापैः प्रमुच्यते ।।

तैलग्रहे दोषः पाद्मे—

उपोष्यैकादशीं माघे तैलाभ्यङ्गः कृतस्त्वया ।
द्वादश्यां प्रागभवे देव ! तेन व्याघ्रमुखो भवान् ।।

त्रयोदशी

इयं कृष्णा परयुता ग्राह्या,

षष्ठ्यष्टम्यप्यमावाख्या कृष्णपक्षे त्रयोदशी ।
एताः परयुताः पूज्याः पराः पूर्वेण संयुताः ।।

इति निगमात् । शुक्ला तु पूर्वा,

त्रयोदशी प्रकर्त्तव्या द्वादशीसहिता मुने ।

742- तत्रैव (पृ-117) ।

इति वैवर्त्तस्य[743] शेषाच्छुक्लविषयत्वात् । सायंकालीनत्रिमुहूर्त्तव्यापित्वेन पूर्वविद्धाप्राप्तौ वचनान्तरादपराह्णसम्बन्धोऽपि ग्राह्यः,

त्रयोदशी प्रकर्त्तव्या या भवेदापराह्णिकी ।

इति स्कान्दात् । अतएव माधवीये[744]—

शुक्लाऽपि गृह्यते पूर्वा गृह्यतां साऽपराह्णिकी । इति ।

परस्याः कृष्णाया अलाभे तु पूर्वा स्यात् ,

एकादशी तृतीया च षष्ठी चैव त्रयोदशी ।
पूर्वविद्धा तु कर्त्तव्या यदि न स्यात् परेऽहनि ॥

इति वसिष्ठवचनात् ।

अनङ्गत्रयोदशी

माधवीये[745]—'मार्गशीर्षे सिते पक्षे' इत्युपक्रम्य व्रतं विधाय

अनङ्गेन कृता ह्येषा तेनानङ्गत्रयोदशी ।

इत्युपसंहृतम् । तिथिद्वैधे त्वियं पूर्वा,

कृष्णाऽष्टमी बृहत्तपा सावित्री वटपैतृकी ।
अनङ्गत्रयोदशीरम्भा उपोष्याः पूर्वसंयुताः ॥

इतिवचनात् । स्मृतिसारादौ तु[746]—

कामदेवः त्रयोदश्यां पूजनीयो यथाविधि ।
रतिप्रीतिसमायुक्तो ह्यशोकमणिभूषितः ॥

743- कालमाधवे (पृ-225) सम्पूर्णं ब्रह्मवैवर्त्तवचनं यथा—

त्रयोदशी प्रकर्त्तव्या द्वादशी-सहिता मुने ।
भूतविद्धा न कर्त्तव्या दर्शपूर्णा कदाचन ।
वर्जयित्वा मुनिश्रेष्ठ ! सावित्रीव्रतमुत्तमम् ॥ इति ।

744- या शुक्ला गृह्यते पूर्वा-इति मुद्रितकालमाधवे (पृ 14) पाठः ।

745- तत्रैव (पृ-226) सिते-स्थाने अमले-पाठः ।

746- मुद्रित स्मृतिसारसङ्ग्रहे (पृ-35) प्रथमश्लोकौ अन्तिमश्लोकश्च न सन्ति । अवशिष्टांशे चैत्रशुक्ल-स्थाने कामदेव, सन्धुक्षितः-स्थाने सम्पूजितः-पाठः ।

ततः प्रातः समुत्थाय स्नातः कलशवारिणा ।
परं सौभाग्यमाप्नोति कामांश्चाप्नोति पुष्कलान् ॥
चैत्रशुक्लत्रयोदश्यां मदनं चन्दनात्मकम् ।
कृत्वा सम्पूज्य यत्नेन वीजयेद् व्यजनेन तु ॥
तत्र सन्धुक्षितः कामः पुत्रपौत्रसमृद्धिदः ॥
एवं यः कुरुते पूजामनङ्गस्य महात्मनः ।
भवन्ति नापदस्तस्य तस्मिन्नब्दे कथञ्चन ॥

मदनं दमनात्मकमिति पाठान्तरम् । दमनो वृक्षविशेषः । सन्धुक्षितो जीवितः । इयं पूर्वा ग्राह्येत्युक्तम् । कामध्यानं तु—

चापेषु धृक् कामदेवो रूपवान् विश्वमोहनः ।
रतिप्रीतिसमायुक्तो ह्यशोकमणिभूषितः ॥

चतुर्दशी

इयं परा शुक्ला, कृष्णा च पूर्वा ग्राह्या ।

शुक्लपक्षेऽष्टमी चैव शुक्लपक्षे चतुर्दशी ।
परविद्धैव कर्त्तव्या पूर्वविद्धा न कुत्रचित् ॥
कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी ।
पूर्वविद्धैव कर्त्तव्या परविद्धा न कुत्रचित् ॥
उपवासादिकार्येषु एष धर्मः सनातनः ॥

नक्तादौ तु प्रदोषव्यापिनीत्युक्तम् । नक्ते चैत्रश्रावणचतुर्दश्यौ शुक्लेऽपि रात्रियोगिन्यौ ग्राह्ये ।

मधुश्रावणमासस्य शुक्ला या तु चतुर्दशी ।
सा रात्रियोगिनी ग्राह्या परा पूर्वाह्णगामिनी ॥ इति ।

रात्रिः प्रदोषः । परा मासान्तरगता ।

दमनकचतुर्दशी

लैङ्गे— मधुमासे तु सम्प्राप्ते शुक्लपक्षे चतुर्दशी ।
प्रोक्ता दमनभञ्जीति सिद्धिदा तु महोत्सवा ॥
पूजयिष्यन्ति ये मर्त्यास्तदङ्गभवपल्लवैः ।
ते यान्ति परमं स्थानं दमनस्य प्रभावतः ॥

इयं शुक्ला पूर्वविद्धा गृह्यते,

अपूज्या पूर्णिमायुक्ता मधौ शुक्ला चतुर्दशी ।

इति वायुपुराणात्[747] ।

नृसिंहचतुर्द्दशी

बृहन्नृसिंहपुराणे[748]—वैशाखशुक्लपक्षस्य चतुर्दश्यां समाचरेत् ।

मज्जन्मसम्भवं पुण्यं व्रतं पापप्रणाशनम् ॥

स्वातीनक्षत्रयोगे तु शनिवारे हि मद् व्रतम् ।

सिद्धियोगस्य योगे च लभ्यते दैवयोगतः ॥

सर्वैरेतैस्तु संयुक्तैः हत्याकोटिविनाशनम् ।

केवलं च प्रकर्त्तव्यं मद्दिनं फलकाङ्क्षिभिः ॥

सिद्धियोगस्येति सिद्धिपदं सामीप्योत्तरवर्त्तित्वादिसम्बन्धेन व्यतीपातवज्रयोऽर्थकम् । षोडशस्य त्वत्रासम्भवः । केवल-पदं स्वात्यभावेऽपि ।

वर्षे वर्षे तु कर्त्तव्यं मम सन्तुष्टिकारणम् ।[749]

सर्वेषामेव वर्णानामधिकारोऽस्ति मद् व्रते ।[750] । इति ।

आगमे— वैशाखे शुक्लपक्षे च चतुर्द्दश्यां महातिथौ ।

सायं प्रह्लादधिक्कारमसहिष्णुपरो हरिः ॥

सद्यः कटकटाशब्दविस्मापितसभाजनः ।

लीलया स्तम्भगर्भान्ताद् उद्भूतः शब्दभीषणः ॥

नृहरेरवताराढ्यं यत्नतः समुपोषयेत् ।

747- कालसारे वायुवचनस्यास्य पूर्वार्द्धपाठो यथा—

सर्वा चतुर्दशी पूज्या युक्ता पूर्णेन्दुना सह । इति ।

748- हरिभक्तिविलासे (12/458-460) । तत्रान्तिमार्द्धपाठो यथा—

वैष्णवैनं तु कर्त्तव्या स्मरविद्धा चतुर्दशी । इति ।

749- तत्रैव (14/415) बृहन्नृसिंहपुराणवचनोत्तरार्द्धं यथा—

महागुह्यमिदं श्रेष्ठं मानवैर्भवभीरुभिः । इति ।

750- तत्रैव (14/417) उत्तरार्द्धपाठो यथा—

मद्भक्तैस्तु विशेषेण प्रणेयं मत्परायणैः । इति ।

महापुण्यतमा ह्येषा सायं विष्णुं प्रपूजयेत् ॥

वर्षे वर्षे इति वीप्सया नित्यत्वम् । सर्वेषामिति चतुर्वर्णाधिकारः ।

स्त्रीणां व्रतमिदं साधु पुत्रदं भाग्यदं तथा ।[751]
अपुत्रो लभते पुत्रान् मद्भक्तांश्च सवर्चसः ।
दरिद्रो लभते लक्ष्मीं धनदस्य च यादृशी ॥[752]

एतेन स्त्र्यधिकारः पुत्रलक्ष्मीकामना च स्फुटम् । स्वातीव्यतीपातैः फलाधिक्यञ्च । तथा भौमवारेऽपि—

राधे सिते चतुर्दश्यां साध्ये वणिजि वायुभे ।
मन्दवारे नृसिंहोऽभूत् त्रेतादावादिकल्पके ॥
सायंकाले सदसदां रक्षोदमनकारणात् ।
सामान्येन तिथिः पुण्या किमु स्वात्यादिभिर्युता ॥

इति भविष्योत्तरात् । 'सायं विष्णु'', 'सायं काल' इत्यादिवचनात् प्रदोषोऽस्य काल इत्येके । पञ्चधाविभक्तसायाह्नस्तथेत्यपरे । वस्तुतस्तु, दिवारात्रीतरकाले रक्षोमारणस्य विहितत्वादहोरात्रसन्धिः सायंसन्ध्यात्मकमुहूर्त्तोऽस्य कालो विवक्षितः[753] । तदुक्तं योगियाज्ञवल्क्येन[754]—

751- अवैधव्यकरं तासां पुत्रशोकविनाशनम् ।
इति तत्रैव (14/444) वृहन्नृसिंहपुराणवचने उत्तरार्द्धपाठः ।

752- तत्रैव (14/442) बृहन्नृसिंहपुराणवचनमेतत् ।

753- दिनरात्र्योरितरकाले रक्षोमारणार्थं सन्ध्योपासनायाः कर्त्तव्यता सूचिता वृद्धयोगियाज्ञवल्क्यस्मृतौ, यथा (6/12-16)—

त्रिंशत्कोट्यस्तु विख्याता मन्देहा नाम राक्षसाः ।
प्रद्रवन्ति सहस्रांशुमुदयन्तं दिने दिने ॥
अहन्यहनि ते सर्वे सूर्यमिच्छन्ति खादितुम् ।
अथ सूर्यस्य तेषाञ्च युद्धमासीत सुदारुणम् ॥
ततो देवगणाः सर्वे ऋषयश्च तपोधनाः ।
सन्ध्येति (सन्ध्यां तु) समुपासीनाः प्रक्षिपन्ति महज्जलम् ॥
ॐकारब्रह्मसंयुक्तं गायत्र्या चाभिमन्त्रणम् ।
तेन दह्यन्ति ते दैत्या वज्रीभूतेन वारिणा ॥

अहोरात्रस्य यः सन्धिः सूर्यनक्षत्रवर्जितः ।

सा तु सन्ध्या समाख्याता मुनिभिस्तत्त्ववेदिभिः ॥

सन्ध्या मुहूर्त्त मात्रं तु....' इत्यादि ।

एवञ्चात्र— राधे सिते चतुर्दश्यां शनौ स्वात्यृक्षसंयुते ।

एतद्विदित्वा यो विप्र उपास्ते संशितव्रतः ।

दीर्घमायुः स विन्देत सर्वपापैश्च मुच्यते ॥ इति ।

नृसिंहव्रतस्यास्य कर्मकालत्वेन सायंसन्ध्यां स्पष्टं प्रतिपादयति निर्णयसिन्धुकारः (पृ 75) कमलाकरो यथा— सा प्रदोषव्यापिनी ग्राह्या । तदुक्तं हेमाद्रौ नृसिंहपुराणे—

वैशाखे शुक्लपक्षे तु चतुर्दश्यां निशामुखे ।

मज्जन्मसम्भवं पुण्यं व्रतं पापप्रणाशनम् ॥ इति ।

अत्र सायं नाम दिनमानस्य रात्रेश्चान्तिमादिघटिकाद्वयमिति कृत्यकौमुदीकारस्य (पृ-20) मतं स्वीकुर्वद्भिरस्मद्गुरुचरणैः कालदीपतेजन्यां (पृ 82)— समाचारात् सूर्यास्तकाल एव नृसिंहस्य जन्मकालरूपेण ग्राह्यः इति साधूक्तम् ।

754- मुद्रितबृहद्योगियाज्ञवल्क्यस्मृतौ सन्ध्याविषयकवचनं यथा—

ह्रासवृद्धी तु सततं दिनरात्र्योर्यथाक्रमम् ।

सन्ध्या मुहूर्त्तमात्रं तु ह्रासे वृद्धौ तु सा स्मृता ॥(6/11)

सन्धौ सन्ध्यामुपासीत नास्तगे नोद्गते रवौ ।

सन्ध्यात्रयं तु कर्त्तव्यं द्विजेनात्मविदा सदा ॥ (6/25) । इति ।

मिश्रमिश्रस्तु याज्ञवल्क्यमतव्याख्याने (1/25)—ननु.... सन्ध्यावन्दनस्य दिनरात्रिसन्धिरूपसन्ध्याकालकर्त्तव्यत्वस्थितौ कियान् सन्धिरित्यपेक्षायाम्— ह्रासवृद्धी तु सततं.... ह्रासे वृद्धौ समा स्मृता ॥ इति वचनात् सन्ध्याकालस्य दण्डद्वयात्मकत्वे निव्यूढे 'समं स्यादश्रुतत्वात्' इति न्यायाद्रात्रेश्चरमो दण्डो दिवसस्य प्रथमः प्रातःसन्ध्या, दिवसस्य चरमो रात्रेः प्रथमो दण्डः सायंसन्ध्येति पर्यवसानात् कथं सूर्यनक्षत्रदर्शनयोः सन्ध्यासमयोत्तरावधित्वमव्यापनादधिकव्यापनाच्चेति चेत् मैवं, वाचनिकेऽर्थे न्यायाऽनवकाशात् । यदाह मिहिराचार्यः—

अर्द्धास्तसमयात् सन्ध्या व्यक्तीभूता न तारका यावत् ।

तेजः परिहानिरूषा भानोरर्द्धोदयं यावत् ॥

एवञ्चाविधमानार्द्धाधिकमार्तण्डमण्डलः स्पष्टलक्ष्यनक्षत्रगणः कालविशेषः सन्ध्येति सन्ध्ययोः सामान्यलक्षणम् । इति सन्ध्याकालं स्पष्टीकरोति ।

आविर्भूतो महाविष्णुरर्द्धास्तमितभास्करे ।

इत्येतद्वाक्यमनुकूलम् । तेन तिथिद्वैधे उक्तसन्ध्याव्यापिनी ग्राह्या । दिनद्वये-सन्ध्याव्याप्तौ तु परा,

यः करोति नरो मोहात् कामविद्धां चतुर्द्दशीम् ।
धनापत्यैर्वियुज्येत तस्मात्तां परिवर्जयेत् ॥
पूर्णायुक्तां तु तां कुर्यान्नरसिंहस्य तुष्टये ॥

इत्यादिवचनात् । दिनद्वये तद्व्याप्तावप्येवम्,

चतुर्द्दशी न वर्त्तेत सायंकाले दिनद्वये ।
परैव वर्त्तते वाऽपि कर्त्तव्या सा तदैव तु ॥
स्पृशेत् परदिनं चेत् सा सायंकालं चतुर्द्दशी ।
कर्त्तव्या त्वन्यथा पूर्वा नरसिंहप्रियातिथिः ॥

इत्यादिवचनात् । रामनवम्यादावुदयास्तान्यतरावच्छिन्नर्क्षस्य निर्वचनादुदयास्तान्यतरगतस्वातीयोगे तु तदृक्षयुता ग्राह्या ।

प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः ।

इत्यादिरामनवम्यादिरीत्या तथौचित्यात् । दिनद्वये स्वातीयोगे तदयोगे वा पूर्ववत् परा । पूर्वेद्युः स्वातीयोगे परेद्युः सायंकालमात्रयोगे तु पूर्वैव, ऋक्षस्य तिथिसमत्वेन खण्डकालापेक्षया बलवत्त्वस्य प्राक्कथनात् । 'यः करोति नरो मोहादि'ति तु दिनद्वये ऋक्षयोगे तदभावे च चरितार्थम् । वैष्णवैस्तु सर्क्षाऽनृक्षा पूर्वविद्धा हेया ।

वैष्णवैर्न तु कर्त्तव्या स्मरविद्धा चतुर्द्दशी ।

इतिवचनात् । वेधश्च कलाकाष्ठादिरित्यवोचामः । चतुर्द्दशीक्षये तु क्षयदिन एव व्रतम्, जयन्त्येकादशीवदन्यदिने वचनादर्शनात् । रामनवम्यां तथाऽऽचारात् । शेषं रामनवम्यादिवत् । एतेन तिथिद्वैधे शुक्लचतुर्द्दशीत्वात् परा ग्राह्येति स्मृतिसारोक्ति[755]ग्रन्थान्तरादर्शनमूलत्वेन प्रत्युक्ता ।

755- अत्र स्मृतिसारसङ्ग्रहे (पृ-29) विश्वनाथमिश्रेणोक्तं यथा— तत्र शुक्लचतुर्द्दशी द्वितीयोपोष्या, कृष्णा पूर्वेति ।

दिव्यसिंहस्तु[756] स्वातीयोगमप्रदर्श्य तत्सत्त्वासत्त्वसाधारण्येन पूर्वेद्युरेव सायंव्याप्तौ पूर्वाऽन्यथा परैवेत्यभिदधे। तदपि ग्रन्थान्तरादर्शनजन्यं दूरीकरणीयम्। जयन्त्यन्तरवदत्रापि योगत्यागे बीजाभावादित्यास्तां तावत्।

अघोरचतुर्दशी

भविष्योत्तरे—भाद्रे मासि सिते पक्षे अघोराख्या चतुर्दशी।
तामुपोष्य नरो याति शिवलोकमयत्नतः ॥

अनन्तचतुर्दशी

अनन्तव्रतमेतद्धि सर्वपापहरं शुभम्।
सर्वकामप्रदं नृणा स्त्रीणाञ्चैव युधिष्ठिर ॥
मध्याह्ने भोज्यवेलायां समुत्तीर्य सरित्तटे।
ददर्श शीला सा स्त्रीणां समूहं रक्तवाससाम्।
चतुर्दश्यामर्चयन्तं भक्त्या देवं पृथक् पृथक् ॥

अत्र मध्याह्ने भोज्येतिवचनान्मध्याह्नः कर्मकाल इति विद्याकरः। तच्च मध्याह्ने पूजयेन्नृपेतिगणेशचतुर्थ्यादाविव विधिवाक्यगततत्त्वाभावेनार्थवादस्थितत्वादयुक्तमिति माधव-रघुनन्दनादयः[757]। तस्माद्दैवे ह्योदयिकी

756 कालदीपे (पृ- 82) दिव्यसिंहोक्तिर्यथा—परदिने सायं काले चतुर्दशीस्पर्शाभावे एव पूर्वविद्धा ग्राह्या। अन्येषु तु पक्षेषु परविद्धा ग्राह्या। इति।

757- अत्र माधवाचार्यः कालमाधवे (पृ.पृ-227-228) स्वकीयं मतं प्रतिपादयति यथा—अत्र 'मध्याह्ने भोज्यवेलायाम्' इत्यनेन मध्याह्नस्य कर्मकालत्वं प्रतीयते। अतस्तद्व्यापिनी तिथिर्ग्राह्या। नैतत् सारम्। यथा विनायकव्रते 'मध्याह्ने पूजयेन्नृप' इति मध्याह्नः कर्मकालत्वेन विहितः, नात्र तथा विधिरस्ति। उदाहृतन्तु लिङ्गमर्थवादगतत्वान्न स्वातन्त्र्येण कस्यचिदर्थस्य प्रमापकं, किन्तु सति प्रमाणान्तरे तस्योपोद्बलकं भवति। न चात्र प्रमाणान्तरं पश्यामः। अतो न मध्याह्नः कर्मकालः। तथा सति 'दैवे ह्योदयिकी ग्राह्या' इतिवचनेन युग्मशास्त्रादिभिश्चोदयव्यापिनी ग्राह्या। इति। रघुनन्दनोऽपि तिथितत्त्वे (स्मृ० त०-I-पृ-123) आह यथा— न च मध्याह्ने भोज्यवेलायाम्....इति भविष्योत्तरीयान्मध्याह्नव्यापिनी तिथिर्ग्राह्येति वाच्यं, पूर्वाह्णो वै देवानामिति श्रुत्यादिभिः पूर्वाह्णे दैवकृत्यविधानात्। विध्यसमभि-

ग्राह्येति सोदयद्विमुहूर्त्तोऽस्य कालः ।[758]

कार्त्तिककृष्णचतुर्दशी

लैङ्गे— कार्त्तिके कृष्णपक्षे च चतुर्दश्यां दिनोदये ।[759]
अवश्यं कर्त्तव्यं स्नानं नरैर्नरकभीरुभिः ॥
अपामार्गपल्लवञ्च भ्रामयेच्छिरसोपरि ।
ततश्च तर्पणं कार्यं धर्मराजस्य नामभिः ॥
नरकाय प्रदातव्यो दीपः सम्पूज्य देवताः ॥

नरकायेतिनिवृत्त्यर्थकतादर्थ्ये चतुर्थीति प्राञ्चः[760] । विरोधिलक्षणया नरकाभावायेत्येके ।

चित्राकृष्णचतुर्दशी

कार्त्तिके भौमवारे तु चित्रा कृष्णचतुर्दशी ।
तस्यामाराधितः स्थाणुर्नयेच्छिवपुरं ध्रुवम् ॥
यां काञ्चित् सरितं प्राप्य कृष्णपक्षे चतुर्दशीम् ।
यमुनायां विशेषेण नियतं तर्पयेत् पुमान् ॥

व्याहृतार्थवादेन तद्बाधायोगात् । किन्तु, तस्यैव गौणकालबोधकं तत् । इति ।

758- वस्तुतस्तु सोदयद्विमुहूर्त्तकालोऽत्रानुकल्पः, त्रिमुहूर्त्तो मुख्यः कल्प इति ।

759- कार्त्तिकोऽत्र पूर्णिमान्तः । अत्र दिनोदय इति प्रातःकालव्यापित्वं ग्राह्यम् । दिनद्वये तद्व्याप्तौ तदव्याप्तौ वा पूर्वैव,
पूर्वविद्धचतुर्दश्यां कार्त्तिकस्य सितेतरे ।
प्रत्यूषसमये स्नानं कुर्यात्तत्र प्रयत्नतः ॥
इति वीरमित्रोदयसमयप्रकाश (पृ 83) धृतवचनानुकूल्यात् । निर्णयसिन्धु-(पृ-147) कारस्त्वत्र कार्त्तिककृष्णचतुर्दश्यां प्रभाते चन्द्रोदयेऽभ्यङ्गं कुर्यात् । इत्याह ।

760- रघुनन्दनस्त्वत्र तिथितत्त्वे (पृ-123) आह यथा नरकाय नरकनिवृत्तये । अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु । इति (अमरकोषः-3/3/1) निवृत्तावपि तादर्थ्ये इत्यनेन चतुर्थीविधानात् ।इति ।

यमाय यमराजाय मृत्यवे नरकाय च ।
औदुम्बराय दध्नाय नीलाय परमेष्ठिने ॥
वृकोदराय चित्राय चित्रगुप्ताय वै नमः ॥
एकैकशस्तिलैर्मिश्रांस्त्रींस्त्रीन् दद्याज्जलाञ्जलीन् ।
संवत्सरकृतं पापं तत्क्षणादेव नश्यति ॥

संवत्सरेत्यादिना नित्यमिदम् ।

पाषाणचतुर्दशी

भविष्ये— वृश्चिके शुक्लपक्षे तु पाषाणस्य चतुर्दशी ।
तस्यामाराधयेद्देवीं नक्तं पाषाणभोजनैः ॥
ऐश्वर्यसौख्यसौभाग्यरूपाणि प्राप्नुयान्नरः ॥

पाषाणः पाषाणाकारो माषतण्डुलपिष्टक इति शिष्टाः[761] । नक्तमिति प्रदोषकालः । दिनद्वये नक्तव्याप्तौ शुक्लत्वात् परा ग्राह्या, तदव्याप्तौ च रात्रिसामान्यात् पूर्वा ।

माघकृष्णचतुर्दशी

शतानन्दः—माघे मासि रटन्त्याख्यः कृष्णपक्षे चतुर्दशीम् ।
ब्रह्मघ्नमपि चण्डालं कं पतन्तं पुनीमहे ॥
अरुणोदयवेलायामारटन्त्यपि नित्यशः ।[762]

यमश्च[763]— माघे मास्यसिते पक्षे रटन्त्याख्या चतुर्दशी ।
तस्यामुदयवेलायां स्नातो नावेक्षते यमम् ॥

उदयोऽरुणोदयः ।

अनर्काभ्युदिते काले कृष्णपक्षे चतुर्दशी ।
सतारव्योमकाले तु तत्र स्नानं महाफलम् ॥
यां काञ्चित् सरितं प्राप्य कृष्णपक्षे चतुर्दशीम् ।

761-जीमूतवाहनोऽत्र 'पाषाणाकारः पिष्टकः' इति कालविवेके(पृ-470)आह ।
762-कालसारे वाराहवचने उत्तरार्द्धपाठो यथा—
नियुक्ता विष्णुना सर्वाः कस्य पापं पुनीमहे ॥ इति ।
763- कालसारे धृतम् । 764- तत्रैव वराहपुराणवचनमेतत् ।

यमुनायां विशेषेण नियतं तर्पयेत् पुमान् ॥[764]

उभयेद्युररुणोदये माघसप्तमीन्यायात् पूर्वद्युः स्नानम् । स्मृतिसारगतं परारुणोदयस्नानं तु प्राक् निरस्तम् । अरुणोदयश्चतुर्नाडिकाः ।

शिवरात्रिचतुर्दशी

इदं व्रतं नित्यम् ।

वर्षे वर्षे महादेवि ! नरो नारी पतिव्रता ।
शिवरात्रौ महादेवं कामं भक्त्या प्रपूजयेत् ॥

इति स्कान्दे[765] वीप्सादर्शनात् ।

द्वादशाब्दिकमेतत् स्याच्चतुर्विंशाब्दिकं तथा ।
सर्वान् कामानवाप्नोति प्रेत्य चेह च मानवः ॥
शिवरात्रिव्रतं नाम सर्वपापप्रणाशनम् ।
आचाण्डालप्रसूतानां भुक्तिमुक्तिप्रदायकम् ॥[766]

इत्यादिवचनाद् द्वादशाब्दचतुर्विंशाब्दावृत्तिकं सर्वकामदं नरमात्राधिकारिकम् , न त्वेकदावृत्तिकमिति माधवीयकारः[767] । वस्तुतस्तु, द्वादशचतुर्विंशावृत्तौ सर्वकामाप्तिः फलम् । एकदावृत्तौ तूक्ताक्षयभोगः, श्रमाधिक्ये फलभूमौचित्यात् । नरमात्राधिकारश्च एकदावृत्तावपि नरो नारीत्यादिवाक्यसिद्धः, अन्यथा वीप्साचारविरोध इति निष्कर्षः । अत्र पूजोपवासजागराणां त्रयाणां समप्राधान्याद् वैश्वानरविद्यान्यायेनैतत्त्रये समुदाय एव तद् व्रतत्वं व्यासज्यवृत्तिरिति माधवाचार्याः[768] । तथाहि नागरखण्डे[769]—

765- कालमाधवे (पृ 236) ।

766- तत्रैव (पृ.पृ-236 237) ईशानसंहितावचने प्रसूतानां-स्थाने मनुष्याणां पाठः ।

767- कालमाधवे (पृ.पृ-236-237) माधवाचार्यस्यैतदनुकूलवचनं यथा—काम्यव्रतस्येशानसंहितायां वर्षसङ्ख्या पठ्यते—एवमेतद् व्रतं कुर्यात्प्रतिसंवत्सरं व्रती । द्वादशाब्दिक....चेह च मानवः । इति । नित्यकाम्यरूपस्यास्य व्रतस्य सर्वाधिकारिकत्वमीशानसंहितायामुक्तम्—शिवरात्रिव्रतं नामेत्यादि ।

768- तत्रैव (पृ पृ-238-39) माधवाचार्यवचनं यथा—वैश्वानरविद्योपासनन्यायेन समुदाय एवात्रानुष्ठेयः । तस्य च न्यायस्य सङ्ग्राहकावेतौ श्लोकौ भवतः —

उपवासप्रभावेन बलादपि च जागरात् ।
शिवरात्रेस्तथा तस्य लिङ्गस्यापि च पूजया ।
अक्षयाँल्लभते लोकान् शिवसायुज्यमाप्नुयात् ॥

सह्यखण्डेऽपि[770]—'स्वयञ्च लिङ्गमभ्यर्च्य सोपवासः सजागरः ।
अजानन्नपि निष्पापो निषादो गणताङ्गतः ॥'
अथवा शिवरात्रिं तु पूजाजागरणैर्नयेत् ।

इत्यादिवाक्यं त्वशक्तपरम्, कार्त्तिके केवलस्नानजपवत् । अत्र प्रदोष-निशीथावुभौ कालौ ।

प्रदोषव्यापिनी ग्राह्या शिवरात्रिः शिवप्रिया ।[771]

वैश्वानरमुपास्तेऽत्र प्रत्येकसमुदायतः ।
विकल्पः, समुदायो वा नियतो विविधाद्विधेः ॥
विकल्पः इति चेन्मैवं समुदायप्रशस्तितः ।
अवयुत्यानुवादेन प्रत्येकोक्त्युपपत्तितः ॥ इति ।

अयमर्थः । छन्दोगैराम्नायते—'वैश्वानरमुपास्ते' इति विद्युल्लोकादित्य-वाय्वाकाशोदकपृथिवीरूपैः षड्भिरवयवैरूपेतोऽवयवी सर्वात्मको विराट्-पुरुषो वैश्वानर-शब्दवाच्यः । तत्र संशयः—किं विद्युल्लोकाद्यवयवा अवयवी च प्रत्येकं विकल्पेनोपास्यः, उतावयव्येव नियमेनोपास्यः, इति ।.... समुदाय एवात्र नियमेनोपासितव्यः । कुतः ? प्रशस्ततत्वात् । अवयवोपास्तिवाक्या-न्यवयुत्यानुवादरूपत्वेनाप्युपपद्यन्ते । तस्मात् समुदाय एवोपास्यः इति राद्धान्तः । अनेन न्यायेन प्रकृतेऽप्युपवासादीनां त्रयाणां समुदायस्यैव व्रतरूपत्वम् । ननु, क्वचिदुपवासादित्रयं विधाय पुनः पक्षान्तररूपेणोपवास-व्यतिरिक्तं द्वयं पठ्यते ,

अथवा शिवरात्रिं च पूजाजागरणैर्नयेत् । इति ।

नायं दोषः । अथवेत्यनुकल्पोपक्रमेणाशक्तविषयत्वोपपत्तेः । अत्र व्रते विहितानां त्रयाणां परस्परमङ्गाङ्गिभावबोधकप्रमाणाभावादाग्नेयादिषड्याग-वत्प्रत्येकं कालसम्बन्धविधानात् फलसम्बन्धाच्च समप्राधान्यं द्रष्टव्यम् । इति ।

769- कालमाधवे (पृ-237) । 770- तत्रैव (पृ-237) ।

771- तत्रैव (पृ-240) सम्पूर्णं स्मृत्यन्तरवचनं यथा—

इत्यादिवचनात् ।

अर्द्धरात्रादधश्चोर्द्ध्वं युक्ता यत्र चतुर्दशी ।
तत्तिथावेव कुर्वीत शिवरात्रिव्रतं व्रती ॥[772]
अर्द्धरात्रयुता यत्र माघकृष्णचतुर्दशी ।
शिवरात्रिव्रतं तत्र सोऽश्वमेधफलं लभेत् ॥[773]

इतीशानसंहितानारदवाक्याच्च ।

प्रदोषोऽस्तमयादूर्द्ध्वं मुहूर्त्तत्रयमिष्यते ।[774]

इति प्रदोषमानम् । अर्द्धरात्रश्च जन्माष्टमीव्रतपूर्वापरदण्डद्वयोपेतो रात्रेर्मध्यममुहूर्त्तः । सङ्क्रान्त्यादावप्येवम् । तथा च रघुनन्दनः[775]—अर्द्धरात्रोऽत्र जयन्तीव्रद्रात्रेर्मध्यदण्डद्वयरूपो मध्यममुहूर्त्तः ।

महानिशा द्वे घटिके रात्रेर्मध्यमयामयोः ।

इति देवलस्मृतौ घटिकापदस्य दण्डार्थकत्वादिति । युक्तमेतत् । एकत्र निर्णीतस्यार्थस्य बाधकं विना स्थानान्तरेऽपि सन्देहे तथौचित्यात् । अथवा

प्रदोषव्यापिनी ग्राह्या शिवरात्रिचतुर्दशी ।
रात्रौ जागरणं यस्मात्तस्मात्तां समुपोषयेत् ॥ इति ।

772- तत्रैव (पृ-233) ईशानसंहितावचनमेतत् ।

773- तत्रैव (पृ-233) नारदीयवचने 'कुर्य्याज्जागरणं तथा' इति चतुर्थपादपाठः । किन्तु नित्याचारपद्धतौ (भागः-I, पृ 604) सम्पूर्णवचनं यथा—

अर्द्धरात्रयुता यस्तु माघकृष्णचतुर्दशी ।
शिवरात्रिव्रतं कुर्यात् सोऽश्वमेधफल लभेत् ॥
सूर्येऽस्ते नवनाडीषु भूतविद्धा त्रयोदशी ।
शिवरात्रिव्रतं तत्र कुर्य्याज्जागरणं तथा ॥ इति ।

774- वीरमित्रोदयसमयप्रकाशे (पृ-129) व्यासवचनं यथा—

त्रिमुहूर्त्तः प्रदोषः स्याद्भानावस्तं गते सति । इति ।
प्रदोषोऽस्तमयादूर्द्ध्वं घटिकाद्वयमिष्यते ।

इति तु तिथितत्त्वे (पृ-125) वत्सवचनम् । अनुकल्पत्वेऽस्य ग्रहणम् ।

775- तिथितत्त्वे (पृ-125) रघुनन्दनवचनं यथा—अत्र 'महानिशा द्वे घटिके.... ।' इति देवलोक्ता महानिशा ग्राह्या । घटिका एकदण्डः । इति ।

अर्द्धरात्रादधश्चोर्द्ध्वं........ ।

मुहूर्त्तो विजयो नाम यत्र जातो जनार्द्दनः ॥

इत्यस्य जन्माष्टम्यामुक्तत्वे ऽपिह किञ्च तयोर्न्यायात् प्रासाददीपन्यायाच्च शिवरात्रादावपि प्रसरतु । तुलाराशिविवाहार्थस्यापि

द्विपञ्चनवमोऽपीष्टस्त्रयोदशदिनात् परम् ।[776]

इत्यस्यान्यराशिविवाहवत् । तेनेयं प्रदोषनिशीथोभयव्यापिनी मुख्या ।

त्रयोदशी यदा देवि ! दिनमात्रप्रमाणतः ।

जागरे शिवरात्रिः स्यान्निशि पूर्णा चतुर्द्दशी ॥[777]

सा रात्रिः शिवरात्रिस्तस्यां व्रतमित्यर्थः । इदं पूर्वेद्युरुभयग्राहकं वाक्यम् । परदिनेऽप्येवं यथा—

निशाद्वये चतुर्द्दश्यां पूर्वा त्याज्या परा शुभा ।[778]

पूर्वानिशामारभ्य परदिनप्रदोषनिशार्द्धव्याप्तिश्चेदित्यर्थः । दिनद्वये उभयोर्व्याप्ति-रव्याप्तिश्चासम्भविन्यौ । पूर्वेद्युर्निशीथमात्रं व्याप्य परेद्युः प्रदोषमात्र-व्याप्तिश्चेत् पूर्वेद्युर्व्रतम् ।

जयन्ती शिवरात्रिश्च कार्ये भद्राजयान्विते ।

इतिवचनात् । यदेयं पूर्वेद्युः प्रदोषादूर्द्ध्वं भूत्वा क्षयवशात् परेद्युः प्रदोषा-दर्वाक् समाप्ता तदा पूर्वेद्युर्निशीथाधिक्याज्जयायोगाच्च पूर्वोपोष्या । त्रिस्पृशायां फलाधिक्यम्—

त्रयोदशी कलाऽप्येका मध्ये चैव चतुर्द्दशी ।

अन्ते चैव सिनीवाली त्रिस्पृशां समुपोषयेत् ॥[779]

माघकृष्णचतुर्द्दश्यां रविवारो यदा भवेत् ।

भौमो वाऽथ शिवो देवि ! कर्त्तव्यं व्रतमुत्तमम् ॥[780]

776- श्रीनिवासदीपिकायां तृतीयाध्याये सम्पूर्णवचनं यथा—

जन्मराशेः शुभः सूर्यस्त्रिषष्ठदशलाभगः ।

द्विपञ्चनवमोऽपीष्टस्त्रयोदशदिनात् परम् ॥ इति ।

777- कालमाधवे (पृ·241) स्कान्दवचने मात्र-स्थाने भुक्ति-पाठः ।

778- तत्रैव (पृ-241) कामिकवचनमेतत् ।

779- तत्रैव (पृ-244) 'त्रिस्पृश्यां शिवमर्चयेत्' इति चतुर्थपादपाठः ।

इति वचनादेतद्वारयोगपाते फलाधिक्यम् । शिवो विंशतितमो योगः । शिवरात्रिव्रतेन नक्तव्रतस्यापि तन्त्रेण निर्वाहः, नक्तस्य हविष्येतरनिवृत्ति-रूपतया कार्त्तिकादाविवोपवासस्यापि तद्रूपत्वात् । एतदुत्तरदिने नक्तपाते तु जलादिपारणं कृत्वा पृथक् नक्तं कार्यम् । एवं नृसिंहजयन्त्यादौ । वैष्णवानां तु त्रयोदशीविद्धा त्याज्या ।

नोपोष्या वैष्णवैर्विद्धा शिवरात्रिः सतां मता ।
'शिवरात्रिव्रते भूतां कामविद्धां विवर्जयेत् ।'[781]

इत्यादिवचनात् । वेधश्च कलाकाष्ठादिः । इदं व्रतं विहितप्रतिषेधात् षोडशी-ग्रहाग्रहवद् वैष्णवानां विकल्प्यते । तथाहि पाद्मे[782]—

सौरो वा वैष्णवो वाऽपि देवतान्तरपूजकः ।
न पूजाफलमाप्नोति शिवरात्रिबहिर्मुखः ॥

पूजेष्टदेवपूजा । कौर्मे—

यो मांसमर्चयेन्नित्यमेकान्तभावमाश्रितः ।
विनिन्दन् देवमीशानं स याति नरकायुतम् ॥

इति विधिः ।

चतुर्थस्कन्धदृष्ट्या तु नैके वाञ्छन्ति तद् व्रतम् ।[783]

चतुर्थस्कन्धे निषेधो यथा भृगुशापे[784]—

शिवव्रतधरा ये च ये च तान् समनुव्रताः ।
पाषण्डिनस्ते भवन्तु सच्छास्त्रपरिपन्थिनः ॥

यद्यपि कार्यं गुणावतारत्वेनैक्याद्रुद्रस्य वैष्णवैः ।
वैष्णवाग्र्यतया श्रैष्ठ्यात् सदाचाराच्च तद् व्रतम् ॥[785]

780- तत्रैव स्कान्दवचने 'शिवो देवि'-स्थाने भवेद्देवि पाठः ।
781- 'एकेनैवोपवासेन ब्रह्महत्यां व्यपोहति ।' इति तिथितत्त्वे (पृ-126) उत्तरार्द्धम् ।
782 हरिभक्तिविलासे-14/188 ।
783- तत्रैव 14/196-वाञ्छन्ति-स्थाने कुर्वन्ति-पाठः ।
784- श्रीमद्भागवते-4/2/28-भवव्रत-पाठः । 785- हरिभ०-14/195 ।

इति तत्कर्त्तव्यतां स्वीकृत्य गोपालभट्टेन पूजाजागरादिकं विविच्य लिखितं, वृन्दावनादावपि प्राचां वैष्णवानामेतदनुष्ठानं श्रुतचरम्, तथापीदानीन्तन-वैष्णवैरालस्यात् साधनदीपिकायामलिखितत्वाच्च न समाचर्यते । एवं रामोपासकवैष्णवानामपि वैकल्पिकमिदम् । लक्ष्मीनारायणोपासकश्रीवैष्णवानां तु नित्य एतत्त्यागः, चतुर्थस्कन्धविकल्पनिषेधस्यात्र विश्रामात् ।

व्याघ्रेण खाद्यमानोऽपि न गच्छेच्छङ्करालयम् ।

इति तेषां नित्यनिषेधात् । श्रीवैष्णवैकदेशिनां शक्तिशून्यचन्द्रशेखरप्रतिमादौ दर्शनात् प्रमाणसत्त्वेऽपि एतद्व्रतकृतावाचाराभावादिति ध्येयम् ।

पारणम्

पूर्वविद्धायामुपवासे परदिने चतुर्दशीकलायामेव पारणं स्कान्दे निरुक्तम्, यथा— उपोषणं चतुर्दश्यां चतुर्दश्यां तु पारणम् ।

तिथ्यन्ते पारणं कुर्याद् विना शिवचतुर्दशीम् ॥ इति ।

माधवाचार्यास्तु[786]—इदं तिथिभान्ते च पारणमिति सामान्यबाधकम् ।

उपवासेषु सर्वेषु पूर्वाह्णे पारणं भवेत् ॥
तिथ्यन्ते चोत्सवान्ते च पारणं यत्र चोद्यते ।
यामत्रयोर्द्ध्ववर्त्तिन्यां प्रातरेव हि पारणम् ॥

786- कालमाधवे (पृ पृ-244 245) माधवाचार्यवचनमत्र यथा—ननु, यदा पूर्वविद्धायामुपवासस्तदा परेद्युः किं तिथ्यन्ते पारणं भवति किं वा तिथिमध्ये? शास्त्रन्तु पक्षद्वयेऽपि समानम् । तच्च, तिथ्यन्तपारणवचनानि पूर्वमुदाहृतानि । तिथिमध्यपारणवचनं तु स्कन्दपुराणे पठ्यते—

उपोषणं चतुर्दश्यां चतुर्दश्यां तु पारणम् ।
कृतैः सुकृतलक्षैश्च लभ्यते वाऽथवा न वा ॥

× × ×

तिथीनामेव सर्वासामुपवासव्रतादिषु ।
तिथ्यन्ते पारणं कुर्याद्विना शिवचतुर्दशीम् ॥ इति ।

वाढम् । अस्ति हि द्विविधं शास्त्रम्, तस्य च द्विविधस्य शास्त्रस्य प्रतिपत्प्रकरणोक्तन्यायेन व्यवस्था द्रष्टव्या । यदा यामत्रयादर्वागेव चतुर्दशी परिसमाप्यते तदा तिथ्यन्ते पारणम् । यदा तु चतुर्दशी यामत्रयमतिक्रामति तदा चतुर्दशीमध्ये पूर्वाह्णे पारणं कुर्यात् । इति ।

इति वचनात् । तेन यदा चतुर्दशी यामत्रयादर्वाक् समाप्यते तदा तिथ्यन्ते पारणम् । यदा यामत्रयादूर्द्ध्वगता सा तदा चतुर्दश्यामेवेति व्यवस्था । विना शिवचतुर्दशीमित्यस्याप्ययं भाव इत्याहुः । नव्यास्तु तिथ्यन्ते पारणे शिवरात्रिनिषेधाद्यामत्रयात् पूर्वमपि चतुर्दशीसत्त्वे तस्यामेव पारणं न तु तदन्तचतुर्दश्यां तु पारणमिति चतुर्दशीगुणफलस्य निरवकाशत्वेन त्यागायोगात् । तिथ्यन्ते पारणस्य व्रताङ्गत्वेन नित्यतया काम्याद् दुर्बलत्वात् । अन्यथा रामनवम्यां दशमीपारणादावप्येवमापत्तिः । दर्शश्राद्धकारी तु श्राद्धं कृत्वा पारयेदित्याहुः ।

चैत्रकृष्णचतुर्दशी

स्कान्दे— चैत्रे मासि चतुर्दश्यां मदनस्य महोत्सवः ।
भगवान् तुष्यते कामः पुत्रपौत्रसमृद्धिदः ।।
न मानयन्ति ये गर्वान्मद्दिनं मानवाधमाः ।
तेषां पुण्यफलं दत्तं मया ते चैत्रमासिकम् ।।

ते तुभ्यमसुराय । देवलः—

चैत्रकृष्णचतुर्दश्यां यः स्नायाच्छिवसन्निधौ ।
पिशाचत्वं न तस्य स्याद् गङ्गायां तु विशेषतः ।।
चैत्रकृष्णचतुर्दश्यामङ्गारकदिनं भवेत् ।
पिशाचत्वं पुनर्न स्याद् गङ्गायां स्नानभोजनात् ।।

स्नुहीचतुर्दशी

राजमार्त्तण्डे—धवलितकलशन्यस्ता रक्तपताका स्नुहीभवने ।
चैत्रासितभूतदिने पापरुजं दूरतोऽभिधत्ते ।।

चैत्रकृष्णचतुर्दश्यां सितचूर्णादिभिः शुक्लघटे स्नुहीशाखां रक्तपताकायुतां कृत्वा गृहोपरि न्यसेत् । एवं सति पापरुजो नश्यन्ति ।

पौर्णमासी

इयञ्च पूर्वविद्धा ग्राह्या युग्मात् । बृहस्पतिः—

एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी ।
अमावास्या तृतीया च उपोष्याः स्युः परान्विताः ।।

अत्रोपवासशब्दो व्रतपर इति विश्वनाथादयः[787] । तेन व्रतमात्रे परविद्धा ग्राह्येत्यर्थः । वैवर्त्तेऽपि—

भूतविद्धा न कर्त्तव्या अमावास्या च पूर्णिमा ।
वर्जयित्वा मुनिश्रेष्ठ ! सावित्रीव्रतमुत्तमम् ॥

यमः— पक्षान्ते स्रोतसि स्नायात्तेन नायाति मत्पुरम् ।
"पौर्णमासीषु चैतासु मासर्क्षसहितासु च ।
एतासां स्नानदानाभ्यां फलं चाष्टगुणं स्मृतम् ॥"[788]
दृश्यते सहितौ यस्यां दिवि चन्द्रवृहस्पती ।
पौर्णमासी तु महती ज्ञेया संवत्सरे तु सा ॥
तस्यां दानोपवासाभ्यामक्षयं परिकीर्त्तितम् ॥[789]

मासर्क्षाणि चित्राविशाखादीनि । तदुक्तम्—

भाद्राश्विनौ त्रिभौ मासौ फाल्गुनस्तु त्रिभो मतः ।
अन्यमासेषृक्षयुग्मम्........ ॥ इति ।
माससंज्ञे यदा ऋक्षे चन्द्रः सम्पूर्णमण्डलः ।
गुरुणा याति संयोगं सा तिथिर्महती स्मृता ॥ (गार्ग्यः)

स्कान्दे— आषाढी-कार्त्तिकी-माघी-वैशाखीषु कृतञ्च यत् ।
तदनन्तफलं प्रोक्तं स्नानदानजपादिकम् ॥

अनन्तेत्यनेन स्नानमिदं काम्यम् । इदं चोदयव्यापितिथौ कार्यम् ।

यां तिथिं समनुप्राप्य उदयं याति भास्करः ।
सा तिथिः सकला ज्ञेया स्नानदानजपादिषु ॥

इति देवलोक्तेः । उदयस्त्रिमुहूर्त्तः । दिनद्वये तूदयव्याप्तौ तु युग्मात् पूर्वा । शुद्धाधिकायां न परा, तिथिमलत्वात् ।

787- उपवासशब्दोऽत्र व्रतपरः । इति स्मृतिसारसङ्ग्रहे पञ्चदशीनिर्णये विश्वनाथः । कालसारकारो गदाधरश्चापि तथैवाह, यथा—एकादश्यष्टमी.... इति वृहस्पत्युक्तिव्रतपरैवेति ज्ञेयम् । इति ।

788- कालसारे स्कान्दवचनमेतत् । 789- विष्णुस्मृतौ 49/9-10 ।

आकामावेषु यच्छ्राद्धं दानं यच्च यथाविधि ।
उपवासादिकं यच्च तदनन्तफलं स्मृतम् ॥[790]

ज्येष्ठपूर्णिमायां स्नानयात्रा

ब्राह्मे[791]—मासि ज्येष्ठे च सम्प्राप्ते नक्षत्रे शक्रदैवते ।
पौर्णमास्यां तदा स्नानं सर्वकालं हरेर्द्विजाः ॥
सर्वतीर्थमयः कूपस्तत्रास्ते निर्मलः शुचिः ।
तदा भोगवती तत्र प्रत्यक्षं भवति द्विजाः ॥
तस्माज्ज्यैष्ठ्यां समुद्धृत्य हैमाढ्यैः कलशैर्जलम् ।
कृष्णरामाभिषेकार्थं सुभद्रायाश्च भो द्विजाः ॥
कृत्वा सुशोभनं मञ्चं पताकाभिरलङ्कृतम् ।
सितवस्त्रपरिच्छन्नं मुक्ताहारावलम्बितम् ॥
तत्र नानागीतवाद्यैः कृष्णं नीलाम्बरं द्विजाः ।
स्थाप्य मध्ये सुभद्राञ्च जयमङ्गलनिःस्वनैः ॥
ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्चान्यैश्च जातिभिः ।
अनेकजन्मसाहस्रैः कृतं स्त्रीपुरुषैर्द्विजाः ॥
गृहस्थाः स्नातकाश्चैव यतयो ब्रह्मचारिणः ।
स्नापयन्ति तदा कृष्णं मञ्चस्थं सहलायुधम् ॥
तस्मिन् काले तु ये मर्त्याः पश्यन्ति पुरुषोत्तमम् ।
बलभद्रं सुभद्राञ्च ते यान्ति पदमव्ययम् ॥
कपिलाशतदानेन यत्फलं पुष्करे स्मृतम् ।
तत्फलं कृष्णमालोक्य मञ्चस्थं लभते नरः ॥

स्कान्दे— ज्येष्ठ्यां प्रातस्तरे काले ब्रह्मणा सहितं हि माम् ।
रामं सुभद्रां संवीक्ष्य ब्रह्मलोकमवाप्नुयात् ॥

प्रातस्तर इति तरपाऽरुणोदयोऽस्य कालः । दिनद्वयेऽरुणोदयव्याप्तौ माघसप्तमीन्यायात् पूर्वा । एतेन पूर्णिमां हित्वा केवलज्येष्ठायां स्नातव्यम् ।

790-कालसारे महाभारतवचनमेतत् । 791-ब्रह्मपुराणे 65 तमेऽध्याये द्रष्टव्यम् ।

ज्येष्ठाद्वैधे 'तूदये त्रिमुहूर्त्तस्थमि'तिमाधवीयरीत्या पूर्वा ग्राह्येति स्मृतिसारः[792] परास्तः । तिथिं विना केवलनक्षत्रग्रहे मानाभावादसमाचाराच्च ।[793]

> ततः पञ्चदशाहानि मम स्नानादनन्तरम् ।
> सुरूपां वा विरूपां वा न पश्येत् प्रतिमां मम ॥[794]

सुरूपां प्रतिष्ठाजीवन्यासादिना शुद्धस्वभावाम् । 'रूपं स्वभावे सौन्दर्य'' इति मेदिनीकारः । विरूपां तदन्याम् । प्रतिमां दारुब्रह्ममूर्त्तिम् । चन्दनस्नानभावेन सुरूपाम्, तदभावेन विरूपामिति सर्वदा रूपं प्रतिमार्थकं वा । पञ्चदशाहान्यत्र सावनानि, अवधिभावात् । तेन कदाचित् क्षयतिथिद्वये गुण्डिचायात्रादिने तद्दर्शनं स्यात् । एवमाषाढीयमलमासे तत्प्रतिमादर्शनेऽपि न क्षतिः । तदनाचारस्त्ववशास्त्रीयः ।

आषाढपूर्णिमा

अयोध्याकाण्डे भरतशपथे[795]—

> आषाढी-कार्त्तिकी-माघी-तिथयः पुण्यसम्भवाः ।
> अप्रदानवतो यान्तु यस्यार्योनुमते गतः ॥

अप्रदानवतो दानशून्यस्य ।

श्रावणपूर्णिमा

उपाकर्मणि[796] किञ्चिल्लिख्यते । बह्वृचपरिशिष्टे[797]—

792- कालमाधवे (पृ-17) सम्पूर्णवचनं यथा—

> उदये त्रिमुहूर्त्तस्थं नक्षत्रं व्रतदानयोः ।
> दिनद्वये तथात्वे तु पूर्वं स्याद् बलवत्त्वतः ॥ इति ।

मुद्रितस्मृतिसारसङ्ग्रहे एतद्वचनाभावः । किन्तु तत्र 'तस्माज्ज्यैष्ठ्यां समुद्धृत्ये'त्यादिवचनमात्रोद्धरणात् केवलं ज्येष्ठानक्षत्रयुक्तपूर्वाह्णकाले स्नानयात्रा सूच्यते ।

793- गदाधरेणापि कालसारे उक्तमित्थम्, यथा—ज्येष्ठानक्षत्रं विनाऽपीयं यात्रा फलदा, अन्यथा सर्वकालमित्यसङ्गतं स्यात् । इति ।

794- कृत्यकौमुद्यां (पृ-25) वायुपुराणवचनमेतत् ।

795- कालसारे पठ्यते । मुद्रितरामायणे तु वचनमिदं नास्ति ।

पर्वण्यौदयिके कुर्युः श्रावण्यां तैत्तिरीयकाः ।
बह्वृचाः श्रवणे कुर्युर्ग्रहसङ्क्रान्तिवर्जिते ॥

'हस्तर्क्षे सामवेदिनः' इति गोभिलीये[798] चतुर्थपादः । श्रवण इत्यनेन पूर्णिमाभिन्नतिथौ श्रवणर्क्षं इत्यर्थः । पुष्यादावन्यत्र ग्रहसङ्क्रान्त्यादिदोषे पूर्वग्रहेऽप्यत्रोत्तरर्क्षं ग्राह्यम् ।

श्रवणं तूत्तरं ग्राह्यमुपाकरणकर्मणि ।

इति माधव[799]वचनात् । औदयिके त्रिमुहूर्त्तपूर्वाह्णे ।

भवेदुपाकृतिः पौर्णमास्यां पूर्वाह्ण एव च ।

इति बृहत्प्रचेतोवाक्यात् । गार्ग्यः—

"तैत्तिरीयव्यतिरिक्तैर्यजुःशाखीयैः पूर्वविद्धैव पौर्णमासी ग्राह्या ।"

वेधश्च निगमे[800]—

श्रावण्यां प्रौष्ठपद्यां वा प्रतिपत्षण्मुहूर्त्तकैः । इति ।

याज्ञवल्क्ये[801]—अध्यायानामुपाकर्म श्रावण्यां श्रवणेन वा ।
हस्तेनौषधिभावे वा पञ्चम्यां श्रावणस्य तु ॥
पौषमासस्य रोहिण्यामष्टकायामथापि वा ।
जलान्ते छन्दसां कुर्यादुत्सर्गं विधिवद्बहिः ॥ इति ।

पञ्चमी च शुक्ला । तत्रैव हस्तसम्भवात् । उपाकर्माख्यसंस्कारकर्म कार्यमित्यर्थः । ओषधीनां व्रीह्यादीनाम् । हस्तेनेत्यस्य ओषधिसद्भावे पञ्चम्यामित्युभयान्वयः । श्रावण्यां श्रवणेन वेति तिथ्यृक्षविकल्प इति कर्काचार्याः[802] ।

796- उपाकर्मेति वेदसंस्कारकर्मणो नामधेयम् । इत्याह मित्रमिश्रः वीरमित्रोदयसमयप्रकाशे (पृ-91) ।
797- कृत्यकौमुद्याम् (पृ-46) । 798- निर्णयसिन्धौ (पृ-92) ।
799- कालमाधवे (पृ 17) ।
800- विद्धा स्याच्छन्दसां तत्रोपाकर्मोत्सर्जनं भवेत् ।
इति निर्णयसिन्धौ (पृ-91) उत्तरार्द्धपाठः ।
801- याज्ञवल्क्यस्मृतौ-1/142-143 ।
802-उपाकर्मकालः पारस्करेण (गृह्यसूत्रम्-2/10/2) उक्तो यथा—ओषधीनां

केचित्तु[803]—

उपाकर्म च कर्त्तव्यं कर्कटस्थे दिवाकरे ।

हस्तेन शुक्लपञ्चम्याम्........ ॥

इति वाक्यात् श्रावणपूर्णिमायां श्रवणाया अलाभे हस्तेन शुक्लपञ्चम्यामिति विकल्पमामनन्ति । युक्तं चैतत् ।

श्रावण्यां श्रवणा यत्र तत्रोपाकर्म कारयेत् ।

योगो नास्ति यदा काले हस्तेनैव तु पञ्चमी ॥

इति राजमार्त्तण्डा[804]नुकूल्यात् । हस्तेनेति

सहैव दशभिः पुत्रैः भारं वहति गर्दभी ।[805]

इति वदप्रधानतृतीया । हस्ताभावे केवलपञ्चम्यामुपाकृतिः । श्रावण्यां श्रवणायोग इति मुख्यः कल्पः । ग्रह उपरागः, सङ्क्रान्तिः रविसङ्क्रमणादिः, तत्पर्युदासः । कदाचिदत्रासम्भवे भाद्रपूर्णिमायां तत् कुर्यात् ।

प्रादुर्भावे श्रवणेन श्रावण्यां पौर्णमास्यां श्रावणस्य पञ्चमीं हस्तेन वा । इति । अत्र भाष्यकारः कर्काचार्य आह यथा—'ओष....स्याम्' श्रावण्यां हि पौर्णमास्यां श्रवण एव प्रायशो भवति ओषधीनां प्रादुर्भावश्च । तदेतदुभयं तस्या एव विशेषणम् । 'श्राव....न वा' तत्रापि प्रायशो हस्त एव भवति । अतः कालद्वयस्योपाकरणकर्मणो विकल्पोऽयम् । इति ।

803- कृत्यकौमुदीकारो (पृ-35) बृहस्पतिः प्रतिपादयत्येवम्, यथा— हस्तेनेत्यस्य ओषध्यभावे पञ्चम्यामित्युभयत्र सम्बन्धः । यद्वा श्रावण्यां श्रवणायोगो न भवति तदा हस्तेन श्रावणपञ्चम्यामित्ययं पक्षो बोद्धव्यः, 'उपाकर्म....शुक्लपञ्चम्यां श्रावण्यां श्रवणा न चेत् ॥' इति स्मृतिसमुच्चयवचनात् । इति । गदाधरश्चापीत्थं कथयति, यथा—यदा श्रावण्यां श्रवणायोगाभावनिश्चयः तदा तत्पूर्वतो हस्तशुक्लपञ्चम्याम्, एतदुभयानिश्चये केवलं श्रावणपूर्णिमायां कुर्यात् । इति ।

804- राजमार्त्तण्डे (पृ-111) ।

805- अत्र सम्पूर्णमभियुक्तवचनं यथा—

सहैव दशभिः पुत्रैर्भारं वहति गर्दभी ।

सुखं शेते वने सिंही एकपुत्रसमन्विता ॥ इति ।

श्रावण्यां प्रौष्ठपद्यां वाऽप्युपाकृत्य यथाविधि ।

इति मनुस्मरणात्[806] । तेन बह्वृचानां श्रावणे तैत्तिरीयाणां प्रौष्ठपद्यामिति व्यवस्था सूचिता । सामगानां विशेषमाह गोभिलः[807]—

अथ प्रौष्ठपद्यां हस्ते वोपाकरणं पुष्ये चोत्सर्गः । इति ।

हस्ते हस्तर्क्षयुक्तदिने । पुष्यर्क्षदिनं सिंहार्केऽपि ।

सिंहे रवौ तु पुष्यर्क्षे पूर्वाह्णे विधिवद् बहिः ।
छन्दोगा मिलिताः कुर्युरुत्सर्गं सर्वच्छन्दसाम् ॥
शुक्लपक्षे तु हस्तेन उपाकर्मापराह्णिकम् ।।[808]

इदं मलमासेऽपि कार्यम् , सिंहे रवाविति वचनात् ।

उपाकर्म तथोत्सर्गः प्रसवाहोऽष्टकादयः ।
मलिम्लुचेऽपि कर्त्तव्याः शेषमन्यद् विवर्जयेत् ॥

इति विद्याकरपद्धतेश्च । छन्दोगभिन्नानां तु शुद्धमासे ।

उपाकर्म च हव्यञ्च कव्यं दुर्गोत्सवं तथा ।
उत्तरे नियतं कुर्यात् पूर्वे तन्निष्फलं भवेत् ॥

इति प्रजापतिवचनात् ।

माधवादित्रिके मासि अधिमासो भवेद्यदि ।
कर्कटे तु हरेः स्वापः श्रावण्यां स्यादुपाकृतिः ॥
श्रावणादित्रिके मासि अधिमासो भवेद्यदि ।
सिंहेऽर्के च हरेःस्वापः श्रावण्यां स्यादुपाकृतिः ॥

सिंहे इति तु अधिमासे निपतित इति साम्याय सिंहपूर्वमिथुनार्थकम् । श्रावणमासार्थकत्वे लक्षणायास्तुल्यत्वात् । मिथुनार्क इति वा पाठः । स्मृतिमहार्णवे[809] —

806- युक्तश्छन्दांस्यधीयीत मासान् विप्रोऽर्धपञ्चमान् ।
इति मनुस्मृतौ (4/95) उत्तरार्द्धपाठः ।

807- गोभिलगृह्यसूत्रे-3/3/1 ।

808- कृत्यकौमुद्यां (पृ-36) गार्ग्यवचनमेतत् । निर्णयसिन्धौ (पृ 93) तु विधिवत् स्थाने अविवरे, सर्वच्छन्दसां-स्थाने स्वस्वच्छन्दसाम्-इति पाठः । अविवरे ग्रहादिदोषहीने ।

सङ्क्रान्तिर्ग्रहणं वाऽपि पौर्णमास्यां यदा भवेत् ।

उपाकृतिस्तु पञ्चम्यां कार्या वाजसनेयिभिः ।

विस्तरः कृत्यकौमुद्या[810]मुन्नेयः ।

श्रावण्यां बलदेवपूजा

अमावास्यां तुलादित्ये लक्ष्मीर्निद्रां विमुञ्चति ।

सुखरात्रेरुषःकाले प्रदीपोज्ज्वलितालये ॥

गावो महिष्यश्छागाद्याः शोभ्याः पूज्याश्च तद्दिने ।

पूजनं केचिदिच्छन्ति श्रावण्यां तु गवामपि ॥

पक्षद्वयस्य देशभेदेन[811] विकल्पः । कौमुद्याम्[812]—

श्रावणी पूर्णिमा यत्र मध्याह्नव्यापिनी यदि ।

उत्थाने बलदेवस्य नन्दाविद्धां विवर्जयेत् ॥

इति वचनात् पञ्चधाविभक्तमध्याह्नोऽस्य कालः ।

अह्नो मध्ये वामनो रामरामा[813]—

वित्यस्य प्रामाण्ये तु सुतराम् । तेन तिथिद्वैधे मध्याह्नव्यापिनी ग्राह्या । दिनद्वये मध्याह्नव्याप्तौ तदव्याप्तौ च पूर्वा,

नन्दायुक्तपौर्णमास्यां कृत उत्थापने बलेः ।

तत्र रोगी भवेद्राजा गावो नश्यन्त्यनेकधा ॥

इति स्मरणात् ।

पौर्णमास्यां सनन्दायां यत्र चोत्थाप्यते बलः ।

गवां तत्र भवेद्रोगो दुर्भिक्षं च तदा भवेत् ॥

इत्यादिवचनाच्च । न चैतेन पूर्वेद्युरुत्थापनाभावपरम् । न तु पूजनार्थ-

---

809- कालसारे पठ्यते । 810- द्रष्टव्यं कृत्यकौमुद्याम् (पृ पृ 34-46) ।

811- अस्मद्देशे श्रावणपूर्णिमायामेव गोपूजा क्रियते ।

812- कृत्यकौमुद्याम् (पृ-33) ।

813- पण्डितसर्वस्वे रामनवमीप्रकरणे सम्पूर्णवचनं यथा—
अह्नो मध्ये वामनो रामरामौ क्रोडादित्यौ चापराह्णे च काले ।
मत्स्यः कूर्मो बुद्धकल्की च सायं कृष्णो रात्रौ सायमासीन्नृसिंहः ॥ इति ।

कमपीति वाच्यम् । दुर्गोत्थापनवत् पूजाया अपि प्राप्तत्वात् ।

यामद्वयं चतुर्दश्यां पूर्णिमायां द्वियामकम् ।
पूर्वेऽहनि बलेः पूजा पशूनाञ्च तथोत्तरे ॥

इत्यादिना पूजाया स्फुटत्वाच्च । ऋजवस्तु[814] पशूनाञ्च तथोत्तर इत्यनालोचयन्तः पूर्वेद्युर्बलपूजावशाद् गवादिपूजामपि तदाचरन्ति ।

श्रावणी दुर्गनवमी.... । पूर्वविद्धैव कर्त्तव्या.... ॥

इत्यस्य व्यवस्थया बलपूजापरत्वात् । व्यवस्थायाश्च विकल्पतः प्राबल्यात् । दुर्गनवमीत्याङ्यापोः संज्ञाछन्दसोरित्यापो ह्रस्वः । दौर्गेत्यन्तः क्वचित् पाठः । विश्वनाथदिव्यसिंहौ[815] तु—तिथिद्वैधे पूर्वदिने रौद्रत्वादपराह्णेऽपि पूजेत्यूचतुः । अत्र ब्रूमः—तिथिद्वैधे यदा परेद्युर्मात्रे मध्याह्नव्याप्तिस्तदा पूर्वेद्युरित्यसङ्गतम् । न च नन्दाविद्धनिषेधात् परदिने मध्याह्नव्याप्तावपि पूर्वा स्यादिति वाच्यम् । तन्निषेधवाक्यस्योभयेद्युस्तद् व्याप्त्यव्याप्त्योः कृतार्थत्वात् । अन्यथा मध्याह्नवाक्यानर्थक्यम् । गणेशचतुर्थ्यादावेवं प्रसङ्गाच्च । किञ्च 'मध्याह्नव्यापिनी यदी'ति स्वलिखितवाक्ये श्रुत्या मध्याह्नलाभे दुर्बललिङ्गादपराह्णकल्पनानौचित्यम् । न चापि नाम मध्याह्नस्यापि सङ्ग्रहः । एवं चतुर्दशीदिनसुरतन्यायादपराह्णोक्तिविरोधमिलितयोस्तद् द्वयोर्ग्राहकता च स्यात् । श्रुताश्रुतकल्पयोरतुल्यबलवत्त्वेन विकल्पायोगाच्च । अतएव बलाबलाधिकरण उक्तम्—सन्दिग्धमसन्दिग्धेन बाध्यते । इत्यलं मृताघातेन ।

इन्द्रपौर्णमासी

शतानन्दः—पञ्चदश्यां महेन्द्रं च पूजयेत् केलिकौतुकैः ।
गीतवादित्रमाङ्गल्यैर्भूतये भूपतिर्निशि ॥

निशीति प्रदोषकालः ।

814- "यामद्वयं चतुर्दश्यां पौर्णमास्यां द्वियामकम् ।
पूर्वेऽहनि बलेः पूजा पशुवन्दापना तथा ॥" इति स्मृतिवचनं प्रतिपादयन् गदाधरः कालसारे पूजाद्वयं पूर्वविद्धायां कथयति ।

815- तिथिद्वैधे पूर्वदिने पूजानुष्ठानमित्यर्थः । इत्याह स्मृतिसारसङ्ग्रहकारो (पृ-52) विश्वनाथमिश्रः । दिव्यसिंहश्च कालदीपे (पृ 93)-तिथिद्वैधे पूर्वदिने रौद्रत्वादपराह्णेऽपि पूजानुष्ठानम् । इत्यत्र कथयति ।

कौमुदीपूर्णिमा

लैङ्गे— आश्विने पौर्णमास्यां तु चरेज्जागरणं निशि ।
कौमुदी सा समाख्याता कार्या लोकविभूतये ॥
कौमुद्यां पूजयेल्लक्ष्मीमिन्द्रमैरावते स्थितम् ।
सुगन्धैर्निशि सद्वेशस्त्वक्षैर्जागरणं चरेत् ॥
निशीथे वरदा लक्ष्मीः को जागर्त्तीतिभाषिणी ।
तस्मै ऋद्धिं प्रयच्छामि अक्षैः क्रीडां करोति यः ॥
नारिकेलैश्चिपिटकैः पितॄन् देवान् समर्चयेत् ।
बन्धूंश्च प्रीणयेत्तेन स्वयं तदशनो भवेत् ॥

विष्णुः— को जागर्त्ति-वचोऽभिधाय पुरुषं लक्ष्मीस्त्यजेत् सुप्तकम् ।
शुक्ले पञ्चदशीनिशीथसमये लोकस्ततो जागृयात् ॥

निशि स्वयमिष इत्याश्विनार्थकः क्वचित्[816] पाठः । पूजानन्तरं यथा—

एवं कृत्वा विधानेन द्यूतक्रीडां समाचरेत् ।
ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्चैवान्यवर्णजैः ॥
अम्बुजैर्नारिकेलैश्च वस्त्रैश्चैव कपर्द्दकैः ।
परस्परं प्रदातव्यं पूज्यां देवीं समर्च्चयेत् ॥
एवं यः कुरुते भक्त्या तस्य देवी प्रिया भवेत् ॥

निशीति प्रदोषार्थकम् । निशीथः शिवरात्रिवदर्द्धरात्रीयमध्यमुहूर्त्तः । तेन प्रदोषनिशीथोभयव्यापिनी तिथिर्मुख्या । यदा पूर्वेद्युर्निशीथमात्रव्याप्तिः परेद्युश्च प्रदोषमात्रव्याप्तिस्तदा परेद्युरेव कोजागरकृत्यम्, प्रधानपूजाकालप्रदोषवशात् । पूर्वविद्धपूर्णिमाया वर्ज्जनाच्च । यदा पूर्वेद्युर्निशीथमात्रव्याप्तिः परेद्युश्च न प्रदोषव्याप्तिरपि तदा किमु पूर्वेद्युर्न स्यात्,

नक्तादिव्रतयोगे तु रात्रियोगो विशिष्यते ।

इति वचनात् । दिनद्वये तदुभयव्याप्त्यव्याप्तौ त्वसम्भविनीन्दौ । स्मृतिसारकारस्तु[817] निशीथपदमनुक्त्वा प्रदोषार्थकं वा तज्जानन् पूर्वेद्युः प्रदोष-

---

816- 'निशि स्वयमिषे' इति कालसारे धृतपाठः ।

निशीथोभयव्याप्तिसत्त्वासत्त्वसाधारण्येन परेद्युः प्रदोषमात्रव्याप्तौ तु परा ग्राह्येत्यभिदधे । तदेतन्न्यायमपि स्वदेशव्यवहारत्यागिनो गौडरघुनन्दनावलम्बिनो मूढदिव्यसिंहस्य ग्रन्थे[818] उत्कलबाला माद्यन्तीति भीत्योपेक्षितमस्माभिः ।

पुष्यपूर्णिमा

ब्राह्मे— इदं जगत् पुरा लक्ष्म्या त्यक्तमासीत्ततो हरिः ।
पुरन्दरश्च सोमश्च तथा शुक्रबृहस्पती ॥
पञ्चैते पुष्ययोगेन पौर्णमास्यां तपोबलात् ।
अलङ्कृतं पुनश्चक्रुः सौभाग्योत्साहलक्ष्मीभिः ॥
तस्मान्नरः पुष्ययोगे तत्र सौभाग्यवृद्धये ।
धनैर्विप्रांश्च सन्तर्प्य नवैर्वस्त्रैश्च शोभितान् ॥
ततः पुष्टिकरं हृद्यं भोक्तव्यं घृतपायसम् ।
पुष्ययोगेषु कर्त्तव्या राज्ञां वन्दापना सदा ॥

पुष्ययोगेष्विति नक्षत्रयोग एव वन्दापनार्थम् । पुष्यर्क्षद्वैधे तु

उदये त्रिमुहूर्त्तस्थं नक्षत्रं व्रतदानयोः ।
दिनद्वये तथात्वे तु पूर्वं स्याद् बलवत्त्वतः ॥

इति माधवीयात्[819] पूर्वग्रहः । इदं माधवीयं पूर्णिमायुक्ततद्भिन्नपुष्यमात्र-

817- स्मृतिसारसङ्ग्रह (पृ-66) कारो विश्वनाथोऽत्र कथयति यथा—तिथिद्वैधे भास्वतोऽस्तादुपरि यदा घटिकात्रयपर्यन्तमधिकं व्याप्य पञ्चदशीं व्याप्नोति तदा परदिने कर्त्तव्यम्, त्रिभिर्मुहूर्त्तैर्विध्यन्तीतिवचनात् । अन्यथा पूर्वदिन एव रात्रावपि निशाप्रधानत्वात् । इति ।

818- कालदीपे (पृ-94) दिव्यसिंहस्य वचनं यथा—अत्र निशीति निशीथेति चाभिधानाद्रात्रिकृत्यमिदम् । यद्दिने प्रदोषनिशीथोभयव्यापिनी पौर्णमासी तद्दिने कोजागरकृत्यम्, उभयकालव्याप्त्यनुरोधात् । यदा तु पूर्वदिने निशीथव्याप्तिः परदिने प्रदोषव्याप्तिस्तदा परेद्युरेव कृत्यं प्रधानपूजाकालव्याप्त्यनुरोधात् । यदा तु पूर्वेद्युर्निशीथव्याप्तिः परेद्युर्न प्रदोषव्याप्तिस्तदा सुतरां पूर्वेद्युस्तत्कृत्यम् । इति । कालसारकारो गदाधरश्चापीत्थमभिदधे ।

819- कालमाधवे (पृ-17) ।

साधारणमिति स्थूलधियः[820] । वस्तुतस्तु पुष्ययोगेष्विति योगपदस्वरसात् पूर्वदिनपूर्णिमायामुदयोत्तरपुष्येऽपि तन्नीराजनं स्यात्, न तु परे प्रतिपदुदयपुष्ये । जयन्त्यपराजितादौ तिथ्यृक्षयोग एवाचारस्यासकृदावेदितत्वात् । अन्यथा चैत्राद्यन्यमासीयपुष्येऽपि तदापत्तिः ।

'मज्जते तु अवत्सा गौः.... ।' 'अमा वै सोमवारेण[821].... ।'

इत्यादिवत् पुष्यपूर्णिमाऽव्यवहितपुष्यर्क्षग्रहाददोषः । केवलं पुष्ये राजवदन्येषामपि पूपनववस्त्रादिभोगे त्वनाचारादेकशेषस्य दुर्वचत्वात् । पुष्ययोगेष्वित्यत्र पुष्यं केवलम् । योगः पुष्यपूर्णिमायोगः । बहुत्वमनेकवर्षाभिप्रायकम् । पुष्यातारकात्रित्वकृतं वा । तेन तद्योगाभावे केवलपुष्य इति तदर्थः, केवलश्रवणे शक्रोत्थापनत्वात् ।

माघपूर्णिमा

लैङ्गे— वह्न्युत्सवः सिते पक्षे माघे मास्याद्र्भे निशि
द्वादश्यां पञ्चदश्यां वा भवेद्वह्निमहोत्सवः ॥

निशीत्युक्तेः प्रदोषः कर्मकालः । तिथिद्वैधे प्राग्वत् परा ।

दोलयात्रा

ब्राह्मे— नरो दोलागतं दृष्ट्वा गोविन्दं त्रिदशार्च्चितम् ।
फाल्गुन्यां संयतो भूत्वा गोविन्दस्य पुरं व्रजेत् ॥

शतानन्दः—फाल्गुने पौर्णमास्यां तु कार्यः फल्गुमहोत्सवः ।
गोविन्दो दोलया क्रीडेत् तत्रार्यम्णि गते विधौ ॥

अर्यम्णि उत्तरफाल्गुन्याम् ।

820- गदाधरोऽत्र कालसारे 'तत्र तिथिपक्षवन्नक्षत्रपक्षेऽपि व्यवस्था, नक्षत्रद्वैधे उदये त्रिमुहूर्त्तस्थं....बलवत्तरम् ॥ इति माधवीयकारिकाया व्यवस्था इत्याह ।

821- अमायां योगविशेषमाह निर्णयसिन्धौ (पृ-36) शातातपः —
अमावास्यां भवेद्वारो यदा भूमिसुतस्य वै ।
जाह्नवीस्नानमात्रेण गोसहस्रफलं लभेत् ॥
अमा वै सोमवारेण रविवारेण सप्तमी ।
चतुर्थी भौमवारेण विषुवत्सदृशं फलम् ॥ इति ।

वृत्ते तुषारसमये सितपञ्चदश्यां प्रातर्वसन्तसमये समुपस्थिते च ।[822] इति वक्ष्यमाणवैष्णवमते प्रातःपदातिदेशात् स्मार्त्तानामप्युदयत्रिमुहूर्त्तः प्रातर्मात्रं वा कालः । 'दैवे ह्योदयिकी ग्राह्ये'तिसामान्याच्च । प्रातर्द्वैधे पूर्णिमा सामान्यात् पूर्वा ग्राह्या । तिथिमले तु सुतरां मलत्यागः । दक्षिणाभिमुखमितिवक्ष्यमाणवैष्णवशास्त्रातिदेशाद्दोलायां हरेर्दक्षिणामुखत्वं कार्यम् । एवं 'सम्प्राश्य चूतकुसुममि'तिवैष्णवशास्त्रात् स्मार्त्तानां दोलाविधिः चूतपुष्पफलत्यागश्च केषाञ्चित् ।

अमावास्या[823]

इयं प्रतिपद्युता ग्राह्या । यथा वाराहे चण्डालशपथे—

षष्ठ्यष्टम्यप्यमावास्या उभे पक्षे चतुर्दशी ।
अस्नातानां गतिं यास्ये यद्यहं नागमे पुनः ॥

इत्यत्र स्नानमावश्यकम् ।

अमास्नानं गयाश्राद्धं दक्षिणामुखभोजनम् ।
न जीवत्पितृकः कुर्यात् कृते तु पितृहा भवेत् ॥

इतिवचनं रागप्राप्तसुखस्नाननिवारकम् , न तु नित्यनैमित्तिकयोरपीति । अन्यथा महत्यर्द्धोदयग्रहणस्नानाद्यनापत्तिः ।

पुष्ये च जन्मनक्षत्रे व्यतीपाते च वैधृतौ ।
अमायाञ्च नदीस्नानं पुनात्यासप्तमं कुलम् ॥[824]

822- हरिभक्तिविलासे (14/238) प्रभासखण्डवचनं यथा—
वृत्ते तुषारसमये सितपञ्चदश्यां प्रातर्वसन्तसमये समुपस्थिते च ।
संप्राश्य चूतकुसुमं सह चन्दनेन सत्यं हि पार्थ ! पुरुषोऽब्दशतं सुखी स्यात् ॥इति ।

823- अमावास्यार्थः कालमाधवे (पृ-254) विचार्यते यथा—मत्स्यपुराणे—
अमा वसेतामृक्षे तु यदा चन्द्रदिवाकरौ ।
एषा पञ्चदशी रात्रिरमावास्या ततः स्मृता ॥ इति ।
ब्रह्माण्डपुराणेऽपि—अमा नाम रवे रश्मिश्चन्द्रलोके प्रतिष्ठिता ।
यस्मात् सोमो वसेत्तस्याममावास्या ततः स्मृता ॥ इति ।

824- कालसारे पैठीनसिवचनमेतत् ।

व्यासः — अमावास्यां भवेद् योगो यदि भूमिसुतस्य च ।
गोसहस्रफलं दद्यात् स्नानमात्रेण जाह्नवी ॥
करतोयाजलं प्राप्य यदि सोमयुता कुहूः ।
अरुणोदयवेलायां सूर्यग्रहशतैः समा ॥

करतोयास्नानमन्त्रो यथा—

करतोये सदानीरे सरिच्छ्रेष्ठे शुचिस्मिते ।
पौण्ड्रान् प्लावयसे नित्यं पापं हर करोद्भवे ॥

पौण्ड्रान् देशभेदान् ।

सावित्रीव्रतम्

इदञ्च द्वैधे पूर्वयुतं ग्राह्यम् ।

भूतविद्धा न कर्त्तव्या अमावास्या च पूर्णिमा ।
वर्जयित्वा मुनिश्रेष्ठ सावित्रीव्रतमुत्तमम् ॥

इति वैवर्त्तात् ।

भूतोऽष्टादशनाडीभिर्दूषयत्युत्तरां तिथिम् ।[825]

इति वचनाद् यदा चतुर्दश्यष्टादशनाडीमिताऽधिका वा तदा परविद्धा ग्राह्या ।

सप्तपूर्विकामावास्या

अमावास्या च पित्र्येण नक्षत्रेण च संयुता ।
सप्तप्रकाराः पितरो जाताः कमलसम्भवात् ॥
तेभ्यः पूजा च कर्त्तव्या तत्र सर्वात्मना बुधैः ।
पिण्डो देयस्तथाष्टाङ्गः[826] श्राद्धं कार्यञ्च सर्वदा ॥

कौमुद्याम्[827]—दर्शे सुवर्णवटकैः पतिमाराधयन्ति याः ।

825- तत्रैव स्कान्दवचनमेतत् ।

826- अष्टाङ्गपिण्डो यथा कालसारधृतब्राह्मे—

मधु साज्यं जलं सार्घं पुष्पं धूपं विलेपनम् ।
बलिं दद्याच्च विधिवत् पिण्डोऽष्टाङ्गो भवेत्तथा ॥ इति ।

827- कृत्यकौमुद्यां (पृ-68) 'न वैधव्यं भवेत्तासां पुनर्जन्मसु सप्तसु ।' इत्यन्तिमपाठः ।

ताः सर्वाः सुभगा नार्यः पुत्रवत्यो वराङ्गनाः ।।
न वैधव्यं पुनस्तासां भवेत् सप्तसु जन्मसु ।।

अत्र मघाक्षाभावेऽपि चन्द्रक्षये श्राद्धम् । श्राद्धार्थकार्यं तु द्वैधे परदिने ।

अमावास्या तृतीया च उपोष्याः स्युः परान्विताः ।

इति बृहस्पतिवचनादिति स्मृतिसारः ।[828]

प्रदीपामावास्या

परिशिष्टे[829]—तुलास्थे भास्करे दर्शे उपास्तसमये रवेः ।
एकैकस्य पितुस्त्रींस्त्रीन् प्रदद्यात् पितृयज्ञवत् ।।

पितृयज्ञस्तर्पणम् । स्कान्दे—

एकैकमञ्जलिं द्वौ द्वौ दद्याच्च सनकादयः ।
अर्हन्ति पितरस्त्रींस्त्रीन् स्त्रियस्त्वेकैकमञ्जलिम् ।।
तुलां प्रत्यागते सूर्ये याऽमावास्यातिथिर्भवेत् ।
उपास्तसमये दीपान् पितृन् दद्याच्छुचिः शुचिः ।।
दिवा तत्र न भोक्तव्यं विना बालातुरान् जनान् ।
दीपदानं ततः पश्चाल्लक्ष्मीं सुप्तां प्रबोधयेत् ।।

उपास्तसमये त्रिमुहूर्त्तात्मकप्रदोषे ।

तुलासंस्थे सहस्रांशौ प्रदोषे भूतदर्शयोः ।
उल्काहस्ता नराः कुर्युः पितृणां मार्गदर्शनम् ।।

इति ज्योतिषसामात् ।

दण्डैके रजनीयोगे दर्शस्य च परेऽहनि ।
तदा विहाय पूर्वेद्युः परेऽह्नि सुखरात्रिका ।।
अमा वसति यद्रात्रौ तत्र दीपं प्रदापयेत् ।।

828- स्मृतिसारसङ्ग्रहे (पृ-56)—तिथिद्वैधे परदिने कर्त्तव्यम् ।
अमावास्या तृतीया च ता उपोष्याः परान्विताः ।
इति विष्णुधर्मोत्तरवचनात् । इत्याह ग्रन्थकर्त्ता विश्वनाथमिश्रः ।

829- मुद्रितछन्दोगपरिशिष्टे नोपलभ्यते । किन्तु कालसारे पितृयज्ञवत्-स्थाने गन्धलेपितान् इति धृतपाठः ।

उभयेद्युः प्रदोषव्याप्तौ युग्मात् परदिनं ग्राह्यम् ।

तर्पणं पिण्डदानञ्च श्राद्धञ्चैव परेऽहनि ।

इति पूर्वेद्युरन्त्यमुहूर्त्तोनसायंकाले चन्द्रक्षयालाभ एव । तल्लाभे तु दीपवच्छ्राद्धादिकमपि पूर्वत्र स्यात् । तथा वक्ष्यमाणत्वात् । उभयेद्युः प्रदोषाव्याप्तावपि परा ।

भूताहे ये प्रकुर्वन्ति उल्काग्रहमचेतसः ।

निराशाः पितरो यान्ति शापं दत्त्वा सुदारुणम् ॥

एवं सिद्धे यद्दिने महालयाऽमाश्राद्धे स्यातां तद्दिन एव दीपदानमिति नियमाचारो न शास्त्रीयः । अतएव गोपीनाथेन दीपदाने चन्द्रक्षयापेक्षा नास्तीत्युक्तम् । पितृयज्ञवदित्यतिदेशादपसव्यदक्षिणामुखपुरःसरं दीपा देयाः । सङ्क्षेपात्तद्विधिर्यथा—बहिः स्थण्डिले सितरजसा क्लृप्तेषु वा पदेषु तिलदर्भानास्तीर्य गन्धपुष्पधूपदीपैरभ्यर्च्य प्राग्देशाकाशं पश्यन् क्रत्वादिदशविश्वेदेवेभ्य इमे दीपा इति दशदीपान् प्रत्येकं दद्यात् ।

क्रतुर्दक्षो वसुः सत्यः कालः कामो धुरिलोचनः ।

पुरुरवामाद्रवाश्च विश्वेदेवाः क्रमाद्दश ॥

ततो निवीत्युदङ्मुखः सनकादिसप्तमनुष्येभ्यः[830] प्रत्येकं द्वौ द्वाविति चतुर्दशदीपान् दत्त्वा कृतापसव्यो दक्षिणदिशाकाशं पश्यन् अमुकसगोत्रामुकशर्मन्नस्मत्पितर एते दीपा इति त्रीन् दीपान् दद्यात् । एवं पितामहप्रपितामहयोर्मातामहप्रमातामहवृद्धप्रमातामहेष्वपि त्रींस्त्रीन् दीपान् प्रत्येकं दद्यात् । पितृयज्ञवदितिलिङ्गात्तर्पणवदपुत्रपितृव्यादीनामप्येकदीपदानम् । क्रतुसनकपितृषु गन्धदीपादि दानकाण्डानुसमय एव । पदार्थानुसमये निवीतत्वापसव्यत्वादीनां बहुकृतौ गौरवात् ।

830- सप्त मनुष्याः यथा धर्मशास्त्रशब्दकोषे (पृ-576)—

सनकश्च सनन्दश्च तृतीयश्च सनातनः ।

कपिलश्चासुरिश्चैव वोढुः पञ्चशिखस्तथा ।

एते ब्रह्मसुताः सप्त मनुष्याः परिकीर्त्तिताः ॥ इति ।

दत्त्वोदकं गन्धपुष्पधूपदीपं तथैव च ।
अपसव्यं ततः कृत्वा पितृणामप्रदक्षिणम् ॥

इति याज्ञवल्क्यस्वरसाच्च[831] । उल्कादानमन्त्रो यथा—

यमलोकं परित्यज्य आगता ये महालये ।
उज्ज्वलं ज्योतिषां मार्गं प्रपश्यन्तो व्रजन्तु ते ॥

सुखरात्रिः[832]

धवलसङ्ग्रहे[833]—

कार्त्तिके मासि शुक्लादौ तिथौ च कुमुमांशुकैः ।
सुखार्थी सुखरात्रिः स्यात् कार्या राष्ट्रसुखाय वै ॥

शुक्लादावमायाम् ।

अमावास्यां तुलादित्ये लक्ष्मीर्निद्रां विमुञ्चति ।
सुखरात्रेरुषःकाले प्रदीपोज्ज्वलितालये ॥
पूजयेच्च तथा लक्ष्मीमलक्ष्मीमलनाशिनीम् ।
लक्ष्मीं पञ्चपताकाभिर्ध्वजमेकं गृहे न्यसेत् ॥

उषःकाल इत्यरुणोदयः[834]कालः । वैष्णवानां तु प्रदोष इति भेदो वक्ष्यते ।

831- 'गन्धमाल्यं धूपदानं सदीपकम्' इति मुद्रितयाज्ञवल्क्यस्मृतौ (1/231-32) पाठः ।

832- कृत्यतत्त्वे (स्मृ० त०-II-पृ-451) सुखरात्रिर्विचार्यते यथा—

अमावास्या यदा रात्रौ दिवाभागे चतुर्दशी ।
पूजनीया तदा लक्ष्मीर्विज्ञेया सुखरात्रिका ॥ इति ।

833- कालसारकारोऽत्र चतुर्थपादे 'कायराष्ट्रसुखाय वै' इति पठित्वा 'कायसुखेत्युक्तेः कायसुन्दरप्रतिपदित्यस्य नामान्तरमि'त्याह ।

834- सर्वसाधारण्येन व्रतस्यास्य कर्मकालः प्रदोष उक्तः कृत्यकल्पतरौ नियतकालकाण्डे (पृ-442) कृत्यकौमुद्यादौ (पृ-124) ब्राह्मे यथा—

दिवा तत्र न भोक्तव्यमृते बालातुराज्जनात् ।
प्रदोषसमये लक्ष्मीं पूजयित्वा यथाक्रमम् ॥ इत्यादि ।

अत्र सुखसुप्तिका चोक्ता ब्राह्मे यथा—

अमावास्यायां तु देवाः कार्त्तिके मासि केशवात् ।
अभयं प्राप्य सुप्तास्तु सुखं क्षीरोदसानुषु ॥

दीपावल्युत्सवः

देवीपुराणे[835]—

तुलास्थे दीपदानेन पूजा कार्या महात्मना ।
दीपवृक्षाः प्रकर्त्तव्या दीपचक्रास्तथापराः ॥
दीपयात्रा प्रकर्त्तव्या चतुर्दश्यां कुहूषु च ।
सिनीवालीषु अथवा वत्स ! कार्यं महाफलम् ॥

तुलास्थे तुलाभे स्थिते । सुपि स्थ इति कः । तेन वृश्चिकस्थे रवाविति फलिते मार्गामायामित्यर्थः । तेन मार्गशीर्षकृष्णचतुर्दश्यमाप्रतिपत्सु दीपदानं शक्तानाम् । अथवेत्यस्य कुहूष्वन्वयात् केवलं कुह्वामशक्तपरं तत् । कृष्णपक्ष इत्यनुवृत्तौ भविष्योत्तरे—

नरकाय प्रदातव्यो दीपः सम्पूज्य देवताम् ।
ततः प्रदोषसमये दीपान् दद्यान्मनोरमान् ॥

नरकाय नरकनिवृत्तये तदभावे वा लक्ष्मणेत्युक्तं प्राक् ।

वकुलामावास्या

धवलसङ्ग्रहे—

पौषे तु वकुलक्षीरपायसैस्तर्पयेत् पितॄन् ।

अमायामित्यर्थः ।

अमावास्याश्राद्धविचारः

विष्णुः[836]—

अमावास्या तिस्रोऽष्टकास्तिस्रोऽन्वष्टकामाघीप्रौष्ठपद्यूर्ध्वं कृष्णत्रयोदशी व्रीहियवपाकौ च ॥

एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजापतिः ।
श्राद्धमेतेष्वकुर्वाणो नरकं प्रतिपद्यते ॥

लक्ष्मीर्दैत्यभयान्मुक्ता सुखं सुप्ताम्बुजोदरे ।
अतोऽर्थं विधिवत् कार्या मनुष्यैः सुखसुप्तिका ॥ इति ।

835-मुद्रितदेवीपुराणे (59/22-23) 'सिनीवाली तथा वत्स ! तदा'-पाठः ।
836- विष्णुस्मृतौ—76/1-2 ।

संवत्सरप्रदीपे—

एकराशिस्थिते सूर्ये यदि दर्शद्वयं भवेत् ।
दर्शश्राद्धं तदादौ स्यान्न परत्र मलिम्लुचे ॥

श्राद्धकालमाह परिशिष्टम्[837]—

पिण्डान्वाहार्यकं श्राद्धं क्षीणे राजनि शस्यते ।
वासरस्य तृतीयेंऽशे नातिसन्ध्यासमीपतः ॥

इतित्रिधाविभागाच्चन्द्रक्षयविशिष्टोऽपराह्णोऽस्य मुख्यः कालः । नातिसन्ध्येत्यनेन सन्ध्यान्तकश्चरममुहूर्त्तो हेय इति प्राञ्चः[838] ।

ततः प्रभृति पितरः पिण्डसंज्ञां तु लेभिरे ।

इति मात्स्यात् पिण्डानां पितॄणामन्वाहार्यं मासिकमित्यर्थ इति रघुनन्दनः[839] । विधीयत इत्यपहाय शस्यत इत्युक्त्या क्वचिच्चन्द्रक्षयालाभे श्राद्धं सूचितम् । चन्द्रक्षयमाह कात्यायनः[840]—

अष्टमेंऽशे चतुर्दश्याः क्षीणो भवति चन्द्रमाः ।
अमावास्याष्टमांशे च पुनः किल भवेदणुः ॥

क्षयश्च चतुर्थभागो न कलाशेषः । अन्त्यकलायाः पादक्षय इति निष्कर्षः । तथैवानुपदं वाच्यत्वात् । विशेषमाह[841]—

आग्रहायण्यमावास्या तथा ज्येष्ठस्य या भवेत् ।
विशेषमाभ्यां ब्रुवते चन्द्रचारविदो जनाः ॥
अत्रेन्दुराद्ये प्रहरेऽवतिष्ठते चतुर्थभागोनकलाविशिष्टः ।
तदन्त एव क्षयमेति कृत्स्नमेवं ज्योतिश्चक्रविदो वदन्ति ॥

837- छन्दोगपरिशिष्टे—16/1 ।

838- रघुनन्दनस्य मतमप्यत्रेत्थम्, यथा तिथितत्त्वे (पृ-168)— नातिसन्ध्यासमीपत इति सन्ध्यासमीपैकमुहूर्त्त आपद्यपि वर्जनीयः । इति ।

839- तिथितत्त्वे (पृ-167) रघुनन्दन आह यथा—पिण्डान्वाहार्यकमिति । 'ततः प्रभृति....लेभिरे ।' इति मत्स्यपुराणात् पिण्डानां पितॄणामन्वाहार्यं श्राद्धं मासिकतृप्तिजनकम्.... । राजनि चन्द्रे । शस्यत इत्यनेन क्वचिच्चन्द्रक्षयाभावेऽप्यमावास्याश्राद्धं सूचितम् एतादृग्व्युत्पत्तेः । इति ।

840- छन्दोगपरिशिष्टे—16/5 । 841- छन्दोगपरिशिष्टे—16/6-7 ।

आभ्यामिमे प्राप्येति ल्यब्लोपे पञ्चमी । अत्राग्रहायणीज्येष्ठयोश्चैत्रशुक्लादिका मासा इत्यभिप्रायेण पौषाषाढामावास्ययोर्ग्रहणम् । मासान्तरे चतुर्दश्यष्टमांशे इति सिद्धम् । तदन्तेऽमावास्यान्तयामे । मलमासाधिवत्सरयुक्तवर्षे पौषाषाढयोरपि मासान्तरवच्चतुर्दश्यष्टमांशे क्षयः ।

यस्मिन्नब्दे द्वादशैकश्च यव्यास्तस्मिंस्तृतीयया परिदृश्यो नोपजायते ।[842] इति श्रुतेः । यव्यो मासः । इदमधिवत्सरोपलक्षणमिति वाजपेयिनः । तृतीयया चतुर्थभागोनकलया । परिदृश्यश्चन्द्रो न भवतीत्यर्थः । अधिमासाधिवत्सरयोः शम्भुकरवाजपेयिभिरलिखितत्वादज्ञातमृतकपुत्रस्य पञ्चदशवर्षोर्द्ध्वं पर्णदाहमिवेमं बहवो न स्वीकुर्वन्ति । परिशिष्टे[843]—

यदा चतुर्दशी यामं तुरीयमनुपूरयेत् ।
अमावास्या क्षीयमाणा तदैव श्राद्धमिष्यते ॥

चतुर्दशीपदं सायाह्नीयामायुक्तचतुर्दशीलाक्षणिकम् । तादृशचतुर्दश्याश्चतुर्थयाममित्यर्थः । तेन चतुर्दशीचरमयामस्याष्टमत्वेऽपि न तुरीयत्वक्षतिः । अनुपूरयेदित्यनेनाप्रहरत्रयव्यापिनी यामत्रयात् किञ्चिदधिका चतुर्दशीति सिद्धम् । क्षीयमाणा यथा—पूर्वदिवसीयचतुर्दश्यपेक्षया न्यूनकालव्यापिनी न त्वहोरात्रात्मकसर्वचतुर्दश्यपेक्षया, तादृशामाविशिष्टचतुर्दश्या वृद्धिस्थत्वेनोपस्थितेः । तथा च परदिनेऽमाया अपराह्णलाभेऽपि न श्राद्धम् । तदैवेत्येवकारात् । अस्यापवादं ब्रूते कात्यायनः[844]—

वर्द्धमानाममावास्यां वर्जयेदपरेऽहनि ।
यामांस्त्रीनधिकान् वाऽपि पितृयज्ञस्ततो भवेत् ॥
प्रतिपद्यपि कुर्वीत श्राद्धं श्राद्धविदो विदुः ।

अपरे परभिन्ने पूर्वदिने त्यजेदित्यर्थः । लक्षयेदितिपाठेऽपरपदं परदिनात्मकम् ।

842- एवं चारं चन्द्रमसो विदित्वा क्षीणे तस्मिन्नपराह्णे च दद्यात् । इति छन्दोगपरिशिष्टवचने (16/8) उत्तरार्द्धपाठः ।

843- छन्दोगपरिशिष्टे—16/2 । 844-तत्रैव—16/10 । क्षेमराजप्रकाशने वर्जयेत्-स्थाने लभेच्चेत् पाठः । एसिआटिकसंस्करणे लक्षयेत्-पाठः । तृतीयपङ्क्तिः मुद्रितपुस्तके नास्ति, किन्तु कालसारे उद्धृता वर्त्तते ।

चन्द्रक्षयाभावेऽपि वचनात् परेद्युः श्राद्धमित्यर्थः। यत्तु 'क्षीणे राजनी'ति-प्रत्यक्षश्रुतिविरोधादौदुम्बरीसर्ववेष्टनस्मृतिर्बाधितेति तदसत्। वर्द्धमानास्मृते-र्निरवकाशत्वेन चन्द्रक्षयान्यस्थाने व्यवस्थया सम्भवात्। अन्यथा-

'मा हिंस्यात् सर्वाणि भूतानि।' इति श्रुत्या

मांसमानीय श्राद्धाय मृगं हत्वा महाबल।

जिघांसन्तं जिघांसीयात्........ ॥

इति हरिवंशादिस्मृतिर्बाध्येत। तस्मात् वाजपेयिरघुनन्दनविश्वनाथादिबहु-स्मार्त्तसम्मतेयं वर्द्धमाना स्मृतिः प्रामाणिकी। इयांस्तु विशेषः—पूर्वदिवसीय-चतुर्द्दश्यपेक्षया वर्द्धमानाऽपरा ग्राह्येति गौडभट्टाचार्याः। अहोरात्रात्मक-सर्वचतुर्द्दश्यपेक्षया वर्द्धमाना सा तथेति उत्कलवृद्धाः। यत्तद्वाऽस्तु, सर्वथा जरत्तरमप्येकमनवहितं शम्भुकरमवेक्ष्य वर्द्धमाना स्मृतिर्नापलपनीया। शम्भु-करस्यापि केचिदित्युक्त्या चास्वरसवादिपक्षोऽयं नातीव सम्मत इति सम्यग्-विभावनीयम्। यदा दिनद्वये श्राद्धकालेऽमावास्याक्षयालाभस्तदा चन्द्रक्षय-विशिष्टकाललाभात् पूर्वेद्युश्चतुर्द्दश्यामपि श्राद्धम्। शस्यत इत्युक्ते प्रशस्ततम-तिथेः प्रतिनिधित्वेन ग्रहणात्। अमाश्राद्धञ्च पार्वणमित्युक्तम्।

पार्वणश्राद्धे मातामहादौ जीवति विशेषः।

पिता यस्य निवृत्तः स्याज्जीवेद्वाऽपि पितामहः।

पितुः स नाम संकीर्त्त्य कीर्त्तयेत् प्रपितामहम् ॥[845]

इत्यनुसारात् 'त्रिषु पिण्डः प्रवर्त्तत' इति पुरुषत्रये पिण्डदानम्। प्रपितामहपदं वृद्धप्रपितामहाद्युपलक्षणम्। तेन प्रपितामहे जीवति वृद्धप्रपितामहनाम वाच्यम्। एवं मातामहे जीवति प्रमातामहादिकमूह्यम्।

पितरो यत्र पूज्यन्ते आब्दिकेन विना बुधैः।

तत्र मातामहाः पूज्याः........ ॥

इति वार्षिकान्यश्राद्धे मातामहादीनामपि प्रवेशात्। मातामहादित्रये जीवति परमवृद्धमातामहादित्रयाणां चतुर्थपञ्चमषष्ठानामेकद्वित्रिपरमपूर्वकं नामो-च्चार्य श्राद्धं कुर्यात्। प्रपितामहपदस्य वृद्धप्रपितामहाद्युपलक्षणत्ववत्

845- मनुस्मृतौ—3/221।

परमवृद्धप्रमातामहाद्युपलक्षणत्वस्यापि सुवचत्वात् । नामगोत्राद्यज्ञाने तु यथानामगोत्रमित्युच्चारयेत् । यत्तु पित्रादित्रये जीवति नैतत् कुर्यादित्यतिदेशेन क्रमिकमातामहादित्रयजीवने तु न श्राद्धमिति दिव्यसिंहेनोक्तम्[846], तदसत् । प्रपितामहोपलक्षणतौल्यस्य प्रागुक्तत्वात् । न वा पित्रादित्रयजीवनं श्राद्धाभावप्रयोजकम् ।

सपितुः पितृकृत्येषु अधिकारो न विद्यते ।[847]

इति कात्यायनात् ऋद्दन्तकप्रमासान्तत्वादनित्यः । प्रतेरश्वादयस्तु पुरुष इत्यश्वादिगणे राजन्शब्दपाठात् । न वाऽतिदेशो वाचनिकः । अन्यथा पितृमात्रजीवनवन्मातामहमात्रजीवनेऽपि श्राद्धाभावप्रसङ्गः । अतएव नारायणविप्रमिश्रादिभिरयं प्रकार उपन्यस्तः ।

अशक्त्या पार्वणश्राद्धं यथावत् कर्त्तुमक्षमः ।
अग्नौकरणमर्घ्यं चावाहनं चावनेजनम् ॥
पिण्डश्राद्धे प्रकुर्वीत पिण्डहीने विवर्जयेत् ।
पिण्डनिर्वापरहितं श्राद्धं यत्र विधीयते ॥
स्वधावाचनलोपोऽत्र विकिरश्चैव लुप्यते ।
अक्षय्यदक्षिणां शक्ति सौमनस्यमथापि वा ॥

अन्यच्च— किञ्चिद्दद्यादशक्तस्तु उदकुम्भादिकं द्विजे ।
तृणानि वा गवे दद्यात् पिण्डान् वाऽप्यथ निर्वपेत् ॥
तिलदर्भैः पितृन् वाऽपि तर्पयेत् स्नानपूर्वकम् ।
पिण्डमात्रं तु दातव्यमभावे द्रव्यविप्रयोः ॥
श्राद्धाहनि तु सम्प्राप्ते भवेन्निरशनोऽथवा ।

846- श्राद्धदीपे (पृ-52) दिव्यसिंह आह यथा—केवल मातामहे जीवत्यपि प्रमातामहादित्रयमुद्दिश्य श्राद्धम्,

सपितुः पितृकृत्येषु अधिकारो न विद्यते । इति वचनात्

न जीवन्तमतिदद्यादित्यस्य जीवत्पितृकमात्रविषयत्वात् । इति ।

847- न जीवन्तमतिक्रम्य किञ्चिद्दद्यादिति श्रुतिः ।
इति कात्यायनस्मृतौ (16/12) उत्तरार्द्धपाठः ।

पराधीनः प्रवासी च निर्धनो वाऽपि मानवः ॥

मनसा शुद्धिभावेन प्रदद्याद्वा तिलोदकम् ॥

पार्वणैकोद्दिष्टाशक्तौ प्रतिनिधित्वेन तानि कुर्यात् ।

अत्र सिंहवाजपेयिनः—

पितृश्राद्धे रवौ शुक्रे सप्तम्यां निशिसन्ध्ययोः ।

सङ्क्रान्त्यां जन्मदिवसे न कुर्यात्तिलतर्पणम् ॥

अयने विषुभे चैव ग्रहणे चन्द्रसूर्ययोः ।

उपाकर्मणि चोत्सर्गे युगादौ पितृवासरे ॥

रविशुक्रदिने वाऽपि न कुर्यात्तिलतर्पणम् ।

तीर्थे तिथिविशेषे च गङ्गायां प्रेतपक्षके ॥

निषिद्धेऽपि दिने कुर्यात् तर्पणं तिलमिश्रितम् ।

तीर्थमात्रेऽपि कर्त्तव्यं तर्पणं सतिलोदकम् ॥

निषिद्धदिनमासाद्य यः कुर्यात् तिलतर्पणम् ।

रुधिरं तद्भवेत्तोयं दाता च नरकं व्रजेत् ॥

अत्रायनविषुवयुगादिमृताहप्रेतपक्षादिपितृश्राद्धेषु तिलतर्पणनिषेधादमावास्याऽष्टकाऽन्वष्टकाकाम्यश्राद्धेषु तिलतर्पणाभावः । प्रागुक्तश्राद्धानुकल्पं तिलतर्पणं तु निर्बाधम्, तन्निषेधे मानाभावात् ।

दर्शे स्नात्वा पितृभ्यश्च दद्यात् कृष्णतिलोदकम् ।

अन्नञ्च विधिवद् दद्यात् सन्ततिस्तेन वर्द्धते ॥

इत्यादिवचनात् सन्तानवृद्धिकामस्य तु तिलतर्पणं न्याय्यम् । अत्र रविशुक्रनिषेधः सर्वापवादः, सप्तमीनिषेधस्त्वर्थातिरिक्ते । तीर्थे तिथिविशेषे चेतिवचनात् सन्ध्यानिषेधो निरपवादः । सङ्क्रान्तिविषुवनिषेधोऽयनगङ्गाप्रेतपक्षव्यतिरिक्तविषयः । जन्मदिननिषेधोऽपि गङ्गाप्रेतपक्षातिरिक्त इति सर्वं सुस्थितमित्याहुः ।

अथात्र वर्जनम् ।

राजमार्त्तण्डे[848]—पुनर्भोजनमध्वानं द्यूताध्ययनमैथुनम् ।

दानं प्रतिग्रहं सन्ध्यां श्राद्धं कृत्वाऽष्ट वर्जयेत् ॥

अध्वगमनं क्रोशाधिकं निषिद्धम्, 'अध्वगमनमाक्रोशमि'ति हारीतात्। मैथुनं ऋतुकालीनमपि त्याज्यम्।

ऋतुस्नातां तदहोरात्रं परिहरेत्।

इति श्राद्धानन्तरं शङ्खलिखितस्मृतेः।

तैलञ्च न स्पृशेदामं वृक्षादीन् च्छेदयेन्न तु।
सूर्यऋक्षगते चन्द्रे परान्नं यो हि भक्षयेत्।
तिथिमासकृतो होमो दातारमनुगच्छति ॥

साग्नेरेव होमसम्भवात् तत्परमिति विद्याकरः। अन्ये तु होमस्थाने पुण्यं पठित्वा सर्वसाधारणमाहुः।

गुर्वन्नं मातुलान्नञ्च श्वशुरान्नं तथैव च।
पितुः पुत्रस्य यच्चान्नं न परान्नमिति स्थितिः ॥
श्वशुरान्नं तु यो भुङ्क्ते स भुङ्क्ते पृथिवीमलम्।

इति निन्द्यश्वशुरपरम्।

'तैलं मांसं तिलपिष्टममावास्यां विवर्जयेत्।'
छिनक्ति वीरुधो यश्च वीरुत्संस्थे निशाकरे ॥
पत्रं वा पातयत्येकं ब्रह्महत्यां स विन्दति ॥

अमायां त्रिभागीकृतायां मध्यभागे चन्द्रस्य वीरुद् गतत्वादयं दोषः।

अप्सु तस्मिन्नहोरात्रं पूर्वं गच्छति चन्द्रमाः।
ततो वीरुत्सु सङ्क्रम्य प्रयात्यर्कं ततः परम् ॥

इति वचनात्। यत्तु इदं गुरुदेवपूजार्थं यत्तुलसीबिल्वपत्रादिच्छेदनं तदन्यविषयकम्, पर्युषितानामेषां पत्रपुष्पाणां दुष्टत्वात्[849]। समित् कुशादीनां तु

848- मुद्रितराजमार्त्तण्डे (पृ-122, श्लोकः-86) द्यूत-स्थाने निद्रा, सन्ध्यां-स्थाने होमं-इति पाठः।

849-अत्र नित्याचारपद्धतौ (भागः-I-पृ 502) विद्याकरवाजपेयिना शोभनं विचार्यते। तद्यथा—देवपूजापत्रपुष्पयोस्तु पर्युषितनिषेधात् प्रतिदिनमाहरणम्। यत्तु, न पर्वणि तृणमपि च्छिन्द्यादिति 'छिनक्ति वीरुधो........स विन्दति ॥' इति तद्विहितनिषेधायोगात् पूजार्थं गुरुशुश्रूषार्थं वा यत्

पर्युषितत्वेऽप्यदोषात्तद्दिने च्छेदो निषिद्ध इति दिव्यसिंह[850] प्रलपितम्। तत्तुच्छम्।

पद्मञ्च बिल्वपत्रञ्च यावत् पञ्चदिनावधि।
न वर्ज्यं बिल्वतुलसीपत्रं पर्युषितं त्वपि॥

इति विद्याकरपद्धतिस्मृत्या पत्रपुष्पविशेषाणामपि द्वित्रिदिनपर्युषितत्वेऽप्यदोषात्तच्छेदने दोषस्य वज्रलेपत्वात्।

कुशं पत्रञ्च पुष्पञ्च गवामर्थे तृणानि च।
इन्दुलोपे न दुष्यन्ति छेदने समिधस्तथा॥

इतिवाक्यप्रामाण्ये न दोषः। तथा—'न पर्वणि तृणं छिन्द्यात्', अयं निषेधः पुरुषार्थः, श्राद्धप्रकरणे चापाठात्। एवमन्यत्र। चन्द्रक्षये रात्रौ भोजननिषेधाचारो निर्मूलः। श्राद्धदिनसत्त्वात् प्राप्तेऽपि तदन्यद्दिनेऽनौचित्यम्। प्रकृतमनुसरामः।

पक्षादिः चरुकालः

वृद्धशातातपः—

पर्वणो यश्चतुर्थांश आद्याः प्रतिपदस्त्रयः।
यागकालः स विज्ञेयः प्रातर्युक्तो मनीषिभिः॥

पत्रच्छेदनं तद्व्यतिरिक्तपरम्। समिदादिच्छेदनं त्वन्यत्र सम्भवात् तत्र निषिद्धमेव। अत्र—

कुशं पत्रञ्च पुष्पञ्च गवामर्थे तृणानि च।
इन्दुलोपे न दुष्यन्ति च्छेदने समिधस्तथा॥

इति वाक्यं दृश्यते। तत्प्रामाण्ये तत्राप्यदोषः।

अप्सु तस्मिन्नहोरात्रे पूर्वं विशति चन्द्रमाः।
ततो वीरुत्सु वसति प्रयात्यर्कं ततः क्रमात्॥

इति वचनादमावास्यामध्य एवायं दोषो नाद्यन्तयोः। इति।

850- श्राद्धदीपे (पृ-55) दिव्यसिंहः प्रतिपादयति यथा—न पर्वणि तृणमपि छिन्द्यादिति यत् तद्विहितनिषेधायोगात् पूजार्थं गुरुशुश्रूषार्थं वा यत् पत्रच्छेदनं तद्व्यतिरिक्तपरम्। समिदादिच्छेदनं तु अन्यत्र सम्भवात् तत्र निषिद्धमेव। देवपूजापत्रपुष्पयोस्तु पर्युषितनिषेधात् प्रतिदिनमाहरणम्। इति।

प्रातः सूर्योदयोपरि मुहूर्त्तत्रयम् ।

न यष्टव्यं चतुर्थेंशे यागैः प्रतिपदः क्वचित् ।[851]

इतिवचनात् चतुर्थेंशे निषेधः । यदा मध्याह्नादूर्द्ध्वं सन्धिस्तदा तस्मिन् दिनेऽन्वाधाय परेद्युरिष्टौ कृतायां प्रतिपच्चतुर्थांशे यागकालत्वप्रतिप्रसवः । तदाह वृद्धशातातपः[852]—

"सन्धिर्यदपराह्णे स्याद् यागः प्रातः परेऽहनि ।
कुर्वाणः प्रतिपद्भागे चतुर्थांशे न दुष्यति ॥"
पक्षादावेव कुर्वीत सदा पक्षादिकं चरुम् ॥[853]

पूर्णिमायामिष्टिकालमाह कात्यायनः[854]—

सन्धिश्चेत् सङ्गवादूर्द्ध्वं प्राक्पर्यावर्त्तनाद्रवेः ।
सा पौर्णमासी विज्ञेया सद्यःकालविधौ तिथिः ॥
"पर्वप्रतिपदोः सन्धिर्मध्याह्ने वा ततः पुरा ।
अन्वाधानं पूर्वदिने यागः सन्धिदिने भवेत् ॥
ऊर्द्ध्वं मध्याह्नतः सन्धावन्वाधानन्तु तद्दिने ।
इष्टिं परदिने कुर्यादन्ये वाजसनेयिनः ॥
यस्तु वाजसनेयी स्यात्तस्य सन्धिदिनात् पुरा ।
न क्वाप्यन्वाहितिः किन्तु सदा सन्धिदिने हि सा ॥
वृद्धिः प्रतिपदो याऽस्ति तदर्द्धं पर्वणि क्षिपेत् ।
क्षयस्यार्द्धं तथा हित्वा सन्धिर्निश्चीयतां सदा ॥"[855]

851- कालसारे सम्पूर्णं कात्यायनोक्तवचनं यथा—
न यष्टव्यं चतुर्थांशे यागैः प्रतिपदः क्वचित् ।
रक्षांसि तद्विलुम्पन्ति श्रुतिरेषा सनातनी ॥ इति ।

852- कालसारे 'चतुर्थेऽपि न दुष्यति' इति धृतः पाठः ।

853- कात्यायनोक्तं (16/11) सम्पूर्णवचनं यथा—
पक्षादावेव कुर्वीत सदा पक्षादिकं चरुम् ।
पूर्वाह्ण एव कुर्वन्ति विद्धेऽप्यन्ये मनीषिणः ॥ इति ।

854- कात्यायनस्मृतौ वचनमिदं नास्ति । कालसारे तु उद्धृता वर्त्तते ।

855- कालमाधवे (पृ.पृ-16-17) कारिकावचनान्येतानि ।

दर्शेष्टिकालः

"पूर्वेद्युः पितृभ्यो निष्क्रीय परेद्युर्देवेभ्यो ददाती"ति श्रुतेश्चन्द्रक्षयोत्तरदिन एव दर्शेष्टिकालः । अतएव जीवत्पितृकस्य पिण्डपितृयज्ञाभावादमावास्यामेवेष्टिरित्यभिप्रेत्य सम्प्रदायग्रन्थे तस्य चतुर्दश्यामुपवास इत्युक्तम् ।

विकृतेष्टिकाले:

विकृतत्वं सर्वाङ्गयुक्तत्वात् प्रकृतात् किञ्चिन्न्यूनत्वम् , यथा दर्शपूर्णमासौ प्रकृतेष्टिः, ऐन्द्राग्नमेकादशकपालं निर्वपेत् इत्याद्या विकृतयः ।

इष्ट्यादिविकृतिः सर्वाः पर्वण्येवेति निश्चयः ।[856]

कात्यायनः[857]—

आवर्त्तनात् प्राग्यदि पर्वसन्धिः कृत्वा तु तस्मिन् प्रकृतिं विकृत्याः ।
तत्रैव यागः परतो यदिस्यात्तस्मिन् विकृत्याः प्रकृतेः परत्र ।।

चैत्रमासकृत्यम्

चैत्रं तु नियतो मासमेकभक्तेन यः क्षिपेत् ।
सुवर्णमणिमुक्ताढ्ये कुले महति जायते ।।[858]

मध्याह्नव्यापिनी ग्राह्या एकभक्ते सदा तिथिः ।

इति ब्राह्मादीदृशी त्वत्र ग्राह्या । दिनद्वये मध्याह्नव्याप्तौ—

मासि संवत्सरे चैव तिथिद्वैधं यदा भवेत् ।
तत्रोत्तरोत्तमा ग्राह्या पूर्वा स्यात्तु मलीम्लुचः ।।[859]

इत्यादिवाक्यात् परा ग्राह्या । इदञ्च मासादिकृत्यं पूर्णिमान्ते गौणचान्द्रे न तु मुख्येऽपि दर्शान्ते ।

यस्मिन् देशे य आचारः पारम्पर्यक्रमागतः ।

इति[860] मनुवाक्यान्माघकार्त्तिकादावुत्कले तथाचारात् ।

856- कालमाधव (पृ-17) कारिकायां निश्चयः-स्थाने निर्णयः-पाठः ।
857- कात्यायनस्मृतौ नास्ति, किन्तु कालसारे उद्धृतम् ।
858- महाभारते अनुशासनपर्वणि—106/23 । 859-कालदीपे (पृ-111) ।
860- उत्कलीयस्मृतिनिबन्धेषु वचनमेतदित्थमुद्धृतम् । किन्तु मनुस्मृतौ (2/18) वचनस्यास्य पाठो यथा—

वैशाखमासकृत्यम्

मात्स्ये— वैशाखे पुष्पलवणे वर्जयित्वाऽथ गोप्रदः ।
भुक्त्वा विष्णुपदे कल्पं स्थित्वा राजा भवेदिह ॥

पुष्पपदं निर्माल्यभिन्नपुष्पार्थकम् । यत्तु गोप्रदो मासान्त इति दिव्यसिंह-व्याख्यानं[861] तन्न,

माधवे मासि कुर्वीत........शर्कराधेनुरोहिणीम् ।

इति वक्ष्यमाणविरोधात् । अध्याहारे मानाभावात् । पाद्मे—

प्रातः स्नानं च वैशाखे यज्ञदानमुपोषणम् ।
हविष्यं ब्रह्मचर्यञ्च महापातकनाशनम् ॥
वैशाखं सकलं मासं नित्यस्नायी जितेन्द्रियः ।
जपन् हविष्यभुग्दान्तः सर्वपापैः प्रमुच्यते ॥
एकभक्तमथो नक्तमयाचितमतन्द्रितः ।
माधवे मासि यः कुर्याल्लभते सर्वमिप्सितम् ॥
यावद् युगसहस्राणि शतमष्टोत्तरं भवेत् ।
तावत् स्वर्गे वसेद् वीर भूपतिश्च पुनर्भवेत् ॥
भूपत्वे विविधान् भोगान् विहृत्य च यथासुखम् ।
माधवस्य प्रसादेन माधवे लीयते ततः ॥

इति नित्यकाम्यमिदम् । तत्रैव

वैशाखे मासि यो विप्रान् भोजयेद्भक्तितत्परः ।
सिक्थे सिक्थे भवेत्तृप्तिः पितृणां युगसङ्ख्यया ॥

तस्मिन् देशे य आचारः पारम्पर्यक्रमागतः ।
वर्णानां सान्तरालानां स सदाचार उच्यते ॥ इति ।

पूर्णिमान्तमासस्यापि मुख्यत्वे शास्त्रीयत्वम्, 'ब्राह्मे कार्त्तिकपूर्णिमान्त-मुक्त्वा—

मार्गशीर्षस्य मासस्य प्रारम्भे प्रतिपद्यपि ।
देववर्षः समारम्भो देवैः कृतयुगे कृतः ॥

इति कालसारे उक्तत्वात् ।

861- गोप्रदः मासान्त इति कालदीपे (पृ-112) दिव्यसिंह आह ।

अपिच वैशाखे विधिना स्नानं यथा नद्यादिके बहिः ।
हविष्यं ब्रह्मचर्यञ्च भूशय्यानियमस्थितिः ॥
माधवे मासि कुर्वीत मधुसूदनतुष्टिदम् ।
तिलोदकसुवर्णानां शर्कराधेनुरोहिणीम् ॥
पदत्राणातपत्राम्बुकुम्भान् दद्याद् द्विजातिषु ॥

स्नानं तु कार्त्तिकवदरुणोदये वक्ष्यते । मन्त्रभेदः स्नाने यथा[862]—

माधवे मेषगे भानौ मुरारे मधुसूदन ! ।
प्रातः स्नानेन मे देव यथोक्तफलदो भव ॥
यथा ते माधवो मासो वल्लभो मधुसूदन ।
प्रातःस्नानेन मे तस्मिन् फलदो भव पापहा ॥

मेषार्कास्पृष्टमीनगे वृषगे वेत्यूहः । अत्र सकलपदस्य त्रिंशद्दिनार्थकत्वान्मासादितिथिः पूर्वविद्धा ग्राह्या ।

मस्यन्ते परिमीयन्ते स्वकला वृद्धिहानितः ।
मासा एते स्मृतास्तस्मात्त्रिंशद्दिनसमन्विताः ॥

इति सिद्धान्तशिरोमणिवाक्यात्[863] । विशेषः कार्त्तिके वक्ष्यते । इदं वैष्णवानामपि समम् ।

ज्येष्ठमासकृत्यम्

स्कान्दे— ज्येष्ठामूलं तु यो मासमेकभक्तं समाचरेत् ।
भ्रातॄणां भवति ज्येष्ठो भोगांश्चाप्नोति पुष्कलान् ॥[864]

आषाढमासकृत्यम्

भारते[865]— आषाढमेकभक्तेन स्थित्वा मासमतन्द्रितः ।
बहुधान्यो बहुधनो बहुपुत्रश्च जायते ॥

862- पद्मपुराणे द्वितीयभागे चतुर्थखण्ड—89/10-11 ।

863- कालमाधवे (पृ-48) द्वितीयार्द्धे 'मास एते स्मृता मासास्त्रिंशत्तिथिसमन्विताः ।' इति धृतपाठः ।

864- महाभारते अनुशासनपर्वण्यपि (106/25) वचनं प्राप्यते, यथा—
ज्येष्ठामूलं तु यो मासमेकभक्तेन संक्षिपेत् ।
ऐश्वर्यमतुलं श्रेष्ठं पुमान् स्त्री वा प्रपद्यते ॥ इति ।

श्रावणमासकृत्यम्

श्रावणं नियतो मासमेकभक्तेन यः क्षिपेत् ।
यत्र तत्राभिषेकेण पूज्यते ज्ञातिवर्द्धनः ॥[866]

भाद्रपदकृत्यम्

प्रौष्ठपदं तु यो मासमेकाहारो भवेन्नरः ।
धनाढ्यस्फीतमतुलमैश्वर्यं प्रतिपद्यते ॥[867]

क्वचित् गवाढ्य इति पाठः ।

आश्विनमासकृत्यम्

भारते[868]— तथैवाश्वयुजं मासमेकभक्तेन यः क्षिपेत् ।
प्रजावान् वाहनाढ्यश्च बहुपुत्रश्च जायते ॥

कार्त्तिकमासकृत्यम्

स्कान्दे— कार्त्तिकं वाऽपि यो मासमेकभक्तेन तिष्ठति ।
सोऽश्वमेधफलं प्राप्य वह्निलोके महीयते ॥
एकभक्तेन नक्तेन तथैवायाचितेन च ।
कृते व्रते धरावाप्तिर्जायते द्वीपमालिनी ॥[869]

केवलैकभक्तेनाग्निलोकप्राप्तिः । स्नानजपैकभक्तरूपव्रतकरणे तु भूसाम्राज्यमित्यर्थः । एतद् व्रतत्वं स्नानजपादित्रये व्यासज्यवृत्तिरिति वक्ष्यामः ।

यदीच्छेद्विपुलान् भोगांश्चन्द्रसूर्यग्रहोपमान् ।
कार्त्तिके सकले मासि प्रातःस्नायी भवेन्नरः ॥
जलधेनुसहस्रं तु वृषसंस्थे दिवाकरे ।
तोयं दत्त्वा यदाप्नोति स्नानं कृत्वा तु कार्त्तिके ॥
कार्त्तिके भूमिशायी च ब्रह्मचारी हविष्यभुक् ॥

इति पाद्मे भूशयनादिवत् केवलं हविष्येणापि फलाप्तिः, एकभक्तेन तिष्ठतीत्युक्तेः । केवलं जपोऽपि वक्ष्यते ।

865- तत्रैव—106/26 । 866- तत्रैव—106/27 ।
867- तत्रैव—(106/28) धनाढ्य-स्थाने गवाढ्य-पाठः ।
868- तत्रैव—106/29 । 869- कालसारे नारदीयवचनमेतत् ।

माघकार्त्तिकयोश्चैव चान्द्रमासो विधीयते ।

तच्च पूर्णिमान्तमित्युक्तम् । "प्रकरणान्तरे प्रयोजनान्यत्वम्" इति न्याया-न्नित्यात् पृथगिदं काम्यस्नानम् । काम्येन नित्यनिर्वाहान्माघस्नानवदेक-मिदम् । एवं वैशाखस्नानमिति गौडाः । सिंहवाजपेयिनस्तु[870] माघस्नानवत् सन्ध्यातः पूर्वमरुणोदये नित्यस्नानात् पृथक् कार्त्तिकवैशाखस्नानम्, 'तुलामकरमेषेष्वि'त्यविशेषात् । 'सन्ध्याहीनोऽशुचिर्नित्यमि'त्यस्य त्वत्र न प्रसर इति माघसप्तम्यामुक्तम् । तच्च बहिराचर्यत इत्याहुः । एतेन प्रातःशब्दो दिवसपर इति व्याख्यानमपास्तम्[871] । प्रातःशब्दस्य दिवसलक्षणायां मानाभावात् । अन्यथा,

---

870- नरसिंहवाजपेयी नित्याचारप्रदीपे (प्रथमभागः-पृ.पृ-294-296) विचारयति यथा—यच्च 'तुलामकरमेषेषु प्रातःस्नायी भवेन्नरः ।' इति प्रातःस्नानम् । × × × किञ्च प्रातःस्नानस्य शरीरशुद्धिद्वारा कर्मा-धिकारसम्पादकत्वात् काम्यस्नानान्तरस्यापि प्रातःस्नानानन्तरमेव काल इति कालभेदान्न काम्यनित्यप्रातःस्नानयोस्तन्त्रेणानुष्ठानसम्भवः । न च 'सन्ध्याहीनोऽशुचिर्विप्रो ह्यनर्हः सर्वकर्मसु ।' इति वचनात् सन्ध्योत्तरं काम्यप्रातःस्नानप्रसङ्गः । सन्ध्यायाः सूर्योदयावधित्वात् सूर्योदयोत्तरकालीन-कर्मणामेव सन्ध्योत्तरत्वाधिकारसम्पादकत्वात् सूर्योदयात् पूर्वं सन्ध्यां कृत्वा काम्यप्रातःस्नानकरणे सूर्योदयावधिजपरूपसन्ध्याबाधापत्तेः सन्ध्याहीन-त्वेन सुतरामनधिकारः । × × × एवं माघस्नानमप्यनुदिते रवाविति पद्मपुराणवचनात् सन्ध्यातः पूर्वं प्रातःस्नानादूर्ध्वमनुष्ठानम् । यत्तु 'कार्त्तिकं सकलं मासं बहिःस्नायी जितेन्द्रियः । जपन् हविष्यभुग्दान्तः सर्वपापैः प्रमुच्यते ।। इति विष्णूक्तं काम्यस्नानम् । तस्य प्रातःकालविध्यभावात् सन्ध्योत्तरं यदा कदाचिदनुष्ठानमिति लक्ष्मीधरादयः । यदा तु

कार्त्तिकेऽहं करिष्यामि प्रातःस्नानं जनार्दन ! ।

इति मन्त्रवर्णाच्छागो वा मन्त्रवर्णादिति न्यायेन प्रातःकालोऽवधार्यते तदा तस्यापि सन्ध्यातः पूर्वमरुणोदयेऽनुष्ठानम् । इति ।

871- सूर्योदयसमीपस्थदिवसांशः प्रातरित्युच्यते । पारस्करगृह्यसूत्र प्रथम-काण्ड द्वितीयकण्डिकायां भाष्यकारो गदाधरो विचारयति यथा—प्रातःशब्दः सार्द्धप्रहरात्मककालवचनः । तदाह गार्ग्यः—

ललाटसमिते भानौ प्रथमः प्रहरः स्मृतः ।

स एव सार्द्धसंयुक्तः प्रातरित्यभिधीयते ।। इति ।

तुलामकरमेषेषु प्रातःस्नायी जितेन्द्रियः ।

इत्यादिशेषान्माघस्नानेऽपि दिवायोगे समाचारविरोधः । प्रातःशब्दो मुहूर्त्तांस्त्रीनिति मात्स्यादिकं तु श्राद्धादिविषयम् ।

स्नातं दत्तं हुतं जप्तं तपश्चैव तथा कृतम् ।

तदक्षयफलं प्रोक्तं कार्त्तिके च द्विजोत्तम ॥

इति स्कान्दा[872]द्दानहोमादिवत् केवलं जपादपि फलम् ।

गोष्ठे वसन् ब्रह्मचारी मासमेकं पयोव्रतः ।
गायत्रीजपनिरतो मुच्यतेऽसत्प्रतिग्रहात् ॥

इति याज्ञवल्क्येन[873] केवलं गायत्रीजपविधानाच्च ।

न च व्रताङ्गजपोऽत्र विवक्षितः इति शङ्क्यम् । राजसूयादिवत्[874] शिवरात्रिपूजाजागरादिवच्च स्नानजपादीनां समफलत्वेनाङ्गाङ्गिभावरहितस्य वक्ष्यमाणत्वात् । स च जपस्त्रिसहस्रमितो मुख्यः, एकसहस्रमितो गौणः,

जपित्वा त्रीणि सावित्र्याः सहस्राणि समाहितः ।
मासं गोष्ठे पयः पीत्वा मुच्यतेऽसत्प्रतिग्रहात् ॥
सहस्रकृत्वस्त्वभ्यस्य बहिरेतत्त्रिकं द्विजः ।
महतोऽप्येनसो मासात्त्वचेवाहिर्विमुच्यते ॥

कार्त्तिकस्नानकृत्ये कालसारकारो गदाधरः प्रातःशब्दं दिवसपरमाह । तद्यथा—ननु मन्त्रे प्रातःशब्दस्य का गतिरिति चेदुच्यते । त्र्यहं सायं त्र्यहं प्रातरिति प्राजापत्यकृच्छ्रादाविव प्रातःशब्दस्य दिवसपरत्वमित्यभियुक्ताः ।.... तत्र प्रातःस्नानमुक्तं पुनः स्नानान्तरं तर्पणान्तरं चोक्तम् इति दिवसे यदा कदापि काम्यं स्नानान्तरं सिद्धमिति । अपास्तमिति कथनेनैतत् कृष्णमिश्रेण न स्वीकृतम् ।

872- हरिभक्तिविलासे (16/53) स्नातं-स्थाने दानं-पाठः ।

873- मुद्रितयाज्ञवल्क्यस्मृतौ (3/289) मुच्यते-स्थाने शुद्ध्यते-पाठः ।

874-मीमांसादर्शने (4/4/1) राजसूयशब्दवाच्यानां यागानां फलार्थत्वाधिकरणे जैमिनिना सूत्रितं यथा—

प्रकरणशब्दसामान्याच्चोदनानामनङ्गत्वम् ॥ 1 ॥
अपि वाऽङ्गमनिज्याः स्युस्ततो विशिष्टत्वात् ॥ 2 ॥

तत्र भाष्यकारेण शावरस्वामिना स्फुटीकृतमेतद्यथा—

इति मानवीयात्[875] । बहिर्ग्रामाद् बहिरिति गोविन्दराजः[876] । विद्याकरास्तु—

जलान्ते अग्न्यगारे च जले देवालयेऽपि वा ।
गवां गोष्ठे पुण्यखले सिद्धक्षेत्रेऽथवा गृहे ।।

गृहेऽनावृत्तदेशे इत्यादिबहिरर्थकमाहुः । वृतपक्षे केवलपक्षेऽप्येतावान् जपः ।

सन्त्यनुमत्यादीन्यैष्टिकानि कर्माणि । मह्लादयः पशवः, पवित्रादयः सोमाः, वल्मीकवपायां होम इत्येवमादीनि दार्विहोमिकानि । तथा, पष्ठौहीं दीव्यति, राजन्यं जिनाति, शौनःशेपमाख्यापयति, अभिषिच्यते, इति । एतेषां सन्निधौ श्रूयते, राजसूयेन स्वाराज्यकामो यजेत, इति । स एष रूपवतां सन्निधावरूपः शब्दः श्रूयमाणः समुदायवाचकः समधिगतः । तत्र सन्देहः । किं सर्वेषामनुमत्यादीनां समुदायस्य राजसूयशब्दो वाचक उत केषाञ्चिद्वाचकः केषाञ्चिन्नेति । किं प्राप्तम । सर्वेषां वाचक इति । कुतः । प्रकरणशब्दसामान्यात् । प्रकरणशब्दः सर्वेषां समानो राजसूयेनेति । राजा तत्र सूयते तस्माद्राजसूयः । राज्ञो वा यज्ञो राजसूयः । तत्प्रकरणसन्निधाने सति, विशेषाभावे च सर्वेषां वाचको भवितुमर्हति । यश्च राजसूयशब्दितस्ततः फलं भवति । तस्मात् सर्वाणि प्रधानानीति ।। 1 ।। अपि वेति पक्षव्यावृत्तिः । या अनिज्यास्ता अङ्गम् , यथा विदेवनादयः । राजसूयसंज्ञकेन यागेन स्वाराज्यं कुर्यादित्युच्यमाने यागेनैव स्वाराज्यं साध्यते, नायागेन । अयागाश्च विदेवनादयः । तस्मादङ्गं भवेयुरिज्यानां फलवतीनां श्रूयमाणा इति ।। 2 ।। माधवाचार्येण जैमिनीयन्यायमालायां (4/4/1/1-2) प्रतिपादितमेतद्यथा—

राजसूयेऽनुमत्यादि देवनादि च ते उभे ।
मुख्ये उतैकमुख्यत्वं स्यादाद्यः प्रक्रियैक्यतः ।।
यागानां राजसूयत्वादङ्गित्वं फलवत्त्वतः ।
देवनाद्यफलं यत्तदङ्गं फलवतो यजेः ।। इति ।

सिद्धान्तविस्तरेऽप्युक्तं तेन यथा—

राजा स्वाराज्यकामो राजसूयेन यजेतेत्याख्यातवाच्यायां भावनायां धातुबोध्यो यागः करणम् । राजसूयशब्दश्चाप्रसिद्धार्थत्वाद्यागसामानाधिकरण्येन तन्नामधेयं भवति । तथा राजसूयेन यागेन स्वाराज्यं भावयेदिति वाक्यार्थपर्य्यवसानादनुमत्यादीनां यागानामेव फलवत्त्वादङ्गित्वम् । तत्सन्निधौ श्रूयमाणमफलं देवनादिकं यागाङ्गम् । इति ।

875- मनुस्मृतौ—11/194, 2/79 । 876- तत्रैव मनुटीकायाम् ।

अत्र पुराणपठनश्रवणहरिपूजनदीपदानतुलसीसेवादौ प्रत्येकं फलं गोपाल-भट्टेनोदितम्[877] । विस्तरभयात्ततो विरतम् ।

अव्रतेन क्षिपेद्यस्तु मासं दामोदरप्रियम् ।
तिर्यग्योनिमवाप्नोति सर्वधर्मबहिस्कृतः ॥[878]

इति वचनात्,

वाराणस्यां कुरुक्षेत्रे नैमिषे पुष्करेऽर्बुदे ।
गत्वा यत् फलमाप्नोति व्रतं कृत्वा तु कार्त्तिके ॥[879]

इति वचनाच्च नित्यकाम्यमिदम् ।

"कार्त्तिकोऽग्निदैवतोऽग्निः अग्निश्च सर्वदेवानां मुखम् । तस्मात् कार्त्तिके मासि बहिःस्नायी गायत्रीजपनिरतः सकृदेव हविष्याशी संवत्सर-कृतात् पापान्मुक्तो भवती"तिवचनात् ।[880]

कार्त्तिकं सकलं मासं बहिःस्नायी जितेन्द्रियः ।
जपन् हविष्यभुग्दान्तः सर्वपापैः प्रमुच्यते ॥[881]

इति वचनात् प्रातः बहिःस्नानमेकसहस्रमितगायत्रीजपः सकृत् हविष्यं चेति त्रयं मिलितं व्रतस्वरूपम्, शिवरात्रौ पूजाजागरोपवासत्रयवत् । इदं त्रयं राजसूयवत् समं प्रधानम्, न प्रयाजदर्शादिवदङ्गाङ्गित्वनियतम् । तथा वचनाभावात् । तेनैतत्त्रयाणां मध्य एकैकस्याकरणे व्रतभङ्गः । अतएव नात्र सर्वशक्त्यधिकरणन्यायः । व्रतत्वस्यैतत्त्रये त्रित्वादिवद् व्यासज्यवृत्तित्वात् ।

877- हरिभक्तिविलासे (16/92,93) कार्त्तिकव्रतफलं यथा—

हरिजागरणं प्रातःस्नानं तुलसीसेवनम् ।
उद्यापनं दीपदानं व्रतान्येतानि कार्त्तिके ॥
पञ्चभिर्व्रतकैरेभिः सम्पूर्णं कार्त्तिके व्रती ।
फलमाप्नोति तत्प्रोक्तं भुक्तिमुक्तिफलप्रदम् ॥ इति ।

878- नारदीयोक्तिरियं कालसारे ।

879- हरिभक्तिविलासे (16/47) स्कान्दवचनमेतत् ।

880- विष्णुस्मृतौ—89/1-3 । तत्र मुक्तो-स्थाने पूतो-पाठः ।

881- तत्रैव (89/4) बहिः-स्थाने नित्य-पाठः ।

अन्यथा केवलात् स्नानाज्जपाद्वा व्रतापत्तिः । हविष्यं तु हविष्येतरनिवृत्ति-रूपत्वान्निषेधरूपम् । तच्च हविष्यभोजनवदुपवासेऽप्यन्तर्भावान्नोपवासेन व्रतभङ्गः । चतुर्थषष्ठकालादौ तु प्राजापत्यादिवद्भोजनस्य व्रताङ्गत्वेन उपवासे व्रतहानिरिति भेदः । एवञ्च जपोपवासौ विधिरूपौ हविष्यञ्च निषेधरूपमिति त्रयं मिश्रितमेकाहोरात्रे व्रतमिति सिद्धम् । एवं स्थिते कार्त्तिकपूर्णिमा यद्वर्षे सप्तविंशत्यादिदण्डमिता तत्र पूर्णिमांशे स्नानजपौ कृत्वा निषेधस्य कालमात्रार्थत्वात्[882] प्रतिपद्भागे तद्दिने हविष्येतरमत्स्यमांसवार्त्ताककुष्माण्डाद्यशनेऽपि न व्रतभङ्ग इति नव्यस्मार्त्तभाषानामापातरुचिरां युक्तिमवलम्ब्य ऋजुमतयो यद् भ्रमन्ति तन्मन्दमेव । हविष्याभाववत्स्नानजपान्यतराकरणेऽपि व्रतहानि-प्रसङ्गात् । अन्यथा यदा कुमारपूर्णिमा षोडशविंशतिदण्डमिता तदा मासादितिथेः पूर्वविद्धत्वग्रहात् स्नानजपौ समाप्य पूर्णिमादिभागे हविष्येत-रान्नं भुक्त्वा सायं सन्ध्याया देहशुद्धे रात्रौ प्रतिपद्भागे हविष्यकरणादपि कार्त्तिकव्रतं सिद्धयेत । न चेष्टापत्तिः, समाचारविरोधात् । अतो ग्रहिला विद्याकरवंश्या विद्वत्तमा एव । यदिमं पक्षं सर्वथाऽपि नाद्रियते, न वा देशान्तरसिद्धमिदम् , न वा निषेधः कालमात्रापेक्ष्यः, "षष्ठीषु तैलं तालमष्ट-मीषु" इत्यादिसम्भवेऽपि अमावास्यैकादशीतैलस्त्रीनिषेधादौ तदभावादिति सुधीभिः विवेचनीयम् । अशक्तौ स्नानजपान्यतरक्रियेति प्रागुक्तम् । आरब्ध-व्रतस्य व्याध्यादिना चासम्भवे धर्मपत्नीपुत्रादिना मूल्यग्राहिणाऽन्येन वा निर्वाह इति विद्याकरः । सकलमितिवचनात् मासादितिथिः पूर्वविद्धा ग्राह्या, वैशाखवत् । काम्यस्नानं तु सम्भवेनेत्यादिना स्वपितृपुत्रादिखातवारिणा वा निष्पाद्यम् । असम्भवे तु पञ्च पिण्डानुद्धृत्य परवारिणा परवद्धनद्यादिजलेन त्रीन् पिण्डानुद्धृत्य वा निष्पाद्यम्[883] ।

882- कर्मानुष्ठाने खण्डातथौ विधिनिषेधव्यवस्थामाह गार्ग्यः कालमाधवे (पृ 81) यथा—

निमित्तं कालमादाय वृत्तिर्विधिनिषेधयोः ।
विधिः पूज्यतिथौ तत्र निषेधः कालमात्रके ॥
तिथीनां पूज्यता नाम कर्मानुष्ठानयोग्यता ।
निषेधस्तु निवृत्त्यात्मा कालमात्रमपेक्षते ॥ इति ।

नित्यं नैमित्तिकञ्चैव क्रियाङ्गं मलकर्षणम् ।
तीर्थाभावेऽपि कर्त्तव्यमुष्णोदकपरोदकैः ॥

इति शङ्खस्मरणात्[884] ।

शिवलिङ्गसमीपस्थं यत्तोयं पुरतः स्थितम् ।
शिवगङ्गेतिविख्यातं तत्र स्नात्वा दिवं व्रजेत् ॥[885]

883- परकीयजलाधारे स्नानविचारः प्रदर्शितो मनुना । तद्यथा (4/201)—

परकीयनिपानेषु न स्नायाच्च कदाचन ।
निपानकर्त्तुः स्नात्वा तु दुष्कृतांशेन लिप्यते ॥ इति ।

मन्वर्थमुक्तावल्यां कुल्लूकभट्टेन स्फुटीकृतमेतद्यथा— .... तदाह याज्ञवल्क्यः—

पञ्च पिण्डाननुद्धृत्य न स्नायात्परवारिषु ।
उद्धृत्य चतुरः पिण्डान् पारक्ये स्नानमाचरेत् ।
स्नात्वा च तर्पयेद्देवान् पितृंश्चैव विशेषतः ॥ इति ।

नित्याचारप्रदीपकारः (भागः-I-पृ पृ-300-301) अत्र मृत्पिण्डत्रयोद्धरणं प्रतिपादयति । तद्यथा— शङ्खलिखितौ—स्नायात् तडागोदकनिपानकूपेषु सप्त पञ्च च त्रीन् पिण्डानुद्धृत्य देवपितॄंश्च तर्पयेत् । बौधायनः—

स्रवन्तीष्वनिरुद्धासु त्रयो वर्णा द्विजातयः ।
प्रातरुत्थाय कुर्वीरन् देवर्षिपितृतर्पणम् ॥
निरुद्धासु न कुर्वीरन्नंशभाक् तत्र सेतुकृत् ।
तस्मात् परकृतान् सेतून् कूपांश्च परिवर्जयेत् ॥
उद्धृत्य वाऽपि त्रीन् पिण्डान् कुर्यादापत्सु नो सदा ।
निरुद्धासु तु मृत्पिण्डान् त्रींस्त्रींनम्बुघटांस्तथा ॥

अत्रेयं व्यवस्था— .... प्रवाहसेतुकरणेन जलाधिक्यं यत्र तत्र मृत्पिण्डत्रयोद्धरणम्, अम्बुघटत्रयोद्धरणञ्च । इति ।

884- शङ्खस्मृतौ—8/8-9 । जलवर्द्धिष्णुरोगवतां कृते शीतलजलेन स्नानमधिकहानिकारकमितिकृत्वा उष्णजलं तेषां कृते विहितम् । उष्णजलस्यापि मेध्यत्वमुक्तं षट्त्रिंशन्मुनिभिर्यथा—

आपः स्वभावतो मेध्याः किं पुनर्वह्निसंयुताः ।
तेन सन्तः प्रशंसन्ति स्नानमुष्णेन वारिणा ॥ इति ।

885- नित्याचारप्रदीपे (भागः-I, पृ-298) भविष्यपुराणवचनेऽस्मिन् विख्यातंस्थाने तज्ज्ञेयं-पाठः ।

एवम्, भास्करायतनाभ्यासे यत्तोयं पुरतः स्थितम् ।[886]
इत्यादिशिवार्कपूर्वजले फलाधिक्येऽपि शिवान्तिकतडागादौ[887] पञ्चपिण्डोद्धरणनिषेधः प्रवादमात्रं न शास्त्रीयः ।

निपानकर्त्तुः स्नात्वा तु दुष्कृतांशेन लिप्यते ।

इति दोषस्य पञ्चपिण्डोद्धारश्रमे चोपनयेऽदृष्टकल्पनानौचित्यात् । क्रियाङ्गं काम्यकर्माङ्गम् । व्रताभावेऽपि भक्ष्यदीपपुराणश्रुत्यादिनाऽपि नियमे फलवाक्यानि यथा—

प्रवृत्तानाञ्च भक्ष्याणां कार्त्तिके नियमे कृते ।
अवश्यं कृष्णरूपत्वं प्राप्यते भुक्तिमुक्तिदम् ॥

स्कान्दे— श्रावणे वर्जयेच्छाकं दधि भाद्रपदे तथा ।
दुग्धमाश्वयुजे मासि कार्त्तिके चामिषं त्यजेत् ॥
कार्त्तिके वर्जयेत्तैलं कार्त्तिके वर्जयेन्मधु ।
कार्त्तिके वर्जयेत् कांस्यं कार्त्तिके मासि सिन्धुजम् ॥

क्वचित् 'कार्त्तिके वर्जयेत् स्त्रियमि'ति सिन्धुजान्तपादे पाठः ।

चण्डालो जायते राजन्! कार्त्तिके मांसभक्षणात् ॥
नियमेन विना विप्रः कार्त्तिकं यः क्षिपेन्नरः ।
कृष्णःपराङ्मुखस्तस्य यस्मादूर्जोऽस्य वल्लभः ॥
परान्नं परशय्यां च परवासः पराङ्गनाम् ।
सर्वदा वर्जयेत् प्राज्ञो विशेषेण तु कार्त्तिके ॥
भोजनं ब्रह्मपत्रेषु कार्त्तिके मुक्तिदायकम् ।
मध्यमं वर्जयेत् पत्रं शूद्रस्य मुनिसत्तम ॥

886- सूर्यगङ्गेति तज्ज्ञेयं तत्र स्नात्वा दिवं व्रजेत् ।
इति तत्रैव (पृ-298) भविष्यपुराणवचने उत्तरार्द्धपाठः ।

887- तडागादीनां लक्षणं नित्याचारप्रदीपे (भागः-I, पृ-301) यथा—

चतुर्विंशाङ्गुलैर्हस्तैश्चतुर्भिर्धनुरुच्यते ।
एकधन्वादि तुर्यान्तं कूपमानमुदाहृतम् ॥
शतधन्वन्तरा वापी पुष्करिणी चतुर्गुणा ।
सहस्रेण तडागः स्यादयुतेन तु सागरः ॥ इति ।

स्नानं जागरणं दीपं तुलसीवनपालनम् ।
कार्त्तिके ये प्रकुर्वन्ति ते नरा विष्णुमूर्त्तयः ॥
विहाय सर्वपुष्पाणि मुनिपुष्पेण केशवम् ।
कार्त्तिके योऽर्च्चयेद्भक्त्या वाजपेयफलं लभेत् ॥

स्कान्दे— कृत्वा कोटिसहस्राणि पातकानि बहून्यपि ।
निमिषार्द्धेन दीपस्य विलयं यान्ति कार्त्तिके ॥
घृतेन दीपको यस्य तिलतैलेन वा पुनः ।
ज्वलते मुनिशार्दूल ! अश्वमेधेन तस्य किम् ॥
गृहेऽप्यायतने वाऽपि दीपं दद्याच्च कार्त्तिके ।
तेनेष्टं क्रतुभिः सर्वैः कृतं तीर्थावगाहनम् ॥

पुष्करपुराणे—तुलायां तिलतैलेन सायंसन्ध्यासमागमे ।
आकाशदीपं यो दद्यान्मासमेकं हरिं प्रति ।
महतीं श्रियमाप्नोति रूपसौभाग्यसम्पदम् ॥

सायंसन्ध्या च नृसिंहजयन्तीकालवत् सन्ध्योत्तरमुहूर्त्तः ।

दीपदानं कृतं येन कार्त्तिके केशवाग्रतः ।
कार्त्तिके तत्फलं प्रोक्तं परदीपप्रबोधनात् ॥
यो ददाति द्विजातिभ्यो धरामुदधिमेखलाम् ।
विष्णोः शिखरदीपस्य कलां नार्हति षोडशीम् ॥
अशक्तो दीपदानस्य परदीपान् प्रबोधयेत् ।
तेषां वा रक्षणं कुर्याद् वातादिभ्यः प्रयत्नतः ॥
सर्वाभावे व्रती कुर्याद् ब्राह्मणानां गवामपि ।
सेवां वा बोधिवटयोर्व्रतसम्पूर्णहेतवे ॥
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा मुनिसत्तम ।
वियोनिं च व्रजत्येव व्रतं कृत्वा तु कार्त्तिके ॥
नियमेन विना चैव यो नयेत् कार्त्तिकं मुने ।
चातुर्मास्यं तथा चैव ब्रह्महा स कुलाधमः ॥

दीपदानमन्त्रो यथा—

दामोदराय नभसि तुलायां लोलया सह ।
प्रदीपं ते प्रयच्छामि नमोऽनन्ताय वेधसे ॥

मासस्सर्वदिने मांसादित्यागाशक्तौ शुक्लपक्षे तत्कार्यम् । यथा भारते—

कौमुदं तु विशेषेण शुक्लपक्षे नराधिप ।
वर्जयेत् सर्वमांसानि धर्मो ह्यत्र विधीयते ॥

कौमुदं कार्त्तिकम् । शुक्लपक्षपदं भीष्मपञ्चकपरं वा । सर्वपदं हविष्येतरवार्त्ताक्यादिबोधकम् । एवं कार्त्तिकशुक्लमधिकृत्य—

एकादश्यादिषु तथा तासु पञ्चसु रात्रिषु ।
दिने दिने च स्नातव्यं शीतलासु नदीषु च ।
वर्जितव्या तथा हिंसा मांसभक्षणमेव च ॥

प्रसङ्गाद्धविष्यद्रव्याणि यथा परिशिष्टे[888]—

हविष्येषु यवा मुख्यास्तदनु व्रीहयः स्मृताः ।
माषकोद्रवगौरांश्च सर्वालाभेऽपि वर्जयेत् ॥

व्रीहिः शरत्पक्वधान्यम् । गौराः श्वेतसर्षपाः । मुख्याभावे प्रतिनिधिः ग्राह्यः पूतीकादिवदिति न्यायेन[889] प्राप्तान् माषकोद्रवादीनपि त्यजेदित्यर्थः ।

888- मुद्रितछन्दोगपरिशिष्टे (9/10) गौरांश्च-स्थाने गौरादीन् पाठः ।

889- प्रारब्धे कर्मणि द्रव्यसाधनविधौ तदसम्भवे कर्मलोपप्रसङ्गे यत्र तत्सदृशं द्रव्यान्तरं साधनमुपादीयते स्वोत्प्रेक्षया तत्र प्रतिनिधिः । पूतीकस्य सोमप्रतिनिधित्वं प्रतिपादयता जैमिनिना पूर्वमीमांसायां (6/3/31) सूत्रितं यथा—वचनाच्चान्याय्यमभावे तत्सामान्येन प्रतिनिधिरभावादितरस्य । इति । माधवाचार्यः जैमिनीयन्यायमालायामुक्तमेतद्यथा (6/3/13/14)—

सोमाभावे भवेत् पूतीविधिः प्रतिनिधावुत ।
नियमो वचनादाद्यो लाघवात्तन्नियम्यते ॥ इति ।

विस्तराख्यव्याख्याने स्फुटीकृतमपि तेन यथा—

यदि सोमं न विन्देत पूतीकानभिषुणुयादिति लिङ्प्रत्ययस्य विधिवाचित्वादिदं वाक्यं पूतीकलताखण्डानां विधायकमिति चेत् । नैवम् । सदृशतया प्रतिनिधित्वेन प्राप्तेषु पूतीकादिद्रव्येषु नियममात्रविधौ लाघवात् । तस्मात् पूतीकद्रव्यं नियम्यते । इति ।

भविष्योत्तरे—हैमन्तिकं सितास्विन्नं धान्यमुद्गास्तिला यवाः ।

कलायकङ्गुनीवारा वास्तुकं हिडमोचिका ॥

कालेयं कालशाकञ्च मूलकं केवुकेतरत् ।

कन्दं सैन्धवसामुद्रे गव्ये च दधिसर्पिषी ॥

पयोऽनुद्धृतसारञ्च पनसाम्रहरीतकी ।

पिप्पलीजीरके द्वे च नागरं चैव तिन्तिडी ॥

लवली कदली धात्री फलान्यगुडमैक्षवम् ।

अतैलपक्वं मुनयो हविष्याणि प्रचक्षते ॥

नारिकेलफलञ्चैव लवलीं कदलीं तथा ।

आम्रातकफलञ्चैव पनसञ्च हरीतकीम् ।

वृतान्तरप्रशस्तञ्च हविष्यं मन्वते बुधाः ॥

अस्विन्नमित्युक्त्या स्विन्नतण्डुलं हविष्येतरकाले भक्ष्यमिति सूचितम् । एवम्

पीताम्बरी च धान्येषु स्विन्नदोषो न गण्यते ।

इति वाक्यं निर्मूलमप्याचारात्स्विन्नदोषाभावो देशभेदे । **कालशाकं** कोशलाशाकम् । रक्तं श्वेतञ्च पश्चिमदेशप्रसिद्धं शाकान्तरमित्यन्ये । **नागरं** सुण्ठी । नागरङ्गमिति हरिभक्तिविलासतिथितत्त्वयोः[890] कवर्गतृतीयान्तपाठः । कषायबाहुल्यात् कदलीविशेषो वर्ज्य इति निर्मूलम् । वाक्ये कदलीमात्रस्य विशेषात् । कदली धात्री फलानीतिलिङ्गात् फलान्यतकदलीपुष्पमज्जादेर्हविष्यत्वनिरास इत्येके । ऐक्षवमिति खण्डशर्करादेरप्यैक्षवत्वात्तद्धविष्यत्वाचारः । माहिषं दधीत्यादिदर्शनात्तस्येदमितिक्षणपरम्परासम्बन्धेऽपि सत्त्वात् । अन्यथाऽगुडमिति पर्युदासानुपपत्तिः । द्रवरसस्यैव साक्षादैक्षवत्वेऽपि । बहुवीजेषु कर्कटीतिवाक्यं पारम्परिकं यद्यपि स्मृतिसारतिथितत्त्वादौ नास्ति तथापि शिष्टाचारो मृग्यः । मुनिपुष्पशाकयोर्हविष्यत्वं क्वचिदाचारात् । भव्यफलस्य हविष्यत्वं तु निर्मूलम् । यानि मुद्गपनसादीनि

890- पिप्पली जीरकं चैव नागरङ्गं च तिन्तिडी ।
इति हरिभक्तिविलासे—13/12 ।

हविष्याण्युक्तानि तत्प्रतिनिधिजातीयानि । विश्वामित्रनिर्मित्तफलान्यपि हविष्याणि । तेन शर्परीपनसरामतिलादेरपि हविष्यत्वं मुद्गकोशलाशाक-द्वयादिवत् । आम्रातकस्य त्वसन्देहार्थमुक्तिरिति केचित् ।

भीष्मपञ्चकम्

भीष्मेणैतद्यतः प्राप्तं व्रतं पञ्चदिनात्मकम् ।
सकाशाद्वासुदेवस्य तेनोक्तं भीष्मपञ्चकम् ॥
व्रतस्यास्य गुणान् वक्तुं कः शक्तः केशवादृते ।
व्रतञ्चैतन्महापुण्यं महापातकनाशकम् ॥
कार्त्तिकस्यामले पक्षे स्नात्वा सम्यग्यतव्रतः ।
एकादश्यां तु गृह्णीयाद् व्रतं पञ्चदिनात्मकम् ॥[891]

भविष्योत्तरे[892]—स्त्रीभिर्वा भर्त्तृवाक्येन कर्त्तव्यं सुखवर्द्धनम् ।
विधवाभिश्च कर्त्तव्यं पुत्रपौत्रविवृद्धये ।
सर्वकामसमृद्ध्यर्थं मोक्षार्थमपि पाण्डव ॥

व्रतस्वरूपं विष्णुरहस्यभविष्योत्तरयोर्ज्ञेयम् । ब्राह्मे—
एकादश्यां समारभ्य राकां यावत् प्रबोधने ।
बकोऽपि तत्र नाश्नीयान्मत्स्यं मांसञ्च किञ्चन ॥

तिथिद्वैधे एकादशी पूर्वविद्धा ग्राह्या । कृत्स्नमासासामर्थ्ये पञ्चककृतौ मासातिदेशध्रौव्यात् । न च दशमीविद्धैकादश्यां पञ्चककरणे षड्दिनापत्तिः । इष्टापत्तेः । राकां यावदित्यवधिना चान्द्रदिनानामेव प्राप्तेः । अन्यथा द्वादश्यादिक्षये चतुर्दिनापत्तौ त्वन्मते का गतिः स्यात् । न चैकादशीपदं व्रतयोग्यैकादश्यर्थकम् । तथा सत्येकादशीमात्रवृद्धिकलायां द्वादशीत्रिस्पृशायां तत्करणे चतुर्दिनापत्तौ समाचारविरोधात् । द्वादशीक्षयस्य सुतार्थिनां व्रतायोग्यत्वेन तेषां तल्लोपापत्तेः । शक्तवैष्णवानां वञ्जुलीद्वादश्यां तत्क्रियायामाचारविरोधात् । एकादशीपदस्य व्रतयोग्यैकादशीलक्षणायां गौरवान्मानाभावाच्चेति दिक् ।

891- कृत्यकौमुद्यां (पृ-129) विष्णुरहस्यवचनमेतत् ।
892- तत्रैव (पृ-128) सुखवर्द्धनं-स्थाने शुभवर्द्धनं-पाठः ।

एतन्मासपञ्चकयोर्वैष्णवसाम्येऽपीषद् भेदो वक्ष्यते । कार्त्तिकपूर्णिमा यदा स्नानकालमात्रव्यापिनी तदा स्नानजपौ कार्यौ , न तु हविष्यम् । तस्य निषेधरूपत्वेन कालाभावकृतहानात् । स्नानकालस्त्वरुणोदयो निरुक्तः । जपकालस्तु

यां तिथिं समनुप्राप्य उदयं याति भास्करः ।
सा तिथिः सकला ज्ञेया स्नानदानजपादिषु ॥

इति देवलोक्तेः सोदयस्त्रिमुहूर्त्तः । उदयस्य त्रिमुहूर्त्तात्मकत्वं तु प्रागुक्तमिति नव्याः । एकभक्तकालमध्याह्नोत्तरं कार्त्तिकपूर्णिमासत्त्वे तु स्नानजपहविष्याणि स्युः । मध्याह्नान्न्यूनत्वे स्नानजपावेव न तु हविष्यमपीति नव्यतराः । वस्तुतस्तु , व्रतस्य स्नानादित्रये व्यासज्यवृत्तित्वोक्त्या त्रिमुहूर्त्तात्मकपूर्णिमाया हविष्यकालेऽभावेऽपि हविष्यं स्यादेव । सोदयत्रिमुहूर्त्तेति माधववाक्येन तस्यापि व्रतयोग्यत्वादारम्भकाले सत्त्वाच्च । नक्तं प्रदोषोत्तरं पूर्णिमाविरहे हविष्याभावोपपत्तिस्तु विद्वन्मण्डलबाह्यैरयुक्तम् । कार्त्तिकव्रतस्य पूर्वविद्धायां करणे प्रातः कौमुदीपूर्णिमांशेऽपि सङ्कल्पः कार्यः ।

तिथिनक्षत्रवारादि साधनं पुण्यपापयोः ।
प्रधानगुणयोगेन स्वातन्त्र्येण न ते क्षमाः ॥[893]

इति गृह्यपरिशिष्टे प्रधानस्य कर्मणोऽङ्गभूततिथ्यादेर्गुणत्वेन गुणार्थं प्रधानापेक्षानौचित्यात् ।

प्रातः सङ्कल्पयेद् विद्वानुपवासव्रतादिकम् ।[894]

इति वचनाच्च । इदमेवाभिप्रेत्य

अभावेऽपि प्रतिपदः सङ्कल्पः प्रातरिष्यते ।

इति माधवेनोक्तम्[895] । एवमन्यत्र । अत्रारुणोदये प्रतिपदभावेऽपि हविष्याशिनां स्नानमेव । व्रतत्वस्य स्नानजपादित्रये व्यासज्यवृत्तित्वे तदभावे व्रतभङ्गात् । केवलस्नानपक्षे तदभावेऽपि न क्षतिः । एवं माघादाविति दिक् ।

893- कालमाधवे (पृ-36) गर्गवचनेऽस्मिन् योगेन-स्थाने भावेन-पाठः ।
894 तत्रैव (पृ-97) स्मृतिवचनमेतत् । 895- तत्रैव (पृ-7) ।

चातुर्मास्यव्रतम्

वाराहे— आषाढशुक्लैकादश्यां पौर्णमास्यामथापि वा ।

चातुर्मास्यव्रतारम्भं कुर्यात् कर्कटसङ्क्रमे ॥

भारते— आषाढस्य सिते पक्षे एकादश्यामुपोषितः ।

चातुर्मास्यव्रतं कुर्याद्यत्किञ्चिन्नियतो नरः ॥

नियमो यथा भविष्योत्तरे—

वार्षिकांश्चतुरो मासान् देवस्योत्थापनावधि ।

गृह्णीयान्नियमानेतांल्लभते सन्ततिं पराम् ॥

मधुरस्वरसम्पत्तिर्भवेल्लवणवर्जनात् ।

कटुतैलपरित्यागाच्छत्रुनाशमवाप्नुयात् ॥

ताम्बुलवर्जनाद्रोगी अपक्वान्नोऽमलो भवेत् ।

दधिदुग्धपरित्यागाद् गोलोकं लभते नरः ॥

लभते सन्ततिं दीर्घां पक्वतालस्य वर्जनात् ।

भूमौ प्रस्तरशायी च विष्णोरनुचरो भवेत् ॥

सदा मुनिः सदा योगी मधुमांसस्य वर्जनात् ।

निर्व्याधिर्निरृणोऽर्थस्वी सुरामद्यविवर्जनात् ॥

अर्थस्वी धनज्ञातिमान् ।

एकान्तरोपवासेन ब्रह्मलोके महीयते ।

एकान्तरोपवासश्चतुर्थकालभोजनम् । षष्ठाष्टमकालादावप्येकान्तरत्वान्-पायादग्रहः । अधिकं प्रविष्टं न तु तद्धानिरिति न्यायात् ।

धारयेन्नखरोमाणि गङ्गास्नानं दिने दिने ।

मौनव्रती भवेन्नित्यं तस्याज्ञाऽस्खलिता भवेत् ॥

भूतौ भुङ्क्ते सदा यस्तु स पृथिव्यां पतिर्भवेत् ।

विष्णुपादाम्बुजस्पर्शी कृतकृत्यो भवेन्नरः ॥

प्रदक्षिणत्रयं यस्तु करोति स्तुतिपाठकः ।

हंसयुक्तविमानेन स च विष्णुपुरं व्रजेत् ॥

पुष्पमालाकुलां पूजां कृत्वा विष्णोः पुरं व्रजेत् ।

तीर्थाम्भसि कृतस्नानो निर्मलं देहमाप्नुयात् ॥
षष्ठकाले तु भोजी यः स्थायी स्वर्गे नरो भवेत् ।
नित्यस्नायी नरो यस्तु नरकं स न पश्यति ॥
भोजनं वर्जयेद् यस्तु स स्नानं पौष्करं लभेत् ॥

भोजनं पक्वान्नम् । तत्सामान्यनिषेधे प्राणबाधात् ।

पत्रेषु यो नरो भुङ्क्ते कुरुक्षेत्रफलं लभेत् ।
शिलायां भोजनान्नित्यं भवेत्स्नानं प्रयागजम् ॥

इत्याद्यन्यत्र विस्तरः । चातुर्मास्यासम्भवे तु

असम्भवे तुलार्के तु कर्त्तव्यं तत् प्रयत्नतः ।

तुलार्के कार्त्तिके ।

वार्षिकांश्चतुरो मासान् केनचिद्वाहयेन्नरः ।
व्रतेन तेन नाप्नोति किल्विषं वत्सरोद्भवम् ॥

अत्र नर इति सामान्याच्चतुर्वर्णस्त्रीपुंसामधिकारः ।

स्वीकृत्य प्रार्थयेद्देवं गृहीतनियमो बुधः ।

वाराहे— 'इदं व्रतं मया देव ! गृहीतं पुरतस्तव ।
निर्विघ्नां सिद्धिमायातु प्रसादात्तव केशव ॥
गृहीतेऽस्मिन् व्रते देव ! पञ्चत्वं यदि मे भवेत् ।
तदा भवतु सम्पूर्णं प्रसादात्तव केशव ॥'
न शैशवं नैव मौढ्यं शुक्रगुर्वोर्न वा तिथेः ।
खण्डत्वं चिन्तयेच्चातुर्मास्यव्रतविधौ नरः ॥

इति वृद्धशातातपवचनान्नेह शुक्रास्तादिदोषः । खण्डत्वं तिथिक्षयम् । तच्च विष्टिवैधृत्याद्युपलक्षकम् । नित्याकरणदोषस्य शुक्रास्तादौ सङ्कोचे मानाभावात् । इदं जन्माष्टमी-रामनवम्यादिसर्वनित्यव्रततुल्यमिति ज्ञातसाराः । तुलार्के त्वित्यधोवाक्यस्याश्विनशुक्लैकादशीतो मास इति कालादर्शः । इदं स्मार्त्तवैष्णवोभयसमम् ।

मार्गशीर्षकृत्यम्

भारते[896]— मार्गशीर्षं तु यो मासमेकभक्तेन संक्षिपेत् ।

भोजयेत्तु द्विजान् शक्त्या स मुच्येद् व्याधिकिल्बिषैः ॥

पौषमासकृत्यम्

भारते[897]— पौषमासं तु कौन्तेय ! एकभक्तेन यः क्षिपेत् ।
सुभगो दर्शनीयश्च यशोभागी च जायते ॥

माघमासकृत्यम्

भारते[898]— माघं तु नियतो मासमेकभक्तेन यः क्षिपेत् ।
श्रीमत्कुले जातिमांश्च सुमहांश्चैव जायते ॥
दर्शं वा पौर्णमासीं वा प्रारभ्य स्नानमाचरेत् ।
पुण्यान्यहानि त्रिंशत्तु मकरस्थे दिवाकरे ॥[899]

राजमार्त्तण्डे[900]—तुलामकरमेषेषु प्रातः स्नानं प्रशस्यते ।
भारतेऽपि—तुलामकरमेषेषु प्रातः स्नानं तिलैः सह ।[901]
हविष्यं ब्रह्मचर्यञ्च महापातकनाशनम् ॥

शिरसि तिलान्निक्षिप्येत्यर्थ इति प्राञ्चः । स्नानमन्त्रो यथा पाद्मे—
'मकरस्थे रवौ माघे गोविन्दाच्युतमाधव ।
स्नानेनानेन मे देव ! यथोक्तफलदो भव ॥
इमं मन्त्रं समुच्चार्य स्नायान्मौनसमन्वितः ।'
मकरार्कस्पर्शकाले मकरस्थे रवाविति ॥

896- महाभारते अनुशासनपर्वणि (106/17) ।
897- तत्रैव (106/20) भक्तेनैकेन-पाठः ।
898- 'श्रीमत्कुले ज्ञातिमध्ये स महत्त्वं प्रपद्यते ।'
इति महाभारतेऽनुशासनपर्वणि (106/21) उत्तरार्द्धपाठः ।
899- निर्णयसिन्धौ (पृ-158) विष्णुवचनमेतत् । अत्र मकरस्थे दिवाकर इति वचनात् सङ्क्रान्तिदिनादप्यारभ्य स्नातव्यम् ।
900 मुद्रितराजमार्त्तण्डे (पृ-125) पाठोः यथा—
तुलामकरमेषेषु प्रातःस्नायी भवेत् सदा ।
हविष्यं ब्रह्मचर्यञ्च महापातकनाशनम् ॥ इति ।
901- माघे तिलस्नानेन पापनाशं सूचयति निर्णयसिन्धु(पृ-160) कारो यथा—
तिलस्नायी तिलोद्वर्ती तिलहोमी तिलोदकी ।
तिलभुक् तिलदाता च षट्तिलाः पापनाशनाः ॥ इति ।

अयं मन्त्रो न पाठ्य इति गौडाः। मकरस्थाने धनुःपदस्य कुम्भपदस्य बोह इत्युत्कलाः। स्नानमन्त्रोऽपि नारदीये—

सवितुः प्रसवस्येह परंधामजले मम।
स्वत्तेजसा परिभ्रष्टं पापं यातु सहस्रधा॥
दिवाकर! जगन्नाथ! प्रभाकर! नमोऽस्तु ते।
परिपूर्णं कुरुष्वेदं माघस्नानं ममाच्युत!॥

यस्मिन् देशे य आचार इति मनुना माघस्नानं पौर्णमास्यन्तमास इत्युक्तं प्राक्।

आयुरारोग्यसम्पत्तौ रूपे सुभगतागुणे।
येषां मनोरथस्तैस्तु न त्याज्यं माघमज्जनम्॥
आयुर्वित्तकलत्रादिसम्पदः प्रभवन्ति च।
उपपातकानि सर्वाणि पातकानि महान्ति च।
भस्मीभवन्ति सर्वाणि माघस्नायिनि मानवे॥
काम्यादिकञ्च यत्पापं ज्ञानाज्ञानकृतञ्च यत्।
स्नानमात्रेण नश्येत्तु मकरस्थे दिवाकरे॥
सरितामप्यभावे तु नवकुम्भस्थितं जलम्।
वायुना ताडितं रात्रौ गङ्गास्नानसमं विदुः॥

भविष्योत्तरे—ब्रह्मचारी गृहस्थश्च वानप्रस्थी च भिक्षुकः।
प्रातः सर्वे प्रशंसन्ति माघमासस्य मज्जनम्॥
बालस्तरुणका वृद्धा नरो नारी नपुंसकाः।
माघे मासि शुभे तीर्थे प्राप्नुवन्तीप्सितं फलम्॥
ब्रह्मक्षत्रविशाञ्चैव मन्त्रवत्स्नानमिष्यते।
तूष्णीमेव तु शूद्रस्य स्त्रीणां कुरुकुलोद्वह!॥
सितासितेषु यैः स्नातं माघे मासि युधिष्ठिर!
न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि॥
गवां शतसहस्रस्य सम्यग्दातुश्च यत्फलम्॥
मकरस्थे रवौ माघे प्रातःकाले तथाऽमले।

गोष्पदेऽपि जले स्नानं स्वर्गदं पापिनामपि ॥

इत्यादिबहुवाक्यात् काम्यमिदम् । मन्त्रवदिति 'इमं मे वरुण श्रुधी'त्यादि-वैदिकमन्त्रपरम्[902] । तेन स्त्रीशूद्राणां 'मकरस्थे रवौ', 'सवितुः प्रसवे'त्यादि-पुराणमनूच्चारणं निर्बाधम् । गोपालभट्टास्तु'[903]—

प्रयागं पुष्करं प्राप्य कुरुक्षेत्रमथापि वा ।
यत्र वा तत्र वा स्नायान्माघे नित्यमिति श्रुतिः ॥
अकामो वा सकामो वा माघस्नायी भवेन्नरः ।
अमाघस्नायिनां नृणां निष्फलं जन्म कीर्त्तितम् ॥

इत्यादिपाद्मभविष्यान्नित्यमपीत्याहुः । इदं वैष्णवपरम् । तद्ग्रन्थे लिखनात् । इदं स्नानमरुणोदये कार्यम्, उक्तवाक्ये प्रातःपदलिङ्गात् ।

यो माघमास्युषसि सूर्यकराभिताम्रे स्नानं समाचरति चारुनदीप्रवाहे ।

इत्यादिदर्शनाच्च[904] । सूर्याभिताम्र इत्यपहाय करदानं सूर्योदयात् प्राक् तत्करसम्भवात्तदभिप्रायकमिति शिष्टव्याख्यानात्[905] । यत्तु

माघे मासि रटन्त्यापः किञ्चिदभ्युदिते रवौ ।[906] इति
किञ्चिदभ्युदिते सूर्ये माघस्नानं समाचरेत् । इति च,

902- शुक्लयजुर्वेदे (23/1) सम्पूर्णमन्त्रो यथा—
इम मे वरुण श्रुधी हवमद्या च मृडय ।
त्वामवस्युराचके ॥ इति ।

903- हरिभक्तिविलासे (14/48, 50, 51) भविष्यपाद्मवचनानि ।
असूर्यगमनं यद्वद्चन्द्रमुडुमण्डलम् ।
इति तत्र पाद्मेऽन्तिमश्लोकार्द्धपाठः ।

904- तत्रैव (14/64) भविष्योत्तरवचने उत्तरार्द्धपाठो यथा—
उद्धृत्य सप्त पुरुषान् पितृमातृतश्च
स्वर्गं प्रयात्यमरदेहधरो नरोऽसौ ॥ इति ।

905- कालदीपकार (पृ-127) इत्थमाह यथा— अत्र उषसीत्यभिधानात् सूर्यकराभिताम्रे इत्युक्तम् । सूर्योदयात् प्रागपि तत्करसम्भवात् । न तु सूर्याभिताम्र इत्युक्तम् । इति ।

906- निर्णयसिन्धौ (पृ-159) पाद्मवचनमेतत् ।

अत्र किञ्चित्पदमरुणोदयसूचकम्। उक्तप्रातःपदादिसामात्। न चोदिता-नुदितहोमवद् विकल्पः[907] स्यादिति शङ्क्यम्। तस्याष्टदोषत्वादाचार-विरोधाच्च।

> अस्मिन् मासे त्वशक्तोऽपि स्नायादपि दिनत्रयम्।
> दद्यात् किञ्चिद्यथाक्ति दारिद्र्याभाववाञ्छनः।
> त्रिस्नानेनापि माघे स्युर्धनिनो दीर्घजीविनः ॥[908]

त्रिदिनानि कृष्णचतुर्दशी शुक्लसप्तमी पूर्णिमा।

> सम्प्राप्ते मकरादित्ये पुण्ये पुण्यप्रदे सदा।
> कर्त्तव्यो नियमः कश्चिद् व्रतरूपी नरोत्तमैः ॥ (स्कन्दपु०)
> हरेरच्चर्चा तु वैशाखे तपः पूजा तु कार्त्तिके।
> तपोऽभ्यर्च्चा तथा दानं त्रयं माघे विशिष्यते ॥ (पद्मपु०)
> यदीच्छेद् विपुलान् भोगान् वैष्णवं पदमव्ययम्।
> स्नपयित्वा हरिं भक्त्या पूजयेत्तुलसीदलैः ॥
> मासार्द्धं वा समग्रं वा दशाहं वा तदर्द्धकम्।
> यथाशक्ति हरेः पूजां कुर्वन्नाप्नोति तत्पदम् ॥

907- धर्मप्रतिपादने श्रुतिः परमं प्रमाणं भवति। यत्र च श्रुत्योः परस्पर-विरुद्धार्थप्रतिपादनं तत्रोभयोर्ग्राह्यत्वं वर्त्तते। तदुक्तं मनुना (2/14)—

> श्रुतिद्वैधं तु यत्र स्यात्तत्र धर्मावुभौ स्मृतौ।
> उभावपि हि तौ धर्मौ सम्यगुक्तौ मनीषिभिः ॥ इति।

तुल्यबलतया विकल्पानुष्ठानविधानेन तत्र विरोधाभावं प्रदर्शयन् दृष्टान्तमाह स एव। तद्यथा (2/15)—

> उदितेऽनुदिते चैव समयाध्युषिते तथा।
> सर्वथा वर्त्तते यज्ञ इतीयं वैदिकी श्रुतिः ॥ इति।

अग्निहोत्रहोमसाधने 'उदिते जुहुयात्' 'अनुदिते जुहुयात्' इत्यादीन्यत्र श्रुतिवाक्यानि।

908- कृत्यकौमुद्यां (पृ-142) पद्मपुराणवचने मासे-स्थाने योगे, दद्यात्-स्थाने देयं, भाववाञ्छन-स्थाने भावमिच्छता, माघे स्युर्धनिनः-स्थाने माघेन बलिनः-इति धृतः पाठः।

अप्रावृतशरीरस्तु यः कष्टं स्नानमाचरेत् ।
पदे पदेऽश्वमेधस्य फलं प्राप्नोति मानवः ॥
तप्तेन वारिणा स्नानं यद् गृहे क्रियते नरैः ।
षड्वर्गफलदं तद्धि मकरस्थे दिवाकरे ॥

काम्यस्नाने त्वकृत्रिमं स्वपितृपुत्रादिकृतं वा तडागादिकं मुख्यम् । तदलाभे पञ्चपिण्डपञ्चकुम्भोद्धरणपूर्वकं परखातवारिस्नानमपीष्टम् । असामर्थ्ये पत्नीपुत्रादिना स्नानादि कर्त्तव्यम् । इदञ्च नित्यस्नानात् पृथगेकत्र वा कार्त्तिकवत् ।

फाल्गुनमासकृत्यम्

यमः[909]— प्रातःस्नायी च सततं द्वौ मासौ माघफाल्गुनौ ।
देवान् पितॄन् समभ्यर्च्य सर्वपापैः प्रमुच्यते ॥
एकभक्तं तु कुर्वाणः फाल्गुने मासि नित्यशः ।
स्त्रीषु सौभाग्यमाप्नोति स्त्रियश्च परमप्रियाः ॥

ग्रहणम्

तत्सम्भावना यथा ज्योतिषे—

एकर्क्षे रविचन्द्रराहुषु रवेः पूर्णोपरागस्तमस्यस्ते वाऽथ निशाकरग्रह इदं प्रायोऽस्ततुल्यर्क्षतो । प्रायस्तत्र षडष्टगे व्ययधनस्थेऽल्पग्रहोऽस्तैकभे तुल्ये चांशकलादिनाऽर्कशशिनो राहावखण्डग्रहः ॥[910]

909- मुद्रितयमस्मृतौ वचनमिदं नोपलभ्यते । किन्तु कालसारे केवलं प्रथमश्लोकस्योत्तरार्द्धं उद्धृतो वर्त्तते ।

910- ग्रहणसम्भावनाऽप्युक्ता तिथितत्त्वे (पृ-150) यथा—
भत्रिपादान्तरे राहोः केतोर्वा संस्थितो रविः ।
चतुष्पादान्तरे चन्द्रस्तदा सम्भाव्यते ग्रहः ॥
यस्मिन् ऋक्षे रविस्तस्माच्चतुर्दशगतः शशी ।
पूर्णिमाप्रतिपत्सन्धौ राहुणा ग्रस्यते शशी ॥ इति ।

उक्तञ्चापि वर्षक्रियाकौमुद्यां (पृ-90) ज्योतिषे—
षट्काष्टके वाऽप्यथ सप्तमे वा द्विर्द्वादशे वा तमसो युतौ वा ।
राकावशेषे ग्रहणं सुधांशोर्दर्शावशेषे कमलैकबन्धोः ॥ इति ।

अत्र स्मार्तपाराशिकाः—रवि चन्द्रयोः राहुग्रास एव ग्रहणम् ।

यदैवास्तं गतश्चन्द्रो राहोराननगोचरः ।[911]

इति ब्राह्मात् ।

राहुग्रस्ते दिनकरे न दोषो राहुदर्शने ।

चन्द्रे वा यदि वा सूर्ये दृष्टे राहौ महाग्रहे ॥

त्यज्यतां चन्द्रसङ्ग इत्यादिलिङ्गाच्चेत्याहुः । इदं ज्योतिर्विदो न मन्यन्ते । एकर्क्षे राहुग्रासस्म्भवेऽपि सममसप्तम इष्टकादौ कथं स्यात् । वैयधिकरण्यात् । तस्माच्चन्द्रस्य भूच्छायाच्छादने चन्द्रग्रहः, सूर्यस्य तु चन्द्रेणाच्छादनं सूर्यग्रह इति निर्वाच्यम् । तदुक्तं सूर्यसिद्धान्ते[912]—

छादको भास्करस्येन्दुरधस्थो घनवद् भवेत् ।

भूच्छायां प्राङ्मुखश्चन्द्रो विशत्यस्य भवेदसौ ॥

वस्तुतस्तु भूच्छायादिना ग्रहणेऽपि भिन्नभिन्नराशिगतोऽपि राहुः शिववरेण सूर्याचन्द्रमसावाक्रामति । अन्यथा बहुस्मृतिपुराणविरोधापत्तिः । अतएवात्र कामाभट्टेन[913] सिद्धान्तशिरोमणिपदमुपन्यस्तम्—

दिग्देशकालावरणादिभेदान्न च्छादको राहुरिति ब्रुवन्ति ।

यन्मानिनः केवलगोलविद्यास्तत्संहितावेदपुराणबाह्यम् ॥

911- तिथितत्त्वे (स्मृ० त०-I पृ-161) सम्पूर्णं ब्रह्मपुराणवचनं यथा—

यदैवास्तं गतश्चन्द्रो राहोराननगोचरः ।

आकलय्य तु तं कालं क्रिया कार्या विचक्षणैः ॥ इति ।

912- सूर्यसिद्धान्ते चन्द्रग्रहणाधिकारे नवमश्लोकपाठोऽयम् ।

913- कामाभट्टः सिद्धान्तविवरणे (पत्रम्-84-पार्श्वः-क) विचारयति यथा—भूच्छाया चन्द्रमण्डले यावन्तं प्रदेशमावृणोति तावन्तं राहोर्नियतगराशेऽपि स्वस्थानं विहाय प्रविश्य चन्द्रगतममृतं सारमेव शिववरात् पिबेत् । एवं सूर्यबिम्बेऽपि चन्द्रेणाच्छादितप्रदेशमाश्रित्य तद्गतं सारांशं पिबेत् । ततः स्वस्थानमेव गच्छेत् । तदुक्तं सिद्धान्तशिरोमणौ—दिग्वर्णवेलावरणादिभेदान्न च्छादको राहुरित्यादि । वरप्रदानात् स्थाने विवरणमातृकायामपि 'वरप्रसादात्'-पाठः । वचनमिदं सिद्धान्तशिरोमणौ गोलाध्याये (ग्रहणवासना-श्लोकौ-9, 10) पठ्यते ।

राहुः कुभामण्डलगः शशाङ्कं शशाङ्कगश्छादयतीनबिम्बम् ।
तमोमयः शम्भुवरप्रदानात् सर्वागमानामविरुद्धमेतत् ॥

एवञ्च न स्मृत्यादिविरोध इति तत्त्वम् । एतत्साधनं स्फुटे विचारितम् । अत्र ब्रह्मसूर्यसिद्धान्तशिरोमण्यादिमुनिसिद्धान्तानां क्रमाद् दौर्बल्यम् । ब्रह्मसूर्ययो-र्विष्णुकलातारतम्यान्नव्यप्राचीनभावाच्च । तेन यदा रविचन्द्रयोर्ग्रस्तोदय-ग्रस्तास्तग्रहौ तत्तत्सिद्धान्तवशाद् भिन्नभिन्नौ पततस्तदा सूर्यसिद्धान्तादीन् बाधित्वा ब्रह्मसिद्धान्तेन निर्णेतव्यम् । ब्रह्मणो रजोगुणमात्रोपाधिकविष्णु-रूपत्वेन सूर्याधिक्यात् नवीनत्वाच्च । एवं सूर्यमुनिसिद्धान्तानामन्योन्य-विरोधे सूर्यसिद्धान्तस्तद् बाधक इत्युक्तप्रायम् । सूर्यस्य मुनितो विष्णवंशाधि-क्यात् । पाणिनिकात्यायनपतञ्जलीनां यथोत्तरप्रामाण्यवत् । रोमशपौल-स्त्यादिमुनीनां विरोधे तु समबलत्वाद् विकल्पः । अतुल्यबलयोर्विकल्पे त्वौदुम्बरीस्पर्शनसर्ववेष्टनश्रुतिस्मृत्योर्विकल्पापत्तिः[914] । न च भूगोलबन्धेन ग्रहणं प्रत्यक्षं ग्रस्तोदयास्तनिर्णायकमिति वाच्यम् । भूगोलस्याप्युक्तयुक्ति-मूलत्वात् । अन्यथा भ्रममूलत्वम् । प्रयोजनञ्चात्र

ग्रस्तोदये विधोः पूर्वं नाहर्भोजनमाचरेत् ।
ग्रस्तावेवास्तमानं तु........ ॥[915]

इति भोजनाभावे कालतारतम्यं पुरश्चरणाभावश्च वक्ष्यते । इदञ्च ग्रहणं दृष्टमेव स्नानदानादिनिमित्तं न तु साधनज्ञातमपि मेघाद्याच्छन्नम् ।

सङ्क्रान्तेः पुण्यकालस्तु षोडशोभयतः कलाः ।
चन्द्रसूर्योपरागे तु यावद्दर्शनगोचरः ॥

इति जाबालिवचनात्[916] । चाक्षुषज्ञाने दृशः शक्तत्वात् ।

914- द्रष्टव्या पादटिप्पणी—613 ।
915- ग्रस्तोदय इति कालमाधवे (पृ-292) वृद्धवसिष्ठवचनम् । ग्रस्तावेवेति सम्पूर्णं भृगुवचनं तत्रैव (पृ-293) यथा—

ग्रस्तावेवास्तमानं तु रवीन्दू प्राप्नुतो यदि ।
परेद्युरुदये स्नात्वा शुद्धोऽभ्यवहरेन्नरः ॥ इति ।

'तयोः परेद्युरुदये स्नात्वाऽभ्यवहरेन्नरः ।' इति पण्डितसर्वस्वे (पृ-137) ।
916- कृत्यतत्त्वार्णवे (पृ.पृ-67-68) ।

चक्षुषा दर्शनं राहोर्यत्तद् ग्रहणमुच्यते ।

इति संवत्सरप्रदीपाच्च[917] । तेन यावद्दर्शनेत्यस्य स्वदर्शनयोग इत्यर्थः, व्याख्यानात् । 'राहुं दृष्ट्वा क्षयं नर'[918] इति समानकर्तृकक्त्वाप्रत्ययेन एतल्लाभाच्च । गोचरपदस्य योग्यार्थकत्वादन्धादेः तत्सिद्धिः । मेघाच्छादने तन्निरासश्चेत्युक्तम् । न च

नेक्षेतोद्यन्तमादित्यं नास्तं यन्तं कदाचन ।
नोपरक्तं न वारिस्थं न मध्यं नभसो गतम् ॥

इति मनुना[919] निषेधादुपरक्तस्य रवेर्दर्शनयोग्यता नास्तीति वाच्यम् । दक्षिणावाक्ये गौरश्वतरश्चेत्यादावश्वे द्वादशसङ्ख्याबाधवत्

'राहुं दृष्ट्वाऽक्षयं नरः ।'
'राहुदर्शनसङ्क्रान्तिविवाहात्ययवृद्धिषु ॥'[920]

इत्यादिस्मृतिविरोधेनोद्यन्तवारिस्थसूर्यादौ तदवकाशात् । गौडास्तु नोपरक्तमितिनिषेधो रागकौतुकादिकृतस्योपरक्तदर्शनस्यैव न तु ग्रहणसन्देहाभावकृतदर्शनस्येत्याहुः । अन्धानां सूर्यादर्शनेऽप्याप्तवाक्यादिना तन्निश्चयात्तद् योग्यता निर्बाधा[921] । परमाणुरूपादौ प्रत्यक्षयोग्यत्ववत् । शास्त्रस्य मनुष्याधिकारित्वात्तन्निषेधबाधः । अत एव कल्पतरावपि[922] दर्शनमत्र स्वचाक्षुषमन्यन्निवेदितं, ते च द्विविधमुक्तम् । नामकीर्त्तनादिप्रायश्चित्तं वा तद्दर्शने

917- तत्र कर्माणि कुर्वीत गणनामात्रतो न तु ।
इति तिथितत्त्व (पृ 155) धृतसंवत्सरप्रदीपोक्तवचनापरार्द्धपाठः ।

918- तिथितत्त्वधृतं (पृ 152) सम्पूर्णं मार्कण्डेयवचनं यथा—
एकरात्रमुपोष्यैव राहुं दृष्ट्वा क्षयं नरः ।
पुण्यमाप्नोति कृत्वा च दानं श्राद्धं विधानतः ॥ इति ।

919- मुद्रितमनुस्मृतौ (4/37) नोपरक्तं-स्थाने नोपसृष्टं-पाठः ।

920- स्नानदानादिकं कार्यं निशि काम्यव्रतेषु च ।
इति कालमाधवे (पृ-278) याज्ञवल्क्यवचने उत्तरार्द्धपाठः । रघुनन्दनस्तु तिथितत्त्वे (पृ-152) कार्यं-स्थाने कुर्युः-इतीदं देवलवचनं पठित्वा "दर्शनपदश्रवणाद्दर्शने सति स्नानादेर्महाभ्युदयहेतुत्वाद्दर्शनमपि विधेयम् ।" इत्याह ।

921-रघुनन्दनोऽपि तिथितत्त्वे (पृ-161) मतमित्थं प्रतिपादयति । तद्यथा—
अन्धेनापि उदयकालमाकलय्य भुज्यत इति ।

कार्यम्, सारस्वतचरुवत्। वृद्धगौतमवशिष्ठौ[923]—

सूर्यग्रहे तु नाश्नीयात् पूर्वं यामचतुष्टयम्।
चन्द्रग्रहे तु यामांस्त्रीन् बालवृद्धातुरैर्विना ॥
ग्रस्तोदये विधोः पूर्वं नाहर्भोजनमाचरेत्।
मुक्ते शशिनि भुञ्जीत........ ॥

इति स्वरसात् स्पर्शादिसर्वमोक्षान्तकालमध्ये भोजनाभावस्य प्राप्तत्वेन तत्र वसनविधिप्रसरानौचित्यात् स्पर्शात् पूर्वमेव त्रिचतुर्यामनिषेधाचारः, न तु सर्वमोक्षात् प्राक्। अयं भोजननिषेधः पुरुषार्थो न तु ग्रहणस्नानाङ्गम्, मानाभावात्।

चन्द्रसूर्यग्रहे भुक्त्वा प्राजापत्येन शुद्ध्यति।[924]

इति वाक्यशेषात्। एवं

मुक्ते शशिनि भुञ्जीत यदि न स्यान्महानिशा।[925]

इति भुञ्जीतेति तु रागप्राप्तभोजनानुवादो न तु तदव्यवहितोत्तरकाले षष्ठादि-

---

922- कृत्यकल्पतरौ नियतकालकाण्डे (पृ.पृ-368-369) लक्ष्मीधरेण विचार्यते यथा—चन्द्रसूर्योपरागस्य निमित्तत्वप्रतिपादनाज्ज्ञातस्यैव च निमित्तत्वाज्ज्ञानमात्रे प्राप्ते 'यावद्दर्शनगोचर' इति वचनात् 'राहुदर्शन' इति वचनाच्च चाक्षुषज्ञानविषयस्यैव निमित्तता। चाक्षुषज्ञाने दर्शनपदस्य मुख्यत्वात्। तेन च मेघादिच्छन्ने स्नानादिकं कर्त्तव्यम्। एवं ग्रस्तास्तमिते परेऽह्नि यन्मुक्तिदर्शनं तच्चाक्षुषमेव। इति।

923-वीरमित्रोदयसमयप्रकाशे (पृ.पृ-117-119) प्रथमश्लोकः वृद्धगौतमस्य, ग्रस्तोदये इति वृद्धवसिष्ठस्य, मुक्ते शशिनि इति शातातपस्योक्तिः।

924- कृत्यतत्त्वार्णवे (पृ-71) भवदेवलिखितदेवलवचनं यथा—

चन्द्रसूर्यग्रहे भुक्त्वा प्राजापत्येन शुद्ध्यति।
तस्मिन्नेव दिने भुक्त्वा त्रिरात्राच्छुद्धिरिष्यते ॥ इति।

कालमाधवे तु (पृ-292) कात्यायनोक्तवचनेऽस्मिन् त्रिरात्रेणैव शुद्ध्यतीति चतुर्थपादपाठः।

925- अमुक्तयोरस्तगयोरद्याद् दृष्ट्वा परेऽहनि।

इति कालमाधवे (पृ-292) व्यासोक्तवचने उत्तरार्द्धपाठः।

कालवन्नित्यभोजनविधिः। गौरवात्। महानिशाप्रतिषेधात् सङ्गतेश्च। ग्रहात् प्राग्भोजनस्य निषेधो रागप्राप्तस्य न तु व्रताङ्गस्य। ग्रस्तास्तमययोस्तु भेदः।

दृष्ट्वा स्नात्वा परेऽह्नि यद्याद् ग्रस्तास्तमययोस्तथा।[926]

परेऽह्नि परदिनोदयकाले। तेन सूर्यग्रहे परदिवसे चन्द्रग्रहे परात्रावित्यर्थः। परदिने मेघाच्छादनादिनोदयप्रतिबन्धे तु

आकलय्य तु तं कालं भुञ्जीत स्नानपूर्वकम्।

इति परं दिवसं रात्रिं वा ज्ञात्वा भोक्तव्यम्।[927]

रविशशिग्रस्तास्तेऽहोरात्रं न भोक्तव्यम्।

इति विष्णुस्मृतेः[928]। निषेधकालानन्तरं भोजनश्रुतेश्च। अत्रादित्ययं विधिः परिसङ्ख्या, न नियमः। आचारमानाभावात्।

सायाह्ने ग्रहणञ्चेत् स्यादपराह्णे न भोजनम्।

अपराह्णे न मध्याह्ने मध्याह्ने चेन्न सङ्गवे॥

सङ्गवे ग्रहणञ्चेत् स्यान्न पूर्वं भोजनं त्विति॥

इति वाचस्पतिमिश्रधृतं[929] मार्कण्डेयपुराणवचनं बालवृद्धातुरविषयकम्।

926- कृत्यकल्पतरौ नियतकालकाण्डे (पृ.पृ-369-370) सम्पूर्णवचनं यथा—

मुक्ते शशिनि भुञ्जीत यदि न स्यान्महानिशा।

स्नात्वा दृष्ट्वा परेऽह्न यद्याद् ग्रस्तास्तमितयोस्तयोः॥ इति।

927- रघुनन्दनोऽपि तिथितत्त्वे (पृ-161) इत्थमाह। तद्यथा—एष च दर्शननियमो न रागप्राप्तदर्शन एव। मेघादिना अदर्शने तु उदयकालमाकलय्यैव भुञ्जीत।

मेघमालादिदोषेण यदि मुक्तिर्न दृश्यते।

आकलय्य तु तं कालं भुञ्जीत स्नानपूर्वकम्॥

इति कृत्यतत्त्वार्णवधृतवचनात्। इति।

928- विष्णुस्मृतौ (68/1-3) ग्रहणभोजनविचारो यथा—चन्द्रार्कोपरागे नाश्नीयात्। स्नात्वा मुक्तयोरश्नीयात्। अमुक्तयोरस्तंगतयोः स्नात्वा दृष्ट्वा चापरेऽह्नि। इति।

929- तिथितत्त्वे (पृ-159) भोजनन्त्विति स्थाने भोजनक्रिया-पाठः।

'भुञ्जीत सङ्गवे चेत्स्यान्न पूर्वं भोजनक्रिया।'

इति निर्णयसिन्धौ (पृ-45) सङ्गवे ग्रहणं चेत् पादे धृतः पाठः।

आदित्येऽहनि सङ्क्रान्तौ ग्रहणे चन्द्रसूर्ययोः ।
अहोरात्रोषितः स्नातः सर्वपापैः प्रमुच्यते ॥[930]
चन्द्रार्कयोर्ग्रहणयोर्व्यतीपातेऽथ पर्वसु ।
अहोरात्रोषितः स्नानं श्राद्धं दानं तथा जपम् ।
यः करोति प्रसन्नात्मा तस्य स्यादक्षयं फलम् ॥[931]

इत्यादिकं काम्योपवासविधायकम् ।

आदित्येऽहनि सङ्क्रान्तौ ग्रहणे चन्द्रसूर्ययोः ।
पारणञ्चोपवासञ्च न कुर्यात् पुत्रवान् गृही ॥[932]

इति पुत्रिण उक्तोपवासनिषेधकम् ; न तु रविग्रस्तास्तकृतोपवासस्यापि । तस्य नित्यत्वादिति बहवः[933] । गौडास्तु ग्रस्तास्ते ग्रहणात् पूर्वं तदनन्तरं वा न भोक्तव्यमिति संवत्सरप्रदीपोक्तमाददिरे[934] । ग्रहणकाले पक्वमप्यन्नमभोज्यम् , शृतमन्नं विवर्जयेदिति शृतपदस्य ग्रहणकालवाक्यार्थत्वात् । अत एव पाकभाण्डास्पर्शाचारः ।

930- कालमाधवे (पृ-293) 'अयने विषुवे चैव' इति दक्षवचने प्रथमान्तपादपाठः ।

931- कृत्यकौमुद्यां (पृ 248) ब्रह्मपुराणवचनेऽस्मिन् प्रथमश्लोकपूर्वार्द्धपाठो यथा— नित्यं द्वयोरयनयोस्तथा विषुवतोर्द्वयोः । इति ।

932- निर्णयसिन्धौ (पृ-45) जैमिनिवचनमेतत् ।

933- माधवाचार्यः कालमाधवे (पृ-294) इत्थमाह । तद्यथा—ग्रस्तास्तसमये तु पुत्रिणोऽप्युपवास एव । 'अहोरात्रं न भोक्तव्यम् ।' इति भोजनप्रतिषेधात् । इति । निर्णयसिन्धुकारस्तु (पृ.पृ-45-46)— यदा तु रवेर्ग्रस्तास्तस्तदा पुत्रिणः प्रहरद्वयं हित्वा बालादिवद्भोजनं, न तूपवासः ।

सायाह्ने सङ्गवेऽश्नीयाच्छारदे सङ्गवादधः ।
मध्याह्ने परतोऽश्नीयान्नोपवासो रविग्रहे ॥ इति स्मृतेः ।

इति पुत्रिणो ग्रस्तास्ते प्रतिषिद्धे उपवासे भोजनकालमाह । तच्चिन्त्यम् ।

934- तिथितत्त्वे (पृ-159) रघुनन्दनोक्तं संवत्सरप्रदीपवचनं तु यथा— पुत्रिणो गृहस्थस्य ग्रस्तास्तेऽपि नोपवासः किन्तु ग्रहणानन्तरं पूर्वं वा निर्दोषकाले तेन किञ्चिद्भक्ष्यमिति संवत्सरप्रदीपः । इति ।

पूर्णिमाप्रतिपत्सन्धौ राहुः सम्पूर्णमण्डलम् ।
ग्रसते चन्द्रमर्कञ्च दर्शप्रतिपदन्तरे ॥
ग्रस्यमाने भवेत् स्नानं ग्रस्ते होमो विधीयते ।
मुच्यमाने भवेद्दानं मुक्ते स्नानं विधीयते ॥[935]

दर्शप्रतिपदन्तरे इति लम्बनशून्यविषयम् । तेन क्वचिदमायां ग्रासमोक्षौ । क्वचित् प्रतिपदि तौ । क्वचिच्चन्द्रग्रहवद् दर्शप्रतिपदोर्मध्ये । लम्बनकला-देर्हननवशात्तस्य शून्यत्वाच्चेति चन्द्रग्रहादभेदः । ग्रस्यमाने ग्रासारम्भे । ग्रस्ते ग्राससमाप्तौ । एवं मुच्यमान इत्यादौ । पुरश्चरणं तु स्पर्शान्मोक्षपर्यन्तं कार्यम् ।

स्पर्शाद्विमुक्तिपर्यन्तं जपेन्मन्त्रं समाहितः ।[936]

इति वचनात् । स्पर्शं दृष्ट्वेति ल्यब्लोपे पञ्चमी । तेन स्पर्शाद्यदर्शने पुरश्चर-णाभावः । अत एव ग्रस्तोदये पुरश्चरणं नास्तीति प्राचां प्रवादः । ग्रस्तास्ते तु सर्वमोक्षदण्डं साधनान्निश्चित्य कार्यम् । स्पर्शे दर्शनस्य नियतत्वेऽपि मोक्षे तदपेक्षाविरहात् । हेमाद्रिस्तु यावद्दर्शनगोचरस्तावान् पुण्यकालः । तेन ग्रस्तास्तेऽस्तमयानन्तरं पुण्यकालालाभः । ग्रस्तोदये दर्शनानन्तरं स चेति ।

सूर्यग्रहो यदा रात्रौ दिवा चन्द्रग्रहो भवेत् ।
तत्र स्नानं न कुर्वीत दद्याद्दानं न कुत्रचित् ॥

इत्यादि निगमादित्याह[937] । तदाचारविरुद्धम् । सूर्यग्रहो यदा रात्राविति निगमस्तु साधनकृतो रात्रौ सूर्यस्पर्शादिपरः । ग्रस्तोदये तु मेघाद्याशङ्कया दर्शनात् पूर्वं तद्वा माऽस्तु । न तु ग्रस्तास्ते तथा । अन्यथा तन्मते ग्रस्तास्ते दानहोमानापत्तिः । तत्कालस्यापुण्यकरत्वादिति ध्येयम् । व्याध्यादिना स्नानाशक्तौ तु व्याघ्रः[938]—

935- कालमाधवे (पृ-19) दर्श स्थाने पर्व-पाठः ।

936- ग्रहणे पुरश्चरणमुक्तं निर्णयसिन्धौ (पृ-51) पुरश्चरणचन्द्रिकायाम्—

चन्द्रसूर्योपरागे च स्नात्वा प्रयतमानसः ।
स्पर्शादिमोक्षपर्यन्तं जपेन्मन्त्रं समाहितः ॥ इत्यादि ।

937- कालमाधवे (पृ-291) भवेत्-स्थाने 'तथा', चतुर्थचरणे च 'दानञ्च न क्वचित्' इति धृतः पाठः ।

'आदित्यकिरणैः पूतं पुनः पूतञ्च वह्निना ।
अतो व्याध्यातुरः स्नायाद् ग्रहणेऽप्युष्णवारिणा ॥'
सूतके मृतके चैव न दोषो राहुदर्शने ।
स्नानमात्रं तु कर्त्तव्यं श्राद्धदानविवर्जितम् ॥

इति गौडग्रन्थे[939] यद्यपि दानश्राद्धे हित्वा स्नानमात्रमुक्तं तथापि सिंहवाजपेयिकालादर्शकारादिभिः[940] श्राद्धदानादेरपि स्फुटलिखनादुत्कले दानश्राद्धाद्याचारः ।

सूतके मृतके चैव न दोषो राहुदर्शने ।
तावत् कालं भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यते ॥

इति लिङ्गपुराणे स्नानदानादि सर्वसाधारण्येन सर्वतः शुद्ध्युक्तेश्च ।

स्नानं स्याद्धुपरागादौ मध्ये होमः सुरार्च्चनम् ।[941]

शिवरहस्ये[942]—सूर्येन्दुग्रहणं यावत् तावत् कुर्याज्जपादिकम् ।
न स्वपेन्न च भुञ्जीत स्नात्वा भुञ्जीत मुक्तयोः ॥

व्यासः[943]—सर्वं भूमिसमं दानं सर्वे व्याससमा द्विजाः ।
सर्वं गङ्गासमं तोयं ग्रहणे नात्र संशयः ॥
इन्दोर्लक्षगुणं प्रोक्तं रवेर्दशगुणं भवेत् ।
गङ्गातीरे तु सम्प्राप्ते इन्दोः कोटी रवेर्दश ॥[944]

938- तत्रैव (पृ-286), वीरमित्रोदयसमयप्रकाशे (पृ-110) ।
939- संवत्सरप्रदीपादिवचनमेतत् वीरमित्रोदयसमयप्रकाशे (पृ 115) ।
940- नित्याचारप्रदीपे (भागः-II-पृ-688) नरसिंहवाजपेयी आह यथा—तथा च लिङ्गपुराणे—सूतके मृतके चैव........मुक्तिर्न दृश्यते ॥
अत्र शुद्ध्यभिधानं दानश्राद्धार्थमेव पूर्वेण स्नानस्य प्राप्तेः । इति ।
निर्णयसिन्धुकारश्चापि (पृ-48) दानश्राद्धविवर्जितमिति निर्मूलं वदन्तो गौडाः परास्ताः । इत्याह । तत् समीचीनम् ।
941- कालमाधवे (पृ-290) ब्रह्मवैवर्त्तवचनमेतत् । 942-तत्रैव (पृ-290) ।
943- तत्रैव (पृ-286) 'ग्रहणे चन्द्रसूर्ययोः' इति चतुर्थपादपाठः ।
944- तत्रैव (पृ-285) प्रोक्तं-स्थाने पुण्यं, भवेत्-स्थाने ततः, तीरे स्थाने तोये-इति धृतः पाठः ।

वराहसंहितायाम्[945]—

जन्मसप्ताष्टरिष्फाङ्कदशमेस्थे निशाकरे ।
दृष्टोऽरिष्टप्रदो राहुर्जन्मर्क्षे निधनेऽपि च ॥

निधनं सप्तमतारा ।

जन्मभे जन्मराशौ च षष्ठाष्टमगते तयोः ।
चतुर्थे द्वादशे चन्द्रे न कुर्याद्राहुदर्शनम् ॥[946]
वैनाशिकर्क्षे दृष्टं ग्रहणं सुधांशुभास्करयोः ।
जनयति रोग बहुधा क्लेशं धनक्षयं चाशु ॥[947]
जन्माष्टजायान्त्यखधर्मसंस्थे निशाकरे जन्मसु तारकासु ।
दृष्ट्वा तमश्चन्द्रमसं प्रयत्नादभ्यर्च्य दद्यात् कनकं द्विजाय ॥

वैनाशिकं निधनम् । चन्द्रमसमिति सूर्योपलक्षणम्, राहुग्रासार्थकं वा । उपक्रमे सुधांशुभास्करयोरिति सत्त्वात् । अत्र श्राद्धं नित्यकाम्यं विहितम् ।

सर्वात्मनाऽपि कर्त्तव्यं श्राद्धं वै राहुदर्शने ।
अकुर्वाणस्तु तच्छ्राद्धं पङ्के गौरिव सीदति ॥[948]
चन्द्रसूर्यग्रहे यस्तु श्राद्धं विधिवदाचरेत् ।
तेनैव सकला पृथ्वी दत्ता विप्रस्य वै करे ॥[949]

इति ऋष्यशृङ्गशातातपस्मरणात् । तच्छ्राद्धमामं हेमरूपं वेति विकल्पः ।

आपद्यशौचे तीर्थे च चन्द्रसूर्यग्रहे तथा ।
आमश्राद्धञ्च कर्त्तव्यं शूद्रेण तु सदैव हि ॥

945- तिथितत्त्वे (स्मृ० त०-I-पृ-151) ।

946- तत्रैव (पृ-151) वशिष्ठोक्तिरियम् ।

947- तत्रैव (पृ-151) वराहसंहितावचनेऽस्मिन् धन-स्थाने वित्त-पाठः ।

948- कृत्यकौमुद्यां (पृ-248)शातातपवचनेऽस्मिन् "सर्वस्वेनापि कर्त्तव्यं श्राद्धं खलु विचक्षणैः ।" इति प्रथमार्द्धः, चतुर्थपादे सीदति-स्थाने मज्जति-पाठः । कालमाधवे (पृ-287) तु महाभारतोक्तवचनेऽस्मिन् सर्वात्मनापि-स्थाने सर्वस्वेनापि, तच्छ्राद्धं-स्थाने नास्तिक्यात् इति पाठः ।

949- कालमाधवे (पृ-287) ऋष्यशृङ्गवचनमेतत् ।

इति प्रचेतःस्मृतेः ।[950]

हेमश्राद्धं सग्रहे च द्विजः शूद्रः सदाऽऽचरेत् ।[951]

इति वाक्याच्च । मातापित्रोराब्दिकमप्येवमत्र विकल्पः ।

दर्शे रविग्रहे पित्रोः प्रत्याब्दिक उपस्थिते ।

अन्नेनासम्भवे हेम्ना कुर्यादामेन वा पुनः ॥ इति वाक्यात्[952] ।

वशिष्ठः[953]—सस्यं क्षेत्रगतं प्राहुः सतुषं धान्यमुच्यते ।

आमं वितुषमित्युक्तं स्विन्नमन्नमुदाहृतम् ॥

निरग्नेरामश्राद्धे तु अन्नं न क्षालयेत् क्वचित् ।

वृद्धौ च क्षालयेदन्नं सङ्क्रमे ग्रहणेषु च ॥[954]

निरग्निः साग्निकभिन्नो द्विजः शूद्रश्च ।

चन्द्रसूर्यग्रहे दानं श्राद्धं स्नानजपादिकम् ।

कार्याणि मलमासेऽपि नित्यं नैमित्तिकं तथा ॥[955]

इति वचनान्मलमासेऽप्येतत् सर्वं स्यात् ।

मन्त्रदीक्षां प्रकुर्वाणो मासर्क्षादीन्न शोधयेत् ।[956]

इति वाक्यान्मन्त्रग्रहेऽपि मलमासदोषाभावः ।

सपिण्डीकरणादूर्ध्वमामश्राद्धं विधीयते ।

950- कृत्यतत्त्वार्णवे (पृ 80) आपद्यनग्नौ इति प्रथमपादे, आमश्राद्धं द्विजैः कार्यम् इति तृतीयपादे च धृतः पाठः ।

951- कालमाधवे (पृ-288) बौधायनोक्तवचनं यथा—

अन्नाभावे द्विजाभावे प्रवासे पुत्रजन्मनि ।

हेमश्राद्धं सग्रहे च कुर्याच्छूद्रः सदैव हि ॥ इति ।

952- तत्रैव (पृ-289) ।

953- तिथितत्त्वे (पृ-154) प्राहुः स्थाने प्रोक्तं-पाठः ।

954- तत्रैव (पृ-154) योगिनीतन्त्रवचनमेतत् ।

955- तत्रैव (पृ-154) कालमाधवीयधृतवचनमेतत् ।

956- मन्त्रग्रहणं विचार्यते निर्णयसिन्धौ (पृ 48) रत्नसागरे यथा—

सत्तीर्थेऽर्कविधुग्रासे तन्तुदामनपर्वणि ।

मन्त्रदीक्षां प्रकुर्वाणो मासर्क्षादीन्न शोधयेत् ॥ इति ।

इति वचनात् ब्राह्मणस्यात्र मासिकसपिण्डीकरणान्यामेनासम्भवे वाक्येनैव स्युः । परन्तु तदन्नभाण्डादीनां गवाग्निजलेषु क्षेपो न तु भोजनयोग्यता ।

सर्वेषामेव वर्णानां सूतकं राहुदर्शने ।
स्नात्वा कर्माणि कुर्वीत शृतमन्नं विवर्जयेत् ।।[957]

शृतं पक्वम् । अत्र श्राद्धशेषस्याप्यभोजनमाघ्राणं वा । वस्तुतस्तु शृतमन्नमित्यत्र ग्रहणकालीनपक्वस्याशुद्धेर्गोपीनाथोक्तत्वात् तत्कालपक्वस्याशुद्धित्वेन पितृदेवानर्हत्वम् । अत एव देवालये तदानीं पाकाभावः । तस्मान्मासिकस्य तादृशतिथावमाकृष्णैकादश्योर्वा क्रिया । सपिण्डीकरणस्य तु रौद्रे हस्ते वेति प्रतीयते । अमाश्राद्धपक्षेऽपि पिण्डाभावः पिण्डत्रयं वेति विकल्पः ।

ग्रहणे च व्यतीपाते नवसस्य-समागमे ।
युगादौ षडशीत्याश्च गृहाच्छादन एव च ।
नित्यश्राद्धे च सङ्क्रान्त्यामपिण्डं श्राद्धमिष्यते ॥
ततः प्रभृति सङ्क्रान्तावुपरागादिपर्वसु ।
त्रिपिण्डमाचरेच्छ्राद्धमेकोद्दिष्टं मृतेऽहनि ।।[958]

इति वचनात् षोडशिग्रहाग्रहन्यायात् । अत्रानध्यायो ग्रस्तास्तपर इति न दृष्टमात्रविषयः । किन्तु गणकसाधनेन तज्ज्ञानमात्रादपि

त्र्यहं न कीर्त्तयेद् ब्रह्म राज्ञो राहोश्च सूतके ।

इति मनुना[959] सामान्यतो निषेधादिति रघुनन्दनः[960] । अत्र त्र्यहानध्यायो

957- कालमाधवे (पृ-289) षट्त्रिंशन्मतमेतत् ।

958- यमस्मृतौ (श्लोकः-83) अनुरूपवचनं यथा—
ग्रहोपरागे सङ्क्रान्तौ पर्वोत्सवमहालये ।
निर्वपेत् त्रीन्नरः पिण्डानेकमेव मृतेऽहनि ॥ इति ।

959- अनध्यायप्रसङ्गे सम्पूर्णं मनुवचनं (4/110) यथा—
प्रतिगृह्य द्विजो विद्वानेकोद्दिष्टस्य केतनम् ।
त्र्यहं न कीर्त्तयेद् ब्रह्म राज्ञो राहोश्च सूतके ॥ इति ।

960- तिथितत्त्वे (पृ-159) रघुनन्दन आह यथा—अत्रानध्यायोऽपि न दृष्टोपरागमात्रविषयः । त्र्यहं न कीर्त्तयेत्........इति मनुवचने सामान्यतो निषेधात् । इति ।

प्रस्तास्तपर इति विज्ञानगिरिः ।[961]

गारुडे[962]—सूर्यग्रहः सूर्यवारे सोमे सोमग्रहस्तथा ।
चूडामणिरयं योगस्तत्रानन्तफलं स्मृतम् ॥

बृहद्वसिष्ठः[963]—सङ्क्रमे ग्रहणे चैव न स्नायाद्यदि मानवः ।
सप्तजन्मसु कुष्ठी स्याद् :खभागी च सर्वदा ॥

गर्गः[964]— यस्मिंस्तु जन्मनक्षत्रे ग्रस्येते विधुभास्करौ ।
तज्जातानां भवेत् पीडा ये नरा शान्तिवर्जिताः ॥
"ताम्रपात्रं तिलैः पूर्णं पूर्णं वा गव्यसर्पिषा ।
भास्करग्रहणे दद्यान्नाडीदोषोपपीडितः ॥

घृतकुम्भोपरि निहितं खड्गं नवनीतपूरितं दद्यात् । नाड्यादिदोषशान्त्यै द्विजाय दोषाकरग्रहणे[965] ।" नाडी नक्षत्राणि आद्यदशत्रोडशत्रयोविंशतयः ।

दीपिकायाम्[966]—अनिष्टे त्रिविधोत्पाते सिंहिकासूनुदर्शने ।
सप्तरात्रं न कुर्वीत यात्रोद्वाहादिमङ्गलम् ॥

भोजश्च[967]—एकरात्रं परित्यज्य कुर्यात् पाणिग्रहं ग्रहे ।
प्रयाणे पञ्चरात्रं तु त्रिरात्रं व्रतबन्धने ॥

व्रतबन्धने उपनयने । दीपिकाभोजवाक्ययोर्देशभेदाचारविकल्पः ।[968]
चन्द्रसूर्यग्रहे चैव रजोदोषो न विद्यते ।

इति परिशिष्टात्[969] वक्ष्यमाणद्विमासत्रिदिनरजोदोषाभावः । स्नानमन्त्रो यथा—

961- 'अष्टम्यां राहुसूतके' इति याज्ञवल्क्यवचनं (1/146) विचारयन् मिताक्षराकारो विज्ञानेश्वर आह यथा— यत्तु 'ग्रहं न कीर्त्तयेद् ब्रह्म राज्ञो-राहोश्च सूतके ।' इति तद् प्रस्तास्तविषयम् । इति ।

962- कृत्यतत्त्वार्णवे (पृ-80) उत्तरार्द्धपाठो यथा—
चूडामणिरिति ख्यातस्तदा योगः प्रकीर्त्तितः । इति ।

963- वीरमित्रोदयसमयप्रकाशे (पृ-109) सर्वदा-स्थाने जायते-पाठः ।

964- तिथितत्त्वे (पृ-157) । 965- तत्रैव (पृ 158) ज्योतिषवचनमेतत् ।

966- श्रीनिवासदीपिकायां पञ्चमाध्याये चतुर्थश्लोकपाठः ।

967- तिथितत्त्वे (पृ-162) ।

968- अस्मदुत्कलेषु श्रीनिवासदीपिकोक्तव्यवस्था पाल्यते ।

स्वस्थानं गम्यतां राहो त्यज्यतां चन्द्रसङ्गमः ।
कर्मचण्डालयोने स्वं मम पापक्षयं कुरु ॥

सूर्यग्रहे चन्द्रस्थाने सूर्योहः । समुद्रगङ्गादितीर्थेषु तत्तत्तीर्थमन्त्ररहितोऽयं ग्रहणमन्त्रः पाठ्य इति वाजपेयिनः[970] । तत्तत्तीर्थमन्त्रसहकृत इति स्मार्त्त-भट्टाचार्याः[971] ।

श्वेते क्षेमसुभिक्षं ब्राह्मणपीडां विनिर्दिशेद्राहुः ।
अग्निभयमनलवर्णे पीडा च हुताशवृत्तीनाम् ॥
हरिते रोगानुतापः सस्यानामीतिभिश्च विध्वंसः ।
कपिले शीघ्रगत्वम्लेच्छध्वंसोऽथ दुर्भिक्षम् ॥

इत्यादि राहुशुभाशुभानि कृत्यचिन्तामण्यद्भुतसागरादौ[972] द्रष्टव्यानि ।

रविसङ्क्रान्तिः

ज्योतिषे[973]—मृगकर्कटसङ्क्रान्ती द्वे तूदग्दक्षिणायने ।
विषुवती तुलामेषे विष्णुपद्यस्थिरात्मके ॥
षडशीतिर्द्विशरीरे द्वादशैवं प्रकीर्त्तिताः ॥

मृगो मकरः । स्थिरा वृषसिंहवृश्चिककुम्भाः । द्विशरीरा मिथुनकन्या-धनुर्मीनाः ।

त्रुटेः सहस्रभागो यः स कालो रविसङ्क्रमे ॥[974]
सङ्क्रान्तिसमयः सूक्ष्मो दुर्लक्ष्यः पिशितेक्षणैः ।

969- मुद्रितछन्दोगपरिशिष्टे (10/7) सम्पूर्णवचनं यथा—
उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च ।
चन्द्रसूर्यग्रहे चैव रजोदोषो न विद्यते ॥ इति ।

970- नरसिंहवाजपेयी नित्याचारप्रदीपे (भागः-II, पृ-688) कथयति यथा—तीर्थस्नाने तीर्थस्नानमन्त्रं बाधित्वा अस्य निवेशः वैश्यादिनिमित्त-पाश्वद्दश्यवन्नैमित्तिकत्वान्निरवकाशत्वाच्च । इति ।

971- रघुनन्दनभट्टाचार्यः तिथितत्त्वे ग्रहणप्रकरणे तीर्थस्नानमन्त्रेण सह ग्रहणस्नानमन्त्र पठति ।

972- तिथितत्त्वे (पृ-151) । 973 नित्याचारप्रदीपे (भागः II-पृ 678) ।

974- सङ्क्रान्तिकालस्यातिसूक्ष्मत्वमालोच्यते देवीपुराणे (24/24-25)यथा—

तद्योगादप्यधश्चोर्द्ध्वं त्रिंशन्नाड्यः प्रकीर्त्तिताः ॥[975]

इमे षष्टिदण्डा अहोरात्रसाध्योपवासपरास्तैलस्त्रीमांसवर्जनविषयाश्चेति कौमुदीकारादयः[976] । बृहद्वसिष्ठः[977]—

अतीतानागते पुण्ये द्वे तूदग्दक्षिणायने ।
त्रिंशत् कर्कटके नाड्यो मकरे विंशतिः पराः ॥
वर्त्तमाने तुलामेषे नाड्यस्तूभयतो दश ॥[978]

उभयतो मेषतुलयोः ।

पुण्यायां विष्णुपद्याञ्च प्राक् पश्चादपि षोडश ।
षडशीत्यामतीतायां षष्टिरुक्ताश्च नाडिकाः ॥[979]
अह्नि सङ्क्रमणे पुण्यमहः कृत्स्नं प्रकीर्त्तितम् ।[980]
अर्द्धरात्रे त्वसम्पूर्णे दिवा पुण्यमनागतम् ।[981]

स्वस्थे नरे सुखासीने यावत् स्पन्दति लोचनम् ।
तस्य त्रिंशत्तमो भागस्तत्परः परिकीर्त्तितः ॥
तत्पराच्छतभागस्तु त्रुटिरित्यभिधीयते ।
त्रुटेः सहस्रभागो यः स कालो रविसङ्क्रमे ॥ इति ।

975- कालमाधवे (पृ 273) देवलवचनमेतत् ।

976- कृत्यकौमुद्यां (पृ-256) ग्रन्थकर्त्रा बृहस्पतिनोक्तं यथा—एतेन निरामिषभोजनमैथुनवर्जनदानोपवासादिकं प्रतिसङ्क्रान्तिसमयोपलक्षिताहोरात्रसम्बन्धिन्यः षष्टिनाड्यः पर्वकाल इत्युक्तम् । इति ।

977-कालमाधवे (पृ-273) वृद्धवसिष्ठवचनेऽस्मिन् परा स्थाने स्मृता-पाठः ।

978- तत्रैव (पृ-274) बृहस्पतिवचनेऽस्मिन् पूर्वार्द्धपाठो यथा—

अयने त्रिंशतिः पूर्वा मकरे विंशतिः पराः । इति ।

कृत्यकौमुद्यां (पृ-256) तु 'त्रिंशत्कर्कटके नाड्य' इति देवलशातातपोक्तवचने अस्मिन् प्रथमपादपाठः ।

979- कालमाधवे (पृ-274) वृद्धवसिष्ठवचनमेतत् ।

980- रात्रौ सङ्क्रमणे भानोर्दिनार्द्धं स्नानदानयोः ।

इति तत्रैव (पृ-274) वृद्धवसिष्ठवचने उत्तरार्द्धपाठः ।

981- तत्रैव (पृ.पृ-276-277) देवीपुराणीयं सम्पूर्णवचनं यथा—

असम्पूर्णेऽर्द्धरात्रे तु उदयेऽस्तमयेऽपि च ।
मानार्द्धं भास्करे पुण्यमपूर्णे शर्वरीदले ॥

द्विवेत्युक्तविशेषमाह—

अर्द्धरात्रादधस्तस्मिन् मध्याह्नस्योपरि क्रिया ।
उर्द्ध्वं सङ्क्रमणे भानोरुदयात् प्रहरद्वयम् ।।[982]

मध्याह्नस्येत्यत्र पूर्वदिवसस्येति शेषः । अनागतेति पूर्वसाम्यात् ।

सम्पूर्णे चेदर्द्धरात्रे रविसङ्क्रमणं भवेत् ।
प्राहुर्दिनद्वयं पुण्यं मुक्त्वा मकरकर्कटौ ।।
आदौ पुण्यं विजानीयाद् यद्यभिन्ना तिथिर्भवेत् ।।[983]

सङ्क्रान्तिकालीनतिथेः सङ्क्रमपूर्वदिनमात्रगामित्वे पूर्वदिनमध्याह्नोर्ध्वयामद्वयं पुण्यकालः । एवं शेषात् सङ्क्रान्तिकालीनतिथेरुत्तरदिनमात्रगामित्वे उत्तरदिने पुण्यकाल उदयान्मध्याह्नावधिकः । एवं तादृशतिथेः पूर्वपरोभयदिनगामित्वे पूर्वेद्युर्मध्याह्नादूर्ध्वं पुण्यकालः । आदौ पुण्यमिति वचनस्य दिनद्वयव्यापितिथिकेऽपि पूर्वदिनतात्पर्यकत्वात् । अर्धरात्रश्च रात्रेर्मध्यममुहूर्त्तमष्टमरूपमिति रघुनन्दनः[984] । इयं रीतिः सर्वसङ्क्रान्तिसाधारणीति कल्पतरुकाराः[985] । माधवकालादर्शादयस्तु[986] मुक्त्वा मकरकर्कटावित्युक्तेः तयोर्भेदमूचुः । तथा हि भविष्योत्तरे—

अर्द्धरात्रे त्वसम्पूर्णे दिवा पुण्यमनागतम् ।
सम्पूर्णे उभयोर्ज्ञेयमतिरिक्ते परेऽहनि ।। इति ।

982- तत्रैव (पृ-274) वृद्धवसिष्ठवचनेऽस्मिन् भानोः-स्थाने चोर्ध्वं-पाठः ।

983- नित्याचारप्रदीपे (भागः-II-पृ.पृ-679-680) ।

984- तिथितत्त्वे (पृ 141) रघुनन्दन आह यथा—रात्रिमध्यदण्डद्वयात्मकार्द्धरात्रं सङ्क्रान्तावुदयेऽस्तमयेऽपि वेत्यनेनोदयोपक्रममस्तमयान्तश्च मानार्द्धं पुण्यम् । इति ।

985- कृत्यकल्पतरौ नियतकालकाण्डे (पृ-364) सङ्क्रान्तिपुण्यकाल आलोच्यते लक्ष्मीधरेण यथा—रात्रौ द्वादशस्वपि रविसङ्क्रान्तिष्वर्द्धरात्रादर्वाक् सङ्क्रमणे पूर्वदिनोत्तरार्द्धं पुण्यम् । सम्पूर्णे त्वर्द्धरात्रे पूर्वदिनस्योत्तरार्द्धमुत्तरदिनस्य पूर्वमर्द्धं पुण्यम् । अर्द्धरात्रादनन्तरं तूत्तरदिनस्य पूर्वमर्द्धं पुण्यम् । 'षडशीतिमुखेऽतीते' इत्यादि तु पारिशेष्याद्दिनसङ्क्रान्तिविषयम् । उभयतः पञ्चदशषोडशनाडीनां पुण्यत्वमपि दिनसम्बन्धिविष्णुपदीमात्रविषयं पारिशेष्यात् । आदावित्यादि आदौ पूर्वदिन एव । अभिन्ना पूर्वदिने सङ्क्रान्ति-

अस्तं गते यदा सूर्ये त्वृक्षं सङ्क्रमते रविः ।
प्रदोषे वाऽर्धरात्रे वा तदा पुण्यं दिनान्तरम् ॥[987]

दिनान्तरं परदिनस्यादिमं यामद्वयम् ।

कार्मुकं तु परित्यज्य झषं सङ्क्रमते रविः ।
प्रदोषे वाऽर्धरात्रे वा स्नानदाने परेऽहनि ॥
अर्धरात्रे तदूर्ध्वं वा सङ्क्रान्तौ दक्षिणायने ।
पूर्वमेव दिनं ग्राह्यं यावन्नोदयते रविः ॥
मिथुनात् कर्कसङ्क्रान्तिर्यदि स्यादंशुमालिनः ।
प्रभाते वा निशीथे वा कुर्यादहनि पूर्वतः ॥[988]
प्रदोषे कर्कटं भानुः प्रदोषे मकरं यदि ।
सङ्क्रमेत् षष्टिनाड्यस्तु पुण्याः पूर्वोत्तराः स्मृताः ॥ इत्यादि ।

सिंहवाजपेयिभि[989]रपीदृशविशेषवाक्यानि लक्ष्मीधरालिखितत्वेऽपि बहुविद्वत्स्मार्त्तोपन्यासात् प्रमाणमेवेत्युक्तम् । तथापीदृशभिन्नाचारस्याकरालभयत्वेन सर्वत्रैकरूप्यमाश्रयन्ति बहवः ।

काले चैकैव । एतेनार्द्धरात्रिसङ्क्रमणे यदुभयतः पुण्यकथनं तद् भिन्नतिथिविषयम् । 'अर्द्धरात्रे व्यतीते तु' पूर्वेणाहा तिथ्यभेदेऽपि परस्यैव पूर्वमर्द्धं पुण्यमिति तात्पर्यार्थः । इति ।

986- द्रष्टव्यं कालमाधवे सङ्क्रान्तिप्रकरणे (पृ पृ-278-279) ।

987- कृत्यकौमुद्याम् (पृ-259) अनुरूपं ज्योतिःशास्त्रवचनं यथा—

अस्तं गते यदा सूर्ये झषं याति दिवाकरः ।
उदये चार्द्धरात्रे वा तदा पुण्यं दिनान्तरम् ॥ इति ।

988- कालमाधवे (पृ-279) प्रथमतृतीयश्लोकद्वयं भविष्योत्तरीयम् । मध्यश्लोकः वृद्धगार्ग्यस्य ।

989- नित्याचारप्रदीपे (भागः-II-पृ-680) नरसिंहवाजपेयी कथयति यथा—एतच्च यद्यपि कल्पतरुकारेण न लिखितं तथापि प्रामाणिकबहुनिबन्धलिखितत्वेन सर्ववैदिकदेशपरिगृहीतत्वेन च निःसन्दिग्धत्वादेतद् विरुद्ध आचारो नादरणीयः । इति ।

अर्धरात्रे कलाधिक्ये यदा सङ्क्रमते रविः ।
तदोत्तरं दिनं ग्राह्यं स्नानदानजपादिषु ॥

कलाधिक्येऽर्धरात्रानन्तरमित्यर्थः । अत एव सुप्रकाशे 'सम्पूर्णे चेदर्धरात्रे' इति वाक्यं द्वादशसङ्क्रान्तिसाधारण्येनोट्टङ्क्य मृगकर्कटयोर्भेदो नोक्तः । श्राद्धस्यापि दानरूपत्वात् परेद्युर्विधानम् । इयं देवीपुराणे[990] सप्तधोदिता—

मन्दा मन्दाकिनी ध्वाङ्क्षी घोरा चैव महोदरी ।
राक्षसी मिश्रिता प्रोक्ता सङ्क्रान्तिः सप्तधा नृप ! ॥
मन्दा ध्रुवेषु विज्ञेया मृदौ मन्दाकिनी स्मृता ।
क्षिप्रे ध्वांक्षीं विजानीयादुग्रे घोरा प्रकीर्त्तिता ॥
चरे महोदरी ज्ञेया क्रूरैर्ऋक्षैश्च राक्षसी ।
मिश्रिता चैव विज्ञेया मिश्रऋक्षैस्तु सङ्क्रमे ॥
त्रिचतुःपञ्चसप्ताष्ट नव द्वादश एव च ।
क्रमेण घटिकास्त्वेतास्तु पुण्यं पारमार्थिकम् ॥

इदमाकूतम् । अह्नि सङ्क्रमणे यद्यपि कृत्स्नदिनस्य पुण्यत्वमुक्तमेवम्

षडशीतिमुखेऽतीते वृत्ते च विषुवद्वये ।
भविष्यत्ययने पुण्यमतीते चोत्तरायणे ॥[991]

इत्यादौ वैलक्षण्यं प्रतीयते, तथापि

अह्नि सङ्क्रमणे पुण्यमहः सर्वं प्रकीर्त्तितम् ।
षडशीतिमुखे........... ॥

इत्याद्युक्तं पुण्यतरम् । मन्दामन्दाकिनीत्यादिनिरुक्ताश्चतुर्नाड्यः पुण्यतमा इति फलतारतम्यान्नानुपपत्तिः । एवं मकरे विंशतिः परा ।

पुण्यायां विष्णुपद्याञ्च प्राक् पश्चादपि षोडश ।

इत्यपि फलन्यूनाधिक्यमूहनीयम् । ध्रुवादिगणा यथा दीपिकायाम्[992]—

990- मुद्रितदेवीपुराणे (24/2-6) मिश्रऋक्षैः स्थाने मिश्रितर्क्षैः-पाठः । कालमाधवे (पृ-279) त्रिचतुः स्थाने द्विचतुः-इति धृतःपाठः ।
991- देवीपुराणे—24/16 ।
992-श्रीनिवासदीपिकायां चतुर्थाध्याये (पृ 66) शुभकराः-स्थाने शुभफलाः ।

उग्रः पूर्वमघान्तका ध्रुवगणस्त्रीण्युत्तराणि स्वभु-
र्वाणादित्यहरित्रयं चरगणः पुष्याश्विहस्ता लघुः ।
चित्राग्नित्रमृगान्त्यभं मृदुगणस्तीक्ष्णेऽहिरुद्रेन्द्रयुङ्-
मिश्रेऽग्निः सविशाखवः शुभकराः सर्वे स्वकृत्ये गणाः ॥

सङ्क्रमदिनान्येकोनत्रिंशत्त आरभ्य त्रयत्रिंशदवधिनी । तत्प्रकारश्च 'यां तिथिं समनुप्राप्येत्यादि वत्सरे निरुक्तः । ब्राह्मे[993]—

शुक्लपक्षे तु सप्तम्यां यदा सङ्क्रमते रविः ।
महाजया तदा प्रोक्ता सप्तमी भास्करप्रिया ॥
स्नानं दानं जपो होमः पितृदेवाभिपूजनम् ।
सर्वं कोटिगुणं प्रोक्तं तपनेन महौजसा ॥

मात्स्ये[994]—अयने कोटिगुणितं लक्ष्यं विष्णुपदीषु च ।
षडशीतिसहस्रं तु षडशित्यामुदाहृतम् ॥

देवीपुराणे—रविसङ्क्रमणे पुण्ये न स्नायाद्यदि मानवः ।
जन्मजन्मन्यसौ दुःखी निर्धनश्चापि जायते ॥[995]
"नाडीनक्षत्रदिवसे रविभौमशनैश्चराः ।
सङ्क्रान्तिं यस्य कुर्वन्ति तस्य क्लेशोऽभिजायते ॥
गोमुत्रसर्षपैः स्नानं गुरुविप्रसुरार्चनम् ।
विशुद्धकाञ्चनं दद्यान्नाडीदोषोपशान्तये ॥"[996]

नाडी नक्षत्राण्याद्या दश षोडशाष्टादश त्रयोविंशतयः ।

किञ्च, घुस्तूरबीजसलिलैः स्नायात् सङ्क्रान्तिशान्तये ॥

993- मुद्रितब्रह्मपुराणे वचनमिदं नोपलभ्यते । किन्तु कृत्यकल्पतरौ नियतकालकाण्डे (पृ.पृ-367-368) पठ्यते ।

994- मुद्रितमत्स्यपुराणे वचनमिदं नास्ति । राजमार्त्तण्डे (पृ-130) द्वितीयपादे 'विष्णुपदीफलम्' इति पाठः ।

995- कालमाधवे (पृ-273) शातातपवचनेऽस्मिन् द्वितीयार्द्धपाठो यथा—
सप्तजन्मसु रोगी स्याद् दुःखभागीह जायते । इति ।

996- श्रीनिवासदीपिकायां तृतीयाध्याये (श्लोको-16, 17) (पृ-55) ।

यदा हि मेषसङ्क्रान्तिस्तुलासङ्क्रमणं निशि ।
तदा प्रजा विवर्धन्ते धनधान्यसमृद्धिभिः ॥
चतुष्पाद्भिष्टिर्वाणिज्ये यदा सङ्क्रमते रविः ।
दुर्भिक्षं राजसन्तापो दम्पत्योः शत्रुता भवेत् ॥
कुजार्कशनिवारेण महासङ्क्रमणं यदा ।
तदा भवेत् प्रजानाशो दुर्भिक्षादिभयं महत् ॥
शरत्सु विषुवे रात्रौ वसन्ते दिवसो यदा ।
उभयोः शस्यवृद्धिः स्याद्विपरीते विपर्ययः ॥

विष्णुपुराणे[997]—"चतुर्दश्यष्टमी चैव अमावास्या च पूर्णिमा ।
पर्वाण्येतानि राजेन्द्र ! रविसङ्क्रान्तिरेव च ॥
तैलस्त्रीमांसभोगी च सर्वेष्वेतेषु वै पुमान् ।
विण्मूत्रभोजनं नाम प्रयाति नरकं मृतः ॥"
निरंशं दिवशं विष्टिं व्यतीपातञ्च वैधृतिम् ।
केन्द्रञ्चापि शुभैःशून्यं पापाहमपि वर्जयेत् ॥[998]

निरंशं सङ्क्रान्तिदिनम् । मासान्तस्य केषाञ्चिन्निरंशत्वनिर्णयो भ्रमकृतः । मतान्तरे मासान्ते यात्रानिषेधः । सङ्क्रमदण्डसाधनं यथा—

दिनद्वयं स्फुटं कुर्यादन्तरं हार उच्यते ।
ऊनांशलिप्तां षष्ठीघ्नीं तेन हारेण हारयेत् ॥

सङ्क्रान्तिपुरुषो यथा[999]—

सङ्क्रान्त्येको मुखे भुङ्क्ते लाभश्चत्वारि दर्शिणे ।
पादयोर्भ्रमणे द्वे द्वे पञ्च कुक्षौ शुभावहा ॥
पञ्च वामकरे बन्धः प्रीतश्चत्वारि नेत्रयोः ।
ललाटे विजयस्त्रीणि गुह्येष्वेको महद् भयम् ॥

अत्रोपवासनिषेधः सपुत्रस्येति सर्वमुक्तम् ।

997-मुद्रितविष्णुपुराणे (3/11/116-117) 'अमावास्या च'-स्थाने 'तथाऽमा चाथ', 'भोगी च'-स्थाने 'सम्भोगी'-इति पाठः ।
998- श्रीनिवासदीपिकायाम् (5/2) । 999- तत्रैव (3/23-24) ।

पृथ्वीरजस्वला

वृषान्ते मिथुनस्यादौ तन्मध्येऽपि दिनत्रयम् ।
रजस्वला स्यात् पृथिवी कृषिकर्म विगर्हितम् ॥[1000]

मिथुनादिदिनं मध्यं यस्य, ईदृशे दिनत्रये । अत्र सप्तम्यां प्रथमा । तेन विशेषणविशेष्ययोः समविभक्तिकत्वमिति नियमदार्ढ्यम् । एतत्समासेन तृतीयवत् प्रथमदिनप्राप्तावपि वृषान्तपुनरुक्तिगुरुदोषत्वेन सर्वथा त्यागसूचिका । सपूर्वोत्तरो मिथुनसङ्क्रम इति त्रिदिनमित्यर्थः । कृषीतिस्तम्भचूल्ल्यादिखातोपलक्षणम् । वैधखननं तु स्यादेव लौकिकदोषसंयोगादित्यधिकरणन्यायात् । द्वादशाहसत्त्रे ब्रह्मचारिणां मध्यखननत्वपुरुषार्थेन क्रत्वर्थावधाच्च ।

नदीरजस्वला

परिशिष्टे[1001]—यव्यद्वयं श्रावणादि सर्वा नद्यो रजस्वलाः ।
तासु स्नानं न कुर्वीत वर्जयित्वा समुद्रगाः ॥

समुद्रगाः साक्षात्समुद्रप्रविष्टाः । अन्यथा परम्परया सर्वासां समुद्रगामित्वेनाव्यवर्त्तकत्वम् । यव्यो मासः ।

उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च ।
चन्द्रसूर्यग्रहे चैव रजोदोषो न विद्यते ॥

निगमः[1002]—अभावे कूपवापीनामन्येनापि समुद्धृते ।
रजोदुष्टेऽपि पयसि ग्रामभोगो न दुष्यति ॥

अन्येन घटादिना । नदीलक्षणं तु[1003]—

धनुःसहस्राण्यष्टौ च गतिर्यासां न विद्यते ।
न ता नदीशब्दवहाः गर्तास्ताः परिकीर्त्तिताः ॥

धनुःप्रमाणं यथा—

1000- शतानन्दवचनमेतत् कालसारे (पृ-451) ।

1001- छन्दोगपरिशिष्टे—10/5 । वेङ्कटेश्वरप्रेसप्रकाशने तु यव्य-स्थाने मास-पाठः ।

1002- तिथितत्त्वे (पृ-153) । 1003-छन्दोगपरिशिष्टे—10/6 ।

चतुर्विंशाङ्गुलो हस्तस्तच्चतुष्कं धनुः स्मृतम् ।

क्रोशो धनुःसहस्रे द्वे गव्यूतिस्तद् द्वयं स्मृतम् ॥

यवोदरैरङ्गुलमष्टसङ्ख्यैः क्रोशो धनुःसहस्रकः ।

इति विष्णुधर्मोत्तरपाठस्तु न बहुसम्मतः ।

हस्तैश्चतुर्भिर्भवतीह दण्डः क्रोशः सहस्रद्वितयेन तेषाम् ।

इति लीलावतीविरोधात्[1004] ।

आदौ कर्कटके नद्यः सर्वा एव रजस्वलाः ।

त्रिदिनं तु चतुर्थेऽह्नि शुद्धाः स्युर्जाह्नवी यथा ॥[1005]

कर्कटसङ्क्रममारभ्य त्रीणि दिनानीत्यर्थः । गङ्गाया दृष्टान्तत्वं तद्रजोविरहार्थकम् ।

विमलाः कुमुदिनीव तारकाः शरदागमे ।

इत्यादिवदत्रोपमानस्यापि प्रकृतत्वात् । इदमपि विकल्पितमिति विद्याकरः । शेषात् समुद्रगापरमित्यन्ये । देवलः[1006] —

गङ्गा च यमुना चैव प्लक्षजाता सरस्वती ।

रजसा नाभिभूयन्ते ये चान्ये नदसञ्ज्ञकाः ॥

नद्यः प्राक्स्रोतसः प्रत्यक्स्रोतसस्तु नदा मताः ॥

कुरुक्षेत्रगता सरस्वती प्लक्षजाता ।

1004- लीलावत्यां परिभाषाऽध्याये मागदैर्घ्यमानपरिभाषायां (श्लोकौ-5,6) भास्कराचार्येण कथ्यते यथा—

यवोदरैरङ्गुलमष्टसङ्ख्यैर्हस्तोऽङ्गुलैः षड्गुणितैश्चतुर्भिः ।

हस्तैश्चतुर्भिर्भवतीह दण्डः क्रोशः सहस्रद्वितयेन तेषाम् ॥

स्याद्योजनं क्रोशचतुष्टयेन तथा कराणां दशकेन वंशः ।

निवर्त्तनं विंशतिवंशसङ्ख्यैः क्षेत्रं चतुर्भिश्च भुजैर्निबद्धम् ॥ इति ।

1005- निर्णयसिन्धौ (पृ 86) भविष्यवचनेऽस्मिन् पूर्वार्द्धे

आदौ तु कर्कटे देवि ! महानद्यो रजस्वलाः । इति पाठः ।

1006- तत्रैव (पृ-86) तिथितत्त्वे च "नद्यः प्राक्स्रोतसः" इत्यर्द्धं विना, "पावनाः परिकीर्त्तिताः" इति चान्तिमपादे पठ्यते ।

शोणः सिन्धुर्हिरण्याख्यः कोक-लौहित्य-घर्घराः ।

शतद्रुश्च नदाः सप्त पावना ब्रह्मणः सुताः ॥

अगस्त्यार्घ्यः

वैवर्त्ते— अप्राप्ते भास्करे कन्यां सत्रिभागैस्त्रिभिर्दिनैः ।

अर्घ्यं दद्युरगस्त्याय ते वसन्ति महोदये ॥[1007]

कन्यामप्राप्ते सिंहमासे । सिंहस्य तृतीयभागोऽन्त्यदशदिनानि । तत्सहितैस्त्रिभिस्त्रयोदशदिनैरित्यर्थः ।

भीमपराक्रमे—यस्तु भाद्रपदस्यान्ते उदिते कलशोद्भवे ।

अर्घ्यं दद्यादगस्त्याय सर्वान् कामांल्लभेन्नरः ॥

ततः नारसिंहे—गङ्गातोयं विनिक्षिप्य सितपुष्पाक्षतैर्युतम् ।

मन्त्रेणानेन वै दद्याद्दक्षिणाभिमुखः स्थितः ॥

अगस्त्यस्य दक्षिणदिग्गतत्वादर्घ्यदाने दक्षिणामुखत्वम् ।

आग्नेये— सप्तधान्यभृतं पात्रं दधिचन्दनसंयुतम् ।

अर्घ्यं दद्यादगस्त्याय स्त्रीशूद्राणामवैदिकम् ॥

राजपत्नि ! नमस्तुभ्यं मुनिपत्नि ! नमोऽस्तु ते ।

अर्घ्यं गृहीष्व देवेशि ! लोपामुद्रे ! मनस्विनि ! ॥

इति मन्त्रेण लोपामुद्रायै अर्घ्यदानम् । अगस्त्यमन्त्रो यथा—

काशपुष्पप्रतीकाश ! अग्निमारुतसम्भव !

मित्रावरुणयोः पुत्र ! कुम्भयोने ! नमोऽस्तु ते ॥

प्रार्थनञ्च[1008] —आतापी भक्षितो येन वातापी च महासुरः ।

समुद्रः शोषितो येन स मेऽगस्त्यः प्रसीदतु ॥

अगस्त्याय नम इत्यर्घ्यदानम् । अन्यत्र—

कन्यायामगते सूर्ये पूज्यो वै सप्तमे दिने ।

सिंहार्द्धोपगते सूर्ये कुम्भयोन्यर्घ्य इष्यते ॥

1007- कृत्यकौमुद्यां (पृ-98) विष्णुरहस्यवचनमेतत् ।

1008- नरसिंहपुराणे—68/14, गरुडपुराणे—1/116/5 ।

अगस्त्येनार्चितः पूर्वं ददौ तस्मै वरं हरिः ।
ये त्वां तत्रोदितं भक्त्या नार्चयिष्यन्ति मानवाः ।
तेषां संवत्सरं पुण्यं मत्प्रसादाद्भवेत्तव ॥
वेदवेदाङ्गविद्वांसो धनधान्यप्रजान्विताः ।
वारुण ! ते भविष्यन्ति लोकेऽस्मिन्नर्घ्यदास्तव ॥

अतो नित्यकाम्यमिदम् । सप्तमीदिने भाद्रशुक्लसप्तम्याम् । अगस्त्यस्य महावैष्णवत्वादनया रीत्याऽर्घ्यदानं वैष्णवानामपि सममिति केचित् ।

मकरसङ्क्रान्तौ घृतकम्बलदानम्

आलिङ्गवेदिपर्यन्तं यो दद्याद् घृतकम्बलम् ।
जागरं नृत्यगीताद्यैः सकृत् कृत्वा च पर्वणि ।
मन्वन्तरसहस्राणि शिवलोके महीयते ॥[1009]

पर्वणि मकरसङ्क्रमे ।

अथ योगाः

शतानन्दः[1010]—चैत्री चेत् चित्रायुक्ता स्यात्तस्यां पूर्णिमायां चित्रवस्त्रदानेन सौभाग्यमाप्नोति ।

महावैशाखी

[1011] मेषेऽर्के कार्मुके जीवे मकरस्थेऽथवा द्विजे ।
पूर्णिमा रविवारेण तुलास्थे च शनैश्चरे ॥
वरीयो-योगयुक्तेन विशाखर्क्षे यदा शशी ।
महाशब्दा तदा ज्ञेया कोटिसूर्यग्रहाधिका ॥
कोटिजन्मकृतं पापं दृष्ट्वा श्रीपुरुषोत्तमम् ।
महावैशाख्यां मुञ्चन्ति स्नानं कृत्वा महोदधौ ॥

1009- स्मृतिसारसङ्ग्रहे (पृ-72) विष्णुधर्मोत्तरवचनेऽस्मिन् 'सत्कृत्य तत्र पर्वणि' इति मध्यपाठः ।

1010- स्मृतिसारसङ्ग्रहे (पृ-95) 'पूर्णिमायां' इति पदं नास्ति ।

1011- कृत्यकौमुद्यां (पृ-166) स्कन्दपुराणवचनमेतत् ।

यत्तु मेषेऽर्के इति स्वातीविशाखानुराधान्यतमग एवायं चन्द्रे योगः स्यादिति स्मृतिसार[1012] उक्तं तदसत् । स्वात्यृक्षस्य वैशाखपूर्णिमायामपतनात् । तत्पूर्णिमायां चन्द्रस्य तदन्यतमगतित्वेन व्यावृत्तिप्रसिद्धौ स्वरूपकीर्त्तनस्य स्पष्टत्वेनायुक्तत्वाच्च । पुरुषोत्तममित्युक्त्या पुरुषोत्तमक्षेत्रीयसमुद्र एवेदं स्नानं फलप्रदम्, न त्वन्यसागरे । एवमन्यत्र ।

महाव्यतीपातः

गार्ग्यः[1013]—पञ्चाननस्थौ गुरुभूमिपुत्रौ मेषे रविः स्याद्यदि शुक्लपक्षः ।
मासाभिधाना करभेण युक्ता महाव्यतीपात इतीह योगः ॥

पञ्चाननः सिंह । मासाभिधाना द्वादशी । करभो हस्तर्क्षम् ।
अस्मिंस्तु गोभूमिहिरण्यवासोदानेन सर्वं परिहाय पापम् ।
सुरत्वमिन्द्रत्वमनामयत्वं मर्त्याधिपत्यं लभते मनुष्यः ॥[1014]

अत्रापिण्डं[1015] श्राद्धमित्युक्तम् ।

महाज्यैष्ठी[1016]

[1017]ऐन्द्रे गुरुः शशी चैव प्राजापत्यगते रवौ ।
पौर्णमासी गुरौ ज्यैष्ठी महाज्यैष्ठीति सा स्मृता ॥

1012- स्मृतिसारसङ्ग्रहे (पृ.पृ-95-96) विश्वनाथमिश्रेण कथ्यते यथा—ननु यद्यपि मेषार्काभिधानं तथापि भरण्यर्क एष योगोऽयम् । तत्रापि वरीयोयोगसम्भवादित्येके । अपरे तु यावद् यावद् वाचिक इति न्यायात् अश्विनी-भरणी-कृत्तिका-मघापदानामन्यतमार्के इन्दौ स्वातिविशाखानुराधामिश्रो वा योगः । अन्यथा मेषेर्के व्याप्तिर्न स्यादिति शतानन्दः । इति ।

1013- स्मृतिसारसङ्ग्रहे (पृ-96) ।

1014- तत्रैव (पृ-96), कृत्यकौमुद्याम् (पृ-166) ।

1015- अपिण्डश्राद्धप्रमाणं यथा स्मृतिसारसङ्ग्रहे (पृ-96) विष्णुधर्मोत्तरे—
ग्रहणे च व्यतीपाते नवशस्यसमागमे ।
युगादौ षडशीत्याञ्च महाच्छादन एव च ।
नित्यश्राद्धे च सङ्क्रान्त्यामपिण्डश्राद्धमिष्यते ॥

1016- महाज्यैष्ठीस्वरूपं वृहद्धर्मपुराणे (16/27) यथा—
पूर्णिमा ज्येष्ठमासस्य युक्ता चेज्ज्येष्ठया भवेत् ।
महाज्यैष्ठीति विज्ञेया युक्ता चऽप्यनुराधया ।
शनिवारस्य योगस्तु फलाधिक्यात् प्रशस्यते ॥ इति ।

महाज्यैष्ठ्यां तु यो गच्छेत् क्षेत्रं श्रीपुरुषोत्तमम् ।
विश्रम्य विधिवत् स्नायात् प्रतितीर्थेषु वै क्रमात् ॥

अयमुत्तमो योगः । गुरुवाराभावे ततो न्यूनो यथा शङ्करगीतायाम्[1018] —

ज्येष्ठायां गुरुचन्द्रौ च रोहिण्यां स्याद्दिवाकरः ।
पूर्णिमा ज्येष्ठमासस्य महाज्यैष्ठी प्रकीर्त्तिता ॥

प्रकारान्तरं महागार्ग्यः[1019] —

प्राजापत्ये च सौम्येऽर्के ऐन्द्रे शशिगुरू तथा ।
मैत्रे च पूर्णिमा ज्यैष्ठो महाज्यैष्ठीति सोच्यते ॥

अन्यत्र[1020] —वृषे वा मिथुने भानौ जीवचन्द्रे तथेन्द्रभे ।
पौर्णमासी गुरोर्वारे महाज्यैष्ठी प्रकीर्त्तिता ॥

अत्र पञ्चतीर्थान्तर्गतत्वेन समुद्रस्नानप्राप्तिरिति पञ्चानां राजसूयादिवत् समबलत्वम् । तेन स्नानफलं तत्पञ्चकव्यासज्यवृत्तिपञ्चत्वादिवत्, न त्वर्द्धोदयादिवत् समुद्रमात्रप्राधान्यम् । स्मार्त्तभट्टाचार्या[1021] स्त्वत्र हरिदर्शनमात्रमलिखन्न तु पञ्चतीर्थीमपीति । योगोऽयं महतीसोमो गोविन्दद्वादशीतो दशगुणन्यूनस्त्रयोदशन्यूनो वेदश्च वक्ष्यते ।

रोहिणीप्रतिपत्

आग्नेयपुराणे[1022] —"अनुमत्यामतीतायां प्रतिपद्रोहिणी शशी ।
यदा भवति संयोगः कार्त्तिकान्ते विशेषतः ॥
एवं गत्वा विशेषेण गन्तव्यं पुरुषोत्तमम् ।
कोटिसन्निहितं पुण्यं स्नात्वा चैव महोदधौ ॥"

1017-कृत्यकौमुद्यां(पृ-167),नित्याचारप्रदीपे(भागः-II-पृ-693)कौर्ममेतत् ।
1018 स्मृतिसारसङ्ग्रहे (पृ-97) । 1019-तत्रैव (पृ 97) गार्ग्यवचनमिदम् ।
1020-तत्रैव (पृ-97) गार्ग्यवचने प्रथमार्द्धपाठो यथा—
मृगे वा मिथुने नौभे जीवे चन्द्रे तथेन्द्रभे । इति ।
1021-कृत्यतत्त्वे (स्मृ० त०-II-पृ-432) रघुनन्दन आह यथा—
तत्र जगन्नाथदर्शने विष्णुलोकगमनफलम्.... । इत्यादि ।
1022-नित्याचारप्रदीपे (भागः-II-पृ-692) एवं गत्वेतिभागो नास्ति ।

"राका सम्पूर्णचन्द्रा स्यात् कलोनानुमतिः स्मृता ॥
पौर्णमासीदिने दृष्टे शशिन्यनुमतिः स्मृता ।
रात्रिदृष्टे पुनस्तस्मिन सैव राकेति कीर्त्तिता ॥"[1023]
"पूर्वोदिते कलाहीने पौर्णमास्यां निशाकरे ।
पूर्णिमानुमतिर्ज्ञेया पश्चास्तमितभास्करा ॥
यदा त्वस्तमितः सूर्यः पूर्णश्चेन्दुरुपागमत् ।
युगपत् सोत्तरा राका तदा भवति पूर्णिमा ॥"[1024]

कलया भिन्ना षष्टिनाडीभ्यः किञ्चिन्न्यूना चतुर्दशीमिश्रा पूर्णिमाऽनुमतिरिति लक्षणं निवृत्तम्। क्वचिदपि कार्ये तादृशदिनस्य पूर्वांशेऽनुमतित्वं परभागे राकात्वमिति व्यवहारेऽपि सर्वासामनुमतिरेव। पदकरमूर्द्धादौ तत्समुदाये च शरीरत्वकथावत् ।

वृश्चिकस्थे यदा भानुः पक्षादौ च प्रजापतिः ।

1023- पौर्णमास्यमावास्ये प्रत्येकं द्विविधे । तदुक्तं कालमाधवे (पृ-255)—
राका चानुमतिश्चैव पौर्णमासी द्विधा स्मृता ।
सिनीवाली कुहूश्चैवममावास्या द्विधैव तु ॥ इति ।
एतासां चतसृणां स्वरूपं काठकशाखायां विस्पष्ट श्रूयते । यथा—
या पूर्वा पौर्णमासी साऽनुमतिर्योत्तरा सा राका ।
या पूर्वाऽमावास्या सा सिनीवाली योत्तरा सा कुहूः ॥ इति ।
वृद्धवसिष्ठोऽपि (तत्रैव पृ-255)—
राका चानुमतिश्चैव पौर्णमासीद्वयं विदुः ।
राका सम्पूर्णचन्द्रा स्यात् कलोनानुमतिर्मता ॥
पौर्णमासी दिवादृष्टे शशिन्यनुमतिः स्मृता ।
रात्रिदृष्टे पुनस्तस्मिन् सैव राकेति कीर्त्तिता ॥ इति ।
मत्स्यब्रह्माण्डपुराणयोः—
यस्मात्तामनुमन्यन्ते पितरो दैवतैः सह ।
तस्मादनुमतिर्नाम पूर्णिमा प्रथमा स्मृता ॥
अत्यर्थं राजते यस्यां पौर्णमास्यां निशाकरः ।
रञ्जनाच्चैव चन्द्रस्य राकेति कवयो विदुः ॥ इति ।
1024- पश्चादस्तमितार्कका इति कालसारे स्मृत्यन्तरवचनपाठः ।

कोटिसन्निहितं पुण्यं सोमे वा यदि वा रवौ ॥[1025]

इति त्वनुमत्युत्तरप्रतिपदो गुणफलबोधकम् । विध्यन्तरकल्पने गौरवादनाचाराच्च । अन्यथा कोटिसन्निहितमिति नोपपद्येत । अनुमत्युत्तरप्रतिपदः कोटिगुणत्वमित्यर्थात् । मन्त्रो यथा तार्क्ष्यपुराणे—

सरोहिण्यर्कचन्द्राय सश्रिये विष्णवे तथा ।
स्नानं करोमि देवेश ! व्रतं मे सफलं कुरु ॥

पूजाविशेषः स्मृतिसारादावुन्नेयः[1026] ।

महोदध्यमावास्या

कौर्मे[1027]—"मार्गे मासि सिनीवाल्यां सागरे यत्र कुत्रचित् ।
स्नात्वाऽश्वमेधावभृथस्नानस्य लभते फलम् ॥
विशाखायास्तुरीयांशे सचन्द्रे च गते रवौ ।
तथा मैत्रगते भानौ षड्गुणं फलमाप्नुयात् ॥
तथैवैन्द्रगते सूर्ये षड्गुणात् षड्गुणं फलम् ।
सोमवारे विशेषेण साऽक्षयफलदा कुहूः ॥
महाज्यैष्ठ्यां तु यत् पुण्यं तस्यामेव हि तत्समम् ।
तस्यां मोक्षो भवेत् क्षेत्रे देशे श्रीपुरुषोत्तमे ॥
तत्रोषसि समुत्थाय शुचिराचम्य वाग्यतः ।
मनसा केशवं ध्यायन् दक्षिणाभिमुखो व्रजेत् ॥

1025- कृत्यकौमुद्यां (पृ-168) कालसारे च आग्नेयवचनेऽस्मिन् कोटि-स्थाने षष्टि, सोमे-स्थाने भौमे-पाठः ।

1026- पूजाविशेष उक्तः स्मृतिसारसङ्ग्रहे (पृ-103) यथा—अष्टदलपद्मं लिखित्वा अष्टदले पूर्वादितः शश्यादीनभ्यर्च्य पश्चाद् बहिस्तथैव बलभद्रं रोहिणीसहितं कृष्णं रुक्मिणीसहितं वसुदेवं देवकीमनिरुद्धं प्रद्युम्नं गरुडं यशोदां च पूर्वाद्यष्टदिक्षु पूजयित्वा कर्णिकायां च सोमाय सोमेश्वराय इति मन्त्रेण सोमरूपिणं गोविन्दमर्च्चयेत् । इति ।

1027- मुद्रितकूर्मपुराणे नोपलभ्यते । कृत्यकौमुद्यां (पृ.पृ-170-172) तु उद्धृतम् । स्मृतिसारसङ्ग्रहे (पृ.पृ-104-105) च 'दशानामश्वमेधानाम्' इति धृतपाठः ।

सागरे विधिवत् स्नात्वा पुराणपुरुषं स्मरेत् ।
पुनर्मौनं समास्थाय केशवं चिन्तयन् व्रजेत् ॥
पुराणपुरुषेत्युक्त्वा स्फुटार्कमवलोक्य च ।
नमस्कृत्य ततो गच्छेत् प्रासादद्वारदेशतः ॥
प्रासादान्तं परिभ्रम्य पूर्ववत् प्रतिनामभिः ।
प्रविश्य मन्दिरं रामं सुभद्राञ्च सुरारणिम् ॥
कृष्णञ्च पूर्ववज्जप्त्वा प्रणवेन प्रणम्य च ।
सह विष्णुकथाभिश्च त्रिष्णुविष्णिवति वा जपन् ॥
शिरस्यञ्जलिमाधाय कुर्याद्वाचोविसर्जनम् ।
मध्याह्ने च ततः कुर्यात् स्नानदानादिकाः क्रियाः ॥
पूजां होमं तथा श्राद्धमम्भःपानञ्च भोजनम् ।
दशायुताश्वमेधानां कृत्वा फलमवाप्नुयात् ॥"
दृष्टचन्द्राममावास्यां सिनीवालीं प्रचक्ष्यते ।
एतामेव कुहूं प्राहुर्नष्टचन्द्रां महर्षयः ॥[1028]

चतुर्दशीमिश्रा सिनीवाली, प्रतिपन्मिश्रा कुहूरिति फलितार्थः । यत्र कुत्रचिदित्यनेन पुरुषोत्तमसागरे फलाधिक्येऽप्यन्यत्र सागरेऽपि किञ्चित् फलमिति बोध्यम् । रविशशिनोर्वृश्चिकगतयोः सतोरियं मार्गामा महतीसंज्ञां लभत इति प्राचां प्रवादः । यत्तु

वृश्चिकस्थो यदा भानुर्वृश्चिकस्थो यदा शशी ।
अमा वै सोमवारेण सा तिथिर्महती स्मृता ॥

इति वाक्यं परम्परया श्रूयते तच्च कौमुदीस्मृतिसाररघुनन्दनवाजपेय्यादिबहुग्रन्थेष्वनुपलम्भादप्रमाणम् । प्रामाण्यनिर्बन्धे त्वमापदं मार्गदर्शार्थकम् । उत्पत्तिशिष्टवाक्ये मार्गे मासि सिनीवाल्यामित्यस्योपक्रान्तत्वात् । तेन पौषामायां न तच्छङ्का । यत्तु वृश्चिकपदमनुराधावृश्चिकार्थकं, तेन पौषामानिवृत्तिरिति । तदसत् । अधिमासवर्षे सोममार्गामायां ज्येष्ठावृश्चिके महतीयोगभङ्गापत्तेः ।

1028- कालसारे वृद्धवशिष्ठवचनमेतत् ।

तथैवैन्द्रगते सूर्ये षड्गुणात् षड्गुणं फलम् ।[1029]

इत्यधोवाक्यविरोधाच्चेति दिक् ।

अर्द्धोदयामावास्या

भारते[1030] —अमार्कपातश्रवणैर्युक्ता चेत् पुष्यमाघयोः ।
अर्द्धोदयः स विज्ञेयः कोट्यर्कग्रहसन्निभः ॥
तस्मिन् काले तु राजेन्द्र ! गन्तव्यं पुरुषोत्तमम् ।
सागरे विधिवत् स्नात्वा दृष्ट्वा नारायणं प्रभुम् ॥
कोटिजन्मार्जितं पापं नाशयेत्तत्क्षणाद् ध्रुवम् ।
स्नानं दानं तथा जप्यमक्षय्यफलभाग्भवेत् ॥

स्कान्दे[1031] —दिवैव योगः शस्तोऽयं न तु रात्रौ षडानन ! ।

तेन महतीगोविन्दद्वादश्यर्द्धोदयादिसमुद्रयोगा रात्रौ सन्ध्यायाञ्च निषिद्धाः । वारुण्यादिगङ्गायोगस्तु दिवावद्रात्रावपि सम इति वक्ष्यते ।

मन्त्रो यथा—अर्द्धोदये तिथावब्धौ स्नानमद्य करोम्यहम् ।
पापं मे हर देवेश ! क्रोडरूपि जनार्द्दन ! ॥

पापनाशिन्येकादशी

[1032] पुनर्वसौ देवगुरौ निशाकरे निशेशवारेऽमरपूज्यकेऽथवा ।
कुम्भे गुरौ मत्स्यगते बृहस्पतावेकादशी स्यात् खलु पापनाशिनी ॥

1029- कालसारे महोदध्यमावास्याप्रकरणे सम्पूर्णं कौर्मवचनं यथा—
विशाखायास्तृतीयांशे सचन्द्रे च गते रवौ ।
तथा मैत्रगते भानौ षड्गुणं फलमश्नुते ॥
तथैवैन्द्रगते सूर्य षड्गुणात् षड्गुणं फलम् ।
सोमवारे विशेषेण साऽक्षयफलदा कुहूः ॥
तस्यां मोक्षोत्तमे क्षेत्रे देशे श्रीपुरुषोत्तमे ॥ इति ।

1030- मुद्रितमहाभारते वचनमिदं नास्ति । किन्तु कालसारे पठ्यते ।

1031- कालसारे प्रकरणेऽस्मिन् उत्तरार्द्धपाठो यथा—
नान्यः पुण्यतमः कालो योऽर्द्धोदयसमो भवेत् । इति ।

1032- कृत्यकौमुद्यां (पृ-175) ब्रह्माण्डपुराणवचनमेतत् ।

क्षारोदके वा ह्यवगाह्य यो नरः सम्पूज्य कृष्णं रजनीमुपोषितः ।
एतेन पापं दशजन्मभिः कृतं जेष्नीयते तस्य समस्तमाशु तत् ।।
जप्यञ्च तप्यञ्च तपोर्च्चितं हुत यत्किञ्चिदस्यां किल धर्म सञ्चितम् ।
अनन्तपुण्यानि भवन्ति तस्य वै सूर्यग्रहात्कोट्यधिकं फलं तथा ।।

प्रकारान्तरञ्च वायुपुराणे[1033] —

कुम्भे वा यदि वा मीने फाल्गुनैकादशी यदा ।
पुष्यर्क्षे गुरुसंयुक्ता महापापप्रणाशिनी ।।

मतद्वये पुष्यपुनर्वसुवशादेकादशी शुक्लैव न तु कृष्णा ।

गोविन्दद्वादशी

वायुपुराणे—फाल्गुनस्यामले पक्षे कुम्भस्थे दिवसाधिपे ।
जीवे धनुषि योगे च शोभने रविवासरे ।
पुष्यर्क्षे यदि सम्पूर्णा गोविन्दद्वादशी स्मृता ।।[1034]

सम्पूर्णेत्यनेनैतल्लक्षणात् किञ्चिदूनत्वेऽपि सा भवेदिति सूचिता । यथा—

फाल्गुने शुक्लपक्षस्य पुष्यर्क्षे द्वादशी यदि ।
गोविन्दद्वादशी-नाम महापातकनाशिनी ।।[1035]
गोविन्दद्वादशीं प्राप्य गच्छेच्छ्रीपुरुषोत्तमम् ।
ब्रह्मसायुज्यमाप्यैव विष्णुसायुज्यमाप्नुयात् ।।
महाज्यैष्ठ्या दशगुणं फलं प्राप्नोति मानवः ।।[1036]

अयं गोविन्दद्वादशीयोगो गङ्गायामपीति रघुनन्दनः[1037] । मन्त्रो यथा पाद्मे—

महापातकसंज्ञानि यानि पापानि सन्ति मे ।
गोविन्दद्वादशीं प्राप्य तानि मे हर जाह्नवि ! ।।

1033- तत्रैव (पृ-175) यदा-स्थाने सिता-पाठः ।
1034- तत्रैव (पृ-176) कालसारे च तार्क्ष्यपुराणवचनमेतत् ।
1035- तत्रैव (पृ-176) विष्णुधर्मवचने फाल्गुनामलपक्षस्य-इति धृतपाठः ।
1036- तत्रैव (पृ 176) 'व्रतमापूर्य तत्रैव' इति ब्रह्मसायुज्यान्तपादपाठः ।
1037- रघुनन्दनः तिथितत्त्वे (स्मृ० त०-I-पृ-117) कृत्यतत्त्वे (स्मृ० त०-II-पृ-461) च गोविन्दद्वादशीप्रकरणे केवलमिदं कथयति यथा—अत्र गङ्गायां पद्मपुराणीयो मन्त्रः—महापातकसंज्ञानि.... । इत्यादि ।

जीवे धनुषीत्यत्र योगस्थाने मीने इति देशान्तरे पाठः। धनुवन्मीनस्यापि गुरुक्षेत्रत्वात् शोभनपदेनैवार्थसिद्धौ योगस्याधिक्याच्च युक्तोऽयं पाठ इत्येके। इदमत्र विविच्यते। फाल्गुनशुक्लपक्षकुम्भरविशोभनयोगपुष्यर्क्ष-रविवारा द्वादश्यां द्विचतुरादिवर्षैः प्रायो मिलन्ति। जीवे धनुषीत्येतत्तु त्रयोदशवर्षलभ्यम्। तद्धनुजीवे कदाचिद्रविपुष्यशोभनाद्यन्यतमापाते तद्-योगभङ्गः स्यात्। तदर्थं पुनर्धनुर्जीवापेक्षायां षड्विंशतिवर्षाण्यवधयः स्युः। तत्रापि धनुर्जीवे तदन्यतमाभावे तद्योगभङ्ग इति पुनर्धनुर्जीवाकाङ्क्षायामेको-नचत्वारिंशद्वर्षाणीत्येवं क्रमात् सप्ताष्टादिधनुर्जीवयोगैरियं गोविन्दद्वादशी निपततीति बहुकालसाध्यत्वान्महाफलेति स्थिता व्यवस्था। मीनगुरावपि तद्योगस्वीकारे तु षड्वर्षावधिका गुरुप्राप्तिरिति तस्यां रविपुष्यशोभना अचिरात् सम्भवेयुरित्यल्पकालीनेऽस्मिन् योगे न फलाधिक्यसम्भावनाभूमि-र्भवेत्। अतो मीने चेति पाठं विद्वत्तमाः कथमाद्रियन्ताम्। किञ्च देशभेदेन स्मृत्याचारयोर्भेदान्मीने चेति पाठोऽन्यदेशीयैः पाल्यतां न तूत्कलीयैः। तद्देशपुस्तकेष्वेतत्पाठादर्शनादनाचाराच्चेत्यलं पल्लवितेन। प्रकारान्तरेण सा यथा ब्रह्माण्डे[1038] —

कुम्भस्थे भास्करे राजन्! मकरे चाङ्गिरःशनी।
द्वादशी शुक्लपक्षस्य पुष्यर्क्षे जायते यदि॥
तिथिरेषा महापुण्या ब्रह्मणा परिकीर्त्तिता।
गोविन्दद्वादशी नाम महापातकनाशिनी॥
तस्यां कृत्वोदधिस्नानं दृष्ट्वा च पुरुषोत्तमम्।
यत्फलं प्राप्यते सम्यक् शृणुष्वावहितो नृप!॥
श्वेतसन्निहितो गङ्गामवगाह्य विधानतः।
त्रयोदशमहाब्दैष्ठ्याः फलं प्राप्नोति मानवः॥

अथ गङ्गायां वारुण्यादियोगाः

स्कान्दे[1039] —वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी।

1038- कृत्यकौमुद्यां (पृ-176) प्राप्नोति-स्थाने आप्नोति-पाठः।

1039- कृत्यकौमुद्यां (पृ-179), कृत्यतत्त्वे (स्मृ० त०-II-पृ 463)।

गङ्गायां यदि लभ्येत सूर्यग्रहशतैः समा ॥

वारुणः शतभिषा ।

शनिवारसमायुक्ता सा महावारुणी स्मृता ।
गङ्गायां यदि लभ्येत कोटिसूर्यग्रहैः समा ॥
शुभयोगसमायुक्ता शनौ शतभिषा यदि ।
महामहेति विख्याता त्रिकोटिकुलमुद्धरेत् ॥

शुभस्त्रयोविंशतितमो योगः । कुलं पुरुषम् । इदं वारुण्यादिगङ्गास्नानं दिवा रात्रावपीति स्मार्त्तभट्टाचार्याः[1040] ।

दिवा रात्रौ च सन्ध्यायां गङ्गायाञ्च विशेषतः ।
स्नात्वाऽश्वमेधजं पुण्यं गृहेऽप्युद्धृतज्जलैः ॥

इति ब्रह्माण्डात्[1041] । आदिपर्वणि भारते[1042] च—

अतो रात्रौ प्राप्नुवतो जलं ब्रह्मविदो जनाः ।
गर्हयन्ति नरान् सर्वान् गृहस्थान्नृपतीनपि ॥

इति गन्धर्ववाक्येऽर्जुनप्रतिवचनम् ।

[1043]समुद्रे हिमवत्पार्श्वे नद्यामस्याञ्च दुर्मते ।
रात्रावहनि सन्ध्यायां कस्य गुप्तः परिग्रहः ॥
अनिवार्यं महादोषं तव वाचा कथं वयम् ।
न स्पृशेम यथाकामं पुण्यं भागीरथीजलम् ॥ इति ।
सर्व एव शुभः कालः सर्वो देशस्तथा शुभः ।
सर्वो जनस्तथा पात्रं स्नानादौ जाह्नवीजले ॥

इति भविष्ये कालसामान्याभिधानाच्च रात्रावपि वारुण्यादिगङ्गास्नानमिति सुस्पष्टम् ।

1040- कृत्यतत्त्वे (स्मृ० त० II पृ-463) रघुनन्दन आह यथा—अत्र सधवास्त्र्यादीनां स्नानम् । रात्रावपि वारुण्यादिस्नानम् । इति ।

1041- मुद्रितब्रह्माण्डपुराणे नास्ति, किन्तु कृत्यकौमुद्यां (पृ-179) पठ्यते ।

1042- मुद्रितमहाभारते आदिपर्वणि (169/11) गृहस्थान् स्थाने बलस्थान् पाठः ।

1043- तत्रैव (169/16, 24) महादोषं-स्थाने असम्बाधं-पाठः ।

महानिशा तु विज्ञेया मध्यमं प्रहरद्वयम् ।
तस्यां स्नानं न कर्त्तव्यं नित्यनैमित्तिकादृते ॥

इति वाक्ये नित्यनैमित्तिकस्नानप्रतिप्रसवात्तदलोपमाहुः । पूर्वपरदिनद्वये वारुणीमहावारुण्योः पाते महावारुण्या बहुव्यापितया तन्त्रेण तत्रैवैकस्नाने पूर्वपरनिर्वाहः। फलाधिक्येच्छायां पृथगपि स्नातव्यम् । 'श्रेयसि केन तृप्यते' इति न्यायेन कर्मावृत्तौ फलावृत्तेरिष्टत्वात् । जन्माष्टमीजयन्त्यादावेकस्य नित्यत्वेन फलाभावान्न पार्थक्यमिति भेदः । नवीनास्तु

न च नैमित्तिकोच्छेदः कर्त्तव्यश्च कथञ्चन ।

इति वचनात् सूतकपितृमृतिवर्षादौ वारुण्यर्द्धोदयादिस्नानमाचरन्ति । रजस्वलायां तु पराशरः —

स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला ।
पात्रान्तरेण तोयेन स्नानं कृत्वा व्रतं चरेत् ॥
सिक्तमात्रा भवेदद्भिः सा शौचाङ्गी कथञ्चन ।
न वस्त्रपातनं कुर्यान्नान्यवासश्च धारयेत् ॥

नैमित्तिक इति ग्रहणमहत्यादिस्नानवद्रोगशान्तिदानादेरप्युपलक्षकम् । व्रतं तत्कालीनदानजपादिकम् । शौचाङ्गीति तत्कालीनदानादावेव न त्वन्यत्र । जातपुत्रस्य गोभूम्यादिदाने शुद्धवत्[1044] । पात्रान्तरेणेत्यनेनास्याः समुद्र-

---

1044- जननदिवसेऽशौचपालननिषेधं विचारयन्ति शास्त्रकाराः । तत्र याज्ञवल्क्यः—(3/19)—

पित्रोस्तु सूतकं मातुस्तदसृग्दर्शनाद् ध्रुवम् ।
तदहर्न प्रदुष्येत पूर्वेषां जन्मकारणात् ॥ इति ।

तत्र हिरण्यादिदानग्रहणं प्रतिपादितं मिताक्षराकारेण विज्ञानेश्वरेण यथा—तथा च वृद्धयाज्ञवल्क्येनोक्तम्—कुमारजन्मदिवसे विप्रैः कार्यः प्रतिग्रहः । हिरण्यभूगवाश्वाजवासःशय्यासनादिषु ॥ इति । व्यासेनाप्यत्र विशेष उक्तः—सूतिकावासनिलया जन्मदा नाम देवताः । तासां यागनिमित्तं तु शुचिजन्मनि कीर्त्तिता ॥ इति । निर्णयसिन्धुकारेणात्र (पृ 180) दुष्टजन्म-निदानार्थं दानव्यवस्थोक्ता । पराशरेण कर्मण्यस्मिन् रात्रावपि दानमुक्तम् । तद्यथा (12/23)—पुत्रजन्मनि यज्ञे च तथा चात्ययकर्मणि ।
राहोश्च दर्शने दानं प्रशस्तं नान्यदा निशि ॥ इति ।

गङ्गादितीर्थावगाहनस्नानं निषिद्धम् । सिक्तमात्रेत्यनेनाल्पस्नानम् । ग्रहणा-द्वोंदयादिमन्त्रेऽस्मत्पदस्थाने इदं-पदोहश्च । तेनैतत्फलमिषन्न्यूनफलं वाऽस्या निर्बाधम् । सहस्राशक्तेः शतदाने यथा फलं शताशक्तेर्दशदाने तावत्फलम् । इत्यस्मच्छुद्धिसर्वस्वे विस्तारः ।

तथाऽऽगामिनामेषां योगानां सङ्क्षेपात् साधनमुच्यते प्रसङ्गात् । भास्वतीयमते यथा—

"शास्त्राब्दपिण्डः स्वरशून्यदिग्घ्न"[1045]—

इत्यनेनौदयिकरविध्रुवं

"सहस्रनिघ्नः खविधूनितोऽध[1046]", 'रुद्राहतो वेदयुत'[1047]

इति च द्वाभ्यां चन्द्रध्रुवकेन्द्रे च संसाध्य निरुक्तरविध्रुवे सप्तगुणिते इष्टादितिथीः युक्त्या द्विधा स्थाप्याः । चन्द्रध्रुवे च नवतिगुणितास्थितयस्तथा चन्द्र केन्द्रे शतशतघ्नास्तिथयोऽपि योज्याः । ततः

"केन्द्रे क्रमात् षट्शरसप्तदस्रैः शोध्यो विधुश्चागशराब्धिदस्रैः"[1048]

इत्यनेन चन्द्रध्रुवकेन्द्रयोस्तुल्ये लब्धे अधः पातनीये । ते लब्धविकले । शेषद्वयं तु साधम् । केन्द्रे हर्तुमभावे चन्द्रध्रुवे हरणाभावः । केन्द्रे हृतौ

1045- भास्वत्यां तिथ्यादिध्रुवाधिकारे (चतुर्थश्लोके) संवत्सरपालकशुद्धि-सूर्यध्रुवविधिकथने ग्रन्थकर्त्रा शतानन्देन कथ्यते यथा—

अथ प्रवक्ष्ये मिहिरोपदेशाच्छ्रीसूर्यसिद्धान्तसमं समासात् ।
शास्त्राब्दपिण्डः स्वरशून्यदिग्घ्नस्तानाग्नियुक्तोष्टशतैर्विभक्तः ॥ इति ।

1046- तत्रैव (षष्ठश्लोके) सम्पूर्णवचनं यथा—

सहस्रनिघ्नः खविधूनितोऽधः खसिद्धिभागोनभचक्रशेषः ।
खपञ्चसंयुक्तदशघ्नशुद्धे चन्द्राष्टभागाभ्यधिकः शशाङ्कः ॥ इति ।

1047- तत्रैव (सप्तमश्लोके) सम्पूर्णवचनं यथा—

रुद्राहतो वेदयुतस्त्रिवेदशेषश्चतुःषष्टिगुणो रदाढ्यः ।
पृथक् खखागाप्तयुतेन्दुकेन्द्रं शुद्धं यष्टभागाब्दनखांशयुक्तः ॥ इति ।

1048- तत्रैव पञ्चाङ्गस्पष्टाधिकारे (सप्तमश्लोके) वचनं यथा—

खनन्दनिघ्नास्तिथयः शशाङ्के केन्द्रे शतघ्नास्तिथयः प्रदेयाः ।
केन्द्रे क्रमात् षट्शरसप्तदस्रैः शोध्यो विधुश्चागशराब्धिदस्रैः ॥ इति ।

स्थितौ चन्द्रध्रुवे , तदभावे तु तद्ध्रुवे सप्तविंशति शतानि संयोज्य प्राग्वत् समलब्धी आनेये । ततः

"इन्दुद्युवृन्दात् सहितः खसूर्यै"[1049] ,

"पुनद्युवृन्दाद् गगनेषु लब्धम्"[1050]

इति पदद्वयाल्लब्ध ध्रुवकेन्द्रयोः संयोज्य

"खचन्द्रनेत्रद्वयचन्द्रखांशाः"

मेषादिषट्के तच्चन्द्रे ऋणरूपास्तुलादिषट्के धनरूपाश्च कार्याः । ततोऽधः-स्थितात् सप्तगुणतिथियुतरविध्रुवांशगुणतिथिमिश्रं चन्द्रकेन्द्रं च शतेन हृत्वा लब्धयः खण्डाः कार्याः । खण्डफलानि च—

सूर्यस्य पञ्चाङ्कखीन्द्रभूपाः घनानवेन्दुः कुयमा जिनाश्च ।[1051]

इत्यादीनि ,

इन्दोः स्वरूपाग्निरसाः खचन्द्रा नृपा जिनाः पञ्चगुणा रसाब्धयः ।[1052]

इत्यादीनि च तादृशे रविध्रुवे चन्द्रध्रुवे चोपरि योजनीयानि । ततः खण्डशेषानुत्तरखण्डान्तरेण संगुण्य शतेन हृत्वा लब्धं तद् विचन्द्ध्रुवयो-र्योज्यम् । ततः शेषं षष्ट्या संगुण्य शतहृत्या यल्लब्धं तल्लिप्तासु पेष्यम् । एवं कृते रविचन्द्रस्फुटौ भवतः[1053] । रविशशिनोर्गतिस्फुटौ तु—

1049- तत्रैव (अष्टमश्लोके) सम्पूर्णवचनं यथा—

इन्दुद्युवृन्दात्सहितः खसूर्यैश्चरार्द्धभागोनयुतः समार्द्धात् ।
चरार्द्धभागा विषुवादिमासैः खचन्द्रनेत्रद्वयचन्द्रखांशाः । इति ।

1050- तत्रैव नवमश्लोके) सम्पूर्णवचनं यथा—

पुनर्द्युवृन्दाद् गगनेषु लब्धं शीतांशुकेन्द्रे तु युतं प्रकुर्यात् ।
तत्प्रत्यहं स्युः शतशश्च खण्डा भोग्योद्भवांशैश्च धनं स्फुटःस्यात् ।। इति ।

1051- तत्रैव (चतुर्थश्लोके) सम्पूर्णवचनं यथा—

सूर्यस्य पञ्चाङ्कखीन्द्रभूपाः घनानवेन्दुः कुयमा जिनाश्च ।
सप्ताश्विनश्चन्द्रगुणा रसाग्नी द्व्यब्धी मरुत सप्तशराः शराङ्गाः ।। इति ।

1052- तत्रैव (दशमश्लोके) सम्पूर्णवचनं यथा—

इन्दोः स्वरूपाग्निरसाः खचन्द्रा नृपा जिनाः पञ्चगुणा रसाब्धयः ।
षष्टिः शरागाः कुनवाष्टकाष्ठाः षड्भानवो राममनुर्नवाष्टाः ।। इति ।

1053- सूर्यस्य गतिस्पष्टविधौ तत्रैव (षष्ठश्लोके) वचनं यथा—

भुक्तिं च धृत्वा गुणयेत् स्वभुक्तभोग्येन हृत्वाम्बरशून्यचन्द्रैः ।
लब्धं फलं मध्यगतौ प्रदद्यादहःपरं स्यात्परकर्म कार्यम् ।। इति ।

"भोग्या रवेः सप्तगुणाच्छताप्ता सप्तान्विता स्यात् स्फुटसूर्यभुक्तिः"[1054]

"भुक्तिनवत्यान्वितभोग्यमिन्दोः"[1055]

इत्याभ्यां पद्याभ्यामानेयौ। अथ "अर्कोनचन्द्रात्तिथयः खनन्दैः", "शराप्त-मृक्षमि"त्यादिना तिथ्यृक्षादीनि बहिष्कार्याणि । 'त्रिंशद् गुणा मेषमुखार्क-मासे'त्यनेन[1056] वारज्ञानम् । एवं कृते भाविनां वारुणग्रहोदयमहत्यादीनां ज्ञाने महात्मनां कोपमर्दिस्मार्त्तानां चमत्कारः । यथा वा लघुतरं प्रकारा-न्तरम् । गतसंवत्सरतिथ्यादेरागामिवर्षे तिथ्यृक्षाद्यानयनम् , यथा—

वारे चैकं तिथौ वेदा नक्षत्रेण धृतिं न्यसेत् ।
मेषादौ च तुलादौ तद्दण्डे सार्द्धोनविंशतिम् ।।
योगाद्दण्डे ह्येकषष्टौ द्व्यर्धस्याह्नः सुधीः कलाम् ।
दद्यान्नान्यां तिथिक्षयाशङ्कायां जातिमादिशेत् ।।
दण्डे तुलादौ मेषादौ दद्यात् खाक्षिकलां त्यजेत् ।
दण्डेऽह्नि द्योतितो राममृक्षे दण्डे त्रयोदश ।।
न्यसेद् गुणैः षष्ट्याधिक्ये भनाड्योः क्ष्मेषु योजनम् ।।

तुलादौ स्यात्क्षयतिथिशङ्कायां मेषतुलयोः क्रमाद्दण्डे द्वाविंशतिविंशत्योर्योगः । अह्नि द्वौ च प्रदद्यादित्यर्थः । अजादौ तु तयोः क्ष्मागौ क्रमात् क्षिपेत् । ऋक्षे एकं दण्डे पञ्च सप्त वा क्षिपेदित्यर्थः ।

योगे क्षिप्त्वा गुणं नाड्यां त्रिवेदांस्तु क्षिपेद् गुणैः ।
न्यूनषष्टौ सैकयोगे दण्डः स्यात् सशरश्रुतिः ।।

1054- तत्रैव व्याख्यायां वचनं धृतं यथा—

भोग्या रवेः सप्तगुणाच्छताप्ता सप्तान्विता स्यात् स्फुटसूर्यभुक्तिः । इति ।

1055- तत्रैव पञ्चाङ्गस्पष्टाधिकारे (द्वादशश्लोके) सम्पूर्णवचनं यथा—

भुक्तिर्नवत्यान्वितभोग्यमिन्दोरर्कोनचन्द्रात्तिथयः खनन्दैः ।
शेषोनखाङ्काङ्गगनाङ्गनिघ्नाद् भुक्त्यन्तराप्ता घटिका भवन्ति ।। इति ।

1056- तत्रैव (प्रथमश्लोके) सम्पूर्णवचनं यथा—

त्रिंशद् गुणा मेषमुखार्कमासा दिनैस्समेता ऋतुवासरोनाः ।
द्युवृन्दमेतन्नगभक्तशेषं वारा भवन्त्यब्दमुखादिनाथात् ।। इति ।

घटेऽधिवेदौ दण्डेऽह्नि योगे षट्श्रुतिषट् यमः ।
खाश्व्यधिके घस्रदण्डे धृतिं श्वाङ्गे तिथिं न्यसेत् ॥

श्वयोगे एकषष्टितः सप्ततिपर्यन्तमित्यर्थः ।

खाश्वियने योगदण्डे त्वा दिनं प्रागुवन्न च क्षिपेत् ।
क्षेपान्त्यदण्डात् षष्ट्याप्तं तिथौ नाड्यधिकं न्यसेत् ॥
शेषालाभे षष्टिदण्डं तदहः सैकमालिखेत् ।
ऋक्षे योगेऽप्येवमूह्यं युक्त्याऽथांशान्नगं कलाम् ॥
साग्निं कुर्याच्च मेषादौ सप्तोने भकले परे ॥

परे तुलादौ रव्यंशतदण्डयोः सप्तद्वयहानिरित्यर्थः ।

आनेयश्चन्द्रतो राशिस्तिथेश्च करणं बुधैः ।
वर्त्तमानाब्दसौराहे दिनभावादिदं क्षिपेत् ॥
यत्र तस्याथाष्टमाहे भाव्यब्दे दिनभं स्फुटम् ।
दण्डे न्यूनाधिकमिह न गण्यं साधने लघौ ॥
भावियोगादिषु ज्ञानं ग्रहचक्रादि यद् गुरु ॥

इति सामान्यतः पञ्चाङ्गज्ञानम् ।

अथ भाविचन्द्रसूर्यग्रहज्ञाने चमत्कारायः सिद्धान्तशिरोमण्युत्थितं ग्रहचक्रानुसारिग्रहणं सङ्क्षिप्य प्रकाश्यते । ग्रहणसम्भावनाकालश्च एकर्क्षे रविचन्द्रराहुषु रवेः पूर्णोपराग इत्यादि ग्रहतोऽधो दर्शितम् । तत्साधनं यथा— तमसो रसतिथिलिप्ता वेदभूकलाविधूच्चतः शोध्याः । स्फुटशशिनः खेटकलाविकृतिरियं ग्रहणबोधार्था । विंशत्या लब्धमिनस्फुटगतभवघाततोऽर्कमानं स्यात् । चन्द्रस्फुटगतिः शिखिहृता वेदनगाप्तं विधोर्मानम् । शशिगतिः वसुघातार्कस्फुटगतशरिनेत्रघातयोर्विवरम् । षष्ट्याप्तमिदं छादकमिन्दुग्रहणे कलाद्यमतमः । शशिमानमिनग्रहणे छादकमथ राहुणा रवौ हीने । शेषे भषट्कतोऽल्पे सौम्यस्त्वधिके शरो याम्यम् । इन्दुग्रहो भुजांशे भूमिकोनो भुजकलात्रिभूहृदिषु । ग्रास ईषूने शशितम ऐक्यार्धे ग्रासतोऽधिके पूर्णः । योगार्द्धरामघाते शरपक्षहृते फल यदाप्येत ग्रासतदाप्तियुताप्तं योगार्द्धग्रासघातं चाष्टहृतम् । भुक्त्योरन्तरभक्तं स्थित्यर्द्धं स्याद्वियुक्तयुक्ताश्च । तेनैव

पूर्वदण्डाः स्पर्शो मोक्षः क्रमात् स्याताम् । वियुताद्र्धे त्रिहृते । फलमिषुपक्षे-र्विम्बयोर्वियोगार्द्धम् । शरहीनमनिषु विम्बं योगार्द्धहृतं स्वयोगार्द्धम् । षष्टिहतं गतवियुतैर्भक्ताप्तं नाडिकाविमर्दार्द्धे । पर्वघटी वियुतयुता निमीलनो-न्मीलने नाभी । इति चन्द्रग्रहणम् ।

अथ सूर्यग्रहः

दशसु शितानतनाड्यो द्वेधा मनुयुक्तैर्हृता दण्डः । फलवर्गाणामनुयुक्तैः स्थिरं लम्बन तु हृताः । पर्वदिनार्द्धवियोगो नतोऽधिके पर्वणि दिनार्द्धे सः । सौम्ये याम्येऽन्यः श्रुतिभक्ते लब्धं तु राश्यादि । तद्धि युतियुतैः प्राक्परसाय-नरवेभुजकलाहृताल्लब्धम् । खार्धकृतैर्गतखण्डाः प्राक्परखण्डान्तरं तु शेषघ्नम् । खशरकृतहृतकलाप्ता पूर्वे खण्डे युता च षष्टिहृता । क्रान्त्यंशा याम्याख्या विंशतिरक्षांश एव सदा । युतिरुभयोः दिक्सा-म्येऽन्यथान्तरं तद्रसांशतोऽतमसः । रविराहोश्च दिगैक्ये युतिर्नोचेदन्यथा वा त्वंशे । सत्यूनेऽर्कग्रहणं तदंशलिप्ता त्रिभूहृता वा ताः । नतिसंस्कृता अन्यदिन्दुग्रहवत् क्रान्ते वृवे खण्डान । लिप्तांशकैः रुद्राः शरनगशिखिनो वेदवाणेषवोऽब्धिर्द्विग्रावाणोऽङ्कवर्गाष्टयुगभुवर्दिशेषु रुद्रा इनोक्ताः । वेदार्थार्का गजत्रित्रिविधा उदिताः । कुञ्जराङ्कत्रिचन्द्रा भूताब्ध्यब्धीन्दवः खाश्विरामनव इति द्वादश क्रान्तिखण्डाः । इनोक्ताः सूर्यसिद्धान्तोत्थिताः । नतिसंस्कृत-शरःसाध्यं ग्रासस्थितिमद् दिनार्द्धमथ दर्शात् । लम्बनवियुतयुतः प्राक्परयोः स्पर्शश्च मोक्षः स्यात् । चन्द्रसूर्यग्रहेऽत्र शरवलनाङ्गुलादिकमस्थानत्वाद-नुपयोगाच्च नोक्तम् ।

मूलज्योतिरबोधे तु सतामप्यबला स्मृतिः ।
यथा शाखाद्वयोर्मूलं पदशास्त्रं तु सर्वतः ॥

भास्वतीयग्रहणं तु "द्विघ्नो रविः पर्वकृताप्तयुतो"[1057]

1057- भास्वत्यां चन्द्रग्रहणाधिकारे (प्रथमश्लोके) सम्पूर्णवचनं यथा—

द्विघ्नो रविः पर्वकृताप्तयुतो दिग्भिस्तमोऽष्टघ्नदिनं ध्रुवाढ्यम् ।
तमो युतार्कात् खखभाप्तसौम्यं याम्यं शरोऽल्पः स्वदशांशहीनः ॥ इति ।

"न ताद्दशघ्ना जिनयुङ्नताप्तमि"[1058]

त्वध्यायद्वयस्थितं बहुप्रसिद्धमिति गौरवान्न तदुट्टङ्कितम् ।

इतिश्रीकौत्सकुलकैरवनिशाकराष्टादशविद्याविलासिनीरमण-

महामहोपाध्यायकविवर-कृष्णमिश्र कृते कालसर्वस्वे

स्मृतिनिर्णयप्रकरणं समाप्तम् ।

अथ वैष्णवप्रकरणम्

यद्यपि विष्णुर्देवताऽस्येति "साऽस्य देवते"[1059] त्यणा निष्पन्नत्वाद्वैष्ण वत्वं विष्ण्वाराधननमस्कारकेषु सौरशैवादिष्वतिप्रसज्येत तथापि वक्ष्यमाण-दीक्षा[1060] विशिष्टे वैष्णवग्रन्थविहितानुष्ठानकारिणि विष्णुभक्ते वैष्णवपदं पङ्कजादिवद्योगरूढः[1061] । दीक्षा यथा पाद्मे—

विना श्रीवैष्णवीं दीक्षां सत्प्रसादं गुरोर्विना ।

विना श्रीवैष्णवं शास्त्रं कथं भागवतो भवेत् ॥

"अदीक्षितस्य वामोरु ! कृतं सर्वमनर्थकम् ।"[1062]

1058- भास्वत्यां सूर्यग्रहणाधिकारे (प्रथमश्लोके) सम्पूर्णवचनं यथा—

नताद् दशघ्ना जिनयुङ्नताप्तं तल्लम्बनं तेन युतं नतञ्च ।

तत्खाङ्कनिघ्नोनयुतस्य भानोः प्राचीप्रतीच्योश्च शरः प्रसाध्यः ॥ इति ।

1059- पाणिनीयाष्टाध्याय्याम् (4/2/24) ।

1060- दीक्षा यथा हरिभक्तिविलासे (2/9) विष्णुयामले—

दिव्यं ज्ञानं यतो दद्यात् कुर्यात् पापस्य संक्षयम् ।

तस्माद्दीक्षेति सा प्रोक्ता देशिकैस्तत्त्वकोविदैः ॥ इति ।

1061- वैष्णवसाधारणलक्षणमुक्तं यथा पाद्मे उत्तरखण्डे—

विष्णोरयं यतः प्रोक्तो ह्यतो वै वैष्णवो मतः ।

सर्वस्यादिस्तु विज्ञेयो ब्रह्मरूपधरस्ततः ॥ (83/2)

शौचसत्यक्षान्तियुक्तो रागद्वेषविवर्जितः ।

वेदविद्याविचारज्ञः स वै वैष्णव उच्यते ॥ (83/4)

अग्निहोत्ररतो नित्यं नित्यं चातिथिपूजकः ।

पितृभक्तो मातृभक्तः स वै वैष्णव उच्यते ॥ (83/5)

1062- हरिभक्तिविलासे (2/6) स्कान्दं विष्णुयामलीयञ्च वचनं यथा—

किञ्च, वर्णी वाऽथ गृहस्थो वा वानप्रस्थोऽथवा यतिः ।
दीक्षहीना न मुच्यन्ते इत्याह भगवान् शिवः ॥

बृह्माण्डे— "सभर्तृका वा विधवा विष्णुभक्तिं करोति या ।
समुद्धरति चात्मानं कुलमेकोत्तरं शतम् ॥"[1063]
मुख्यं तु लक्षणं स्त्रीणां व्यभिचारस्य वर्जनम् ।
शूद्रस्तुष्णीं जपन् भूमिमास्ते भोगविवर्जितः ॥

दीक्षा च पञ्चमवर्षमारभ्योक्ता भागवते[1064] —
कौमार आचरेत् प्राज्ञो धर्मान् पाराशरानिह । इति ।

माधवीये[1065] —वैखानसाद्यागमोक्तदीक्षां प्राप्तो हि वैष्णवः ।
तदभावे स्कन्दपुराणोक्तदीक्षा[1066] वा—
परमापदमापन्नो हर्षे वा समुपस्थिते ।
नैकादशीं त्यजेद्यस्तु तस्य दीक्षा तु वैष्णवी ॥
समात्मा सर्वजीवेषु निजाचारादविप्लुतः ।
विष्ण्वर्पिताखिलाचारः स वै वैष्णव उच्यते ॥

भक्तिप्रदीपे लैङ्गे[1067] —

अदीक्षितस्य वामोरु ! कृतं सर्वं निरर्थकम् ।
पशुयोनिमवाप्नोति दीक्षाविरहितो जनः ॥ इति ।

1063- तत्रैव (10/128) इतिहाससमुच्चये बृह्मवचनमेतत् । मुद्रितबृह्माण्ड-पुराणे वचनमिदं नोपलभ्यते ।

1064- श्रीमद्भागवते सप्तमस्कन्धे (6/1) प्रह्लादवचनं यथा—
कौमार आचरेत् प्राज्ञो धर्मान् भागवतानिह ।
दुर्लभं मानुषं जन्म तदप्यध्रुवमर्थदम् ॥ इति ।

कौमाराद्यवस्थाविशेषा उक्ता यथा भक्तिरसामृतसिन्धौ दक्षिणविभागे प्रथम-लहर्याम् (श्लोकः-309)—
कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि ।
आषोडशाच्च कैशोरं यौवनं स्यात्ततः परम् ॥ इति ।

1065- कालमाधवे (पृ-13) कारिकावचनमेतत् ।

1066 हरिभक्तिविलासे (12/339-340) "तस्य"-स्थाने 'यस्य' ।

1067- तत्रैव (10/14) लैङ्गवचनम् ।

विष्णुभक्तिसमायुक्तान् श्रौतस्मार्त्तप्रवर्त्तकान् ।
प्रीतो भवति यो दृष्ट्वा वैष्णवोऽसौ प्रकीर्त्तितः ॥

रामार्च्चनचन्द्रिकायाम्[1068] —

साङ्गं समुद्रं सन्यासं सच्छन्दऋषिदैवतम् ।
सदीक्षाविधि सध्यानं मन्त्रं वा द्वादशाक्षरम् ॥
अष्टाक्षरमथान्यं वा ये मन्त्रं पर्युपासते ।
ज्ञेयास्ते वैष्णवा लोके विष्णवर्च्चनरताः सदा ॥

अन्यं तारकादिमन्त्रं वैष्णवम् । पाद्मे[1069] —

"द्विविधं वैष्णवं प्रोक्तं बाह्यमाभ्यन्तरं तथा ।
शङ्खचक्रादिभिर्बाह्यमान्तरं वीतरागता ॥
बाह्याभ्यन्तरसाम्यं यत्तद् वैष्णवमुदाहृतम् ।"
"तुलसीकाष्ठमालां यः कण्ठे वै धारयेत्ततः ।
तिलकानि द्वादशानि स वै वैष्णव उच्यते ॥"[1070]

ये शङ्खचक्रपरिचिह्नितबाहुमूलाः कण्ठावलम्बिसरसीरुहबीजमालाः ।
ये वा ललाटफलकोल्लसदूर्ध्वपुण्ड्रास्ते वैष्णवा भुवनमाशु पवित्रयन्ति ॥[1071]

इति वचनात् पद्माक्षमपि तुलसीवद् वैष्णवेन धार्यम् । तुलस्यर्थवृन्दावनकाष्ठ-श्वेतगुञ्जपिच्छादिधारणं तु निर्मूलाचारः । पाद्मे[1072] —

1068- मुद्रित-रामार्च्चनचन्द्रिकायां पञ्चमपटले (पृ 137) 'सऋषिच्छन्द-दैवतम्', मन्त्रं वा-स्थाने 'सयन्त्रं', पर्युपासते-स्थाने 'समुपासते' इति पाठः ।

1069- पद्मपुराणे उत्तरखण्डे (252/74-75) । तत्रान्तिमश्लोकार्द्धो यथा—
तस्माच्चक्रादिचिह्नं तु प्रथमं वैष्णवं स्मृतम् । इति ।

1070- मुद्रितपद्मपुराणे उत्तरखण्डे (69/6 7) पाठो यथा—
शङ्खं चक्रं गदां पद्मं नित्यं वै धारयेत्तु यः ।
तुलसीकाष्ठजां मालां कण्ठे वै धारयेत्तु यः ॥
तिलकान् द्वादशानेव नित्यं वै धारयेद् बुधः ।
धर्माधर्मं तु जानाति स च वैष्णव उच्यते ॥ इति ।

1071- नित्याचारपद्धतौ (प्रथमभागः-पृ-159) ।

1072- मुद्रितपुराणे नास्ति । किन्तु रामार्च्चनचन्द्रिकायां (पृ-137) तृतीय-पादे 'चलति"-स्थाने "हरति-इति पठ्यते ।

न चलति निजवर्णधर्मतो यः सममतिरात्मसुहृद्विपक्षपक्षे ।
न चलति न च हन्ति किञ्चिदुच्चैर्जितमनसं तमेवेहि विष्णुभक्तम् ॥

न चलति क्रोधेन न कम्पते । स्कान्दे[1073] —

धर्मार्थं जीवनं येषां सन्तानार्थश्च मैथुनम् ।
पाचनं विप्रसुखार्थं ज्ञेयास्ते वैष्णवा नराः ॥

विष्णुः[1074] —"परिचर्यायशोलाभलिप्सुः शिष्याद् गुरुर्नहि ।"

"कामाद्वा लोभतो वाऽपि यो गृह्णीयादशिक्षया ।
तस्मिन् गुरौ च शिष्ये च देवताशाप आपतेत् ॥"[1075]
"अवैष्णवोपदिष्टेन मन्त्रेण निरयं व्रजेत् ।
पुनश्च विधिना सम्यग्वैष्णवाद् ग्राहयेन्मनुम् ॥"[1076]

पाद्मे[1077] —"महाभागवतश्रेष्ठो ब्राह्मणो वै गुरुर्नृणाम् ।"

"महाकुलप्रसूतोऽपि सर्वयज्ञेषु दीक्षितः ।
सहस्रशाखाध्यायी च न गुरुः स्यादवैष्णवः ॥"[1078]

1073-हरिभक्तिविलासे (10/10)"जीवनं"-स्थाने "जीवितम्"इति पाठः । सन्तानार्थमिति एकसन्तानलाभं यावत् ।

1074- तत्रैव (1/45, 46) सम्पूर्णं विष्णुस्मृतिवचनं यथा—

परिचर्यायशोलाभलिप्सुः शिष्याद् गुरुर्नहि ।
कृपासिन्धुः सुसम्पूर्णः सर्वसत्त्वोपकारकः ॥
निस्पृहः सर्वतः सिद्धः सर्वविद्याविशारदः ।
सर्वसंशयसंच्छेत्ताऽनलसो गुरुराहृतः ॥ इति ।

किन्तु मुद्रितविष्णुस्मृतौ वचनमिदं नोपलभ्यते ।

1075- हरिभक्तिविलासे (2/7) विष्णुयामलवचने "कामाद्वा" स्थाने स्नेहाद्वा, "च शिष्ये च"-स्थाने 'सशिष्ये तु' इति धृतः पाठः ।

1076- तत्रैव (4/366) पञ्चरात्रवचने "ग्राहयेद् वैष्णवाद् गुरोः" इति चतुर्थचरणे पाठः ।

1077- मुद्रितपद्मपुराणे उत्तरखण्डे (253/26) सम्पूर्णवचनं यथा—

महाभागवतः श्रेष्ठो ब्राह्मणो वै गुरुर्नृणाम् ।
सर्वेषामेव लोकानामसौ पूज्यो यथा हरिः ॥ इति ।

तत्त्वसागरसंहितायाम्[1079] —

अरोमा बहुरोमा च निन्दिताश्रमसेवकः ।
कालदन्तोऽसितौष्ठश्च दुर्गन्धिश्वासवाहकः ॥
बह्वाशी दीर्घसूत्री च विषयादिषु लोलुपः ।
हेतुवादरतो दुष्टो वाण्यादिगुणनिन्दकः ॥
बहुप्रतिग्रहासक्तः स वार्यः शिक्षया बहिः ॥

शिक्षया वार्यः । गुरुं तं न कुर्यादित्यर्थः ।

गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।
उत्पथप्रतिपन्नस्य परित्यागो विधीयते ॥

अवलिप्तस्य निजाचाराद् विप्लुतस्य । नारदीये—

दाम्भिकं भिन्नमर्यादं नास्तिकं लुब्धचेतसम् ।
विद्वान्नैवानुगृह्णीयाच्छिष्यञ्च नरकप्रदम् ॥

अनुगृह्णीयादित्यस्य मन्त्रशिक्षयेत्यादि । रामार्च्चनचन्द्रिकायाम्[1080] —

गुरुता शिष्यता वाऽपि तयोर्वत्सरवासतः ।

वर्षपर्यन्तमादरानादरं परीक्ष्य तदनन्तरं गुरुं शिष्यं वा कुर्यादिति ल्यब्लोपे पञ्चमी । पञ्चरात्रे—

स्त्रीणां विशेषतो दद्यात् पतिभक्तिसमन्विताम् ।

पत्यनुज्ञाकृतां दीक्षामित्यर्थः । एवं गीताद्वादशाध्याये बहूनि वैष्णवलक्षणान्यनुसर्त्तव्यानि । यथा[1081] —

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥

1078- तत्रैव (226/3) प्रथमपादे "सहस्रशाखाध्यायी वा" इति प्रथमपादे, "कुले महति जातोऽपि" इति तृतीयपादे पाठः ।

1079- हरिभक्तिविलासे (1/57, 56, 58) "वाण्यादि"-स्थाने "अवाग्वादी" पाठः । एवञ्च तृतीयश्लोके पाठो यथा—

दुष्टलक्षणसम्पन्नो यद्यपि स्वयमीश्वरः ।
बहुप्रतिग्रहासक्त आचार्यः श्रीक्षयावहः ॥ इति ।

1080- रामार्च्चनचन्द्रिकायां प्रथमपटले शिष्यलक्षणे (पृ-2) ।

तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित् ।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः । इत्यादि ।

दीक्षा च केवलं ब्रह्मनिष्ठा । यथा विष्णुतन्त्रे—

आलिङ्गनं वरं मन्ये व्यालव्याघ्रविलोकसाम् ।
न भङ्गशल्ययुक्तानां नानादेवैकसेविनाम् ॥
हरिरेव सदाऽऽराध्यः सर्वदेवेश्वरेश्वरः ।
इतरे ब्रह्मरुद्राद्या नावज्ञेयाः कथञ्चन ॥

नावज्ञेयाः पुत्रधनहरिभक्त्यादिबाधधिया त्वाकस्मिकदर्शने नमस्कार्या न तु तन्नैवेद्यभक्षणेष्टत्वादियोग्याः ।

परात् परतरं यान्ति नारायणपरायणाः ।
न ते तत्र गमिष्यन्ति ये द्विषन्ति महेश्वरम् ॥[1082]

इत्यादिवचनात् । यथा राजोपजीवी स्वकार्यभङ्गाय भृत्यमन्त्र्यादीननुगच्छति तद्वदिति भावः । यत्तु—

व्याघ्रेण खाद्यमानोऽपि न गच्छेच्छङ्करालयम् ।

इति लक्ष्मीनारायणोपासकानां परम्परावाक्यं तच्छिवस्य शक्तियोगेनाशुद्धत्वात्तत्प्रणामाभावाभिप्रायकम् । शक्तिशून्यचन्द्रशेखरे तु तेषां नमस्कृतिः स्यादेव । एवं सूर्यगणेशादावपि । न हि परमभागवतः शिवो नमस्कार्यो मानुषेभ्यो हीनः । 'नान्यदेवं नमस्कुर्यादि'ति तु शुद्धवैष्णवपरम् । यद्वाऽन्यदेवानां विष्णुभिन्नत्वेन प्रणामनिषेधो न तु विष्णुत्वेनेत्यर्थः । एवमन्यत्र ।

अत एव नारायणभट्टेनोक्तम्—

1081- मुद्रितश्रीमद्भगवद्गीतायां (12/2) "भक्ततमाः"-स्थाने "युक्ततमाः" इति पाठः । तत्रैव द्वितीयश्लोके (12/19) उत्तरार्द्धपाठो यथा—

अनिकेतः स्थिरमतिर्भक्तिमान् मे प्रियो नरः । इति ।

तत्रैव तृतीयश्लोके (12/15) पूर्वार्द्धपाठो यथा—

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः । इति ।

1082- हरिभक्तिविलासे (14/189) कौर्मे भृग्वादीन् प्रति भगवद्वचनम् । मुद्रितकूर्मपुराणे (पू०-27/13) "परायणाः"-स्थाने "परा जनाः"-पाठः ।

'शिवं भास्करमग्निञ्च गणेशं कौशिकीमपि ।
मनसाऽनर्च्चयन् यान्ति ब्रह्मलोकादधोगतिम् ।।[1083]

इति गृहिवैष्णवानामपि काम्यं पञ्चदेवताऽऽराधनम्, विष्णुरूपत्वेन वा। अन्यथा नित्यानां वर्षवृद्धि-रक्षापञ्चमी-शरद्देवीत्रिदिनपूजा-सावित्रीसूर्योपस्थानादीनामकरणे 'न चलति निजवर्णधर्मतः', 'निजाचारादविप्लुत' इति प्रागुक्तेन

श्रुतिस्मृती ममैवाज्ञे तदतिक्रम्य वर्त्तते ।
आज्ञाच्छेदी मम द्रोही मद्भक्तोऽपि न वैष्णवः ।।[1084]

इत्यादिना च वैष्णवत्वं व्याहन्येत । केचित्तु सावित्रीसूर्योपस्थानादिकं विना भक्तभैरवदेवीपूजादिकं स्कन्दप्रतिनिधिना निर्वाहयन्ति ।

वैष्णवा नारायणभट्टेन गृहिशुद्धास्तोनाप्तादिभेदेन पञ्चधा गदिताः । तथाहि नारदपञ्चरात्रे द्वाविंशतिपटले—

वासुदेवं हरिं नान्यं यजन्ति प्रणवादिना ।
संन्यासक्रमयोगेन फलं सम्पत्तिमन्तरा ।
भगवद्भाविनो विप्रा इत्याप्ताः समुदाहृताः ।।
वर्णकर्माण्यनुचिन्त्य आप्ता दीप्तेन कर्मणा ।
यजन्ते श्रद्धया देवमनाप्तास्तेन तत्स्मृताः ।।
नानात्वेन च विश्वेशं ये यजन्त्यर्थसिद्धये ।
मोक्षार्थमपि विप्रेन्द्र ! ज्ञेयास्तेऽञ्जलिकारिणः ।।
प्रतिभाऽत्यधिकं येषां यज्ञसंस्थापनं हरेः ।
धर्मं सम्पाद्य यत्नेन प्रतिष्ठामाचरन्ति च ।।
वैष्णवा भक्तियुक्तेन चेतसा कीर्त्तितेन च ।
आरम्भितास्ते बोद्धव्या वैष्णवा ब्राह्मणादयः ।।
श्रद्धया ये प्रवर्त्तन्ते स्वयं सम्पूजने हरेः ।
अमार्गेणैव विप्रेन्द्र ! विद्धि तान् सम्प्रवर्त्तकान् ।।

1083- नित्याचारप्रदीपे (प्र० भा०-पृ०-503) "मनसा"-स्थाने 'चेतसा"-पाठः ।

स्कान्दे[1085]—वासुदेवं परित्यज्य योऽन्यदेवमुपासते ।

स्वमातरं परित्यज्य श्वपचीं वन्दते हि सः ॥

वन्दते मातृत्वेनेत्यादि । एवं विष्णुमात्रभजने कार्ये नृसिंहरामकृष्णानां पूर्णैश्वर्यत्वेन त एव वैष्णवैरुपास्याः ।

नृसिंहरामकृष्णेषु षाड्गुण्यं परिपूरितम् ।[1086]

इति वचनात् ।

वैष्णवो नारसिंहः स्यात् सा काष्ठा सा परा गतिः ।[1087]

इत्यादिवचनाच्च ।

नन्वाधुनिकवैष्णवैः कृष्ण एव पूर्णविष्णुरिति स एवोपास्यते ।

एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ।[1088]

रामादिमूर्त्तिषु कलानियमेन तिष्ठन्नानावतारमकरोद्भुवनेषु किन्तु ।

1084- तत्रैव (प्र० भा०-पृ-590) भगवद्वचनं यथा—

स्मृतिश्रुती मम वाक्ये यस्ते उल्लङ्घ्य वर्त्तते ।

आज्ञाच्छेदी मम द्वेषी न भक्तश्च न वैष्णवः ॥ इति ।

1085- हरिभक्तिविलासे (1/111) ।

1086- पद्मपुराणे उत्तरखण्डे (229/42) सम्पूर्णवचनं यथा—

नृसिंहरामकृष्णेषु षाड्गुण्यं परिकीर्त्तितम् ।

परावस्था तु देवस्य दीपादुत्पन्नदीपवत् ॥ इति ।

भगवतः षाड्गुण्यमुक्तं यथा विष्णुपुराणे (6/5/74)—

ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ।

ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥ इति ।

1087 नित्याचारप्रदीपे (प्र० भा०-पृ-745) अङ्गिरसकल्पे वचनं यथा—

शक्तिनिष्ठो भवेत् शैवः शैवो विष्णुं प्रपूजयेत् ।

वैष्णवो नारसिंहः स्यात् सा काष्ठा सा परा गतिः ॥ इति ।

1088- श्रीमद्भागवते (1/3/27, 28) सूतवचनं यथा—

ऋषयो मनवो देवा मनुपुत्रा महौजसः ।

कलाः सर्वे हरेरेव सप्रजापतयस्तथा ॥

एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ।

इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे ॥ इति ।

कृष्णः स्वयं समभवत् परमः पुमान् यः .... ॥[1089]

इति ब्रह्मसंहितादिवचनात् । अतएव कलारूपदशावतारेषु पूर्णः श्रीकृष्णो न गणितः किन्तु रामनृसिंहावेव । तदभिप्रायेण

दशाकृतिकृते कृष्णाय तुभ्यं नमः ।[1090]

इति जयदेवेनोक्तम् । इति चेदत्रोच्यते । एते चांशकला इत्येतत्पदेनापि सहस्रशः मुनिगन्धर्वादीनां ग्रहेऽपि रामनृसिंहयोरभिधानाभावः । सर्वनाम्नां बुद्धिस्थपरामर्शकत्वात् । एतदः समीपवर्त्तिबोधकत्वात् । किञ्च 'रामं कृष्णं जगन्मयम्' इति स्तवराजागस्त्यसंहितादेः कृष्णपदं रामार्थकं रामतत्त्वप्रकाश उक्तम् । रामादिमूर्त्तिष्वित्यत्र रामपदेन भार्गवो बोध्यते । रामादित्यतद् गुण-संविज्ञानबहुव्रीहिर्वा । न वा दशावतारमध्ये रामनृसिंहयोः कलाभूतमत्स्य-कूर्मादिभिः सहगणनं कलांशरूपापरिपूर्त्तिसूचकम् । लोके परापरपदार्थानां बहुशः समूहदर्शनात् । अन्यथा षष्ठस्कन्धे श्रीकृष्णस्यापि मत्स्यकूर्मव्यास-नारदादिकलावतारमध्ये—

मां केशवो गदया प्रातरव्याद् गोविन्द आसङ्गवमात्तवेणुः ।[1091]

इत्यादिना गणना दशावतारत्वं प्रसज्येत । प्रत्युत तयोर्विष्णववतारप्रवेशो हरत्वादिशङ्कानिरासपूर्वकविष्णुत्वसूचक एव न तु तद्दूषकः । अतएव श्रीधरस्वामिभि[1092] 'मात्स्यं कौर्मं भागवतमि'त्यत्र भगवत्या इदं भागवतं

1089- "गोविन्दमादिपुरुषं तमहं भजामि" इति ब्रह्मसंहितायां पञ्चमाध्याये (श्लोकः-39) चतुर्थपादपाठः ।

1090- जयदेवकृतगीतगोविन्दे (2/1) वचनं यथा—

वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते
दैत्यान् दारयते बलिंच्छलयते क्षत्रिक्षयं कुर्वते ।
पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते
म्लेच्छान् मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ॥ इति ।

1091- श्रीमद्भागवते (6/8/20) सम्पूर्णं विश्वरूपवचनं यथा—

मां केशवो गदया प्रातरव्याद् गोविन्द आसङ्गवमात्तवेणुः ।
नारायणः प्राह्ण उदात्तशक्तिर्मध्यन्दिने विष्णुररीन्द्रपाणिः ॥ इति ।

1092- श्रीमद्भागवते (1/1) भावार्थदीपिकायां श्रीधरस्वामी भागवतं

कालिकापुराणमिति लक्ष्मीधराद्यर्थं संदूष्य भगवत इदमित्यप्रीत यत्नेन दशलक्षणा अपि द्वादश स्कन्धाः[1093] पञ्चलक्षणपुराणमध्ये[1094] प्रवेशिताः। अन्यथा तद्भागवतस्य भारतरामायणादिवत् पुराणानन्तर्गतमेकं महत्त्वं हीयेतेति ध्येयम्। 'दशाकृतिकृते कृष्णाये'ति जयदेवोक्तिस्तूपासनस्वीकृता। अस्तु वा

मत्स्याश्वकच्छपनृसिंहवराहहंसराजन्यविप्रविबुधेषु कृतावतारः।

इति दशमस्कन्धात्[1095] कृष्णस्यावतारित्वम्। न चैतावता श्रीरामस्य तद्वद्वक्ष्यमाणावतारकारित्वबाधः। अथ यदि कृष्णवद्रामस्य पूर्णैश्वर्यवाक्य-दर्शनादपरितोषस्तर्हि सावधानं श्रूयताम्। सनत्कुमारसंहितायां राम-स्तवराजे— मत्स्यकूर्मवराहादिरूपधारिणमव्ययम्।

गोपालं गोपरिवारं गोपकन्यासमावृतम्॥
दशग्रीवहरं रुद्रं केशवं केशिमर्दनम्।

प्रतिपादयति यथा—गायत्र्या प्रारम्भेण गायत्र्याख्यब्रह्मविद्यारूपमेतत् पुराण-मिति दर्शितम्। यथोक्त मत्स्यपुराणे (53/20) पुराणदानप्रस्तावे—

यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः।
वृत्रासुरवधोपेतं तद्भागवतमिष्यते॥

पुराणान्तरे च—ग्रन्थोऽष्टादशसाहस्रो द्वादशस्कन्धसम्मितः।

हयग्रीवब्रह्मविद्या यत्र वृत्रबधस्तथा।
गायत्र्या च समारम्भस्तद्वै भागवतं विदुः॥ इति।

× × × अतएव भागवतं नाम अन्यत् इत्यपि नाशङ्कनीयम्। इति। श्रीधरस्वामिना अत्र लक्ष्मीधरगोस्वामिमतं यन्न स्वीकृतं तत् समीचीनमेव।

1093- द्वादशस्कन्धान्वितं श्रीमद्भागवतं दशलक्षणात्मकम्। तत्रोक्तं (2/10/1) तद्यथा—

अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः।
मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः॥ इति।

1094- पुराण पञ्चलक्षणम्। तदुक्तं वराहपुराणे (2/4) यथा—

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।
वंशानुचरितञ्चैव पुराणं पञ्चलक्षणम्॥ इति।

1095- श्रीमद्भागवते (10/2/40) गर्भगतविष्णोर्ब्रह्मादिकृतस्तुतिर्यथा—
मत्स्याश्वकच्छपनृसिंहवराहहंसराजन्यविप्रविबुधेषु कृतावतारः।
त्वं पासि नस्त्रिभुवनं च यथाऽधुनेश! भारं भुवो हर यदूत्तम! वन्दनं ते॥इति।

सर्वकारणकर्त्तारं निदानं प्रकृतेः परम् ॥
मनसा वचनान्नित्यं प्रणमामि रघूत्तमम् ।
ब्रह्मा विष्णुश्च रुद्रश्च देवेन्द्रो देवतास्तथा ।
सप्त द्वीपाः समुद्राश्च नदा नद्यस्तथा द्रुमाः ॥
देवतिर्यङ्मनुष्याणां दानवानां तथैव च ।
माता पिता तथा भ्राता त्वमेव रघुनन्दन ॥
मुनीन्द्रगुह्यं परिपूर्णमेकं कलानिधिं कल्मषनाशहेतुम् ।
परात् परं यत्परमं पवित्रं नमामि रामं महतो महान्तम् ॥

इत्यादीनि बहून्यत्र सन्ति, विस्तरभयान्नोक्तानि । पञ्चरात्रेऽपि—

अवतारा बहवः सन्ति कला अंशावतारिणः ।
रामो नारायणः साक्षात् परंब्रह्मैव केवलम् ॥

ब्रह्मरामायणेऽपि—

मदंशो गोकुले तावत् कृष्णनामा भविष्यति ।

अगस्त्यसंहितायां मानसपूजने—

पूर्णानन्दैकरूपाय ससीताय नमो नमः ।
ब्रह्मानन्दैकरूपाय ससीताय नमो नमः ॥
मानाथ श्रीमहाविष्णो श्रीनृसिंहाभयप्रद ।
गोविन्द श्रीहरे कृष्ण नमस्त जानकीपते ॥

इत्यादीन्यत्राप्यनेकवाक्यानि । अन्यत्र च—

रमन्ते योगिनोऽनन्ते सत्यानन्दे चिदात्मनि ।
इति रामपदेनासौ परं ब्रह्माभिधीयते ॥

कोशलखण्डे—सर्वावतारी भगवान् रामश्चतुर्भुजोऽभवत् ।

भुशुण्डिरामायणे[1096] —

यस्यांशा मत्स्यकूर्माद्या बलकृष्णादयस्तथा ।
अवतारी स्वयं राम पूर्णांशानां निधिः परः ॥ इति ।

1096- भुशुण्डिरामायणे पूर्वखण्डे (9/8. 27, 28) सम्पूर्णवचनं यथा—
यस्यांशा मत्स्यकूर्माद्या बलकृष्णादयस्तथा ।
तं राममपहायान्यं श्रोतुमिच्छामहे कथम् ॥

अध्यात्मरामायणे रामहृदये[1097] —

अयोध्यानगरे जन्म रघुवंशेऽतिनिर्मले ।।

दण्डकारण्यगमनं विराधवध एव च ।

मायामारीचमरणं मायासीताहृतिस्तथा ।।

बालिनश्च बधः पश्चात् सीतान्वेषणमेव च ।

सेतुबन्धश्च जलधौ लङ्कायाश्च निरोधनम् ।।

रावणस्य बधो युद्धे सपुत्रस्य दुरात्मनः ।।

एवमादीनि कर्माणि मयैवाचरितान्यपि ।

आरोपयन्ति रामेऽस्मिन् निर्विकारेऽखिलात्मनि ।।

परे ब्रह्मणि पूर्णे च कान्ते राजीवलोचने ।। इति ।

एवं ब्रह्मरामायणवसिष्ठरामायणभुशुण्डिरामायणादिबहुपुराणप्रसिद्धं कृष्णवद्रामस्य पूर्णैश्वर्यम् । उत्तरतापिन्याञ्च[1098] —

अर्द्धचन्द्रात्मकरामो ब्रह्मानन्दात्मविग्रहः । इति ।

इदं रामतत्त्वप्रकाशे बहूक्तम् । यद्यपि श्रीरामस्याल्पविष्णुत्वं वाल्मीक्याद्यल्पग्रन्थसम्मतं तथापि कल्पान्तरकृतं तद् बहुपुराणविरोधादकिञ्चित्करम् । अतएव सबलश्रीकृष्णस्यापि नारायणश्वेतकृष्णरोमरूपत्वस्य क्वचित्कथनेऽपि नास्य कलावतारत्वशङ्का । बहुग्रन्थविरोधेनाल्पसिद्धस्यानादेयत्वात् । यदुक्तम् —

चरितं रघुनाथस्य शतकोटिप्रविस्तरम् । इति ।

यतो विनिर्गताश्चांशा विस्फुलिङ्गा इवारणेः ।
बलकृष्णादयः सर्वेऽप्यवतारपदं मताः ।।
अवतारी स्वयं रामः सर्वांशानां निधिः परः ।
कस्तस्य महिमानञ्च वक्तुं शक्नोति दैवतः ।। इति ।

1097- अध्यात्मरामायणे बालकाण्डे (1/35, 37, 40, 41, 42) ।

1098- रामोत्तरतापिन्युपनिषदि (श्लोकः- 2) वचनं यथा—
प्रद्युम्नात्मकस्तु भरतो मकाराक्षरसम्भवः ।
अर्द्धमात्रात्मको रामो ब्रह्मानन्दैकविग्रहः ।। इति ।

एवं नृसिंहस्य

आविर्भूतो महाविष्णुरर्द्धास्तमितभास्करः ।

इति नृसिंहजयन्त्यां महत्पदोक्त्या

सत्यज्ञानसुखस्वरूपममलं क्षीराब्धिमध्यस्थितं

छत्रीभूतफणीन्द्रमिन्दुधवलं लक्ष्मीनृसिंहं भजे ।

इति ध्याने च सत्यज्ञानानन्दात्मकब्रह्मत्वसूचनेन पूर्णैश्वर्यमानेयम् । अधिकं नृसिंहपुराणादावुन्नेयमस्य पूर्णत्वम् । तथाहि तत्र[1099] —

वसुदेवाच्च देवक्यामवतीर्य यदोः कुले ।

सितकृष्णे च मच्छक्ती कंसादीन् घातयिष्यतः ॥

नृसिंहागमेऽपि—

सहस्रचन्द्रप्रतिमो दयालुर्लक्ष्मीमुखालोकनलोलनेत्रः ।

दशावतारैः परितः परीतो नृकेशरी मङ्गलमातनोतु ॥

इत्यादि । एवमेतत्त्रयाणां पूर्णैश्वर्यसाम्येऽपि मानुषमधुरलीलावशात् सत्त्वोद्रेकाच्च रामकृष्णावुपास्यतरौ । तद्द्वयोस्तु भजने इच्छा नियामिका । तदुक्तं भक्तिप्रदीपे—

यस्यां मूर्त्तौ यस्य दृढतरविश्वासः सैवोपास्या । इति ।

अथवा राम त्वत्तोऽधिकं नाम इति मे निश्चिता मतिः ।

त्वयैका तारि अयोध्या नाम्ना तु भुवनत्रयम् ॥

इति भक्तपक्षपाताधिक्यादल्पसेवया बहुफललाभाच्च श्रीराम एवोपास्यः । तथा च विभीषणं प्रति श्रीरामवचनं लङ्काकाण्डे[1100] —

सकृदेव प्रपन्नाय तवास्मीति च याचते ।

अभयं सर्वसत्त्वेभ्यो ददाम्येतद्व्रतं मम ॥ इति ।

शिष्टैरप्युक्तम्—कलात्मा कूर्मादिर्भगवदवतारो भृगुपतिहरेश्चावेशः प्राग्यदपि

1099- देवक्यां वसुदेवाच्च अवतीर्य महीतले ।
इति मुद्रितनरसिंहपुराणे (53/32) मार्कण्डेयवचने पाठः ।

1100- मुद्रितवाल्मीकिरामायणे युद्धकाण्डे (18/33, 34) "सर्वसत्त्वेभ्यो"-स्थाने "सर्वभूतेभ्यो" इति पाठः ।

समभूद्राघव इव । न कोऽप्यासीदेकादशशतसहस्राणि शरदः स्वभक्तानुग्राही भुवनभवनं पूर्णविभवः । इति ।

सनकश्रीब्रह्मरुद्रैः सम्प्रदायचतुष्टयम् ।

इति चतुर्धा वैष्णवदीक्षा । सनकसम्प्रदायः कृष्णोपासकानाम् । श्रीसम्प्रदायिनश्च लक्ष्मीनारायणोपासकाः सीतारामोपासकाश्चेति द्विधा । ब्रह्मसम्प्रदाया माध्वाः । एवं रुद्रेण कृतो वैष्णवसम्प्रदायस्तथा । एकविष्णुनिष्ठो नान्यत्रयवत् तत्पत्नीयुग्मकृतः । तथाच वैष्णवपरम्परावाक्यम्—

न मनुजानां सनकः श्रीनारायणरामयोः ।
माध्वानामब्जयोनिश्च विष्णुस्वामिनि शङ्करः ॥ इति ।

यद्यप्यव्यक्तविष्णूपासनाऽस्ति तथापि सा बहुक्लेशा ।

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।[1101]

इति गीतावचनात् । एवं रामकृष्णादीनामुत्पत्तिनाशवचनानामाविर्भावतिरोभावपर्यवनान्नित्यत्वमित्याद्यधिकं भक्तिसर्वस्वे निर्णीतमित्युपरमते । नन्वेवं विष्णुभिन्नोपासनायां दोषात् कथं ज्ञानिनोऽप्यवैष्णवा भवन्तीति चेत् पूर्वपूर्वपापदुर्वासनावशादिति गृहाण । तदुक्तं नामकौमुद्याम्[1102]—"दुर्वारवासनावासितचेतसः प्रायेण विष्णुपराङ्मुखा एव पुरुषाः ।" ईश्वरस्य सर्वत्र सादृश्यक्रियौचित्येऽपि शुभाशुभादृष्टदानं संसारप्रवर्त्तनार्थमित्यपि केचित् इति ।

1101- श्रीमद्भगवद्गीतायां (12/5) भगवद्वचनं यथा—

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥ इति ।

1102- भगवन्नामकौमुद्यां तृतीयपरिच्छेदे (धारा-155) लक्ष्मीधरगोस्वामिना विचार्यते यथा—तत्र समाधिः—एकत्रैव प्रवृत्तिनियमोऽन्यत्र प्रवृत्तिं प्रतिबध्नाति । न च कीर्त्तने प्रवृत्तिनियमः, अश्रद्धोपहतत्वात् प्रायेण पुरुषबुद्धीनाम् । साङ्केत्यनिबन्धना प्रवृत्तिर्न नियन्तुं शक्यते । तस्मादस्त्येवावकाशः स्मृतीनाम् । दृश्यते च सुकरदुष्करयोर्विकल्पो वैद्यकेषु । अत्र च किञ्चित् सुकरमपि कस्मैचित् स्वभावादेव न रोचते । अतस्तदर्थं दुष्करमपि चिकित्सान्तरं विधीयते । तद्वदिहापि दुर्वारदुर्वासनावासितचेतसः प्रायेण पराङ्मुखा एव पुरुषोत्तमात् पुरुषाः ; तदर्थं प्रायश्चित्तान्तरविधानम् । इति ।

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।[1103]

इति वचनात् ।

भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ।[1104]

इति गीतावाक्याच्च ।

यस्तु नारायणं देवं ब्रह्मरुद्रादिदैवतैः ।

समत्वेन निरीक्षेत स पाषण्डी भवेत् सदा ।।[1105]

श्रुतिस्मृती ममैवाज्ञे तमतिक्रम्य वर्त्तते ।

आज्ञाच्छेदी मम द्रोही मद्भक्तोऽपि न वैष्णवः ।।

इत्यादेरुक्तत्वात् सन्ध्याऽग्निहोत्रपञ्चदेवतापूजादयः स्वस्वजात्युक्तगृहिवैष्णवानामत्याज्याः । एकादशीजयन्तीरामनवम्यादयो वैष्णवग्रन्थस्थिताः पूर्वविद्धाः हेयाः । एवमन्यस्मार्त्तवैलक्षण्यमुन्नेयम् । क्वचित् तत्साम्यञ्च ।

निर्माल्यं शिरसा धार्यं त्वदीयं सादरं मया ।[1106]

इति स्कान्दे वैष्णवप्रतिज्ञानान्नित्यं विष्णुनिर्माल्यधारणञ्च ।

यत्करोषि यदश्नासि यज्जुहोसि ददासि यत् ।

यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ।।[1107]

इति गीतावाक्यात् सर्वं हरौ समर्प्यम् ।

भुक्त्वाऽन्यदेवनैवेद्यं द्विजश्चान्द्रायणं चरेत् ।[1108]

1103- श्रीमद्भगवद्गीतायां (7/14) वचनं यथा—

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।

मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ।। इति ।

1104- तत्रैव (18/61) सम्पूर्णं भगवद्वचनं यथा—

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन ! तिष्ठति ।

भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ।। इति ।

1105- हरिभक्तिविलासे (1/117) "समत्वेनैव वीक्षेत" इति पाठः ।

1106- तव दत्त्वा यदिष्टं तु भक्षणीयं मुदा मया ।

इति तत्रैव (10/493) स्कान्दे काशीखण्डे चन्द्रशर्मवचने उत्तरार्द्धम् ।

1107- श्रीमद्भगवद्गीतायाम् (9/27) ।

1108- भुक्त्वा केशवनैवेद्यं यज्ञकोटिफलं लभेत् ।

इति हरिभक्तिविलासे (9/397) स्कान्दवचने उत्तरार्द्धपाठः ।

यद्यपि वाजपेयिभिर्विधिनैवेद्यमपि द्विजभक्ष्यमुक्तं तथापि तद् वैष्णवनिषिद्धम् ।

पत्रं पुष्पं फलं तोयमन्नपानाद्यमौषधम् ।
अनिवेद्य न भुञ्जीत यदाहाराय कल्पितम् ॥

इति बृह्माण्डात्[1109]

अन्नं विष्ठा पयो मूत्रं यद्विष्णौ न निवेदितम् ।

इति तन्त्रसारस्थवचनाच्च सर्वं हरिनिवेदितमेव भोज्यमिति नियमविधिः । पूजाकृतिनिवेदनाशक्तौ मनसा तन्निवेदनम् । एवं भोजनमध्ये प्राप्तभक्ष्येऽपि । एवं गृहासनावासोऽलङ्कारादेरपि ह्यर्पणम् । अर्पणमन्त्रो यथा—

कामतोऽकामतो वाऽपि यत् करोमि शुभाशुभम् ।
तत्सर्वं त्वयि संन्यस्तं त्वत्प्रयुक्त्या करोम्यहम् ॥

यद्यपि स्वपूजाकृतविष्णुनैवेद्यं पूजावैगुण्याय स्वाभक्ष्यमिति वाजपेयादिभिरुक्तं तथापि तद्वैगुण्याल्पदोषो विष्णुनैवेद्याशनफलभूम्ना कूपखानकन्दायान्निरस्यत एव । तस्मात् परालाभे स्वपूजाकृतविष्णुनैवेद्यमपि स्वभक्ष्यमिति सिद्धम् ।

मुकुन्दाशनशेषन्तु यो हि भुङ्क्ते दिने दिने ।
सिक्थे सिक्थे भवेत् पुण्यं चान्द्रायणशतोद्भवम् ॥

इति बृह्माण्डात्[1110] । "अपूजी पूयशोणिताम"ति[1111] हरिपूजाया नित्यत्वात् । यद्वा नित्यपूजाकृतनैवेद्यं पूजावैगुण्याय माऽस्तु स्वभक्ष्यम् । द्वितीयादिपूजाकृतनैवेद्याशने तु क्षयभावः ।

यो माऽनर्घ्यं नरो भुङ्क्ते भविता तस्य गौरवम् ।

इत्येकाम्रपुराणे भुवनेश्वरनैवेद्यस्य विष्णुदेयत्वान्न लिङ्गं भुवनेश्वर इति तस्य शिवत्वनिषेधपूर्वकविष्णुत्वातिदेशाच्च लिङ्गराजनैवेद्यं स्मार्त्तवैष्णवभक्ष्यं

1109- तत्रैव (3/338) धृतः पाठः । मुद्रितबृह्माण्डपुराणे तु नास्ति ।
1110- तत्रैव (9/407) "चान्द्रायणशताधिकम्" इति धृतः पाठः । मुद्रितबृह्माण्डपुराणे तु वचनमिदं नोपलभ्यते ।
1111- कृत्यकल्पतरौ नियतकालकाण्डे (पृ 217) जाबालिवचनं यथा—

अस्नाताशी मलं भुङ्क्ते अजपी पूयशोणितम् ।
अहुत्वा च कृमीन् भुङ्क्ते अदत्त्वा विषभोजनम् ॥ इति ।

प्रतीयते । तप्तमुद्राधारणं पारम्परिकं वैकल्पिकमिति नारायणभट्टादयः । तद् वक्ष्यते । शीतलमुद्राधृतिस्तु बहुसिद्धा ।

वाशिष्ठञ्चैव हारीतं व्यासं पाराशरं तथा ।
भारद्वाजं काश्यपञ्च सात्त्विका मुक्तिदाः शुभाः ॥
बार्हस्पत्यं गौतमञ्च सावर्णञ्च यामः स्मृतः ।
शाङ्खं वैखानसञ्चैव तामसा निरयप्रदाः ॥

मतविरोधे एषां क्रमाद्दौर्बल्यम् , न तु विकल्पः । अतुल्यत्वात् । स्नानीयजलं सरयुत्वेन सञ्चिन्त्य वैष्णवैः श्रीवैष्णवैर्वा गार्ग्योक्तसरय्वष्टकं पठनीयम् । तद्यथा—

जननि सरयुदेवि त्वज्जलं ब्रह्मलोकात्
क्षितितलमुपनीतं ब्रह्मपुत्रर्षभेण ।
विमलतनुविशिष्टेनात्मनो योगसिद्ध्यै
रघुवरकुलवृद्ध्यै रामगङ्गे प्रसीद ॥
त्वदभिसरणमात्राज्जन्तवः सर्व एते
सरयु जयजयेति ध्यानमन्त्रं पठन्तः ।
परमपदमृषीन्द्रैरर्थ्यमानं वरेण्यं
विगतविषयशोका निर्विशेषं विशन्ति ॥
कैलासाश्रमवासिनो भगवतः श्रीचन्द्रमौलेः पुरा
भक्तं वीक्ष्य कपर्दकं सुरगजैर्षांग यदाप्तं जलम् ।
तत्कालं विधिपात्रतो मुनिवरैरानीय संस्थापितं
शम्भौ सन्निहिते जलं तदमलं ख्यातं सुरैः सारवम् ॥
तद्वाशिष्ठजलं त्वदीयममलं संस्थापितं नित्यशः
श्रीरामेण मनस्विना स्वनगरं संवीक्ष्य तत्रोज्झितुम् ।
ब्रह्मैकान्तनितान्तसंस्थितमतौ पूज्ये वशिष्ठेऽर्थितम्
तेन श्रीशिवसन्निधेरुपगतं प्राप्तं पृथिव्यां पुनः ॥
भगवति ! तव तीरेऽयोध्यया वद्धनीरे कुसुमितकरवीरे शुद्धसौगन्धयसारे ।
यदि पतति पतङ्गस्त्वपत्यः प्राप्तपूरे स वहति विगतेर्वो दिव्यरूपं शरीरे ॥

सकलकलुषहन्त्री स्वर्गसोपानकर्त्री सुरपथमनुगन्त्री ब्रह्महत्यादिहन्त्री ।
सकलसुखविधात्री सिद्धिदात्री नराणां जयतु जयतु देवी श्रीवशिष्ठस्य पुत्री ॥

वाशिष्ठे त्वत्तटाम्भः कणमणुपरिमाणं ये जना भक्षयन्ति
येऽमी जीवाः स्पृशन्ति प्रतिदिनमभयास्तत्क्षणाद्यान्ति सिद्धिम् ।

भूलोके नागलोके सुरपतिसदने त्वत्कथाकीर्त्तनेन
स्नातः प्रातः प्रयातः प्रमितिमिति वचः कोऽपि कैवल्यधाम ॥

त्वत्सङ्गे नाम भृङ्गी भवति शुभतनुः कीर्त्तिमान् सैकतान्ते
त्वत्पुरे पूर्णभाग्यो भवति नरवरः कर्मकाण्डप्रसक्तः ।

शृङ्गी भृङ्गी पतङ्गी यदि पतति जले कुञ्जरोऽश्वः शृगालः
सर्वे मुक्तात्मदेहाः सुरपतिसदने दिव्यदेहं लभन्ते ॥

स्तोत्रमेतच्च गार्ग्योक्त सरय्वष्टकमद्भुतम् ।
यः पठेत् प्रयतो नित्यं सर्वसिद्धिमवाप्नुयात् ॥

इति सरय्वष्टकं समाप्तम् । भ्रातुरन्तकस्य पत्तने विपत्तिदारिणीत्यादिसनातनाद्युक्तयमुनाष्टकपाठे पौरुषेयत्वात् फलाभावः ।

श्रुतिस्मृत्युदितं सम्यङ्नित्यमाचारमाचरेत् ॥[1112]

इति याज्ञवल्क्यात् । अन्यथाऽस्मदादिकृतस्तोत्रस्यापि वाल्मीक्यादिकृतगङ्गाष्टकसाम्यापत्तिरिति सङ्क्षेपः ।

सूक्ष्मतुलसीमालया गलबन्धनं च कार्यम् ।

तुलसीकाष्ठमालां तु कण्ठलग्नां वहेत्तु यः ।
अशुचिर्वाप्यनाचारो मामेवैति न संशयः ॥[1113]
धारयन्ति न ये मालां तुलसीकाष्ठसम्भवाम् ।

1112- याज्ञवल्क्यस्मृतौ स्नातकधर्मप्रकरणे (1/154) वचनं यथा—
दूरादुच्छिष्टविण्मूत्रपादाम्भांसि समुत्सृजेत् ।
श्रुतिस्मृत्युदितं सम्यङ्नित्यमाचारमाचरेत् ॥ इति ।

1113- हरिभक्तिविलासे (4/322) विष्णुधर्मोत्तरवचनं यथा—
तुलसीकाष्ठमालाञ्च कण्ठस्था वहते तु यः ।
अप्यशौचोऽप्यनाचारो मामेवैति न संशयः ॥ इति ।

नरकान्न निवर्त्तन्ते दग्धाः शापाग्निना हरेः ॥[1114]

तथा तुलसीकाष्ठसम्भूता माला धार्या सदा मया ।[1115]

इति स्कान्दादौ सदाऽशुच्यादिपददर्शनात् ।

निवेद्य केशवे मालां तुलसीकाष्ठसम्भवाम् ।
वहते यो नरो नित्यं तस्य वै नास्ति पातकम् ॥[1116]

इति वचनात् सा विष्णवङ्गलग्नैव कण्ठे धार्या । प्रह्लादसंहितायाम्—

तुलसीकाष्ठसम्भूतां यो मालां वहते नरः ।
प्रायश्चित्तं न तस्यास्ति नाशौच तस्य च ग्रहे ॥[1117]

यदि तु शयने भोजने चैव मलमूत्रविसर्जने ।
तुलसीं धारयेद्यस्तु विष्णुद्रोही भवेन्नरः ।
तुलसी धार्यते कण्ठे मलमूत्रविसर्जने ।
नरके पच्यते मूढो यमदण्डेन पीडितः ॥
स्नानकाले यदा कण्ठे तुलसीदामभूषितः ।
तद्वारिपतितौ पादौ स पापिष्ठो नराधमः ॥

इत्यादि वचनान्यन्विष्यन्ते तदा शयनमैथुनभोजनाद्यशौचकाले तुलसीमाला-धारणे वैष्णवानां विकल्पः । अत एव वृद्धाः

यज्ञोपवीतवद्धार्याः शङ्खचक्रादयः सदा ।[1118]

1114- नित्याचारप्रदीपे (प्र० भा० पृ.पृ-52-53) "शापाग्निना" स्थाने "कोपाग्निना" इति धृतः पाठः ।

1115- हरिभक्तिविलासे (10/489) स्कान्दे उत्तरार्द्धपाठो यथा—
नृत्यगीतं प्रकर्त्तव्यं सम्प्राप्ते जागरे तव । इति ।

1116- हरिभक्तिविलासे (4/333) गारुड मार्कण्डेयवचने "केशवे"-स्थाने "विष्णवे"-इति पाठः । अपरार्द्धं यथा—
सदा प्रीतमनास्तस्य कृष्णो देवकिनन्दनः । इति ।

1117- तत्रैव (4/334) गारुडे मार्कण्डेयवचने "तस्य विग्रहे"-पाठः ।

1118- नित्याचारप्रदीपे (प्र० भा० पृ-45) वचनं यथा—
उपवीतादिवद्धार्याः शङ्खचक्रादयः सदा ।
ब्राह्मणस्य विशेषेण वैष्णवस्य च तद्भवेत् ॥ इति ।

इति स्थितेऽपि गोपीचन्दनशङ्खचक्रादिकं मलमूत्रादौ प्रोञ्छयन्ति । अन्यथा तप्तमुद्राधारणमपि मालावन्नित्यस्थितं प्रसज्येत । इदमनुसन्धाय सिंहवाजपेयिभिरपि[1119] स्नानानन्तरं सन्ध्यातः पूर्वं तुलसीपद्माक्षादिधारणमुक्तमिति दिक् ।

दीक्षायाः करणं तत्तु स्वेच्छासेवा तु सद्गुरोः [1120]

नियमान् विहितान् वर्ज्यान् श्रावयेच्च चतुःशतम् ॥[1121]

सङ्क्षेपाद् विधिनिषेधा यथा यामले[1122] —

ब्राह्मे मुहूर्त्ते चोत्थानं महाविष्णोः प्रबोधनम् ।

निराजनं च वाद्येन प्रातः स्नानं विधानतः ॥

विशुद्धाहतयुग्वस्त्रधारणं देवताच्चर्नम् ।

गोपीचन्दनमृत्स्नायाः सर्वदा चोर्द्ध्वपुण्ड्रकम् ॥

पञ्चायुधानां विधृतिश्चरणामृतसेवनम् ।

तुलसीमणिमालादिभूषाधारणमन्वहम् ।

निर्माल्योद्वासनं विष्णोस्तच्चन्दनविलेपनम् ॥

1119- नित्याचारप्रदीपे (प्र० भा०-पृ-358) नरसिंहवाजपेयी स्नानानन्तरं वस्त्रपरिधानपादप्रक्षालनतिलकग्रहणात् परं कथयति यथा—तथा × × × रुद्राक्षधारणम् । पद्माक्षधारणम् । तुलसीकाष्ठमालाधारणम् । विष्णोनिर्माल्यधारणम् । × × × पवित्रोपग्रहकुशधारणञ्च परिभाषोक्तरीत्या । अथ सन्ध्या । इत्यादि ।

1120- हरिभक्तिविलासे (2/33) तत्त्वसागरवचनं यथा—

यदैवेच्छा तदा दीक्षा गुरोराज्ञानुरूपतः ।

न तीर्थं न व्रतं होमो न स्नानं न जपक्रिया ।

दीक्षायाः करणं किन्तु स्वेच्छाप्राप्ते तु सद्गुरौ ॥ इति ।

1121- तत्रैव (2/149) विष्णुयामलवचने पूर्वार्द्धं यथा—

गुरुः परीक्षयेच्छिष्यं संवत्सरमतन्द्रितः । इति ।

1122- तत्रैव (2/150-164) विष्णुयामलवचने "तान्त्रिकी पुजा"-स्थाने "तान्त्रिकी सन्ध्या", "विष्णुभक्त्यविरुद्धा या"-स्थाने "विष्णुभक्त्यविरोधेन", "तुलसीं पूजयेत्"-स्थाने "तुलसीपूजनं", "यथार्थ"-स्थाने "यथास्व", "रामस्कन्दादि"-स्थाने "रामादीनाञ्च" इति पाठः ।

शालग्रामशिलापूजा प्रतिमासु च भक्तितः ।
निर्माल्यतुलसीभक्ष्यस्तुलस्यवचयो विधेः ॥
विधिना तान्त्रिकी पूजा शिखाबन्धो हि कर्मणि ।
विष्णुपादोदकेनैव पितॄणां तर्पणक्रिया ।
महाराजोपचारैश्च शक्त्यां संपूजनं हरेः ॥
विष्णुभक्त्यविरुद्धा या नित्यनैमित्तिकी क्रिया ।
भूतशुद्ध्यादिकरणं न्यासाः सर्वे यथाविधि ॥
नवीनफलपुष्पादेर्भक्तितः संनिवेदनम् ।
तुलसीं पूजयेन्नित्यं श्रीभागवतपूजनम् ॥
त्रिकालं विष्णुपूजा च पुराणश्रुतिरन्वहम् ।
विष्णोर्निवेदितानां वै वस्त्रादीनाञ्च धारणम् ॥
सर्वेषां पुण्यकार्याणां स्वामिदृष्ट्या प्रवर्त्तनम् ।
गुर्वाज्ञाग्रहणं तत्र विश्वासो गुरुणोदिते ॥
यथार्थमुद्रारचनं गीतनृत्यादि भक्तितः ।
शङ्खादिध्वनिमाङ्गल्यलीलाद्यभिनयो हरेः ।
नित्यहोमविधानञ्च बलिदानं यथाविधि ॥
साधूनां स्वागतं पूजाशेषनैवेद्यभोजनम् ।
ताम्बूलशेषग्रहणं वैष्णवैः सह सङ्गमः ॥
विशिष्टधर्मजिज्ञासा दशम्यादिदिनत्रये ।
व्रते नियमतः स्वास्थ्यं सन्तोषो येन केन वै ॥
पर्वयात्रादिकरणं वासराष्टकसद्विधिः ।
विष्णोः सर्वर्त्तुचर्या च महाराजोपचारतः ॥
सर्वेषां वैष्णवानाञ्च व्रतानां परिपालनम् ।
गुरावीश्वरभावश्च तुलसीसङ्ग्रहः सदा ॥
शयनाद्युपचारश्च रामस्कन्दादिचिन्तनम् ॥

इत्याद्या विधयः । निषेधा यथा तत्र यामले[1123] —

सन्ध्ययोः शयनं नैव न शौचं मृत्तिकां विना ।

तिष्ठताचमनञ्चैव तथा गुर्वासनासनम् ॥
गुर्वग्रे पादविस्तारश्च्छायाया लङ्घनं गुरोः ।
शक्तौ स्नानक्रियाहानिर्देवतार्च्चनलोपनम् ॥
देवतानां गुरूणाञ्च प्रत्युत्थानाद्यभावनम् ।
गुरोः पुरस्तात् पाण्डित्यं प्रौढपादक्रिया तथा ॥
अमन्त्रतिलकाचामो नीलीवस्त्रविधारणम् ।
अभक्तैः सह मैत्रादि असच्छास्त्रपरिग्रहः ।
तुच्छसङ्गसुखासक्तिर्मद्यमांसनिषेवणम् ॥
मादकौषधिसेवा च मसूराद्यन्नभोजनम् ।
शाकं तुम्बीकलञ्जादि तथाऽभक्तान्नसङ्ग्रहः ।
अवैष्णवव्रतारम्भस्तथा जप्यमवैष्णवम् ॥
अभिचारादिकारित्वं शक्त्या गौणोपचारकम् ।
शोकादिपारवश्यञ्च दिग्विद्धैकादशीव्रतम् ॥
शुक्लाकृष्णाविभेदश्चासद्व्यापारो व्रते तथा ।
शक्तौ फलादिभुक्तिश्च श्राद्धं चैकादशीदिने ॥
द्वादश्याञ्च दिवास्वापस्तुलस्यवचयस्तथा ।
तत्र विष्णोर्दिवा स्नानं श्राद्धं ह्यनिवेदितैः ॥
वृद्धाव्रतुलसीश्राद्धं तथा श्राद्धमवैष्णवम् ।
चरणामृतपानेऽपि शुद्ध्यर्थाचमनक्रिया ॥
काष्ठासनोपविष्टेन वासुदेवस्य पूजनम् ।
पूजाकाले सदाऽऽलापः करवीरादिपूजनम् ॥
आयसं धूपपात्रादितियक्पुण्ड्रं प्रमादतः ।
पूजा चासंस्कृतैर्द्रव्यैस्तथा चञ्चलचित्तता ॥
एकहस्तप्रणामादि अकाले स्वामिदर्शनम् ।

1123- तत्रैव (2/165 179) विष्णुयामलवचने "अभिचारादिकारित्वं"-स्थाने "अभिचारादिकरणं", "वैष्णवस्तथा"-स्थाने "वैष्णवः सदा" इति धृतः पाठः ।

पर्युषितादिदुष्टानामन्नादीनां निवेदनम् ॥
सङ्ख्यां विना मन्त्रजपस्तथा मन्त्रप्रकाशनम् ।
सदा शक्त्यां मुख्यलोपो गौणकालपरिग्रहः ॥
प्रसादाग्रहणं विष्णोर्वर्जयेद् वैष्णवस्तथा ।
चतुःशतं विधीनेतान्निषेधान् श्रावयेद् गुरुः ॥
अङ्गीकारे कृते वाढं तन्नीराजनपूर्वकम् ।
देवपूजां कारयित्वा दक्षकर्णे मनुं जपेत् ॥

अन्येऽपि विधिनिषेधा यथा कौर्मे[1124] —

वृन्ताकं नालिकाशाकं सुकुसुम्भाश्मकं तथा ।
पलाण्डुं लशुनं शुक्तं निर्यासं चैव वर्जयेत् ॥

वृन्ताकं चलणा इति फलं कर्कटीतुल्यम् । निर्यासं हिङ्गुभिन्नम् । स्कान्दे[1125] —वार्त्ताकुबृहती चैव दग्धमन्नं मसूरकम् ।
यस्योदरे प्रवर्त्तन्ते तस्य दूरतरो हरिः ॥

नारदपञ्चरात्रे[1126] —

न भक्षयेन्मत्स्यमांसं कूर्मसूकरयोस्तथा ॥
कांस्यपात्रे न भुञ्जीत न पद्मवटपत्रयोः ।
देवागारे न निष्ठीवेत् क्षुतश्चात्र विवर्जयेत् ॥

मत्स्यकूर्मवराहाणामवतारत्वात्त्यागः, हर्यदेयत्वाद्वा । केचित्तु विष्णो

1124- मुद्रितकूर्मपुराणे वचनमिदं नोपलभ्यते । किन्तु तत्र उत्तरार्द्धे (34/19, 20) वृन्ताकादिभक्षणे प्रायश्चित्तमुक्तम् । तद्यथा—
वृन्ताकं भूस्तृणं शिग्रुं कुटकं चटकं तथा ।
प्राजापत्यं चरेज्जग्ध्वा खड्गं कुम्भीकमेव च ॥
पलाण्डुं लशुनञ्चैव भुक्त्वा चान्द्रायणं चरेत् ।
नालिकां तण्डुलीयञ्च प्राजापत्येन शुध्यति ॥ इति ।

1125- हरिभक्तिविलासे (8/162) स्कान्दभिन्नवचनमेतत् ।

1126- तत्रैव (2/144, 145) नारदपञ्चरात्रभिन्नवचने "कूर्मशूकरकान्" इति प्रथमश्लोकपाठः । द्वितीयश्लोकान्तेऽधिकपाठो यथा—
न सोपानत्कचरणः प्रविशेदन्तरं क्वचित् । इति ।

रोहितरूपत्वेनाशक्तानां रोहितमात्रवर्जनमाहुः । यथा दशावतारलक्षणे हयशीर्षपञ्चरात्रम्[1127]—

रोहितं विवृतास्यन्तु द्वादशाङ्गुलमानतः ।
कृतस्यैवंविधस्येह रोहितस्य मुखोद्गतम् ॥ इति ।

अन्यमांसानां विष्णवदेयत्वेन त्यागौचित्येऽप्यशक्तानां मतान्तरे नृसिंहदत्तात्रेयदेयत्वात् खादनम् । वस्तुतस्तु

गृहेऽपि निवसन् विप्रो मुनिर्मांसस्य वर्जनात् ।[1128]

इति मांसत्यागो युक्तः ।

हिरण्यं राजतं ताम्रं कांस्यं मृण्मयमेव च ।
पालाशं पद्मपत्रञ्च पात्रं विष्णोरतिप्रियम् ॥[1129]

इति कांस्यपद्मपत्रयोर्विष्णुप्रियत्वेऽपि वचनाद्वैष्णवाभक्ष्यत्वम् । आगमे[1130] च—

यानै र्वा पादुकाभिर्वा गमनं भगवद्गृहे ।
देवोत्सवाद्यसेवा च अप्रणामस्तदग्रतः ॥

1127- हरिभक्तिविलासे (18/216-218) हयशीर्षपञ्चरात्रवचनं यथा—
अतः परं प्रवक्ष्यामि मत्स्यादीनां तु लक्षणम् ।
षट्त्रिंशदङ्गुलायामं तदर्द्धेन तु विस्तृतम् ॥
दैर्घ्याष्टमांशसंयुक्तं पुच्छवक्त्रं तु कारयेत् ।
रोहितं विवृतास्यं तु द्वादशाङ्गुलमानतः ।
कलैकं पृष्ठरोमं तु तुच्छार्द्धं क्रोडगं तथा ॥
कृतस्यैवंविधस्यैव रोहितस्य मुखोद्गतम् ।
नारायणं तु कुर्वीत आगुल्फं तन्मुखोद्गतम् ॥ इति ।

1128- याज्ञवल्क्यस्मृतौ भक्ष्याभक्ष्यप्रकरणे (1/181) वचनं यथा—
सर्वान् कामानवाप्नोति हयमेधफलं तथा ।
गृहेऽपि निवसन् विप्रो मुनिर्मांसविवर्जनात् ॥ इति ।

1129- हरिभक्तिविलासे (8/115) स्कान्दे ब्रह्मनारदसंवादे पूर्वार्द्धं यथा—
नैवेद्यपात्रं वक्ष्यामि केशवस्य महात्मनः । इति ।
अवशिष्टांशे "हिरण्यं"-स्थाने "हैरण्यं" इति पाठः ।

1130- तत्रैव (8/441-448) "पादुकाभिर्वा"-स्थाने "पादुकैर्वाऽपि", "वन्दनादिकं"-स्थाने "दर्शनादिकम्" इति धृतः पाठः ।

उच्छिष्टे वाऽथवाऽशौचे भगवद्वन्दनादिकम् ।
एकहस्तप्रणामश्च तत्पुरस्तात् प्रदक्षिणम् ॥
पादप्रसारणञ्चाग्रे तथा पर्यङ्कबन्धनम् ।
शयनं भक्षणञ्चापि मिथ्याभाषणमेव च ॥
उच्चैर्भाषा मिथो जल्पो रोदनादि च विग्रहः ।
निग्रहानुग्रहौ चैव नृषु च क्रूरभाषणम् ।
कम्बलावरणञ्चैव परनिन्दा परस्तुतिः ॥
अश्लीलभाषणञ्चैव अधोवायुविमोक्षणम् ।
शक्तौ गौणोपचारश्च अनिवेदितभक्षणम् ॥
तत्तत्कालोद्भवानाञ्च फलादीनामनर्पणम् ।
विनियुक्तावशिष्टस्य प्रदानं व्यञ्जनादिके ॥
पृष्ठीकृत्यासनञ्चैव परेषामभिवादनम् ।
गुरौ मौनं निजस्तोत्र देवतानिन्दनं तथा ॥
अपराधास्तथा विष्णोर्द्वात्रिंशत् परिकीर्त्तिताः ॥

द्वात्रिंशदित्युपलक्षणम् । तदग्रक्रीडाक्षुतादीनामप्यपराधत्वात् । स्वाम्यनुचिताचारो ह्यपराधः । अपराधशान्त्यै सहस्रसङ्ख्यं सम्बुद्ध्यन्तजगन्नाथकीर्त्तनम् ।

जगन्नाथेति मन्नाम कीर्त्तयिष्यन्ति ये नराः ।
अपराधशतं तेषां क्षमिष्ये नात्र संशयः ॥

इति वचनात् । गीतैकाध्यायपाठो वा । एतच्चापराधसंशयेऽपि कार्यम् । फलसंशयेऽपि कृष्यादौ प्रवृत्तेः । शिवादीनामप्येवम् । एवं स्वयं मद्यपेतरशूद्राणां विष्णुदीक्षाग्रहे तेभ्यो जलादिभक्षणं शिष्टानामदुष्टम् ।

यथा काञ्चनतां याति कांस्यं रसविधानतः ।
तथा दीक्षाविधानेन द्विजत्वं जायते नृणाम् ॥[1131]

पाद्मेऽपि—अर्च्ये विष्णौ शिलाधीगुरुषु नरमतिर्वैष्णवे जातिबुद्धि-
विष्णौ वा वैष्णवानां कलिकलिमथने पादतीर्थेऽम्बुबुद्धिः ।

1131- हरिभक्तिविलासे (2/12) तत्त्वसागरसंहितावचनमेतत् ।

कंसारेर्नाम्नि सेवा सकलकलुषहे शब्दसामान्यबुद्धि-
र्विष्णौ सर्वेश्वरे चेत्तदितरसमधीर्यस्य वा नारकी सः ।।
वैष्णवो लोकबाह्योऽपि पुनाति भुवनत्रयम् ॥
"शूद्रं वा भगवद्भक्तं निषादं श्वपचं तथा ।
वीक्षते जातिसामान्यात् स याति नरकं ध्रुवम् ।।[1132]

अतः सन्यासिवत्तस्य सर्वोत्तमत्वमिति । एवं म्रियतेऽप्यभक्ष्यजलकैवर्त्तश्वपचादिवैष्णवेभ्यो दम्भिहेतुकदीक्षादिशङ्कया शिष्टैर्निर्जलाशनस्पर्शनादिकं कार्यम् । एवं वैश्वदेवश्राद्धाद्यधिकारिशूद्रशिष्यैरपि वैष्णवगुरोरुच्छिष्टं नाशनीयम् । शूद्राह्निकादौ दोषकथनात् । स्वयं मद्यपस्य तु वैष्णवदीक्षा निषिद्धा ।

मद्यपस्तु समासाद्य मम कर्मपरायणः ।
एकजन्म भवेद् गृध्रश्चण्डालः सप्तजन्मसु ।।

इति स्कान्दात् । विष्णुदीक्षानन्तरं सुरापानेऽपि पातित्यम् ।

दीक्षितः पिबते मद्यं प्रायश्चित्तं न विद्यते ।

इति वचनात् । परन्त्वीदृशान्नं व्युत्क्रमेण हरिनामोपदेशो मुक्तिरिति केचित् । दीक्षितः कृतवैष्णवमन्त्रोपदेशः । मद्यपकुलजस्यापि स्वयं ज्ञानकृतमद्यानशने तु स्यादेव विष्णुदीक्षा । 'शूद्रस्तूष्णीं जपन्भूमी'त्यादिना पूर्वं द्विजवत् शूद्रस्यापि विष्णुदीक्षासूचनात् । एवं सच्छूद्रवैष्णवस्त्रीणां शालग्रामार्च्चनमपि विहितम् ।

ब्राह्मणक्षत्रियविशां सच्छूद्राणामथापि वा ।
शालग्रामेऽधिकारोऽस्ति नान्येषाञ्च कदाचन ।।

इति[1133] स्कान्दात् । सच्छूद्रा गोपनापितादयः । पाद्मेऽपि[1134] —

अपि पापसमाचाराः कर्मण्यनधिकारिणः ।
शालग्रामार्च्चनाद् वैश्या नैव यान्ति यमालयम् ।।

1132- तत्रैव (10/119) इतिहाससमुच्चये लोमशवचनमेतत् ।

1133-हरिभक्तिविलासे (5/451) "नान्येषाञ्च"-स्थाने "न चान्येषाम्" ।

1134-मुद्रितपद्मपुराणे स्वर्गखण्डे (31/121) "शालग्रामार्च्चकाः" पाठ ।

नारसिंहे[1135]—ब्राह्मणाः क्षत्रिया वैश्याः स्त्रियः शूद्रान्त्यजातयः ।

सम्पूज्यते सुरश्रेष्ठो भक्त्या सिंहवपुर्हरिः ॥

परन्तु स्त्रीशूद्राणां स्पर्शवती पूजा निषिद्धा ।

स्त्रीशूद्रकरसंस्पर्शो वज्रादपि सुदुःसहः ।[1136]

इति वचनात् । नारायणभट्टादयस्तु स्त्रीशूद्रावत्र वैष्णवभिन्नार्थकौ । 'यथा काञ्चनतां याती'त्युक्तदिशा वैष्णवानां शूद्रत्वाभावात् । स्त्रीशूद्रपदं मद्यपतदर्थकं वा । अन्यथा षोडशोपचारे प्रोञ्छानाभरणाद्यसङ्गतिरित्याहुः । तदेवं नित्यनैमित्तिकानुष्ठानपूर्वकं वैष्णवदीक्षाभजनादिकं वैष्णवत्वसम्पादकम् । प्रयोजनञ्च भक्तिद्वाराऽभेदभिन्ना मुक्तिः, न तु केवलं भक्तिः । सुखदुःखाभावान्यतरस्यैव फलत्वेनाराध्यत्वज्ञानरूपायास्तस्यास्तथात्वाभावात् ।

मुक्तिं ददाति कर्हिचित् स न भक्तियोगम् ।

इत्यादिकं तु भक्तेः प्ररोचनापरम् । यद् यद् वाक्ये भक्तेः फलत्वकथनं तत्फलसाधने फलत्वारोपात् । अत एव 'ज्ञानं फलं बिभ्रती'ति विष्णुपुराणोक्तं सिंहवाजपेयिभिरपि स्वकृत-नित्याचारप्रदीपान्ते इयं भक्तेः फलसाधनतोक्ता । इति सङ्क्षेपः ।

अत्र विचार्यते । गीतायाम्—

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।

अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुच ॥[1137]

पाद्मे[1138]—सर्वधर्मोज्झिता विष्णोर्नाममात्रैकजल्पकाः ।

1135- मुद्रितनरसिंहपुराणे वचनमिदं नोपलभ्यते । ब्रह्मपुराणे (119/14) तु उत्तरार्द्धं पठ्यते यथा—

सम्पूज्य तं सुरवरं प्राप्नुवन्ति परां गतिम् । इति ।

1136- हरिभक्तिविलासे (5/454) पूर्वार्द्धपाठो यथा—

ब्राह्मणस्यैव पूज्योऽहं शुचेरप्यशुचेरपि । इति ।

1137- श्रीमद्भगवद्गीतायाम् (18/66) ।

1138- मुद्रितपद्मपुराणे उत्तरखण्डे (71/99, 100) "जल्पकाः"-स्थाने "जल्पिनः", "धर्मेऽपि"-स्थाने "सर्वेऽपि" इति पाठः ।

सुखेन यां गतिं यान्ति न तां धर्मेऽपि धार्मिकाः ॥

धार्मिकाः कृतनित्यनैमित्तिकाचाराः ।

स्मर्त्तव्यः सततं विष्णुर्विस्मर्त्तव्यो न जातुचित् ।

सर्वे विधिनिषेधाः स्युरेतस्यैव विधिंङ्कराः ॥

प्रथमस्कन्धे[1139] —

त्यक्त्वा स्वधर्मं चरणाम्बुजं हरेर्भजन्नपक्वोऽथ पतेत्ततो यदि ।

यत्र क्व वाऽभद्रमभूदमुष्य तत् को वाऽर्थ आप्तो भजतां स्वधर्मतः ॥

इत्यादि । अत्र सिंहवाजपेयिनः— स्वाचारत्यागस्य भ्रमालस्यादिमूलत्वे सत्येव विष्णुभक्तेस्तु दोषनिरासकत्वम्, न तु वुद्धिकृतस्वधर्मत्यागस्य । संन्यासं विना नित्यकर्मत्यागासिद्धेः । न चैतत् संन्यासपरम् । 'अहं त्वा सर्वपापेभ्यः' इत्युत्तरवाक्यसङ्गतेः । तस्मात् सत्त्वावगूर्य विश्वजिता यजेतेत्यादौ यथा अनायत्ततया सत्राकृतौ विश्वजिद् यागानुष्ठाने तद्दोषनाशस्तथा विष्णुभक्ते-र्भ्रमादिति कृतस्वधर्माननुष्ठानदोषनिरसकत्वम् । अवगूरणस्याकामकृत-प्रतिज्ञाभङ्गदोषार्थकत्वात् । यथा वा

नित्यानां कर्मणां लोपे प्रायश्चित्तमभोजनम् ।[1140] इति ।

न च सोमयागप्रत्याम्नातवैश्वानरीयेष्टिवत् स्वधर्मप्रत्याम्नाता हरि-भक्तिरस्त्विवति वाच्यम् । 'न चलति निजवर्णधर्मतो यः', 'वर्णाश्रमा-चारवता', 'निजाचारादविप्लुतः' इत्यादि प्रागुक्तेन विष्णुभक्तेरपि स्वधर्म-रूपत्वेन स्वत्यागे स्वस्य प्रत्याम्नानत्वायोगात् । अत एव

श्रुतिस्मृती ममैवाज्ञे तदतिक्रम्य वर्त्तते ।

आज्ञाच्छेदी मम द्रोही मद्भक्तोऽपि न वैष्णवः ॥

इति श्रुतिस्मृत्याचारं विना न हरिभक्तिसिद्धिः । न चैवं तर्हि कामकृतनित्य-नैमित्तिकत्यागस्य संन्यासान्यस्थले हरिभजनं न निरासकं स्यादिति वाच्यम् । इष्टापत्तेः ।

1139- मुद्रितश्रीमद्भागवते (1/5/17) ''तत्''-स्थाने ''किम्''-पाठः ।

1140- नित्यकर्मलोपे प्रायश्चित्तं कर्त्तव्यम् । तदुक्तं मनुना यथा (11/203)—

वेदोदितानां नित्यानां कर्मणां समतिक्रमे ।

स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम् ॥ इति ।

विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् ।
अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति ॥[1141]

इति याज्ञवल्क्यात् । पातित्यं महापापे कामकृते ।

यत्कामतो महापापं नरः कुर्यात् कथञ्चन ।
न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते ॥[1142]

इति भृग्वग्निपातादेः प्रायश्चित्तत्वसम्भवात् ।

"व्रात्यस्तोमेनेष्ट्वा तरति पाप्मानमि"ति श्रुत्या
"विहितं यदकामेन कामात्तु द्विगुणं भवेत् ।"[1143]

इति कामकृतप्रायश्चित्ताच्चेति वदन्ति । अत्रेदं वक्तव्यम् । 'सर्वधर्मान् परित्यज्ये'त्यत्र भ्रमालस्यादिनेत्यध्याहारे मानाभावः । वक्ष्यमाणबहुवाक्येष्वेव-मध्याहारे गौरवमसङ्गतिश्च । तथा हि सर्वधर्मोज्झिता विष्णोः', 'त्यक्त्वा स्वधर्मम'ति प्रागुक्तेः । एकादशस्कन्धे[1144] —

देवर्षिभूताप्तनृणां पितॄणां न किङ्करो नायमृणी च राजन् ।
सर्वात्मना यः शरणं शरण्यं गतो मुकुन्दं परिहृत्य कृत्यम् ॥

कृत्यं स्वधर्मम् । पुनस्तत्र[1145] —

स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशः ।
विकर्म यच्चोत्पतितं कथञ्चिद्धुनोति नित्यं हृदि सन्निविष्टः ॥

अगस्त्यसंहितायाम्—

यथा विधिनिषेधौ तु मुक्तं नैवोपसर्पतः ।
तथा न स्पृशतो रामोपासकं विधिपूर्वकम् ॥

1141- याज्ञवल्क्यस्मृतौ (3/219) ।

1142- तत्रैव (3/226) मिताक्षरायां "यः कामतः" इति प्रथमपादे धृतः पाठः ।

1143- आङ्गिरसस्मृतौ (उत्तर० 10/18) प्रायश्चितं विचार्यते यथा—
विहितं यदकामानां कामात्तद् द्विगुणं भवेत् ।
पश्चात्तु दद्यात्तापेन कृत्वा पापानि मानवः ॥ इति ।

1144- मुद्रितश्रीमद्भागवते (11/5/41) 'कृत्यं'-स्थाने 'कर्त्तम्'-पाठः ।

1145- तत्रैव (11/5/42) 'नित्यं'-स्थाने 'सर्वं'-पाठः ।

इत्यादिषु कथं तदध्याहारः । उक्तदोषगणात् । श्रीधरस्वामिनामप्य[1146]-स्मदनुसारव्याख्याने तद् विरोधाच्च । वैवर्त्ते प्रकृतिखण्डे—

हरिभक्ताश्च निष्कामाः स्वधर्मरहिता द्विजाः ।
तेऽपि यान्ति हरेर्लोकं क्रमाद्भक्तिबलादहो ॥

किञ्च, सर्वपापेभ्यः इत्यत्र सर्वपदासङ्गतिः, हरिभक्तेः संन्यासन्यूनतापत्तिश्च । अपि च

"वैकुण्ठनामग्रहणमशेषाघहरं विदुः ।"[1147]
नाम्नोऽस्य यादृशी शक्तिः पापनिर्हरणे हरेः ।
तावत् कर्त्तुं न शक्नोति पातकं पातकी नरः ॥
"तैस्तान्यघानि पूयन्ते तपोदानव्रतादिभिः ।
नाधर्मजं तद्धृदयं तदपीशांघ्रिसेवया ॥"[1148]

इत्यादिना सर्वपापहारित्वं स्फुटीकृतम् । कृष्णतोषिण्यामप्येषः पक्षोऽङ्गीकृतः ।

कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते ।
प्रायश्चित्तं ततश्चैकं हरिसंस्मरणं परम् ॥[1149]

इति पापसामान्येन हरिनाम प्रायश्चित्तम् । अत एव पण्डितसर्वस्वे

प्रायश्चित्तान्यशेषाणि तपः कर्मात्मकानि वै ।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥
तस्मादहर्निशं विष्णुं संस्मरन् पुरुषो मुने ।
न याति नरकं सद्यः सङ्क्षीणाखिलकल्मषः ॥[1150]

1146- श्रीमद्भागवते (11/5/42) व्याख्याकारः श्रीधरस्वामी विचारयति यथा—विहितकर्मनिवृत्तिमुक्ता निषेधनिमित्तप्रायश्चित्तनिवृत्तिमाह—स्वपादमूलमिति ।

1147- श्रीमद्भागवते (6/2/14) वचनस्यास्य पूर्वार्द्धं यथा—

साङ्केत्यं पारिहास्यं वा स्तोभं हेलनमेव च । इति ।

1148- तत्रैव (6/2/16) "व्रतादिभिः"-स्थाने "जपादिभिः"-पाठः ।

1149- विष्णुपुराणे (2/6/40) "ततश्चैकं"-स्थाने "तस्यैकं"-इति पाठः ।

1150- तत्रैव (2/6/39, 45) "सद्यः"-स्थाने "मर्त्यः" 'कल्मषः"-स्थाने 'पातकः" पाठः ।

इति विष्णुपुराणे विष्णुस्मरणादिरूपभक्तेर्ज्ञानाज्ञानकृतसर्वपापशोधकत्व-मुक्तम् । गीताद्वादशाध्यायेऽपि[1151] —

सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ।

इति सकामसर्वकर्मत्याग उक्तः । योगी याज्ञवल्क्योऽप्येवम्[1152] । तस्मात् मद्यपानाद्यज्ञानज्ञानकृतविधिनिषेधाभावे सदा तन्न हरिभजनं प्रायश्चित्तमिति स्थितम् । परन्त्वीदृशाचारत्यागो गृहत्यागिशुद्धवैष्णवानामेव निर्वहेत् , न तु गृहिणाम् । तथा कूर्मपुराणे[1153] —

"उदासीनः साधकश्च गृहस्थो द्विविधः स्मृतः ।
कुटुम्बभरणे सक्तः साधकोऽसौ गृही भवेत् ॥
ऋणानि त्रीण्यपाकृत्य त्यक्त्वा भार्यागृहादिकम् ।
एकाकी यश्च विचरेदुदासीनः स मौक्षिकः ॥
अवरोधपरित्यागस्तपोदानादिकीर्त्तनम् ।
विद्याभ्यासो ह्यपां स्पर्शो गङ्गायाश्चाघनाशनम् ॥"

1151- श्रीमद्भगवद्गीतायां (12/11) पूर्वार्द्धपाठो यथा—

अथैतदप्यशक्तोऽसि कर्त्तुं मद्योगमाश्रितः । इति ।

1152- वृहद्योगियाज्ञवल्क्यस्मृतौ (7/32-34) वचनं यथा—

यं हि व्रतानां वेदानां यमस्य नियमस्य च ।
भोक्तारं यज्ञतपसां ध्यायिनां ध्येयमेव च ॥
ध्यायेन्नारायणं देवं नित्यं स्नानादिकर्मसु ।
प्रायश्चित्त्यपि सर्वस्माद् दुष्कृतान्मुच्यते पुमान् ॥
प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥ इति ।

1153- मुद्रितकूर्मपुराणे पूर्वार्द्धे (2/78-80) "स्मृतः"-स्थाने "भवेत्", "भरणे सक्तः"-स्थाने "भरणायत्तः" इति पाठः ।

ऋणत्रयं तैत्तिरीयसंहितायां (6/3/10/5) यथा—

जायमानो वै ब्राह्मणस्त्रिभिर्ऋणैर्ऋणवान् जायते ।
ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः ॥ इति ।

उक्तञ्चापि मनुना (6/36) यथा—

अधीत्य विधिवद्वेदान् पुत्रांश्चोत्पाद्य धर्मतः ।
इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत् ॥ इति ।

ऋणं बिल्वमङ्गलादिभिरप्युक्तम् ।

सन्ध्यावन्दनभद्रमस्तु भवतः स्नानाय तुभ्यं नमो
भो देवाः पितरश्च तर्पणविधौ नाहं क्षमः क्षम्यताम् ।
यत्र क्वापि निगद्य यादवकुलोत्तंसस्य कंसद्विषः
स्मारं स्मारमघं हरामि तदलं मन्ये किमन्येन मे ॥

मद्यपस्य "दीक्षितः पिबते मद्यमि"त्यादिप्रागुक्तेन वैष्णवत्वविरोधान्मद्यपार्थेऽप्युक्तम् । तस्मात् स्मृत्येकता न स्यादिति सिंहवाजपेयिनो मतं वैष्णवग्रन्थादर्शनजन्यमिति नैतत् साधु मन्तव्यम् ।

अथानन्दवनगोपालभट्टाद्यनुसारेण चैत्रशुक्लादिदिनमारभ्य मासकृत्यान्युच्यन्ते । गारुडे[1154]—

"मधौ शुक्लतृतीयायां जानकीरमणं विभुम् ।
राजोपचारैः सम्पूज्य मासमान्दोलयेत् कलौ ॥
दक्षिणाभिमुखं देवं दोलमानं सुरेश्वरम् ।
सम्पूजितं सकृद् दृष्ट्वा सर्वपापैः प्रमुच्यते ॥
दोलारूढं प्रपश्यन्ति ये कृष्णं मधुमाधवे ।
अपराधसहस्रैस्तु मुक्तास्ते नात्र संशयः ॥
दोलारूढस्य कृष्णस्य येऽग्रे कुर्वन्ति जागरम् ।
सर्वपुण्यफलावाप्तिर्निमेषे निमेषे भवेत् ॥"

कृष्णमिति तदभेदाद्रामस्यापि दोलायां राजोपचारादिकमुन्नेयम् । कृष्णं कृष्णवर्णं रामं वा । ब्राह्मे—

चैत्रमासस्य शुक्लायामेकादश्यां तु वैष्णवैः ।
आन्दोलनीयो देवेशः सलक्ष्मीको महोत्सवः ॥

1154- मुद्रितगरुडपुराणे वचनमिदं नोपलभ्यते । आनन्दवनकृतरामार्चनचन्द्रिकायां पञ्चमपटले (पृ पृ-133-134) तु "सम्पूजितं"-स्थाने "सुपूजितं", "कृष्णं"-स्थाने "रामं", तृतीयश्लोके "अपराधसहस्रेभ्यो मुच्यन्ते", चतुर्थे च "कृष्णस्य"-स्थाने "देवस्य" इति धृतः पाठः ।

लक्ष्म्या रुक्मिण्या सहितः । "उरः प्रभृतिभ्य" इति कप् । देवेशपदेन रामस्यापि महाल्लक्ष्मीभ्यां सीतारुक्मिणीभ्यां सहितः इत्यर्थे "शेषाद्विभाषे"ति वा कप् ।

राघवत्वे भवेत् सीता रुक्मिणी कृष्णजन्मनि ।

इति विष्णुपुराणात्[1155] नारायणभट्टादयः । उपलक्षणतया सीताम् । केचिल्लक्ष्मीपदेन राधामपि गृह्णन्ति । तदसत् । राधाया लक्ष्मीत्वे मानाभावात् । भेदस्य च नित्यत्वात् । सीतायाः शक्त्यैवग्रहे लक्षणारूपोपलक्षणानौचित्यात् । अधिकं प्रविष्टमिति न्याये तु राधानियमाभावाच्च । इयं दोला नित्या ।

ऊर्जे रथं मधौ दोलां श्रावणे तन्तुपूजनम् ।
चैत्रे दमनकारोपमकुर्वाणो व्रजत्यधः ॥

इति पाद्मात्[1156] । गोपालभट्टस्तु[1157] —

केचिच्च वैष्णवाः शुक्लतृतीयायां महोत्सवम् ।
इममिच्छन्ति शक्ताश्च कुर्वते मासमेव तम् ॥

इति स्वयमुक्त्वा शक्तस्य चैत्रशुक्लतृतीयातो वैशाखशुक्लतृतीयान्तं मासं दोला, अशक्तस्य तु तत्तृतीयादिनैक्य एव । इदञ्च रामकृष्णादितुल्यम् । चैत्रशुक्लैकादशीतो वैशाखशुक्लैकादशीपर्यन्तमिति वा मास पक्ष इत्युक्तवान् । आनन्दवनसम्मतस्तृतीयापक्षो रामदोलायां प्रधानम् ।

"यत्फाल्गुनस्य राकादावुत्तरफाल्गुनी यदा ।
तदा दोलोत्सवः कार्यस्तच्चापि पुरुषोत्तमे ॥

1155- विष्णुपुराणे (1/9/144) सम्पूर्णवचनं यथा—

राघवत्वेऽभवत् सीता रुक्मिणी कृष्णजन्मनि ।
अन्येषु चावतारेषु विष्णोरेषानपायिनी ॥ इति ।

1156- मुद्रितपद्मपुराणे नोपलभ्यते । हरिभक्तिविलासे (14/305) तु "तन्तुपूजनं"-स्थाने "तन्तुपर्व"-इति धृतः पाठः । रामार्चनचन्द्रिकायां पञ्चमपटले (पृ-154) च "रथं"-स्थाने "व्रतं"-इति पाठः ।

1157- हरिभक्तिविलासे (14/324) पद्मपुराणवचनमेतत् ।

1158- तत्रैव (14/326, 327) "तच्चापि"-स्थाने "तच्च श्री०"-इति पाठः ।

किन्त्वीदृग्भक्तिसन्दर्शी जगन्नाथानुसारतः ।
दोलाचन्दनकीलाल रथयात्राश्च कारयेत् ।।''[1158]

इदं वक्ष्यमाणञ्च दोलारथतन्तुपूजादिकं नारायणनृसिंहोपासकानामपि समम् ।

चैत्रे मासि सिते पक्षे श्रीरामनवमीव्रतम् ।
एकादश्यां प्रभोर्दोला द्वादश्यां दमनार्पणम् ।।

पुष्पदोलाविधिर्यथा[1159] —

''चैत्रस्य शुक्लैकादश्यां प्रातःकृत्यं समाप्य च ।
नित्यपूजां विधायाथ कुर्याद्दोलोत्सवं व्रती ।।
तदर्थञ्च विशेषेण नैवेद्यादिकमर्पयेत् ।
सम्मान्य वैष्णवांश्चैव गीतनृत्यादि कारयेत् ।।
नीत्वा बहिर्वेदिकायामुत्तुङ्गायां यथाविधि ।
अभ्यर्च्यान्दोलयेत् कृष्णं सर्वलोकावलोकितम् ।।
एवमभ्यर्चयन् यामे यामे त्वान्दोलयेत् प्रभुम् ।
महोत्सवेन गमयेद् दिनं रात्रिञ्च यत्नतः ।।
एवं जागरणं कृत्वा वैष्णवैः सह वैष्णवः ।
प्रणम्य प्रार्थ्य निर्मृज्य कृष्णस्यालयमाश्रयेत् ।।''

इयं पुष्पदोला चैत्रशुक्लैकादशीतो वैशाखशुक्लैकादशीपर्यन्तं कार्या । अशक्तेन तु प्रथमदिनमात्रम् । अयं पक्षः कृष्णे प्रधानम्, रामे तु गौणः । एवं तृतीयातो मासावधिपक्षः श्रीरामे मुख्यः, श्रीकृष्णे तु गौण इत्युन्नेयम् । रामनवमी तूक्ता ।

''चैत्रस्य शुक्लद्वादश्यां दमनारोपणोत्सवः ।
बौधायनादिभिः प्रोक्तः कर्त्तव्यः प्रतिवत्सरम् ।।
मधौ सितैकादश्याञ्च प्रातःकृत्यं समाप्य च ।

1159- हरिभक्तिविलासे (14/317, 318, 321-323)—''आन्दोलयेत्''-स्थाने ''आन्दोलयन्'', ''निर्मृज्य''-स्थाने ''निर्मन्थ्य'', अन्तिमे ''कृष्णं स्वालयमानयेत्'' इति धृतः पाठः ।

गत्वा दमनकारामं तत्राशोकं स्मरन् यजेत् ॥"[1160]
क्रमेणादाय तत्रैव पूजयेच्चन्दनादिना ।
नेष्यामि पूजाभवनमिति संप्रार्थ्य तं नमेत् ॥
उत्पाट्य पञ्चगव्येन प्रोक्ष्य प्रक्षाल्य वारिणा ।
अशोकमुले गन्धाद्यैः स्थण्डिले पूजयेत् क्रमात् ॥
अशोकञ्च तथा कालं वसन्तं काममेव च ॥

अशोकादिचतुर्णां क्रमात् पूजामन्त्रो[1161] यथा—

अशोकाय नमस्तुभ्यं कामस्त्रीशोकनाशन ! ।
शोकार्त्तिं हर मे नित्यमानन्दं जनयस्व मे ॥
त्रुट्यादिकालपर्यन्तः कालरूपो महाबलः ।
कलते चैव यः सर्वं तस्मै कालात्मने नमः ॥
वसन्ताय नमस्तुभ्यं तरुगुल्मलताप्रिय ! ।
सहस्रसुखसंवाह ! कालरूप ! नमोऽस्तु ते ॥
नमोऽस्तु पुष्पबाणाय जगदाह्लादकारिणे ।
मन्मथाय जगन्नेत्रे रतिप्रीतिप्रदायिने ॥
दमनं तं पृथक्कृत्वा भागेनैकेन मन्मथम् ।
पूजयेदुक्तमार्गेण परिवारसमन्वितम् ॥
कामाय नम इत्येष मन्त्रस्तु प्रणवादिकः ।

1160- तत्रैव (14/328, 329) प्रथमश्लोकद्वितीयपादे "दमनारोपणोत्सवम्" पाठः । द्वितीयार्द्धे च पाठो यथा—

विदध्यात्तद्विधिर्बौधायनाद्युक्तोऽत्र लिख्यते । इति ।

रामार्च्चनचन्द्रिकायां (पृ-146) तु—

"द्वादश्यां चैत्रमासस्य शुक्लायां दमनोत्सवः ।" इति,
"पूजाभवनं"-स्थाने "रामपूजार्थं" इति च धृतः पाठः ।

1161- रामार्च्चनचन्द्रिकायां (पृ.पृ-146-147) प्रथमश्लोकद्वितीयपादे "रतिप्रीतिप्रियाय च", अन्तिमश्लोकपादे च "शनैः स्वगृहमानयेत्" इति धृतः पाठः ।

मन्त्रेणानेन दमनं पूजयेद् गन्धपुष्पकैः ॥
धौतेन वाससाऽऽच्छाद्य निधाय पटले नवे ।
घण्टापुरुषसूक्तादिनिःस्वनैर्गृहमानयेत् ॥ इति गृहानयनम् ।

अथाधिवासः

"शालायां रामचन्द्राग्रे कुर्यादष्टदलं शुभम् ।
व्यक्तं सितासितारक्तपीतवर्णप्रपूरितम् ॥
चतुष्कोणं बहिः कृत्वा पीतवर्णेन पूरयेत् ।
तद्बाह्ये श्वेतपीताद्यैर्वर्त्तुलं मण्डलप्रियम् ॥
तद्बाह्ये स्याच्चतुष्कोणं रक्तवर्णेन पूरितम् ।
सार्वकामिकमेतद्वा सर्वतो भद्रमुद्धरेत् ॥
कुम्भं पुण्याम्बुनाऽऽपूर्य हेमरत्नयुतं शुभम् ।
संस्थाप्य तस्मिन् रामाग्रे दमनं तत्र पूजयेत् ॥
वितानं पञ्चवर्णाढ्यमाबध्य कुसुमानि च ।
निर्माय महतीं पूजां कुर्यात्तदधिवासनम् ॥"[1162]

अधिवासमन्त्रो यथा[1163] —

पूजार्थं देवदेवस्य विष्णोर्लक्ष्मीपतेः प्रभोः ।
दमन ! त्वमिहागच्छ सान्निध्यं कुरु ते नमः ॥

तत्पुरुषाय विद्महे कामरूपाय धीमहि तन्नोऽनङ्गः प्रचोदयात् ।

इति मन्मथगायत्र्या सममष्टोत्तरं शतम् ।
दत्त्वा पुष्पाञ्जलीन् कामदेवं वन्देत मन्त्रवित् ॥

नमोऽस्तु पुष्पबाणायेति मन्त्रस्तूक्तः ।

आमन्त्रितोऽसि देवेश ! पुराणपुरुषोत्तम ! ।
प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु केशव ! ॥

1162- तत्रैव (पृ-147) "शालायां"-स्थाने "निशायां", "कुसुमानि"-स्थाने "सुमनांसि"-इति धृतः पाठः ।

1163- तत्रैव (पृ-147) अयं आवाहनमन्त्र इति पाठः ।

निवेदयाम्यहं तुभ्यं प्रातर्दमनकं शुभम् ।
सर्वदा सर्वथा विष्णो ! नमस्तेऽस्तु प्रसीद मे ॥
इत्थमामन्त्र्य देवेशं दत्त्वा पुष्पाञ्जलिं पुनः ।
पूजितं तद्दमनकं कुम्भस्योपरि संस्थितम् ॥
अस्त्रेण सर्वतो रक्षेत् कवचेनावगुण्ठयेत् ।
रक्षेद्वा चक्रमन्त्रेण नृसिंहैकाक्षरेण वा ॥
गीतमङ्गलनिर्घोषैः कुर्याज्जागरणं ततः ॥

इति दमनाधिवासः ।

प्रातः स्नानादि निर्वर्त्य नित्यपूजां विधाय च ।
दमनारोपणार्थे च महापूजां समाचरेत् ॥
दमनं गन्धदूर्वाढ्यं पाणिभ्यां परिगृह्य च ।
घण्टादिवाद्यघोषेण श्रीरामाय समर्पयेत् ॥

मन्त्रो यथा—देवदेव ! जगन्नाथ ! वाञ्छितार्थप्रदायक ! ।
हृदिस्थान् पूरयेः कामान् मम कामेश्वरप्रिय ! ॥
इमं दमनकं देव ! गृहाण मदनुग्रहात् ।
इमां सांवत्सरीं पूजां भगवन् ! परिपूरय ॥
एवं समर्प्य देवाय प्रार्थयेद् विष्णुमव्ययम् ।
मणिविद्रुममालाभिर्मन्दारकुसुमादिभिः ।
इयं सांवत्सरी पूजा तवास्तु गरुडध्वज ! ॥
वनमालां यथा देव ! कौस्तुभं सततं हृदि ।
तद्वद् दामनकीं मालां पूजाञ्च हृदये वह ॥
यत्पूजितं मया देव ! परिपूर्णं तदस्तु मे ॥
"भगवन्तं प्रणम्याथ गुरुं सम्पूज्य भक्तितः ।
सम्भोज्य ब्राह्मणान् शक्त्या भुञ्जीत सह बन्धुभिः ।
स्यादश्वमेधजं पुण्यमित्याह भगवान् शिवः ॥
पारणाहे न लभ्येत द्वादशी घटिकाऽपि चेत् ।
तदा त्रयोदशी ग्राह्या पवित्रदमनार्पणे ॥

न कृष्णदमनारोपः स्यान्मधौ विघ्नतो यदि ।
वैशाख्यां श्रावणे माघे कर्त्तव्यं दमनार्पणम् ॥"[1164]

वैशाख्यां वैशाखपूर्णिमायाम् । नक्षत्रेण युतः काल इत्यण् । एवं श्रावणमाघादिकम् । स्यादश्वमेधजमित्यनेन काम्यम्, "ऊर्जे रथमि" अनेन नित्यञ्चैतत् ।

अथ वैशाखकृत्यम्

पाद्मे पातालखण्डे[1165] —

मेषसङ्क्रमणे भानोर्माधवे मासि यत्नतः ।
महानद्यां नदीतीर्थे नदे सरसि निर्झरे ॥
देवखाते तथा स्नायात् यथा प्राप्ते जलाशये ।
दीर्घिकाकूपवापीषु नियतात्मा हरिं स्मरन् ॥
मधुमासस्य शुक्लायामेकादश्यामुपोषितः ।
पञ्चदश्यां च वा वीर ! मेषसङ्क्रमणेऽपि वा ॥
वैशाखस्नाननियमं ब्राह्मणानामनुज्ञया ।
मधुसूदनमभ्यर्च्य कुर्यात् सङ्कल्पपूर्वकम् ॥

स्नानमन्त्रो यथा[1166] —

वैशाखं सकलं मासं मेषसङ्क्रमणे रवेः ।
प्रातः सनियमः स्नास्ये प्रीयतां मधुसूदनः ॥
मधुहन्तुः प्रसादेन ब्राह्मणानामनुज्ञया ।
निर्विघ्नमस्तु मे पुण्यं वैशाखस्नानमन्वहम् ॥

मेषार्कास्पृष्टदिने मेषसङ्क्रमण इत्यत्र मीनवृषयोरित्यूहः । "माधवे मेषग" इति प्रागुक्तस्नानमन्त्रो (पाताल पाद्म०-95/10, 11) वाऽत्र ग्राह्यः ।

1164- हरिभक्तिविलासे (14/349-351) ।

1165- मुद्रितपद्मपुराणे पातालखण्डे (95/4-7) "यत्नतः"-स्थाने "सत्तम", "देवखाते तथा"-स्थाने "देवखातेऽथवा", अन्तिमपादे च "कुर्यात् सुस्नानपूर्वकम्" इति पाठः ।

1166- तत्रैव (95/8, 9) "अनुज्ञया"-स्थाने "अनुग्रहात्" इति पाठः ।

अवैशाखी भवेत् पापी विप्रः श्रुतिपरोऽपि वा ।
अश्वमेधादिजं यस्मान्माहात्म्यं माधवस्य च ॥

इत्यादि[1167] वचनान्नित्यकाम्यमिदम् । हविष्यादिकं स्मार्त्तवत् ।

अक्षयतृतीया

पाद्मे[1168]—त्रेतायुगं तृतीयायां शुक्लायां मासि माधवे ॥
प्रवृत्ताश्च त्रयीधर्माः प्रवृत्ताः परिकीर्त्तिताः ।
स्नाने दानेऽर्चने श्राद्धे जपे पूर्वजतर्पणे ।
येऽर्चयन्ति यवैर्विष्णुं श्राद्धं कुर्वन्ति यत्नतः ॥
तस्यां ददति दानानि धन्यास्ते धार्मिका नराः ॥

"युगञ्च कृतवान् कृतमि"त्यत्र सत्यत्रेतयोर्विकल्पः ।

शुक्ला वैशाखसप्तमी

पाद्मे[1169]—वैशाखशुक्लसप्तम्यां जाह्नवी जह्नुना पुरा ।
क्रोधात् पीता पुनस्त्यक्ता कर्णरन्ध्रात्तु दक्षिणात् ॥
तस्यां समर्चयेद्देवीं गङ्गां गगनमेखलाम् ।
स्नात्वा सम्यग्विधानेन धन्यः स सुकृती नरः ॥

1167- मुद्रितपद्मपुराणे पातालखण्डे (86/73, 74) वचनं यथा—
प्रातः स्नानञ्च वैशाखे यज्ञदानमुपोषणम् ।
हविष्यं ब्रह्मचर्यञ्च महापातकनाशनम् ॥
पुनः कलियुगे राजन् ! नैतद् गोप्यं भविष्यति ।
अश्वमेधादिकं यस्मान्माहात्म्यं माधवस्य यत् ॥ इति ।

1168- तत्रैव (96/14-17) "परिकीर्त्तिताः"-स्थाने "ते प्रवर्द्धिताः", द्वितीयश्लोकोत्तरार्द्धे—"अक्षया सोच्यते लोके तृतीया हरिवल्लभा ।",
"तेषां ददाम्यहं सर्वं यन्मनोऽभीष्टमुत्तमम् ।
ये ददत्यपि दानानि धन्यास्ते धार्मिका नराः ॥"
इति अन्तिमश्लोके च पाठः । नागप्रकाशने एवम् । आनन्दाश्रमप्रकाशने (91/14) तु पाठो यथा—
"प्रवृत्तश्च त्रयाधर्मः पवित्रस्तेन कीर्त्तितः ।" इति ।

1169- नागप्रकाशितपद्मपुराणे पातालखण्डे (85/42 44) अन्तिमश्लोक-पादे "स्नातकं गतपातकम्" इति पाठः ।

यस्तस्यां तर्पयेद्देवान् पितॄन् मर्त्यो यथाविधि ।
साक्षात् पश्यति तं गङ्गा स्नाननिर्गतपातकम् ॥

नृसिंहचतुर्दशी स्मार्त्त उक्ता ।

वैशाखपूर्णिमा

पाद्मे[1170]—मेषसङ्क्रममारभ्य तिथयस्त्रिंशदुत्तमाः ।
सर्वयज्ञाधिकाः पुण्याः पुराणेषु प्रकीर्त्तिताः ॥
तत्रापि पूर्णिमा धन्या माधवी माधवाह्वया ।
येयं वराहकल्पस्य तिथिराद्या महाफला ॥
अतीता यस्य वैशाखी स नूनं निरयालयः ॥
जलधेनुञ्च यो दद्याद्वैशाख्यां विष्णुतत्परः ।
त्रयाणामपि देवानां चतुर्थोऽयं विशेषतः ॥

किञ्च पाद्मे[1171]—पापेन्धनदवज्वाला तमोद्रुमकुठारिका ।
कृता नैकापि वैशाखी विधिना तत्र पूर्णिमा ॥
अवृता यस्य वैशाखी सोऽवैशाखी भवेन्नरः ।
दशजन्मानि च ततस्तीर्यग्योनिषु जायते ॥

मासाशक्तौ यथा[1172]—
त्रयोदश्यां चतुर्दश्यां वैशाख्यां च दिनत्रयम् ।
सर्वाशक्तोऽपि विधिना नारी वा पुरुषोऽपि वा ॥
पूर्वोक्तनियमैर्युक्तः प्रातःस्नात्वा च शक्तितः ।
विमुक्तः पातकैः सर्वैः स्वर्गमक्षयमश्नुते ॥
वैशाख्यामपि वाऽशक्तौ भोजयेद्ब्राह्मणान् दश ॥

1170- तत्रैव (94/28, 30, 37, 39) "पुण्याः"-स्थाने "धन्याः", "माधवाह्वया"-स्थाने "माधवप्रिया", "येयं"-स्थाने "एवं", "अतीता यस्य"-स्थाने "यस्यातीता च" इति पाठः ।

1171- तत्रैव (94/88-90) "तमो"-स्थाने "पाप", "तत्र"-स्थाने "वत्स" इति पाठः ।

1172-तत्रैव (98/19-21) "वाऽशक्तौ"-स्थाने "शक्त्या वा" इति पाठः ।

मासाशक्तौ त्रिदिनव्रतम् । वैशाखपूर्णिमायां दशविप्रभोजनानि पुरुषाहार-प्रमाणानि वेत्यर्थः ।

अथ ज्येष्ठमासकृत्यम्

आरभ्य राकां वैशाखीं ज्येष्ठीं यावन्महोत्सवम् ।
कुर्यात् सम्पूजयेन्नित्यं कृष्णं जलविहारिणम् ॥
तत्रौष्ण्यतारतम्याद्धि कृष्णं तोयस्थमाचरेत् ।
वैशाखेऽपि तथाऽऽषाढे श्रावणेऽप्यभ्रवर्जिते ॥[1173]

चन्द्रिकायाम्[1174]—वैशाखे पौर्णमास्यां तु जलस्थं जगदीश्वरम् ।
शुक्लस्यैकादशीं यावत् पूजयेत् सुप्रहर्षितः ॥

एतन्मते वैशाखपूर्णिमातो ज्येष्ठशुक्लैकादशीपर्यन्तमिति । यद्वा वैष्णवानामेकादश्यादिमासग्रहात् वैशाखशुक्लैकादशीतो ज्येष्ठशुक्लैकादशीपर्यन्तं रामजलविहार इति प्रतीयते ।

'उत्तापेऽर्कांशुतो जाते शीतलेन सुगन्धिना ।
जलेन पूरिते पात्रे श्रीकृष्णमुपवेशयेत् ॥
नित्यार्चाविधिनाऽभ्यर्च्य सायंसन्ध्यामुपास्य च ।
देवं सिंहासने नीत्वा गन्धादिभिरथार्चयेत् ॥
नीराज्य देवं सर्वेभ्यो दत्त्वा तीर्थं भजेत् स्वयम् ।
द्वादश्याञ्च विशेषेण रात्रौ तोयस्थमर्चयेत् ॥" [1175]
"शुचिशुक्रगते काले येऽर्चयिष्यन्ति केशवम् ।
जलस्थं विविधैः पुष्पैर्मुच्यन्ते यमयातनात् ॥
नीरमध्यस्थितं कृत्वा शालग्रामसमुद्भवम् ।
योऽभ्यर्चयेन्महाभक्त्या स भवेत् कुलपावनः ॥

1173- हरिभक्तिविलासे (15/2, 3) ।
1174- रामार्च्चनचन्द्रिकायां पञ्चमपटले (पृ-149) ।
1175- हरिभक्तिविलासे (15/4-6) ।
1176- तत्रैव (15/11, 13, 17) प्रथमश्लोकपूर्वार्द्धे अधिकपाठो यथा—
कृतैः सुशीतलैस्तोयैस्तुलसीदलवासितैः । इति ।

घनागमे प्रकुर्वन्ति जलस्थं वै जनार्दनम् ।
ये जना नृपतिश्रेष्ठ ! तेषां वै नरकं ध्रुवम् ॥" [1176]

गारुडे[1177]—स्वर्णपात्रेऽथवा रौप्ये ताम्रे वा मृण्मयेऽपि वा ।
तोयस्थं योऽर्चयेद्देवं शालग्रामसमुद्भवम् ॥
चक्राङ्कितं वा भूपाल ! निवृत्ते मधुमाधवे ।
प्रतिमासं महाभाग ! तस्य पुण्यमनन्तकम् ॥
पात्रे गन्धादिकं कृत्वा यः क्षिपेद् गरुडध्वजम् ।
द्वादश्यां पूजयेद्रात्रौ मुक्तिभागी भवेन्नरः ॥
तथैवात्युष्णसमये कालिन्द्यादौ विशेषतः ।
सम्पादयेद्भगवतो जलक्रीडामहोत्सवम् ॥

निर्जलैकादशी तूक्ता प्राक् । ज्येष्ठशुक्लद्वादश्यां कृष्णोपासकैः रुक्मिणी-कृष्णोद्वाहविधिः कार्यः ।

आषाढमासकृत्यम्

"आषाढशुक्लद्वादश्यां कृष्णे शिशयिषौ सति ।
वैष्णवः पारणं कृत्वा तप्तमुद्राश्च धारयेत् ॥
शौनकोक्तप्रकारेण तप्तमुद्राभिधारणम् ॥
ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैकान्तितद्द्वये ।
कुर्वन्नात्मार्पणं तप्तमुद्राभिर्देहमङ्कयेत् ॥" [1178]

वाराहे[1179]—चक्रादिधारणं पुंसां परमं बन्धभेदनम् ।
पातिव्रत्यनिमित्तं हि वलयादिविभूषणम् ॥

ऋग्वेदे[1180]—अतप्ततनुर्न तदामो अश्नुतेऽश्नुता सह इद्वहन्तः संतदा पते तमोऽस्य वितढं देवस्य देशौ वितोषस्य तं तदा व्यवस्थिरन् ।

1177- मुद्रितगरुडपुराणे वचनमिदं नोपलभ्यते । हरिभक्तिविलासे (15/7, 8, 16, 18) तु धृतः पाठः ।

1178- तत्रैव (15/45, 46) "शौनकोक्त०" इति भागपाठो नास्ति ।

1179- तत्रैव (15/47) "परं सम्बन्धवेदनम्" इति पाठः । मुद्रितवराह-पुराणे तु वचनमिदं नोपलभ्यते ।

सामवेदे[1181] च—प्रतद्विष्णोरब्जचक्रे सुतप्ते, जन्माम्भोधिं वर्त्तते चर्षणीन्द्राः। मूले बाह्वोर्दधतेऽन्ये पुराणा, लिङ्गान्यन्ये तप्तान्यायुधान्यर्पयन्ति।

शतपथश्रुतावपि[1182]—स होत्राच याज्ञवल्क्यस्तत्पुमानात्महिताय प्रेम्णा हरिं भजेतेति। सुश्लोकमौलेर्धर्माण्यङ्गेष्वग्निना धत्ते इति शातातपी श्रुतिः।

अथर्ववेदेऽपि—ऊरुक्रमचिह्नैरङ्किता लोके सुभगा भवाम।

ऋक्परिशेषश्रुतिश्च[1183]—"यो ह वै सुश्लोकमौले धर्मार्थावुत्तिष्ठमानोऽग्निना चक्रं धत्ते। अग्निर्वै सहस्रारः सहस्रविस्तारो नेमिर्नेमिना तप्ततनुः सायुज्यं सलोकतामाप्नोतीति।"

"चक्रं बिभर्त्ति वपुषाभितप्तं बलं देवानाममृतस्य विष्णोः।
स एति नाकं दुरितं विधूय विशन्ति यद्यतयो वीतरागाः॥"[1184]

पाद्मे[1185]—"अग्निहोत्रं यथा नित्यं वेदस्याध्ययनं यथा।
ब्राह्मणस्य तथैवेदं तप्तमुद्रादिधारणम्॥"
"चक्रं वा शङ्खचक्रे वा पञ्चायुधमथापि वा॥
धारयित्वेव विधिवद् ब्रह्मकर्म समारभेत्॥"[1186]
"अधृत्वा विधिना चक्रं ब्राह्मणः पतितो भवेत्।
न तस्य किञ्चिदश्नीयादपि क्रतुसहस्रिणः॥"[1187]

1180- हरिभक्तिविलासे (15/62) ऋक्परिशिष्टवचनेऽस्मिन् अतप्त....सह इद्धहन्तस्तत् समास्तेति यजुः। इति पाठः।

1181- तत्रैव (15/63) ऋग्वेदीयाश्वलायनशाखावचनेऽस्मिन् धृतः पाठः।

1182- तत्रैव (15/64) छन्दोगपरिशिष्टवचने पाठोऽयम्।

1183- तत्रैव (15/60) श्रुतिवचनेऽस्मिन् "धर्मार्थावुत्तिष्ठमानो" स्थाने "धर्माननुतिष्ठमानो" इति धृतः पाठः।

1184- तत्रैव (15/61)।

1185- पद्मपुराणे उत्तरखण्डे (66/81) "वेदस्याध्ययनं तथा"-इति पाठः।

1186- तत्रैव (224/30, 31) "तथा पञ्चायुधानि वा" इति द्वितीयपादे।

नारदीये[1188] —

श्रीकृष्णचक्राङ्कविहीनगात्रः श्मशानतुल्यः पुरुषोऽथ नारी ।

दृष्ट्वा नरस्तं नृपते ! सवासाः स्नात्वा समर्चेद्धरिमङ्ग नित्यम् ।।

पाद्मे[1189] —तप्तचक्राङ्कितं दृष्ट्वा ये निन्दन्ति नराधमाः ।

अवलोक्य मुखं तेषामादित्यमवलोकयेत् ।।

सौपर्णे[1190] —अशुचिर्वाऽप्यनाचारः सर्वधर्मबहिष्कृतः ।

प्रतप्तशङ्खचक्राभ्यामङ्कितः पङ्क्तिपावनः ।।

गुरुत्मान्नवशेषेण सर्ववर्णेष्वयं विधिः ।।

पाद्मे[1191] —"अग्नितप्तं पवित्रञ्च धृत्वा वै बाहुमूलयोः ।

त्यक्त्वा यमपुरं घोरं याति विष्णोः परं पदम् ।।"

बह्वाख्यवेङ्कटाचार्यमुखैर्घोरैर्वहू दितम् ।

श्रुतिस्मृत्यादितन्त्रोक्तं तप्तमुद्रादि विस्तरात् ।।

इत्थं नानाश्रुतिस्मृत्यादिप्रमाणसत्त्वेऽपि प्रायशो माध्वश्रीवैष्णवेष्वेव तप्तमुद्रादिधारणं क्वचित् सनकवैष्णवेष्विति देशकुलाचाराद् व्यवहारः । तेनोत्कलवैष्णवेषु प्रायशस्तदभावेऽपि न क्षतिः । तदुक्तं गोपालभट्टेन[1192] —

1187- तत्रैव (224, 40-42, 44) "पतितः"-स्थाने "प्राकृतः" इति, अनन्तरञ्च—

अधृत्वा विधिना चक्रं ब्राह्मणो ज्ञानदुर्लभः ।।
गर्हितः सर्वलोकेषु ब्राह्मणात् प्रच्युतो भवेत् ।।
अधृत्वा विधिना चक्रं ब्राह्मणः पतितो भवेत् ।
ऊर्ध्वपुण्ड्रविहीनस्तु शङ्खचक्रविवर्जितः ।। इति पाठः ।

1188- हरिभक्तिविलासे (15/67) "नित्यं"-स्थाने "सद्यः"-इति पाठः ।

1189- तत्रैव (15/69) । मुद्रितपद्मपुराणे तु वचनमिदं नोपलभ्यते ।

1190- हरिभक्तिविलासे (15/72) धृतः पाठः ।

1191- मुद्रितपद्मपुराणे उत्तरखण्डे (224/31, 32) "बाहु"-स्थाने "भुज" इति पाठः ।

1192- मुद्रितहरिभक्तिविलासे (15/80) "मृमुदाहृतत"-स्थाने "सदनादृतम्" इति पाठः ।

इत्थं निषेधसेवनं निर्मूलं समुदाहृतम् ।
समूलं यच्च तत्सम्यग्विध्यभावादनादृतम् ।। इति ।

केचित्तु— यस्तु सन्तप्तचक्रादिलिङ्गचिह्नतनुर्नरः ।
स सर्वयातनाभोगाच्चण्डालो जन्मकोटिषु ।।
सततं तप्तशङ्खादिलिङ्गाङ्किततनुं नरम् ।
संभाष्य रौरवं यान्ति यावदिन्द्राश्चतुर्दश ।।
चक्राङ्किततनुर्यत्र तत्र कोऽपि न सञ्चरेत् ।
यदि तिष्ठेन्महापापी सहस्रब्रह्महा भवेत् ।।

विद्याकरपद्धतौ च—

तप्तमुद्रां गृहीत्वैव गृही चण्डालतां व्रजेत् ।

इत्यादिनिषेधस्मृत्या षोडशिग्रहाग्रहवद् विकल्पं देशकुलभेदेन मन्यन्ते ।

कुङ्कुमैश्चन्दनैर्वाऽपि पञ्चसंस्कारहेतवे ।
हरेरायुधमुद्रां तु कल्पते गृहवान् द्विजः ।।

इति विद्याकरलिखनादुत्कलगृहिवैष्णवानां सर्वथा तप्तमुद्राविरहः ।

श्रुतिस्मृतिशतैरुक्तः तत्प्रकारः प्रतन्यते ।
बह्वृचे परिशिष्टे च प्रोक्तो यः सनकादिभिः ।।

षोडशोपचारैर्विष्णुमभ्यर्च्याष्टाक्षरेण "परमे व्योमनी"ति "शं नो मित्रः । शं वरुणः ।" इति चक्रशङ्खावभ्यर्च्य द्वादशारं "न हि (?) तज्जरायाग्ने मत्वे प्रथमस्य प्रचेतस" इत्येताभ्यामग्नावादध्यात् ।

"वैश्वानरस्य सुमतौ स्यामे"[1193]त्यग्निं परिचरेत् ।

पुरुषसूक्तेन षोडशाहुतीर्हुत्वा भगवन्तं तेनोपस्तुत्य ब्राह्मणानां पुरतो दण्डवन्निपतेत् ।

1193- शुक्लयजुर्वेदमाध्यन्दिनशाखायां (26/7) सम्पूर्णवचनं यथा— "वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः । इतो जातो विश्वमिदं विचष्टे वैश्वानरो यतते सूर्येण । उपयाम गृहीतोऽसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा ।।" इति ।

सुदर्शन ! महाज्वाल ! कोटिसूर्यसमप्रभ ! ।
अज्ञानतिमिरान्धस्य विष्णोर्मार्गं प्रदर्शय ॥ इत्याद्य

सुदर्शनाय विद्महे महाज्वलाय धीमहि तन्नश्चक्रं प्रचोदयात् ।

एवं पाञ्चजन्य ! निजध्वान ! ध्वस्तपातकसञ्चय !
पाहि मां पापिनं घोरं संसारार्णवपातिनम् ॥ इत्याद्य

पाञ्चजन्याय विद्महे पावनाय धीमहि तन्नः शङ्खः प्रचोदयात् ।

इमान्मन्त्रान् समुच्चार्य दक्षिणादिक्रमेण तु ।
भुजयोश्चक्रपूर्वाणि कृष्णशस्त्राणि धारयेत् ॥

एवं जायाभृत्यादिष्वप्यङ्कनम् । तदुक्तं वाराहे[1194] —

अङ्कयेत्तप्तचक्राद्यैरात्मनो भुजमूलयोः ।
कलत्रापत्यभृत्येषु पश्वादिषु च सम्पदि ॥

"अग्निहोत्रं यथा नित्यमि"त्यादिना नित्यत्वसिद्धौ सम्पदीति तत्काम्यञ्च ।

"आयसं विधिवत् कृत्वा पञ्चायुधविधानतः ।
तत्तन्मन्त्रेण मन्त्रज्ञः प्रतिष्ठाप्य पृथक् पृथक् ॥
ललाटे च गदा धार्या मूर्द्ध्नि चापं शरांस्तथा ।
नन्दकञ्चैव हृन्मध्ये शङ्खचक्रे भुजद्वये ॥"[1195]

इदं पञ्चायुधधारणं शक्तपरम् । अशक्तस्य तु शङ्खचक्रोभयधृतिरेव । रामार्च्चनचन्द्रिकादौ[1196] तथा लिखनात् ।

यथा— दक्षिणे च भुजे विष्णोर्बिभृयाद्वै सुदर्शनम् ।
सव्ये शङ्खञ्च बिभृयादिति ब्रह्मविदो विदुः ॥[1197]

शयन्यां विघ्ने तु बोधनीद्वादश्यां तत् ।

"शयन्याञ्चैव बोधन्यां चक्रतीर्थे तथैव च ।

1194- मुद्रितवराहपुराणे नास्ति । हरिभक्तिविलासे (15/101) "बाहु-मूलयोः"-पाठः ।

1195- तत्रैव (15/102, 103) "शरान्"-स्थाने "शरं" इति पाठः ।

1196- रामार्च्चनचन्द्रिकायां पञ्चमपटले (पृ.पृ. 150-152) ।

1197-हरिभक्तिविलासे (15/104) "विष्णोः"-स्थाने "विप्रो"- इति पाठः ।

शङ्खचक्रविधानेन वह्निपूतो भवेन्नरः ॥"[1198]

"एवमेव प्रबोधन्यां द्वादश्यां भगवत्प्रियैः ।

तप्तमुद्रा ध्रुवं धार्या द्वारकायां विशेषतः ॥"[1199]

विशेषपदं सद्गुरुलाभे उक्ततीर्थकालयोरन्यत्रापि तदङ्कनार्थम् । मतान्तरे तु—शङ्खोपरि कृते पद्मे प्रत्यहं दक्षिणे करे ।

वामे गदाधश्चक्रं च वासुदेवः स्वयं भवेत् ॥

"दक्षिणे च करे विष्णोः" "शङ्खोपरी"त्यनयोः समुच्चयविधिपक्षे दक्षिणे चक्रस्य शङ्खाध ऊर्ध्वगतत्वस्य सव्ये शङ्खस्य गदाध ऊर्ध्वस्थत्वस्य चानियमः । शीतलमुद्राधारणं तु सर्वत्राविरुद्धम् । चक्रादिघटनाद्रव्यमुक्तं पञ्चमप्रश्नपञ्चरात्रे[1200] —

सौवर्णं राजतं ताम्रं कांस्यमायसमेव वा ।

चक्रं कृत्वा तु मेधावी धारयेत् सविचक्षणः ॥

शीतलमुद्रायां काष्ठरूपमपीत्येके ।

कृत्वा काष्ठमयं बिम्बं कृष्णशस्त्रैस्तु चिह्नितम् ।

योऽथाङ्कयति चात्मानं तत्समो नास्ति वैष्णवः ॥[1201]

इति वचनात् ।

विलिखेद्वै चिह्नानि तुलसीगोपिका मृदा ।

काष्ठमपि तुलसीमृत्साहचर्यात्तुलसीरूपम् । इति तप्तमुद्राविधिः ।

आषाढशुक्लद्वादश्यां क्षीराब्धिशयनोत्सवः ।[1202]

तदुक्तं भविष्ये[1203] —

1198- रामार्च्चनचन्द्रिकायां पञ्चमपटले (पृ 152) ।

1199- हरिभक्तिविलासे (15/106) "भगवत्परैः" इति पाठः ।

1200-तत्रैव (15/105) नवप्रश्नपञ्चरात्रवचने "धारयेत विचक्षणः"-पाठः ।

1201- तत्रैव (4/287) "अथ"-स्थाने "हि"-इति पाठः ।

1202- रामार्च्चनचन्द्रिकायां पञ्चमपटले (पृ-150) उत्तरार्द्धं यथा—

कार्योऽन्यथा स्वनावृष्टिर्भवेत्पौराणवाक्यतः । इति

1203- मुद्रितभविष्यपुराणे वचनमिदं नोपलभ्यते । रामार्च्चनचन्द्रिकायां

मिथुनस्थे सहस्रांशौ न स्वापयति यो हरिम् ।
वैष्णवैः सह सम्भूय ह्यनावृष्टिस्ततो भवेत् ॥

मिथुनस्थ इति चैत्रादिचतुर्मासेष्वधिमासाभावपरम् , अन्यथा कर्कट इति भावः । तत्प्रकारो यथा[1204] —

"नीराज्य नरयानेष्वारोप्य रामं सवैष्णवः ।
गीतवादित्रघोषेण देवं नीत्वा जलाशयम् ॥
पुष्पाञ्जलीन् प्रदायाथ यानादुत्तारयेत् प्रभुम् ।
तीरेऽर्घ्यं न्यासमासाद्य हस्तं दत्त्वोपवेशयेत् ॥
धौतांघ्रिपाणिराचान्तः कुर्यात् सङ्कल्पमादितः ।
तथा पुरुषसूक्तेनोत्तरनारायणेन च ॥
पञ्चामृतेन संस्नाप्य पूतोऽभ्यर्च्य रघूत्तमम् ।
तीर्थेणानेन मन्त्रेण जले प्रस्वापयेत् प्रभुम् ॥"

मन्त्रस्तु "शेषपर्यङ्के"ति स्मार्त्तप्रकरण उक्तः ।

अथ कृत्वा महापूजां गन्धस्रग्धूपदीपकैः ।
अन्नताम्बूलपानाद्यैराशास्यानुग्रहं हरेः ॥[1205]

"सुप्ते त्वयी"ति प्राथनाऽपि स्मार्त्तशयन उक्तः ।

इति संप्रार्थ्य रामाग्रे गृह्णीयान्नियमान् व्रती ।

नियममन्त्रो यथा—

वार्षिकांश्चतुरो मासान् देवस्योत्थापनावधि ।
इमं करिष्ये नियमं निर्विघ्नं कुरु मेऽच्युत ! ॥

पञ्चमपटले रामशयनविधौ (पृ-150) गारुडवचनेऽस्मिन् "ततो"-स्थाने "तदा" इति पाठः ।

1204- तत्रैव (पृ-152) "पूतोऽभ्यर्च्य"-स्थाने "पूज्याभ्यर्च्य", "तीर्थेणानेन"-स्थाने "अतो देवेन" इति पाठः ।

1205- तत्रैव (पृ-152) "पानाद्यैः"-स्थाने "नृत्याद्यैः" इति पाठः ।

1206- मुद्रितभविष्यपुराणे वचनमिदं नोपलभ्यते । हरिभक्तिविलासे (15/116) तु "व्रतं वा जप्यमेव वा" इति द्वितीयपादे धृतपाठः ।

गृहीतेऽस्मिन् व्रते देव ! पञ्चत्वं यदि मे भवेत् ।
तदा भवतु सम्पूर्णं त्वत्प्रसादाद्रघूत्तम ॥

भविष्ये[1206]—यो विना नियमं मर्त्यो व्रतं चाज्ञातमेव वा ।
चातुर्मास्यं नयेन्मुर्खो जीवन्नपि मृतो हि सः ॥

नियमो यथा—निष्पावान् राजमाषांश्च मसूरं संधितानि च ।
वृन्ताकञ्च कलिङ्गञ्च सुप्ते देवे विसर्जयेत् ॥[1207]

निष्पावाः काष्ठशिम्बा इति प्रसिद्धाः । सन्धितमासवम् । सन्धितमसूरे शूद्रपरे ।

चतुर्ष्वपि हि मासेषु हविष्याशी न पापभाक् ।

श्रावणादिचतुर्षु शाकदधिदुग्धामिषाणां क्रमात्त्यागः[1208] कार्त्तिक उक्तः । तच्चामिषमष्टधा ।

"प्रत्यङ्गचूर्णं चर्माम्बु जम्बुजं बीजपूरकम् ।
अयज्ञशिष्टमन्नाद्यं यद् विष्णौ न निवेदितम् ॥
दुग्धमन्नं मसूरञ्च माषश्चेत्यष्टधाऽऽमिषम् ॥"[1209]

"कदम्बानि पटोलानि वृन्ताकं सन्धितानि च ।
एतानि भक्षयेन्नैव सुप्ते देवे जनार्दने ॥"

वृन्ताकादेः सदा निषेधत्वेऽपि दोषाधिक्यार्थोऽत्र ग्रहः । नपुंसकत्वात्

1207- रामार्च्चनचन्द्रिकायां (पृ-153) "न भक्षयेत्" इति चतुर्थपादान्तपाठः ।

1208-त्यागवचनं यथा रामार्च्चनचन्द्रिकायां पञ्चमपटले (पृ.पृ-152-153)—
श्रावणे वर्जयेच्छाकं दधि भाद्रपदे तथा ।
दुग्धमाश्वयुजे मासि कार्त्तिके चामिषं त्यजेत् ॥ इति ।

1209- तत्रैव (पृ-153) "जम्बुजं"-स्थाने "जम्बीरं" इति पाठः ।

1210- गोपालभट्टः हरिभक्तिविलासे (15/120) स्कान्दनागरखण्डवचनं प्रतिपादयति यथा—
कलिङ्गानि पटोलानि वृन्ताकं सन्धितानि च ।
एतानि भक्षयेद्यस्तु सुप्ते देवे जनार्दने ।
सप्तजन्मार्जितं पुण्यं हरते नाऽत्र संशयः ॥ इति ।

कदम्बानि तत्फलानि शाकभेदार्थकानि कलम्बानीत्येके । कलिङ्गानीत्यपरे ।[1210]

रूक्षं तत्तद्देशलभ्यं फलमूलादि वर्जयेत् ।[1211]

अन्येऽपि "मधुरस्वरसम्पत्तिरि"त्यादयः स्मार्त्तचातुर्मास्ये कथिताः ।

ततस्तुत्वा प्रजापाले राजन्याशास्य मङ्गलम् ।
शङ्खतीर्थञ्च सम्प्राप्य गीतनृत्यादिना हरिम् ॥
परितोष्याथ सम्पूज्य वैष्णवान् नरयानकम् ।
भगवन्तं समारोप्य गीतवादित्रघोषतः ॥
आगत्य मन्दिरे कृत्वा महानीराजनं प्रभोः ।
विसृज्य वैष्णवान् देवानुपवेश्य स्वयं स्वपेत् ।
यो देवशयनं पार्थ ! अनुमोद्य समाचरेत् ।
उत्थानं वाऽपि कृष्णस्य हरिलोकमवाप्नुयात् ॥

अथ श्रावणमासकृत्यम्

प्रतापमार्त्तण्डे—तृतीयायां यजेद्देवीं शङ्करेण समन्विताम् ।

कुङ्कुमागुरुकर्पूरमणिवस्त्रसुपूपकैः ॥
स्रग्गन्धधूपदीपैश्च दमनेन विशेषतः ।
आन्दोलयेत्ततो विप्र ! शिवोमातुष्टये सदा ॥ इति ।
"श्रावणस्य सिते पक्षे द्वादश्यां शौनकादिभिः ।
उक्तः सदा प्रकर्त्तव्यः पवित्रारोपणोत्सवः ॥"[1212]

—इदञ्च नित्यम् ।

वर्षे वर्षे तु कर्त्तव्यं पवित्रारोपणं हरेः ।

इति विष्णुरहस्ये[1213] वीप्सादर्शनात् । "ऊर्जे रथमि"ति पाद्मात् ।

1211- रामार्च्चनचन्द्रिकायां पञ्चमपटले (पृ-153) । हरिभक्तिविलासे (15/121) स्कान्दे "देश" स्थाने "काल"-इति पाठः ।

1212- रामार्च्चनचन्द्रिकायां पञ्चमपटले (पृ-153) ।

1213- हरिभक्तिविलासे (15/173) विष्णुरहस्यवचने पूर्वार्द्धं यथा—
तस्माद्भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः । इति ।

विधिना शास्त्रदृष्टेन यो न कुर्यात् पवित्रकम् ।
हरन्ति राक्षसास्तस्य वर्षपूजादिकं फलम् ॥[1214]

इति वचनाच्च । काम्यमप्याह बौधायनः[1215] —

"यावांस्तन्तुः पवित्रस्य तावत्स्वर्गे महीयते ।
आयुरारोग्यमैश्वर्यं विपुलं तस्य वर्धते ॥"
"पावयत्येनसो नित्यं त्रायते भवबन्धनात् ।
पवित्रं तेन विख्यातं ब्राह्मं तेजोऽभिधीयते ॥
स एव यज्ञरूपेण यज्ञेशः कर्मणा प्रभुः ॥
तदेव त्रिगुणं सूत्रं ततो नारायणाख्यया ।
त्रिवेदात्मा त्रिदेवात्मा त्र्यक्षरः प्रणवः स्मृतः ॥"[1216]
बौधायनोक्ते त्रिगुणे पवित्रे दृश्यते विधिः ॥

अथ पवित्रकालः

विष्णुरहस्ये—श्रावणस्य सिते पक्षे कर्कटस्थे दिवाकरे ।
द्वादश्यां वासुदेवाय पवित्रारोपणं स्मृतम् ॥
सिंहस्थे वा रवौ कार्यं कन्यायाञ्च गतेऽथवा ।
तस्यामेव तिथौ सम्यक् न तु लक्ष्यं कदाचन ॥

तस्यां तिथौ शुक्लद्वादश्याम् । मन्त्रप्रकाशे च—

कर्कटके गते सूर्ये तथा सिंहगतेऽथवा ।
द्वादश्यां शुक्लपक्षस्य हरेर्द्द्यात् पवित्रकम् ॥
अथ चेद्विघ्नपातेन मुख्यकालो न लभ्यते ।
कन्यागतेऽपि कुर्वीत यावन्नोत्तिष्ठते हरिः ॥

1214- रामार्च्चनचन्द्रिकायां पञ्चमपटले (पृ-153) बह्वृचपरिशिष्टवचनेऽस्मिन् "सर्व पूजादिकं फलम्" इति चतुर्थपादपाठः ।

1215- मुद्रितबौधायनस्मृतौ वचनमिदं नोपलभ्यते । हरिभक्तिविलासे (15/174) तु "यावांस्तन्तुः"-स्थाने "यावत् सूत्रं" इति धृतः पाठः ।

1216- तत्रैव (15/179-181) द्वितीयश्लोकप्रथमार्द्धं यथा—
"विष्ण्वाख्यया तु विख्यातं तदा लोके विधीयते ।" इति ।

नोत्तिष्ठत इति तुलामासपरम्। अथवा उत्थापनात्प्राक् तुलामासोऽपि गौणत्वेन प्राप्यते। तेन न तुलास्थ इत्युत्थापनोत्तरतुलापरमित्यविरोधः।

पवित्रारोपणं काले न करोति कथञ्चन।
तदाऽयुतं जपेद्वाऽपि स्तोत्रं वाऽपि समाचरेत्॥

जपेन्मूलमन्त्रम्। स्तोत्रं रामगोपालादिस्तवादिकं वा पठेदित्यर्थः।

अथ पवित्रारोपणविधिः

योगसारे[1217] पवित्रोपाख्याने—

कनीयान् वासुकेर्भ्राता पवित्रो नाम नागराट्।
निराहारस्ततो भूत्वा दैविकं शरदां शतम्।
तपस्तेपे समाश्रित्य देवदेवं महेश्वरम्॥
प्रसन्नस्तपसा तस्य पुरस्तात् पुरुषोत्तमः।
प्रणतार्त्तिहरः शम्भुराविरासीदुमापतिः॥
प्रसादाभिमुखं दृष्ट्वा देवं स भुजगेश्वरः।
कण्ठाभरणतां प्राप्तुं वव्रे वरमनुत्तमम्॥
तथेत्याभाष्य तं तद्वद्धारयंस्त्रिपुरान्तकः।
प्रादात्तस्मै वरं चान्यं पवित्रायात्मयोगिने॥
ये त्वां न बहुमन्यन्ते यथा सम्भावितो मया।
जपहोमादिकं तेषां फलं त्वामेतु निश्चयात्॥
अत्रैव श्रावणे मासि नक्षत्रे चापि वैष्णवे।
तस्मादाराधयन्तु त्वां नित्यनैमित्तिकोद्यताः॥
वैदिकाः सक्तुहोमेन पूजां कुर्वन्तु तेऽनघ!।
त्वत्सादृश्यानुकारेण निवीतेनैव तान्त्रिकाः।
आराध्यारोप्य पूजायै देवतायै पवित्रकम्॥

इति पवित्रोत्पत्तिः।

"हेमरूप्यताम्रक्षौमैः सूत्रैः कौषेयपद्मजैः।

1217- रामार्च्चनचन्द्रिकायां पञ्चमपटले (पृ-154) "नागराट्"-स्थाने "सर्पराट्" इति धृतः पाठः।

कुशैः काशैश्च कार्पासैर्ब्राह्मण्या कर्त्तितैः शुभैः ॥
सत्कन्यया पवित्रं स्यान्न पुंश्चल्यादिभिः कृतैः ।
स्नात्वा त्रिगुणितं सूत्रं त्रिगुणीकृत्य शोधयेत् ॥
आदाय त्रिगुणीकृत्य पुनस्त्रिगुणयेच्छुचिः ॥"[1218]

नवगुणमित्यर्थः ।

"अभिषिच्य पञ्चगव्यैरद्भिः प्रक्षालयेत्ततः ।
मूलेनाष्टोत्तरशतं गायात्र्या रामसंज्ञया ॥
शङ्खोदकेनाभिमन्त्र्य पवित्राणि विनिर्ममेत् ।
दधिदुग्धविण्मूत्राज्यं पञ्चगव्यं क्रमाद्विदुः ॥
आप्याय स्वदधिक्राव्णस्तेजोसि शुक्रमस्यथ ।
गायत्र्यन्ते गन्धद्वारां मन्त्राः स्युः पञ्चगव्यके ॥"[1219]

इति सूत्रशुद्धिः । "तत्रोत्तमं पवित्रं तु षष्ट्या सह शतैस्त्रिभिः ।
सप्तत्या सहितं द्वाभ्यां पवित्रं प्रथमं स्मृतम् ॥
साशीतिना शतेनैव कनिष्ठं तत् समाचरेत् ॥
अष्टोत्तरतदर्द्धेन नवसूत्री क्रमेण वा ।
जानूरुनाभिपर्यन्तमुत्तमादित्रयं भवेत् ॥
अष्टोत्तरसहस्रेण वनमालां समाचरेत् ।
उत्तमस्य पवित्रस्य द्वैगुण्येनापि वा भवेत् ॥
आरभ्य मुकुटं यावत् सूत्रैर्विरचिता शुभा ॥
आपादलम्बिनी माला वनमाला प्रकीर्त्तिता ।
यजमानपवित्रं चाधिवासमपवित्रकम् ॥
कनिष्ठेन समं कार्यं मध्यमेन समं गुरोः ।
अग्नेः पवित्रं कुर्वीत मध्यमेन समं शुभम् ॥

1218- तत्रैव (पृ-154) प्रथमश्लोकचतुर्थपादे "ब्राह्मणीकर्त्तकैः शुभैः", "सत्कन्यया"-स्थाने "कन्यया वा" इति धृतः पाठः । "आदाय....शुचिः" इति भागो नास्ति ।

1219- तत्रैव (पृ-155) "अभिषिच्य"-स्थाने "हृन्मन्त्रेण" इति पाठः ।

यथासम्भवमन्येषां पवित्रं वाऽपि कारयेत् ।
साधारणपवित्राणि त्रिभिः सूत्रैः समाचरेत् ॥
उत्तमं तु शतग्रन्थिः पञ्चाशद् ग्रन्थिर्मध्यमम् ।
कनिष्ठं तु पवित्रं स्यात् षट्त्रिंशद् ग्रन्थिशोभनम् ॥
षट्त्रिंशच्च चतुर्विंश द्वादशेति च केचन ।
चतुर्विंशद्वादशाष्टावित्येके मुनयो विदुः ॥
अङ्गुष्ठपर्वमात्रं तु कुर्याद् ग्रन्थिमथोत्तमे ।
तदर्द्धेन तदर्द्धेन मध्यमे च कनिष्ठके ॥
ग्रन्थीन् कुर्वीत सर्वत्र सुवृत्तान् सुमनोहरान् ।
न वै विषमसङ्ख्यकान् ग्रन्थीन् कुर्वीत कुत्रचित् ॥
विशोभसूत्रदानेन कर्त्तुः स्यादशुभं फलम् ।
पवित्रं परया भक्त्या तस्मात् कुर्वीत शोभनम् ॥
कुङ्कुमं रोचनञ्चैव कर्पूरेण विमिश्रितम् ।
ततोऽभिमन्त्रणं कुर्यादिदं विष्णुश्च मन्त्रतः ॥
द्वादशाक्षरमन्त्रो यः सर्वसाधारणः स्मृतः ।
त्रींस्त्रीनुत्तमसूत्रे स्यात्तद्वदेवाधिवासके ।
द्विर्मध्यमेऽपि मन्त्रः स्यात् कनिष्ठे तु सकृत् स्मृतः ॥" 1220

इति पवित्रनिर्माणम् ।

"ततस्तानि पवित्राणि वैष्णवे पटले शुभे ।
संस्थाप्य शुचिवस्त्रेण पिधाय पुरतो न्यसेत् ।
अरत्निसंमितां वेणीं कुर्यात् षट्त्रिंशता कुशैः ।
मन्त्रयेत् मूलमन्त्रेण पञ्चगव्येन शोधयेत् ॥
तांस्तु कक्षान्तरे कृत्वा मानसं स्नानमाचरेत् ।
कृत्वा कृत्यं दशम्यां च पवित्रारोपणाय हि ॥

1220- तत्रैव (पृ.पृ-155-156) "प्रथमं"-स्थाने "मध्यमं", "त्रींस्त्रीन्"-स्थाने "त्रिस्त्रिः" , इति धृतः पाठः । "यथासम्भव....कारयेत् ।" इति भागश्च नास्ति ।

कृष्णं विज्ञाप्य तद्रात्रिं यथा प्राग्लिखितं नयेत् ।
एकादश्यां प्रभाते च नित्यकृत्यं समाप्य च ॥
देवालयमुपस्कृत्य मण्डलं रचयेच्छुभम् ।
पूजां विशेषतः कृत्वा कृष्णं विज्ञापयेदिदम् ॥
क्रियालोपविघातार्थं यत्त्वया विहितं प्रभो ।
मयैतत् क्रियते देव ! तव तुष्ट्यै पवित्रकम् ।
न मे विघ्नो भवेदत्र कुरु नाथ ! दयां मयि ।
सर्वथा सर्वदा विष्णो ! मम त्वं परमा गतिः ॥
देवस्य सर्वतो न्यसेद्दन्तकाष्ठं जलं कुशान् ।
मृत्तिकाञ्च हरिद्राञ्च कुङ्कुमं रोचनानि च ॥
उपानहौ सित च्छत्रं चामरं व्यजनं तथा ।
यवव्रीह्यादिधान्यानि यथास्थानं पृथक् पृथक् ॥
कुम्भं शुद्धाम्बुनापूर्य सर्वतो भद्रमण्डले ।
देवाग्रतो निधायाथ पवित्राण्यधिवासयेत् ॥
भगवत् पुरतस्तानि पटलस्थानि पूजयेत् ।
आदावावाहयेन्मूलपूजां तन्मनुना बुधः ॥"[1221]

मन्त्रः— "संवत्सरस्य यागस्य पवित्रीकरणाय भोः ।
विष्णुलोकात् पवित्राद्य आगच्छेह नमोऽस्तु ते ॥"
"अनेनावाहयेत् सूत्रं मूलमन्त्रयुतेन च ।
उत्तमादित्रये विद्वान् स्मरेद्देवत्रयं क्रमात् ॥
गुणादित्रितयञ्चैव ध्यायेल्लोकत्रयं तथा ।
तत्तन्मन्त्रैः संनिधाप्य नवसूत्र्यधिदेवताः ॥

1221- तत्रैव (पू.पृ-156-157)—"कृत्वा कृत्यं....विज्ञापयेदिदम् ।" भाग-पाठो नास्ति । अष्टमश्लोकप्रथमपादे "देवस्य सर्वतः स्थाप्य", चतुर्थपादे "कुष्ठं गोरोचनादि च", नवमश्लोके "पादुकोपानहौ छत्रं", "व्रीह्यादीन च धान्यानि पुरतः स्थापयेत्ततः ।", दशमश्लोके "शुद्ध"-स्थाने ' पुण्य", "भद्रमण्डले"-स्थाने "भद्रके शुभे", उत्तरार्द्धे च-"स्थापयेत् पुरतो विष्णो-स्तत्र सूत्राणि पूजयेत् ॥" इति पाठः ।

क्रिया च पौरुषी वीरा चतुर्थी चापराजिता ।
जया च विजया चैव मुक्तदा च सदाशिवा ॥
मनोमयी तु नवमी दशमी सर्वतोमुखी ।
ग्रन्थीनां देवतास्त्वेतास्तत्र तत्र निवेशयेत् ॥
ॐकारः सोमवह्नी च ब्रह्मा नागाः शशी रविः ।
शिवश्च विश्वेदेवाश्च नवसूत्र्यधिदेवताः ॥"[1222]

मन्त्रो यथा—ॐ सर्वाभरणचित्राङ्ग ! सर्वदेवनमस्कृत ! ।
लावण्यरूप ! विश्वात्मन् ! ज्येष्ठंसूत्रं समाश्रय ॥
सर्वलक्ष्मीकर ! श्रीश ! सर्वज्ञानमयात्मक ! ।
त्रिवृत्तिरूप ! विश्वात्मन् ! मध्यसूत्रं समाश्रय ॥
अतिवेग ! जगद्योने ! पुरुषात्मन् ! दिवस्पते ! ।
कनीयसि प्रभो देव ! तेजसा सूत्रमाश्रय ॥
यत्र मन्त्रो न वर्त्तेत तन्नामैव तु तत्र च ।
नमोऽन्तं सचतुर्थीकमूह्यमाश्लिखनेन्मनुम् ॥ (?)
सर्वाधारधरारूप ! सर्वभूतप्रजापते ! ।
सर्वगात्मेश ! सूत्रेषु सान्निध्यं कुरु ते नमः ॥
सर्वरत्नोज्ज्वलाकार ! सर्वब्रह्माण्डरोचिषा ।
मुकुटोत्तमसर्वाङ्ग ! शिरःसूत्र ! इहैहि भोः ! ॥
प्रकृतेर्जगतः कर्त्र सर्वलावण्यदायिनि ।
श्रीसूत्रे सर्वकल्याणि सान्निध्यं कुरु ते नमः ॥
"ब्रह्मविष्णुमहादेवास्त्रिसूत्रीदेवताः स्मृताः ।
ध्यात्वाऽऽवाह्यामृतीकृत्य गन्धपुष्पाक्षतादिभिः ।
धूपदीपान्नताम्बूलैः पवित्रं विबुधोऽर्च्चयेत् ॥

1222- तत्रैव (पृ-157)—"तत्तन्मन्त्रैः....देवताः ।" इति पाठो नास्ति । तृतीयश्लोकद्वितीयपादे "विजयेषाऽपराजिता" इति धृतः पाठः । चतुर्थश्लोक-पूर्वार्द्धपाठश्चापि यथा—

"मनोमयी जया भद्रा मुक्तिश्च ग्रन्थिदेवताः । इति ।

अथ देवकरे विद्वान् पटसूत्रविनिर्मितम् ।
वितस्तिमात्रं बध्नीयाद् दोरकं मङ्गलात्मकम् ॥"[1223]

मन्त्रो यथा— "संवत्सरकृतार्चायाः सम्पूर्णफलदोऽसि यत् ।
पवित्रारोपणायैतत् कुरु दोरक ते नमः ॥"

ततो गन्धं पवित्रञ्च गृहीत्वा धूपितं बुधः ।
भगवन्तं नमस्कृत्य भक्त्या सम्प्रार्थयेदिदम् ॥
आमन्त्रितोऽसि देवेश ! सिद्धदेवगणेश्वरैः ।
मन्त्रैश्चैर्लोकपालैश्च सहितः परिचारकैः ॥
आगच्छ भगवान्नाथ विधिसम्पूर्त्तिकारक ! ।
प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु केशव ! ॥

गन्धपवित्रार्पणमन्त्रो यथा—

विष्णुतेजोद्भवं रम्यं सर्वपातकनाशनम् ।
सर्वकामप्रदं देव ! तवाङ्गे धारयाम्यहम् ॥
अनेन मनुना विद्वान्मूलसम्पुटितेन ह ।
दद्याद् गन्धंपवित्रञ्च श्रीकृष्णचरणाब्जयोः ॥
नीराज्य देवं स्तुत्वा च दत्त्वा पुष्पाञ्जलिं ततः ।
तत्पवित्राणि तत्कुम्भमप्यस्त्रमनुनाऽथवा ॥
नृसिंहमनुना प्रोक्षेत् कवचेनावगुण्ठयेत् ।
गीतनृत्यादिना कुर्याद्विधिवज्जागरं निशि ॥ इत्यधिवासः ।

अथ पवित्रार्पणम्

प्रातःकृत्यादि निर्वर्त्त्य नित्यपूजां विधाय च ।
विशेषतोऽर्च्चयेद्देवं पवित्राणि च पूजयेत् ॥
सनामघोषं तत्तुर्यं गन्धदूर्वाक्षतैः सह ।
मूलसम्पुटितेनैव पवित्राण्यर्पयेत् क्रमात् ॥
पूजां कृत्वा परिवारदेवानां नान्यथार्पयेत् ॥

1223- तत्रैव (पृ-157) "अक्षतादिभिः"-स्थाने "अक्षताङ्कुरैः", "पवित्रं विबुधः"-स्थाने "पवित्राणि बुधः" इति धृतः पाठः ।

अर्पणमन्त्रो यथा—

राम राम ! नमस्तुभ्यं गृहाणेदं पवित्रकम् ।
पवित्रकं कुरुष्वाद्य यन्मया दुष्कृतं कृतम् ॥
शुद्धो भवाम्यहं देव त्वत्प्रसादाज्जनार्दन ! ॥ इति ।
"मूलसम्पुटितो ह्यस्य पवित्रारोपणे मनुः ।
नैवेद्यं तु महापूर्वं ततो दद्याच्च भक्तितः ॥
नीराजयेत्ततो देवं रमाकान्तं सुमङ्गलम् ।
संवीज्य चामरैः पुष्पैरादर्शं दर्शयेत्ततः ॥
श्रावयेद्देवदेवेशं मन्त्रैरेतैर्यथाविधि ।
मणिविद्रुममालाभिर्मन्दारकुसुमादिभिः ॥
इयं सांवत्सरी पूजा तवास्तु गरुडध्वज ! ॥
वनमाला यथा देव ! कौस्तुभं सततं हृदि ।
तद्वत्पवित्रतन्तुंश्च पूजाश्च हृदये वह ॥
जानताऽजानता वाऽपि न कृतं यत्तवार्च्चनम् ।
केनचिद्विघ्नदोषेण परिपूर्णं तदस्तु मे ॥"[1224]
अथाग्निं विधिनाभ्यर्च्च्य पवित्रं तत् समापयेत् ।
रामे निवेदयेन्मन्त्रहीनमित्यादिना कृतम् ॥
गुरुञ्च भक्त्या सम्पूज्य पवित्रं गुरवेऽर्पयेत् ॥
वैष्णवेभ्यः पवित्राणि दत्त्वैकं धारयेत् स्वयम् ।
सम्पूज्य वैष्णवान् विप्रान् भक्त्या सम्पूज्य बन्धुभिः ॥
समं महाप्रसादान्नं सुखं भुञ्जीत वैष्णवः ॥

अथ पवित्रविसर्गविधिः

"मासं पक्षमहोरात्रं त्रिरात्रं धारयेत्तथा ।
देवे तं सूत्रसन्दर्भदेशकालानुसारतः ॥
प्रत्यहं स्नानकर्मादि सूत्राण्युत्तार्य कारयेत् ।
अभिषिच्यार्घ्यतोयेन पुनर्देवे निवेशयेत् ॥

1224- तत्रैव (पृ.पृ-158-159) "श्रावयेत्"-स्थाने "प्रार्थयेत्"- पाठः ।

अध्यान्तं देवमभ्यर्च्य विशेषात् पुष्पचन्दनैः ।
नैवेद्यं विविधं दत्वा ततः सूत्रं विसर्जयेत् ॥
सांवत्सरीं शुभां पूजां सम्पाद्य विधिवन्मम ।
व्रजेदानीं पवित्र ! त्वं विष्णुलोकं विसर्जितम् ॥
यावद्देवपवित्राणि तावत्तिष्ठेत् समाहितः ।
ब्रह्मचारी हविष्याशी देवपूजापरायणः ॥"[1225]

अथ भाद्रमासकृत्यम्

भविष्योत्तरे—प्राप्ते भाद्रपदे मासि एकादश्यां सितेऽहनि ।
कटदानं भवेद् विष्णोर्महापातकनाशनम् ॥
सिते शुक्लपक्षे । जलाशयान्तिकं देवं नीत्वा दक्षिणतो बुधः ।
कटदानोत्सवं कुर्व इति सङ्कल्प्य पूजयेत् ॥
मन्त्रो यथा—देवदेव ! जगन्नाथ ! योगिगम्य ! निरञ्जन ! ।
कटदानं करिष्येऽद्य मासि भाद्रपदे शुभे ॥
महापूजां ततः कृत्वा शयनीवद् गृहं व्रजेत् ॥
यद्यपि राधाललिताजन्म हरिभक्तिविलासे नास्ति तथापि वैष्णवाचारात् साधनदीपिकायां सत्त्वाच्च तत्किञ्चिल्लिख्यते ।

ललिताजन्म

भद्रे ! भाद्रस्य सप्तम्यां शुक्लपक्षे युधिष्ठिर ! ।
योषितः सुभगाः सर्वाः सर्वलोकमनोहराः ॥
प्रातःस्नानं महानद्यां कृत्वा सङ्गृह्य वालुकाः ।
सोपवासप्रयत्नेन तत्र देवीं प्रपूजयेत् ॥
ललिते ! ललिते ! देवि ! सौख्यसौभाग्यदायिनि ! ।
या सौभाग्यसमुत्पन्ना तस्यै देव्यै नमो नमः ॥
भविष्योत्तरे—भद्रे ! भाद्रपदे मासि शुक्लाष्टम्यां युधिष्ठिर ! ।
प्रातःस्नानं महानद्यां कृत्वा सङ्गृह्य वालुकाम् ।
सोपवासप्रयत्नेन तत्र देवीं प्रपूजयेत् ॥

1225- तत्रैव (पृ-159) "अनुसारतः"-स्थाने "विवक्षया"-इति पाठः ।

देवीं वृजदेवीम् । इयं ज्येष्ठर्क्षयोगाज्ज्येष्ठाष्टमीत्युच्यते । ज्येष्ठेति राधायाः नामान्तरमिति केचित् । कालादर्शे—

भाद्रशुक्लाष्टमी ज्येष्ठानक्षत्रेण समन्विता ।
महती कीर्त्तिता तस्यां ज्येष्ठां देवीं प्रपूजयेत् ॥
मध्याह्ने जन्मसम्भाव्य महास्नानञ्च कारयेत् ॥

इयं जन्माष्टमीव सप्तमीकलाकाष्ठादिविद्धा निषिद्धा । अष्टमीक्षये तु सप्तमीविद्धैवेति भेदः ।

चन्दनागुरुकर्पूरमुशीरं कुङ्कुमं तथा ।
गोरोचना जटामांसी राधागन्धाष्टकं विदुः ॥

एतत्पूजादिकञ्च स्मार्त्ताष्टम्यामुक्तम् । केचित्तु अगस्त्यस्य वैष्णवरीत्या स्मार्त्तरीत्या वैष्णवानां तदर्घ्यदानमप्याहुः ।

आश्विनमासकृत्यम्

"आश्विनस्य सिते पक्षे दशम्यां विजयोत्सवः ।
कर्त्तव्यो वैष्णवैः सार्धं सर्वत्र विजयार्थिना ॥
हनुमद्वाक्यमाकर्ण्य हृष्टाति जनकात्मजा ।
आनन्दपूर्णैः कपिभिः विज्ञापितमुपस्थितम् ॥
रथोमारोप्य देवेशं सर्वाभरणभूषितम् ।
सासितूणधनुर्बाणपाणिं नक्तं चरान्तकम् ॥
स्वलीलया परित्रातुमाविर्भूतं रघूद्वहम् ।
रथैरश्वैर्गजैः पद्भिः सौमित्रिसुग्रीवादिभिः ॥
युतं राजोपचारैस्तं शमीवृक्षतलं नयेत् ।
शमीविष्णवर्चनं कुर्व इति सङ्कल्प्य पूजयेत् ॥
विष्णुधर्मोक्तमार्गेण यात्रानिर्विघ्नसिद्धये ।
शमीयुक्तं सीताकान्तं भक्तानामभयङ्करम् ।
अर्च्चयित्वा शमीवृक्षमर्च्चयेच्च ततः पुनः ॥

मन्त्रो यथा—शमी शमयते पापं शमी लोहितकण्टका ।
धरित्र्यर्जुनबाणानां रामस्य प्रियवादिनी ॥

करिष्यमाणा या यात्रा यथाकालं सुखं मया ।
तत्र निर्विघ्नकर्त्री त्वं भव श्रीरामपूजिते ॥
गृहीत्वा साक्षतामार्द्रां शमीमूलगतां मृदम् ।
गीतवादित्रनिर्घोषैस्ततो देवं गृहं नयेत ॥
कैश्चिदृक्षैस्तत्र भाव्यं कैश्चिदन्यैश्च वानरैः ।
कैश्चिद्रक्तमुखैर्भाव्यं कौशलेन्द्रस्य तुष्टये ॥
निर्जिता राक्षसा दैत्या वैरिणो जगतीतले ।
रामराज्यं रामराज्यं रामराज्यमिति ब्रुवन् ॥
आनीय स्थापयेद्देवं दिव्यसिंहासने विभुम् ।
ततो नीराज्य देवेशं दण्डवत् प्रणमेद् भुवि ॥
महाप्रसादवस्त्रादि धारयेद् वैष्णवैः सह ।
विष्णुधर्मोत्तरोक्तोऽयमाश्विने विजयोत्सवः ॥"[1226]

कार्त्तिककृत्यम्

पाद्मे[1227]—"आश्विने शुक्लपक्षस्य प्रारम्भे हरिवासरे ।
अथवा पौर्णमासीतः सङ्क्रान्तौ वा तुलागमे ॥
दीपदानमखण्डञ्च दद्याद्वै विष्णुसन्निधौ ।
देवालये तुलस्यां वा आकाशे वा तदुत्तमम् ॥"

एकादशीपदं हित्वा हरिवासरपदात् प्रारम्भपदाच्च व्रतयोग्यैकादश्यां कार्त्तिकव्रतं प्रतीयते । एवञ्च वञ्जुलीद्वादश्यामपि तल्लक्ष्यमिति । अत एवैतत् सूचयितुमुक्तम् । प्रारम्भे प्रथमे ।

1226- तत्रैव (पू.पृ-160-161) "वैष्णवैः"-स्थाने "सुजनैः", "विजयार्थिना"-स्थाने "विजयार्थिभिः", चतुर्थश्लोके प्रथमार्द्धे "स्वलीलया जगत्त्रातुमाविर्भूतमजं विभुम् ।", षष्ठे "सीताकान्तं"-स्थाने "रमाकान्तं", सप्तमे "पुनः"-स्थाने "पुमान्", त्रयोदशे "देवं"-स्थाने "सुखं", चतुर्दशश्लोकस्थाने च केवलं "देवोपभुक्तवस्त्रादि धारयेत् स्वजनैः सह ।" इति पाठः ।

1227- मुद्रितपद्मपुराणे वचनमिदं नोपलभ्यते । हरिभक्तिविलासे (16/183, 184) तु धृतः पाद्मपाठः ।

एकादशी द्वादशी च द्वावेतौ मम वासरौ ।

इति वचनात् द्वादशीत्यागमाय प्रथमग्रहः । भीष्मपञ्चकादावित्र ।

पाद्मे[1228]—"यत्र कुत्रापि देशेऽयं कार्त्तिकः स्नानदानतः ।

अग्निहोत्रसमफलः पूजायाञ्च विशेषतः ॥

कुरुक्षेत्रे कोटिगुणो गङ्गायामपि तत्समः ।

अतोऽधिकः पुष्करे स्याद् द्वारकायाञ्च भार्गव ! ॥"

"कार्त्तिके मथुरायां वै परमावधिरिष्यते ॥

यथा माघे प्रयागः स्याद्वैशाखे जाह्नवी यथा ।"[1229]

अत्र स्नानजपहविष्यत्रयं मिलितमेव विधिः । अशक्तौ प्रत्येकं स्नानं जपो वेत्यादिस्मार्त्तवत् । स्नानमन्त्रे भेदो यथा काशीखण्ड—

व्रतिनः कार्त्तिके मासि स्नातस्य विधिवन्मम ।

दामोदर ! गृहाणार्घ्यं दनुजेन्द्रनिसूदन ! ॥

नित्ये नैमित्तिके कृत्स्ने कार्त्तिके पापशोषणे ।

गृहाणार्घ्यं मया दत्तं राधया सहितो हरे ! ॥

सङ्कल्पकालस्तु "कार्त्तिकेऽहं करिष्यामी"[1230] तिलिङ्गात् प्रातः स्मार्त्ते निरुक्तम् । प्रार्थना यथा—

तव स्नानेन देवेश ! जलेऽस्मिन् स्नातुमुद्यतः ।

त्वत्प्रसादाच्च मे पाप दामोदर ! विनश्यतु ॥

कार्त्तिकव्रतक्रमो यथा[1231]—

1228- मुद्रितपुराणे नास्ति । हरिभक्तिविलासे (16/150,151) तु धृतम् ।

1229- हरिभक्तिविलासे (16/153,154) पाद्मे प्रथमश्लोकपूर्वार्द्धं द्वितीयश्लोकोत्तरार्द्धं च क्रमानुसारं यथा—

"मथुरायां तत्रश्चोर्जे वैकुण्ठप्रीतिवर्द्धनः ।"

"कार्त्तिके मथुरा सेव्या ततोत्कर्षः परो नरि ॥" इति ।

1230- पद्मपुराणे उत्तरखण्डे (93/7) सम्पूर्णमन्त्रो यथा—

कार्त्तिकेऽहं करिष्यामि प्रातःस्नानं सुरोत्तम ! ।

प्रीत्यर्थं देवदेवेश ! दामोदर मया सह ॥ इति ।

"नित्यं जागरणायान्त्ये यामे रात्रेः समुत्थितः ।
शुचिर्भूत्वा प्रबोधयाथ स्तोत्रैर्नीराजयेत् प्रभुम् ॥
नद्यादौ च ततो गत्वाऽऽचम्य सङ्कल्पमाचरेत् ।
प्रभुं संप्रार्थ्य तस्मै च दद्यादर्घ्यं यथाविधि ॥"

पाद्मे[1232]—"द्विजं दामोदरं कृत्वा तत्पत्नीं राधिकां तथा ।
कार्त्तिके पूजनीयौ तौ वासोऽलङ्कारभूषणैः ॥
गोवर्द्धनगिरौ रम्ये राधाकुण्डं हरेः प्रियम् ।
कार्त्तिके बहुलाष्टम्यां तत्र स्नात्वा हरेः प्रियः ॥"
दामोदराष्टकं स्तोत्रं पठेत् सत्यव्रतोदितम् ॥

यथा पाद्मे[1233] सत्यव्रत उवाच—

"नमामीश्वरं सच्चिदानन्दरूपं लसत्कुण्डलं गोकुलभ्राजमानम् ।
यशोदाभियोलूखलाद्धावमानं परामृष्टमत्यन्ततो द्रुत्य गोप्या ॥
रुदन्तं मुहुर्नेत्रयुग्मं मृजन्तं कराम्भोजयुग्मेन सातङ्कनेत्रम् ।
मुहुः श्वासकम्पत्रिरेखाङ्ककण्ठस्थितग्रैव दामोदरं भक्तिबद्धम् ॥
इतीदृक्स्वलीलाभिरानन्दकुण्डे स्वघोषं निमज्जन्तमाख्यापयन्तम् ।
तदीयेशितज्ञेषु भक्तैर्जितत्वं पुनः प्रेमतस्तं शतावृत्ति वन्दे ॥
वरं देव ! मोक्षं न मोक्षावधिं वा न चान्यं वृणेऽहं वरेशादपीह ।
इदं ते वपुर्नाथ गोपालबालं सदा मे मनस्याविरास्तां किमन्यैः ? ॥
इदं ते मुखाम्भोजमत्यन्तनीलैर्वृतं कुन्तलैः स्निग्धवक्त्रैश्च गोप्या ।

1231- हरिभक्तिविलासे (16/169, 171) श्रीकृष्णसत्यासम्वादीयकार्त्तिक-माहात्म्ये "सम्प्रार्थ्य"-स्थाने "प्रार्थयेथ"-इति धृतः पाठः ।

1232- मुद्रितपद्मपुराणे वचनमिदं नोपलभ्यते । हरिभक्तिविलासे (16/196,197) तु "भूषणैः"-स्थाने "भोजनैः" इति, अन्तिमश्लोकेऽधिका-न्तिमपाठो यथा—

नरो भक्तो भवोद्धिप्रास्तद्धि तस्य प्रतोषणम् ।

1233- मुद्रितपुराणे नोपलभ्यते । हरिभक्तिविलासे (16/199-206) तु "अत्यन्तनीलैः"-स्थाने "अव्यक्तनीलैः", "स्निग्धवक्त्रैः"-स्थाने "स्निग्ध-रक्तैः" इति धृतः पाठः ।

मुहुश्चुम्बितं बिम्बरक्ताधरं मे मनस्याविरास्तामलं लक्षलाभैः ॥
नमो देव दामोदरानन्त विष्णो ! प्रसीद प्रभो दुःखजालाब्धिमग्नम् ।
कृपादृष्टिवृष्ट्याऽतिदीनं बतानुगृहाणेश मामज्ञमेध्यक्षिदृश्यः ॥
कुबेरात्मजौ बद्धमूर्त्त्यैव यद्वत्त्वया मोचितौ भक्तिभाजौ कृतौ च ।
तथा प्रेमभक्तिं स्वकां मे प्रयच्छ न मोक्षे ग्रहो मेऽस्ति दामोदरेह ॥
नमस्तेस्तु दाम्ने स्फुरद्दीप्तिधाम्ने त्वदीयोदरायाथ विश्वस्य धाम्ने ।
नमो राधिकायै त्वदीयप्रियायै नमोऽनन्तलीलाय देवाय तुभ्यम् ॥"

इदं दामोदराष्टकं पठित्वा पायसादिनैवेद्यमर्पयेत् । उक्तञ्च पाद्मे[1234] —

नैवेद्यं पायसं विष्णोः प्रियं खण्डगुडान्वितम् ।

पायसमत्र योग्यतार्थमात्रात् पयःसम्बन्धिनवनीतम्, न तु परमान्नम् । शूद्राणां पाकदोषात् ।

आमं शूद्रस्य पक्वान्नं पक्वमुच्छिष्टमुच्यते ।

इति वचनात् । घनीभूतपय इति तु मेधातिथिः[1235] । राधादीनां भिन्नभिन्न-पात्रेषु दद्यात् ।

कार्त्तिककृष्णाष्टमीकृत्यम्

पाद्मे[1236] —"वृन्दावनाधिपत्यञ्च दत्तं तस्यां प्रतुष्यता ।
कृष्णेनान्यत्र देवी तु राधा वृन्दावने वने ॥

1234- मुद्रितपुराणे वचनमिदं नोपलभ्यते । हरिभक्तिविलासे (16/89) तु धृतं पाद्मवचनं यथा—

नैवेद्यं पायसं विष्णोः प्रियं खण्डं घृतान्वितम् ।
विभज्य तच्च भुञ्जानो यज्ञसाम्यं दिने दिने ॥ इति ।

1235- मेधातिथिः "पयसा पायसेन च" इति मनु (3/271) वचनमर्थापयन् आह यथा—"पयोविकारं पायसं दध्यादि ।" इति ।

1236- मुद्रितपद्मपुराणे पातालखण्डे (77/37-40) महेश्वरवचनं यथा—

शिवकुण्डे शिवानन्दा नन्दिनी देहिकातटे ।
रुक्मिणी द्वारवत्यां तु राधा वृन्दावने वने ॥
देवकी मथुरायां तु जाता मे परमेश्वरी ।
चन्द्र(चित्र)कूटे तथा सीता विन्ध्ये विन्ध्यनिवासिनी ॥

तत्कुण्डे कार्त्तिकेऽष्टम्यां स्नात्वा पूज्यो जनार्द्दनः ।
सुबोधन्यां यथा प्रातस्तथा प्रीतस्ततो महान् ॥"

कार्त्तिककृष्णत्रयोदशीकृत्यम्

"कार्त्तिके कृष्णपक्षे तु त्रयोदश्यां निशामुखे ।
यमदीपं बहिर्द्द्यादपमृत्युर्विनश्यति ॥
मृत्युना पाशदण्डाभ्यां कालः श्यामलया सह ।
त्रयोदश्यां दीपदानात् सूर्यजः प्रीयतामिति ॥"[1237]

चतुर्द्दशीकृत्यम्

चतुर्द्दश्यां ब्राह्ममुहूर्त्ते तैलादिना गृहे तप्तजलेन स्नात्वा पश्चान्नद्यादौ कार्त्तिके स्नानम् । ततः स्नात्वाऽऽर्द्राङ्ग एव शिरसः उपरि समृत्तिकमपामार्गं भ्रामयित्वा समन्त्रं निक्षिपेत् । मन्त्रो यथा ब्राह्मे—

शीतलोष्णसमायुक्तं सकण्टकजलान्वितम् ।
हर पापमपामार्ग भ्राम्यमाणः पुनः पुनः ॥

स्कान्दे[1238]—कार्त्तिके कृष्णपक्षे च चतुर्द्दश्यां दिनोदये ।
अवश्यमेव कर्त्तव्यं स्नानं नरकभीरुभिः ॥

दिनोदये प्रातः ।

"ततश्च तर्पणं कार्यं धर्मराजस्य नामभिः ।
जीवत्पिता न कुर्वीत तर्पणं यमभीष्मयोः ॥
यज्ञोपवीतिना कार्यं प्राचीनावितिना तथा ।
देवत्वञ्च पितृत्वञ्च यमस्यास्ति द्विरूपता ॥"[1239]

वाराणस्यां विशालाक्षी विमला पुरुषोत्तमे ।
वृन्दावनाधिपत्यञ्च दत्तं तस्यै प्रसीदता ॥
कृष्णेनान्यत्र देवी तु राधा वृन्दावने वने ।
नित्यानन्दतनुः शौरिर्योऽशरीरीति भाष्यते ॥ इति ।

1237- हरिभक्तिविलासे (16/211, 212) पाद्मवचनमेतत् ।
1238- तत्रैव (16/215) "दिनोदये" स्थाने "विधूदये" इति धृतः पाठः ।
1239- तत्रैव (16/216, 217) पाद्मवचनमेतत् ।

यमाय धर्मराजाय मृत्यवे चान्तकाय च ।
वैवस्वताय कालाय सर्वभूतक्षयाय च ॥
उदुम्बराय दध्नाय नीलाय परमेष्ठिने ।
वृकोकराय चित्राय चित्रगुप्ताय वै नमः ॥
एकैकशस्तिलैर्मिश्रांस्तांस्तु दद्याज्जलाञ्जलीन् ।
संवत्सरकृतं पापं तत्क्षणादेव नश्यति ॥

किञ्च, चतुर्दश्यां दीपदानं हरेश्च चार्थमेव च ।
शस्त्रहतानाञ्च तथा पितृणामक्षयं भवेत् ॥
अमावास्यां चतुर्दश्यां प्रदोषे दीपदानतः ।
यममार्गान्धकारेभ्यो मुच्यते नात्र संशयः ॥
कुमारीवटुका भोज्या तथा चैव तपोधनात् ॥

कार्तिकामावास्याकृत्यम्

"दिवा तत्र न भोक्तव्यं विना बालातुरान् जनान् ॥
प्रदोषसमये लक्ष्मीं पूजयेच्च यथाक्रमम् ।
दीपदानं ततः पश्चाल्लक्ष्मीं सुप्तां प्रबोधयेत् ॥"[1240]
पूर्वं बुद्धा ततो लक्ष्मीः प्रागद्वारेण दशाहकम् ।
कृष्णाग्रे दीपकान् कृत्वा उत्सवं रात्रौ कारयेत् ॥

प्रदोषोऽत्र रजनीमुखमिति प्राञ्चः । प्रयतोऽतीतो दोषो यस्मात्तादृशः ऊषःकालः समयपदाधिक्यात् । निश्युत्थाने जनक्षय इति ।

विष्णुर्दिवा न स्वपिति न रात्रौ प्रतिबुध्यते ।

इति कालस्यान्यत्र दृष्टत्वलिङ्गादेकत्र निर्णीतार्थस्यान्यत्रातिदेश इति न्यायादिहापि तथौचित्यात् । शिवरात्रौ प्रदोषस्य मध्यममुहूर्त्तवत् । एवञ्च स्मार्त्तैक्यमिति । एवञ्च पूर्वं दशाहकं बुद्धेति सार्थकमिति तत्त्वम् ।

त्वं ज्योतिः श्रीरविश्चन्द्रो विद्युत्सौवर्णतारकाः ।
सर्वेषां ज्योतिषां ज्योतिः दीपज्योतिःस्थिते नमः ॥

1240- तत्रैव (16/222, 223) पाद्मवचनेऽस्मिन् द्वितीयश्लोकपूर्वार्द्धपाठो यथा—"प्रदोषसमये विप्राः कर्त्तव्या दीपमालिकाः ।" इति ।

मन्त्रेणानेन कमलां दीपहस्तां स्त्रियो द्विजाः ।
देवीं प्रबोधयेयुश्च ततः कुर्यात्तु भोजनम् ॥
प्रदोषसमये लक्ष्मीं बोधयित्वा भुनक्ति यः ।
स पुमान् वत्सरं यावत् लक्ष्मीस्तं नैव मुञ्चति ॥

शुक्लप्रतिपत्कृत्यम्

स्कान्दे[1241] —प्रातर्गोवर्द्धनं पूज्य रात्रौ द्यूतं समाचरेत् ।
भूषणीयास्तथा गावः पूज्याश्च दोहवाहनाः ।

द्यूतस्थाने गीतमिति क्वचित् पाठः । प्रातरिति पञ्चधाविभक्तपूर्वाह्णकालः । दिनद्वये प्रातर्व्याप्तौ पूर्वा ग्राह्या ।

प्रतिपद्दर्शसंयोगे क्रीडनं तु गवां मतम् ।
परविद्धां तु यः कुर्यात् पुत्रदारधनक्षयः ॥[1242] इति वचनात् ।
"या कुहूः प्रतिपन्मिश्रा तत्र गाः पूजयेन्नृप ! ।"[1243]
"भद्रायां गोकुलक्रीडा देशनाशाय जायते ॥"[1244] इत्यतश्च ।

शुद्धाधिका प्रतिपद् द्वितीयायुताऽपि परैव ग्राह्या ।

यथा मलिम्लुचः पूर्वमासो दैवस्तथा परः ।
तथा त्याज्या तिथिः पूर्वा ग्राह्या चैव तथोत्तरा ॥

इति गोवर्द्धनप्रसङ्गे भविष्योत्तरात्[1245] । अधिमासवशान्मासाद्वैत्वे पूर्वं मलं हित्वा शुद्धोत्तरमासस्य ग्रहवदित्यर्थः । इदञ्च गोपालभट्टमतम्[1246] ।

1241- तत्रैव (16/231) द्यूतः पाठः ।
1242- तत्रैव (16/234) देवलवचनमेतत् ।
1243- तत्रैव (16/235) निर्णयामृतधृतवचनेऽपरार्द्धपाठो यथा—
पूजामात्रेण वर्द्धन्ते प्रजा गावो महीपतिः । इति ।
1244- तत्रैव (16/237) पूर्वार्द्धपाठो यथा—
नन्दाया दर्शने रक्षा बलिदानं दशासु च । इति ।
1245- तत्रैव (16/246) धृतः पाठः ।
1246- तत्रैव (16/236) गोपालभट्ट आह यथा—"ततः 'प्रातर्गोवर्द्धनंपूज्य' इति पूर्वाह्णतात्पर्यकम् , द्वितीयासमये तु सर्वथा निषिद्धम् ।" इति ।

नारायणभट्टादयस्तु एतद्वाक्ये विशिष्य गोवर्द्धनपूजानुपलम्भात् एकादशी-जन्माष्टम्यादौ चरितार्थतां मन्वाना इमं पक्षं तत्यजुः । युक्तञ्चेदं भासते परस्य तिथिमलत्वात् द्वितीयायुक्तनिषेधाच्चेति । पूजाविधिश्च पाद्मे[1247] —

"मथुरायास्तथाऽन्यत्र कृत्वा गोवर्द्धनं गिरिम् ।
गोमयेन ततः स्थूलं ततः पूज्यो गिरिर्यथा ॥
मथुरायां तथा साक्षात्कृत्वा चैव प्रदक्षिणम् ।
वैष्णवं धाम सम्प्राप्य मोदते हरिसन्निधौ ॥"

गोवर्द्धनप्रमाणं हरिवंशे[1248] —

शैलोत्पाटनभूरेषा महती निर्मिता मया ।
पञ्चक्रोशप्रमाणेन क्रोशैकविस्तरेण च ॥

यवोदराष्टमिति चतुर्विंशत्यङ्गुलैरेकहस्तः । तादृशाष्टसहस्रकरैः क्रोश इति भास्कराचार्यः ।

क्रोधापयेद्द्रावयेच्च गोमहिष्यादिकं ततः ।
वृषात् कर्षापयेद् गोपैरुक्तिप्रत्युक्तिवादनात् ॥[1249]

पूजामन्त्रो यथा—गोवर्द्धन ! धराधार ! गोकुलत्राणकारक ! ।
कृष्णबाहुकृतोच्छ्राय गवां कोटिप्रदो भव ॥

ततो गाः सम्पूज्य तृणादिकं विभवेऽन्नादिकं वा दद्यात् । ग्रहणे पक्वान्नाभावः । "शृतमन्नं विवर्जयेत्" इति ग्रहणकालीनपक्वस्याशुद्धत्वात् ।

प्रार्थना यथा स्कान्दे[1250] —

"लक्ष्मीर्या लोकपालानां धेनुरूपेण संस्थिता ।
घृतं वहति यज्ञार्थे तथा पापं व्यपोहतु ॥

1247- मुद्रितपद्मपुराणे नोपलभ्यते । हरिभक्तिविलासे (16/248, 249) तु पाद्मवचने "ततः स्थूलं" स्थाने "महास्थूलं" इति धृतः पाठः ।

1248- मुद्रितहरिवंशे विष्णुपर्वणि (18/57) श्रीकृष्णवचनेऽस्मिन् चतुर्थपादे "क्रोशकविस्तरो महान्" इति पाठः ।

1249- हरिभक्तिविलासे (16/253) स्कान्दवचनमेतत् ।

1250- तत्रैव (16/251,252) "तथा पापं" स्थाने "यमपाशं" इति पाठः ।

अग्रतः सन्तु मे गावो गावो मे सन्तु पृष्ठतः ।
गावो मे पार्श्वतः सन्तु गवां मध्ये वसाम्यहम् ॥"
"महिष्यादेस्तथा भूषा क्रीडनं चारणं तथा ।"[1251]
एवं गोवर्द्धनो गावश्च पूजनीया विशेषतः ॥
ततस्तत्रैव सन्ध्यायां मार्गपालीव्रतं कुर्यात् ।

स्कान्दे— ततोऽपराह्णसमये पूर्वस्यां दिशि भारत ! ।
मार्गपालीं निबध्नीयात्तुङ्गे स्तम्भेऽथ पादपे ॥
कुशकाशमयीं दिव्यां लम्बनैर्बहुभिर्मुने ।
कृते होमे द्विजस्तत्र बध्नीयान्मार्गपालिकाम् ॥

मन्त्रो यथा—मार्गपालि ! नमस्तेऽस्तु सर्वलोकसुखप्रदे ! ।
विधेयैः पुत्रदाराद्यैः पुनते हि व्रतस्य ताम् ॥

अथ बलिदैत्यपूजा

लिखित्वा श्रीबलिं पट्टे बिन्ध्यावल्यान्वितं मुदा ।
प्रदोषे तत्प्रतिपदो भगवद् भक्तमर्च्चयेत् ॥

स्कान्दे[1252]—"बलिमालिख्य दैत्येन्द्रं वर्णकैः पीतरङ्गकैः ।
कुष्माण्डभयजम्योरुमुरुदानवसङ्कुलम् ॥
द्विभुजं दैत्यराजानं कारयित्वाऽर्च्चयेन्नृप ! ॥"

पाद्मे[1253]—"यदार्पितं देहमनेन विष्णवे भीतेन मिथ्यावचसो महात्मना ।
दैत्येन तेनाथ कठोरचेष्टया बद्धो बलिर्वामनमूर्तिना वत ॥
बद्ध्वा नीतोऽथ पातालं विमनाः खिन्नमानसः ।
नाभ्यसूयद्धरिं दैत्यस्त्यक्त्वाहं ममतः सुधीः ॥
तत्रोवाच हरिः प्रीतः तस्मै दैत्याय भागकृत् ॥

1251-तत्रैव (26/254)पाद्मवचनेऽस्मिन् "चारणं"-स्थाने "रावणं" पाठः ।
1252-तत्रैव (16/257,258) "पीत" स्थाने "पञ्च"-इति धृतः पाठः ।
1253-मुद्रितपद्मपुराणे वचनमिदं नोपलभ्यते । हरिभक्तिविलासे (16/259, 262) तु पाद्मे "यदा" स्थाने "यथा","तत्र" स्थाने "तदा" धृतपाठः ।

अश्रोत्रिये दत्तममन्त्रकं हुतं जप्तं तथा व्यग्रधिया जनेन यत् ।
तथोर्जशुक्लप्रतिपद्दिने न तु त्वामर्च्चयेत्तत् सुकृतं तवास्तु ॥"
इति तस्मै वरो दत्तो हरिणा दितिजाय च ॥

बलिपूजाविधिः स्कान्दे[1254] यथा—
"गृहस्य मध्ये शालायां विशालायां ततोऽर्च्चयेत् ।
कमलैः कुमुदैः पुष्पैः कह्लारै रक्तकोत्पलैः ।
गन्धपुष्पादिनैवेद्यै रक्षतैर्गुडपूपकैः ॥"

पूजामन्त्रो यथा—बलिराजन् ! नमस्तुभ्यं वैरोचनसुत ! प्रभो ! ।
भविष्येन्द्र सुराराते ! पूजेयं प्रतिगृह्यताम् ॥
दीपोत्सवैर्जनितसर्वजनप्रमादैः कुर्वन्ति ये सुमतयो बलिराजपूजाम् ।
नानोपभोगसुखवृद्धिशताकुलानां नूनं प्रयान्ति सकलं प्रमुदैव वर्षम् ॥

प्रदोषद्वैधे पूर्वविद्धा स्मार्त्तवत् । अत्र द्यूतमपि कार्यम् ।
"प्रातर्गोवर्द्धनं पूज्य द्यूतञ्चापि समाचरेत् ॥"
"तस्माद् द्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैः ।
तस्मिन् दिने जयो यस्य तस्य संवत्सरः शुभः ॥"

शुक्ला गोपाष्टमी

पाद्मे[1255]—शुक्लाष्टमी कार्त्तिके तु स्मृता गोपाष्टमी बुधैः ।
तद्दिने वासुदेवोऽभूद् गोपः पूर्वं तु वत्सपः ॥

रम्यं बालं कृष्णवेशं कारयित्वा गोचारणार्थं प्रेष्य भक्ष्यादिसहितो यशोदारूपः कश्चित्तं सायमायान्तमनुगतो गच्छेत् । ततो वैष्णवान् सत्कृत्य कृष्णं स्नापयित्वा विसर्जयेत् । वस्तुतस्तु, "गोष्ठाष्टम्यां गवां पूजे"त्यादिस्मार्त्तरीत्या गोपूजाऽनुगमनादिकं कृत्वा गोचारणार्थं कृष्णरूपं बालं प्रेषयेत् ।

अथ प्रबोधनीकृत्यम्

भविष्योत्तरे—कार्त्तिके शुक्लपक्षस्य एकादश्यां समाहितः ।

1254- हरिभक्तिविलासे (16/263, 264) प्रथमश्लोकोत्तरार्द्धं यथा—
भ्रातृमातृजनैः सार्धं सन्तुष्टा बन्धुभिस्तथा । इति ।

1255- मुद्रितपद्मपुराणे नास्ति, हरिभक्तिविलासे (16/271) तु धृतम् ।

मन्त्रैरेतैस्तु राजेन्द्र ! देवमुत्थापयेद् बुधः ॥
"जन्मप्रभृति यत्पुण्यं नरेणोपार्जितं भुवि ।
वृथा भवति तत्सर्वं न कृत्वा बोधवासरम् ॥"[1256]

श्रीरामं रथमारूढं कृत्वा नयेत् । भविष्ये[1257] —

रथोत्सवे मुकुन्दस्य येषां हर्षोऽपि जायते ।
तेषां न नारकी पीडा यावदिन्द्राश्चतुर्दश ॥

पाठश्च — "पलायध्वं पलायध्वं रे रे दितिजदानवाः ! ।
संरक्षणाय लोकानां रथारूढो नृकेशरी ॥"[1258]
नृत्यमानैर्भागवतैर्गीतवादित्रनिःस्वनैः ।
भ्रामयेत् स्यन्दनं विष्णोः पुरमध्ये समन्ततः ॥
नानुव्रजति यो मोहाद् व्रजन्तं जगदीश्वरम् ।
ज्ञानग्निदग्धकर्मा तु सम्भवेद् ब्रह्मराक्षसः ॥
रथेन सह गच्छन्ति ये पुरः पृष्ठतोऽग्रतः ।
विष्णुनैवोपमाः सर्वे भवन्ति श्वपचादयः ॥
रथेन गच्छन् भगवाननुगम्योऽखिलैर्जनैः ।
स्वस्वगेहगतश्चार्च्योऽन्यथा दोषो महान् भवेत् ॥
अथ स्वमन्दिरे नीत्वा पूर्ववत् पूजयेत् प्रभुम् ॥
रात्रौ जागरणं कृत्वा विधिवद् वैष्णवैः समम् ।
प्रभाते विमले स्नात्वा भोजयेदन्नविस्तरैः ॥

ततः प्रागुक्तरीत्या तप्तमुद्रां धृत्वा शयन्यां विघ्ने गुरुञ्च वस्त्रालङ्कारादिभिः सम्पूज्य चातुर्मास्यनियमं कृत्वा वैष्णवैः सह भुञ्जीत । प्रबोधमन्त्रादिकं स्मार्त्तवत् ।

भीष्मपञ्चकम्

"आरभ्यैकादशीं पञ्च दिनानि व्रतमाचरेत् ।

1256- हरिभक्तिविलासे (16/274) स्कान्दवचनमेतत् ।
1257- मुद्रितभविष्यपुराणे वचनमिदं नोपलभ्यते, हरिभक्तिविलासे (16/347) तु भविष्योत्तरवचनमेतत् ।
1258- हरिभक्तिविलासे (11/371) विष्णुधर्मोत्तरवचनमेतत् ।

भगवत्प्रीतये भीष्मपञ्चकं यदि शक्नुयात् ॥
तथा धात्रीव्रतं पौर्णमास्यां कुर्वीत कार्त्तिके ॥" [1259]

शक्नुयात् इत्युक्ते वैष्णवानां प्रायशः पञ्चककृत्यसमाचारः । शक्नुयादित्याश्विनशुक्लैकादश्यारब्धव्रतपरम् । पूर्णिमापक्षे तु मासपूरणायात्याज्यमेव । वैष्णवसर्वस्वे तु—ऊर्जे शुक्ले तु पूर्णायां युगे त्वाद्ये हरिः स्वयम् ।

मत्स्यो भूत्वा प्रादुरासीत सायं काले गुरोर्दिने ॥
माधवे मासि शुक्लायामेकादश्यां तिथौ हरिः ।
कूर्माकारो महान्नासीन्मध्याह्ने गिरिरक्षकः ॥
शुक्रे मासि तथा दर्शे तृतीये युगपर्यये ।
तत्राभूच्छ्वेतवाराहः सायाह्नेऽर्के च वै विभुः ॥

इति मात्स्यकौर्मवाराहजयन्तीत्रयं लिखितम् । तस्य चन्द्रिकाविलासादावभावेऽपि तत्पूजोत्सवान्तभोजनादौ वैष्णवानां फलाधिक्यम् । फाल्गुनपूर्णिमायां चैतन्यजन्मनि सनकवैष्णवानां तत्पूजोत्सवान्तभोजनादिकं त्वाचारकृतं केषाञ्चित् । एवं लक्ष्मीनारायणोपासकानां कार्त्तिकशुक्लद्वादश्यां रामानुजतिरोभावदिनत्वादुपवासादिकमाचारसिद्धमिति सङ्क्षेपः ।

अथ मार्गशीर्षकृत्यम्

गौतमीये[1260]—"मार्गशीर्षे तथा मासि प्रातः स्नात्वा नरोत्तमः ।
क्रमपूजां समासाद्य जपहोमौ तथाऽऽचरेत् ॥
पायसं गुडसंमिश्रं प्रत्यहं तु निवेदयेत् ।
एवं मासार्चनं कृत्वा भवेद् भाग्यालयः पुमान् ॥
देहान्ते मोक्षमाप्नोति प्रसादाच्छार्ङ्गधन्वनः ॥"

पायसं नवनीतामिश्रादि, न तु परमान्नमिति प्रागुक्तम् ।

तुलसीकाननेऽप्यत्र मार्गे मासि विशेषतः ।
भगवन्नृत्यगीतादि कुर्वीत सह वैष्णवैः ॥

1259- तत्रैव (16/434, 435) धृतः पाठः ।

1260- मुद्रितगौतमीयतन्त्रे (31/76-78) "मासि प्रातः स्नात्वा"-स्थाने "प्रातः स्नात्वा चैव", "तथाऽऽचरेत्"-स्थाने "समाचरेत्", "तु निवेदयेत्"-स्थाने "विनिवेदयेत्" इति पाठः ।

विशेषतश्च मासेऽस्मिन् वस्त्रं शीतनिवारणम् ।
चित्रं भगवते दद्याज्जगज्जाड्यहरं हि तत् ॥

विष्णुधर्मोत्तरे—मार्गशीर्षे त्वेकभक्तं कृत्वा योऽभ्यर्चयेद्धरिम् ।
भोजयित्वा द्विजान् मुक्तः स्यादित्याह कलिप्रियः ॥[1261]

देवीपुराणे—मार्गशीर्षादारभ्य केशवनारायणमाधवगोविन्दविष्णुमधुसूदन-त्रिविक्रमवामनश्रीधरहृषीकेशपद्मनाभदामोदरान् एतान् (क्रमेण) द्वादशमासेषु पूजयेत् । पूर्णमासाशक्तौ—

"मासार्द्धं वा समग्रं वा दशाहं वा तदर्द्धकम् ।
यथाशक्ति हरेः पूजां कुर्वन्नाप्नोति तत्पदम् ॥"[1262]
"हरेर्नैवेद्यसम्भारान् वैष्णवेभ्यः समर्पयेत् ॥"[1263]

मार्गशीर्षकृष्णपञ्चम्यां सीताविवाहः कार्य इत्युक्तं प्राक् ।

अथ पौषमासकृत्यम्

पञ्चरात्रे[1264]—"मार्गस्यैकादशीं शुक्लामारभ्य स्थण्डिलेशयः ।
मासमात्रं हरिप्रीत्यै त्रिवारं स्नानमाचरेत् ॥
त्रिकालं भोजयेत् कृष्णं त्यक्तभोगो जितेन्द्रियः ।
पौषस्य द्वादशीं शुक्लां यावत् पुण्यफलप्रदाम् ॥
कृत्वा याति हरेः स्थानं पूजां दध्योदनोत्सवाम् ॥"

1261- हरिभक्तिविलासे (14/6) धृतः पाठः ।

1262- तत्रैव (14/69) सौपर्णे "यथाशक्ति"-स्थाने "यथाशक्त्या" इति धृतः पाठः

1263- तत्रैव (9/327) प्रह्लादपञ्चरात्रवचनेऽस्मिन् पूर्वार्द्धपाठो यथा—
स्वभावस्थैः कर्मजडान् वञ्चयन् द्रविणादिभिः । इति ।

1264- तत्रैव (14/14-16) "मार्गस्य"-स्थाने "पौषस्य", "भोजयेत्"-स्थाने "पूजयेत्", अन्तिमश्लोकपूर्वार्द्धं च—"मासमेकं तदर्द्धं वा दशाहं वा तदर्द्धकम् ।" इति । रामार्च्चनचन्द्रिकायां (पृ-165) च "मार्गस्य"-स्थाने "पौषस्य", "हरि"-स्थाने "रघु", "त्रिवारं"-स्थाने "द्विवारं", "भोजयेत् कृष्णं"-स्थाने "अर्च्चयेद्रामं", द्वितीयश्लोकोत्तरार्द्धं च धृतः पाठो यथा—
"माघस्य द्वादशी शुक्ला भवेत् पुण्यफलप्रदा ॥" इति ।

अशक्तौ मासार्द्धं वा दशाहं वेति प्रागुक्तम् ।

घृतप्रस्थेन देवेशं पौषपुष्यसिते नरः ।
स्नापयित्वाऽश्वमेधस्य फलं प्राप्नोत्यसंशयम् ॥[1265]

माघमासकृत्यम्

पाद्मे[1266]—"सम्प्राप्ते मकरादित्ये पुण्ये पुण्यप्रदे सदा ।
सत्कार्यास्तिथयः सर्वाः स्नानदानादिकैः सह ॥
कर्त्तव्यो नियमः कश्चिद् व्रतरूपी नरोत्तमैः ।
फलातिशयहेतोर्वै किञ्चिद्भोज्यं त्यजेद् बुधः ॥
भूमौ शयीत होतव्यमाज्यं तिलविमिश्रितम् ।
त्रिकालं चार्च्चयेन्नित्यं वासुदेवं सनातनम् ॥"
माघे मास्युषसि स्नात्वा विष्णुलोकं स गच्छति ॥

इति वचनादरुणोदयकालः, स्मार्त्तवत् ।

ब्राह्मणः क्षत्रियो वैश्यो मन्त्रवत्स्नानमाचरेत् ।
तुष्णीमेव तु शूद्रस्य स्त्रीणाञ्च कुरुनन्दन ! ॥

इत्यादिकम् "इमं मे वरुण श्रुधी" त्यादि श्रौतमन्त्रनिषेधकम्, न तु स्मार्त्तमन्त्राणामित्युक्तं प्राक् ।

माघस्नानं सदा कार्यं वर्षे वर्षे च नारद ! ।
यत्र वा तत्र वा स्नायान्माघे नित्यमिति श्रुतिः ॥
अवश्यमेव कर्त्तव्यं माघस्नानं यथाविधि ॥

इति वचनात् वैष्णवानामिदं नित्यम् । स्मार्त्तानां केवलं काम्यमिति प्राञ्चः ।

अस्मिन्मासे त्वशक्तोऽपि स्नायादपि दिनत्रयम् ।
पञ्च वा सप्त वाऽहनि चन्द्रवद् वर्द्धते फलम् ॥

1265- हरिभक्तिविलासे (14/19) पञ्चरात्रवचनमेतत् ।

1266 मुद्रितपद्मपुराणे उत्तरखण्डे (127/8,9,11,12) दत्तात्रेयोक्तौ- "दानादिकैः सह"-स्थाने "दानादिकर्मसु", द्वितीयश्लोकोत्तरार्द्धे-"कर्त्तारं दापयन्तीह ह्यक्षयं शाश्वतं पदम् ।", चतुर्थश्लोके"नित्यं"-स्थाने "विष्णु"- इति पाठः ।

त्रिदिनानि कृष्णचतुर्दशीशुक्लसप्तमीपूर्णिमाः । पञ्चपक्षे वसन्तपञ्चमीभीष्माष्टमीयुतास्ताः तिस्रः । सप्तपक्षे मकरसङ्क्रान्त्या द्विदिनाभ्यामेकादशीद्वयेन वा युतास्ताः पञ्च । स्नानीयजलस्य सरयूयमुनात्वेनावाहनं पूर्वोक्तसरय्वष्टकपठनञ्च । शेषं स्मार्त्तवत् ।

वसन्तपञ्चमी

"माघस्य शुक्लपञ्चम्यां महापूजां समाचरेत् ।
नरः प्रबालकुसुमैरनुलेपैर्विशेषतः ॥
नीराजनोत्सवं कृत्वा भक्त्या सम्मान्य वैष्णवान् ।
वसन्तरागं जनयन् गीतनृत्यादि कारयेत् ॥
कृत्वा वसन्तपञ्चम्यां श्रीकृष्णस्यार्च्चनोत्सवम् ।
स्याद्वसन्त इव प्रेयान् वृन्दावनविहारिणः ॥"[1267]

भीष्माष्टमी

"माघस्य चाष्टमीं शुक्लामारभ्य दिनपञ्चकम् ।
तर्पयेदथवाऽष्टम्यां भीष्मं भागवतोत्तमम् ॥
नित्यतर्पणतः पश्चात् सलीलान्तरुदङ्मुखः ।
निवीती तर्पणं कुर्याद् गाङ्गेयस्य महात्मनः ॥"[1268]

पश्चादिति ब्राह्मणस्य वर्णज्यैष्ठ्यात् । शूद्रस्य तु पूर्वमिति प्रागुक्तम् । "वैयाघ्रपद्येति" मन्त्रः स्मार्त्ते स्थितः ।

भैम्येकादशी

मात्स्ये[1269] —"यद्यष्टमीचतुर्दश्योर्द्वादशीष्वथ भारत ! ।
अन्येष्वपि दिनर्क्षेषु न शक्तस्त्वमुपोषितुम् ॥
ततः पुण्यामिमां भीम ! तिथिं पापप्रणाशिनीम् ।
उपोष्य विधिनाऽनेन गच्छ विष्णोः परं पदम् ॥"

1267- हरिभक्तिविलासे (14/167, 168, 170) धृतः पाठः ।

1268- तत्रैव (14/171, 172) धृतः पाठः ।

1269- मुद्रितमत्स्यपुराणे नास्ति, हरिभक्तिविलासे (14/179, 180) तु धृतम् ।

फाल्गुनमासकृत्यम्

यमः[1270]—प्रातःस्नायी भवेन्नित्यं द्वौ मासौ माघफाल्गुनौ ।
देवान् पितॄन् समभ्यर्च्य मुच्यते सर्वकिल्बिषैः ॥

फाल्गुनशुक्लद्वादशी

अस्यामामलकीमूले कृष्णं सम्पूज्य प्रदक्षिणीकुर्यात् ।
फाल्गुने मासि शुक्लायामेकादश्यां जनार्द्दनः ।
वसत्यामलकीमूले लक्ष्म्या सह जगत्पतिः ॥ इति भविष्योत्तरात् ।
आमलकीद्वादशीति लोके ख्यातेयमेव हि ।
योगाभावे तु तन्नाम्ना तदीयैकादशी मता ॥
देवैर्ब्रह्मादिभिः सर्वैः पक्षोऽसौ वैष्णवः स्मृतः ॥
तत्र गत्वा हरिः पूज्यो वृक्षमूलेऽथवा शिवा ।
पूज्या पुष्पैः शुभै रात्रौ कार्यं जागरणं नरैः ॥

फाल्गुनपूर्णिमायां वसन्तोत्सवः

"फाल्गुन्यां पौर्णमास्यां तु विदध्याद्वैष्णवैः सह ।
श्रीकृष्णप्रियभक्तस्य वसन्तस्यार्च्चनोत्सवम् ॥"[1271]
भविष्योत्तरतो ज्ञेयस्तद्विधिर्नेह तन्यते ।

संयोगात्तत्र यथा—

वृत्ते तुषारसमये सितपञ्चदश्यां प्रातर्वसन्तसमये समुपस्थिते च ।
सम्प्राश्य चूतकुसुमं सह पल्लवेन सत्यं हि पार्थ ! पुरुषोऽब्दशतं सुखी स्यात् ॥

सम्प्राश्येत्यनेनैतद्दिनात् पूर्वं विष्णुनिवेदनाभावात् चूतफलकुसुमानामनशनं शिष्टाचारः । "दक्षिणाभिमुख देवमि"ति वैष्णवग्रन्थात् स्मार्त्तानामपि विष्णोर्दोलायां दक्षिणामुखत्वम् , अन्यस्मार्त्तवत् ।

1270- मुद्रितयमस्मृतौ नास्ति , हरिभक्तिविलासे (14/183) तु धृतम् ।

1271- हरिभक्तिविलासे (14/235) धृतः पाठः ।

अधिमासकृत्यम्

भविष्योत्तरे[1272]—

"अधिमासे तु सम्प्राप्ते स्मृत्वा गोपीपतिं हरिम् ।
सुवर्णञ्चाज्यसंयुक्तांस्त्रयस्त्रिंशदपूपकान् ॥
दद्याच्च वेदविदुषे श्रोत्रियाय कुटुम्बिने ।
नश्यत्यकरणे शीघ्रं पुण्यं द्वादशमासजम् ॥"

वैष्णवविधवानां जयन्त्येकादश्युपवासः स्मार्त्तयोग्यदिने प्रधानम् । शक्तानां वा दिनद्वये । प्रमादिना स्मार्त्तदिनत्यागे सावित्र्यष्टाक्षरयोः सहस्रद्वयजपः । प्रमाद् वैष्णवदिनत्यागे गोधामयूरमांसाशनवद् द्विजानामिव तत्प्रायश्चित्ताभावः ।

इत्थं सनकश्रीरामोपासकवैष्णवानामाचारः सङ्क्षेपाद्वर्णितः ।

स्मार्त्ताचारस्थितं किञ्चिदतिदिश्येत वैष्णवे ।
वैष्णवस्थं तथा स्मार्त्ते यन्नोक्तं विस्तरान्मया ॥
षोडशानां तिथीनाञ्च द्वैधेऽनुष्ठाननिर्णयः ।
स्मार्त्तवैष्णवयोः प्रोक्तः स योगो लाघवान्मया ॥

1272- तत्रैव (16/437, 438) "गोपीपतिं"-स्थाने "गोपीप्रियं" इति पाठः । रामार्च्चनचन्द्रिकायां (पृ-166) तु "गोपीपतिं"-स्थाने "सीतापतिं", प्रथमश्लोकद्वितीयार्द्धं च—

"सुवर्णेनाज्यसंयुक्तांस्त्रयस्त्रिंशदपूपकान् ।"

इति धृतः भविष्योत्तरवचनपाठः ।

धर्मस्य कारकहेतुरूपेण दानादि निर्णीतम् । तदुक्तं याज्ञवल्क्येन (1/6) यथा—देशे काल उपायेन द्रव्यं श्रद्धा समन्वितम् ।
पात्रे प्रदीयते यत्तत् सकलं धर्मलक्षणम् ॥ इति ।

पात्रञ्चापि प्रतिपादितं तेन । तद्यथा (1/200)—

न विद्यया केवलया तपसा वाऽपि पात्रता ।
यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्त्तितम् ॥ इति ।

अत्र गृहिवैष्णवः धर्मसम्पादनार्थमधिमासात्मकसमुचितकाले जातिविद्यानुष्ठानतपस्यादिगुणयुक्ताय श्रोत्रियाय सुवर्णादि श्रद्धापूर्वकं दद्यात् ।

इतिश्रीमत्कौत्सकुलकैरवशरन्निशाकरन्यायवैशेषिकमीमांसाऽशेष-
भाष्यादिशास्त्राकूपारपारङ्गमसाहित्यसङ्गीतच्छन्दःप्राकृत-
ज्योतिःपाटीवीजादिगर्वसार्वंकषमहामहोपा-
ध्यायकविकोविदकृष्णमिश्रविरचिते काल-
सर्वस्वे वैष्णवप्रकरणं समाप्तम् ।

[समाप्तश्चायं ग्रन्थः]

मञ्जूषाकृद्विवृत्तिः

भरद्वाजकुलोत्पन्नानाचार्य्यकुलमण्डनान् ।
मिश्रोपाह्वान् गुरुश्रेष्ठान् श्रीकुलमणिसंज्ञकान् ॥
ध्यायनधिगतविद्यान् कृष्णमिश्रांश्च कोविदान् ।
मञ्जूषा टीप्पनी सेयं मुदे तेषां प्रवर्त्ततान् ॥
काश्यपगोत्रसम्भूतो नवघनः सदाशयः ।
यदुनाथ इति श्रीमान् विवेकवान् तदात्मजः ॥
वर्णकर्मरतो नित्यं विप्रवैष्णवपूजकः ।
श्रद्धाशीलो मृदुर्दान्तो न परद्रोहकर्मधीः ॥
सर्वेऽप्यमी दिवं प्राप्ताः पुण्यकर्मपरायणाः ।
शुभाशिषप्रदानेन कृतार्थयन्तु मां सदा ॥
यदुनाथात्मजः सोऽयं विश्वनाथोऽल्पचेतनः ।
गुरुकृपावशात् यत्तु प्राप्तं तत् प्रत्यपादयत् ॥
सद्भिश्चेदत्र विद्वद्भिर्न्यूनता पूरयिष्यते ।
तेन धन्यो भविष्यामि यत्नो मे सार्थको भवेत् ॥
यदिच्छयाऽखिलं जन्यं जगदिदं च कल्यते ।
कालसर्वस्वमञ्जूषा तत्पादेषु समर्प्यते ॥

—o—

भारतीयकुण्डलीविज्ञानम्—सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
सिद्धान्तशिरोमणिः—वाराणसेयहिन्दुविश्वविद्यालयः-1964 A.D.
साङ्ख्यदर्शनम्—चौखम्बाप्रकाशनम्
पदार्थतत्त्वनिरूपणम्—संस्कृतमहाविद्यालयः, कालिकापत्तनम्
कूर्मपुराणम्—नागप्रकाशनम्, 1983 A.D.
वैशेषिकदर्शनम् उपस्कारभाष्यसहितम्—चौखम्बा
सूर्यसिद्धान्तः तत्त्वामृतव्याख्यासहितः—चौखम्बा-1987 A.D.
कालादर्शः (कर्गजपत्रमातृका)—एसियाटिकसोसाइटि पुस्तकालयः
वाचस्पत्यम्—श्रीसदाशिवकेन्द्रीयसंस्कृतविद्यापीठपुस्तकालयः
मनुस्मृतिः नवटीकोपेता—भारतीयविद्याभवनम्, मुम्बई-1978 A.D.
अध्यात्मरामायणम्—गीताप्रेस, गोरक्षपुरम्
योगवाशिष्ठम्—चौखम्बा
महाभारतम्—गीताप्रेस
शब्दकल्पद्रुमः—श्रीसदाशिवकेन्द्रीयसंस्कृतविद्यापीठपुस्तकालयः
कृत्यतत्त्वार्णवः—एसियाटिकसोसाइटि, कालिकापत्तनम्
कालमाधवः—वेङ्कटेश्वरष्टीमप्रेस, मुम्बई
विष्णुपुराणम्—गीताप्रेस, गोरक्षपुरम्/नागप्रकाशनम्-1985 A.D.
सिद्धान्तकौमुदी—मेहरचान्दलछमनदासः-1985
परमलघुमञ्जूषा—चौखम्बाप्रकाशनम्
नित्याचारप्रदीपः—एसियाटिकसोसाइटि, कालिकापत्तनम् 1928 A.D.
शुक्लयजुर्वेदः—सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
निर्णयसिन्धुः—निर्णयसागरप्रेस, मुम्बई-1949 A.D.
स्मृतिसारसङ्ग्रहः—दत्तप्रेस, कटकम्
मत्स्यपुराणम्—मेहरचान्दलछमनदासः, दिल्ली-1984 A.D.
गौतमीयतन्त्रम्—चौखम्बाप्रकाशनम्-1977 A.D
कालसारः - एसियाटिकसोसाइटि, कालिकापत्तनम्
कात्यायनस्मृतिः—वेङ्कटेश्वरष्टीमप्रेस, मुम्बई
याज्ञवल्क्यस्मृतिः मिताक्षरा-वीरमित्रोदयटीकाद्वयोपेता—चौखम्बा-1930
ब्रह्मपुराणम्—हिन्दीसाहित्यसम्मेलनम्, प्रयागः-1976 A.D.
ब्रह्मपुराणम्—नागप्रकाशनम्, दिल्ली
कालदीपः तेजनीसहितः—कुलमणिमिश्रसम्पादितः
त्रिकाण्डशेषः—वेङ्कटेश्वरष्टीमप्रेस, मुम्बई

स्मृतितत्त्वम्—जीवानन्दविद्यासागरसम्पादितम्, कालिकापत्तनम्
पण्डितसर्वस्वम् – कटकम्, 1897
कृत्यकल्पतरुः—गायकवाडप्रकाशनम् बरोदा-1950 A.D.
तिथिनिर्णयः नागोजिभट्टकृतः—चौखम्बा-1940 A.D.
बृहन्नारदीयपुराणम्—चौखम्बा 1975 A.D.
कृत्यकौमुदी टीकासहिता—जयकृष्णमिश्रसम्पादिता-1989 A.D.
शुद्धिदीपिका—मुक्तिमण्डपपुस्तकालयः, श्रीजगन्नाथमन्दिरम्, पुरी
मीमांसापरिभाषा – चौखम्बा
दक्षस्मृतिः—वेङ्कटेश्वरष्टीमप्रेस, मुम्बई
धर्मशास्त्रशब्दकोषः कुलमणिमिश्रकृतः – ओड़िशासर्बकारः, 1981 A.D.
लिखितस्मृतिः—वेङ्कटेश्वरप्रेस, मुम्बई
मीमांसादर्शनम् शाबरभाष्योपेतम्—आनन्दाश्रमप्रेसप्रकाशनम्
जैमिनीयन्यायमालाविस्तरः—आनन्दाश्रमप्रेसप्रकाशनम्-1946 A.D.
स्मृतिचन्द्रिका—सर्वकारीयप्राच्यविद्यापुस्तकालयः, महीशूर-1918 A.D.
श्राद्धचन्द्रिका - श्रीसदाशिवकेन्द्रीयसंस्कृतविद्यापीठपुस्तकालयः, पुरी
स्मृतीनां समुच्चयः—आनन्दाश्रमप्रेसप्रकाशनम्
विष्णुसहस्रनामस्तोत्रम् शाङ्करभाष्यसहितम् गीताप्रेस, गोरक्षपुरम्
औशनसस्मृतिः—वेङ्कटेश्वरप्रेसप्रकाशनम्, मुम्बई
गौतमधर्मसूत्रम् सूक्ष्मासहितम्—कुलमणिमिश्रसम्पादितम्
बृहद्योगियाज्ञवल्क्यस्मृतिः—माधवयोगमन्दिरसमितिः, पुने-प्रकाशनम्-1951
शुद्धिसर्वस्वम् बोधिनीसहितम्—स्वसम्पादितम्, 1993
यमस्मृतिः—वेङ्कटेश्वरप्रेसप्रकाशनम्
शब्दशक्तिप्रकाशिका—चौखम्बाप्रकाशनम्-1973 A.D.
गरुडपुराणम्—चौखम्बाप्रकाशनम्
नैषधमहाकाव्यम्—चौखम्बा
चतुर्विंशतिमतसङ्ग्रहः—बृजभूषणदासः, वाराणसी
यज्ञतत्त्वप्रकाशः—मोतीलालबनारसीदासः, दिल्ली-1992 A.D.
काव्यप्रकाशः—भण्डारकरप्राच्यविद्यागवेषणाप्रतिष्ठानम्, 1965
आपस्तम्बधर्मसूत्रम् उज्ज्वलासहितम्—चौखम्बा
स्मृतिसारोद्धारः—श्रीसदाशिवकेन्द्रीयसंस्कृतविद्यापीठपुस्तकालयः, पुरी
भारद्वाजगृह्यसूत्रम्—श्रीसदाशिवकेन्द्रीयसंस्कृतविद्यापीठपुस्तकालयः, पुरी
श्राद्धक्रियाकौमुदी—एसियाटिकसोसाइटि-1904 A.D.

राजमार्त्तण्डः—वेङ्कटेश्वरष्टीमप्रेसप्रकाशनम्
श्राद्धप्रदीपः रश्मिसहितः—वृजकिशोरस्वाईसम्पादितः-1982 A.D.
श्राद्धदीपः प्रभासहितः—एसियाटिकसोसाइटि, कालिकापत्तनम्-1977
योगिनीतन्त्रम्—भारतीयविद्याप्रकाशनम्, दिल्ली-1982 A.D.
आश्वलायनगृह्यसूत्रम्—श्रीसदाशिवकेन्द्रीयसंस्कृतविद्यापीठपुस्तकालयः, पुरी
श्राद्धकल्पः श्रीदत्तकृतः—वाराणसेयसंस्कृतविश्वविद्यालयः-1971
विधानपारिजातः—एसियाटिकसोसाइटिप्रकाशनम्-1958 A.D.
पराशरमाधवीयम्—एसियाटिकसोसाइटि
चतुर्वर्गचिन्तामणिः—वाराणसेयहिन्दुविश्वविद्यालयः-1971 A.D.
वामनपुराणम्—नागप्रकाशनम्, दिल्ली
ज्योतिस्तत्त्वसुधार्णवः—श्रीसदाशिवकेन्द्रीयसंस्कृतविद्यापीठपुस्तकालयः, पुरी
स्कन्दपुराणम्—वेङ्कटेश्वरष्टीमप्रेस
अत्रिस्मृतिः—वेङ्कटेश्वरप्रेसप्रकाशनम्
वीरसवस्वम्—मुक्तिमण्डपपुस्तकालयः, श्रीजगन्नाथमन्दिरम्, पुरी
तीर्थनिर्णयः भट्टोजिदीक्षितकृतः - चौखम्बा-1940 A.D.
लिङ्गपुराणम्—श्रीसदाशिवकेन्द्रीयसंस्कृतविद्यापीठपुस्तकालयः, पुरी
देवीपुराणम्—लालबहादुरकेन्द्रीयसंस्कृतविद्यापीठप्रकाशनम्-1976 A.D.
वाल्मीकिरामायणम्——गीताप्रेस
विष्णुस्मृतिः—चौखम्बा-1962 A.D.
छन्दोगपरिशिष्टम् परिशिष्टप्रकाश-प्रभासहितम्—एसियाटिकसोसाइटि
तन्त्रवार्त्तिकम्—श्रीसदाशिवकेन्द्रीयसंस्कृतविद्यापीठपुस्तकालयः,पुरी
कात्यायनश्रौतसूत्रम् कर्कभाष्यसहितम्— ,,
नित्याचारपद्धतिः—एसियाटिकसोसाइटि-1903 A.D.
हरिभक्तिविलासः सटीकः—गदाधरगौरहरिप्रेस,वृन्दावन-1986
कृत्यरत्नाकरः—एसियाटिकसोसाइटि-1925 A.D.
आङ्गिरसस्मृतिः—आड्यारलाइब्रेरी, माड्रास--1953 A.D.
ब्रह्मवैवर्त्तपुराणम्—वेङ्कटेश्वरष्टीमप्रेस
दुर्गोत्सवचन्द्रिका वर्द्धनाचार्यप्रणीता—कटकम्
श्रीमद्भागवतम्—गीताप्रेस
श्रीमद्भागवतम् भावार्थदीपिकासहितम्—मोतीलालबनारसीदासः
सप्तशतीचण्डी—गीताप्रेस
कालिकापुराणम्—चौखम्बा

रामार्चनचन्द्रिका—श्रीसदाशिवकेन्द्रीयसंस्कृतविद्यापीठपुस्तकालयः,पुरी
शङ्खस्मृतिः—वेङ्कटेश्वरष्टीमप्रेस
शाकुनवसन्तराजः—वेङ्कटेश्वरष्टीमप्रेस-1867 A.D.
वीरमित्रोदयसमयप्रकाशः –चौखम्बा
बौधायनस्मृतिः—वेङ्कटेश्वरष्टीमप्रेस
बौधायनधर्मसूत्रम्—चौखम्बा-1939
अमरकोषः रामाश्रमीसहितः—चौखम्बा-1985 A.D.
कालविवेकः - एसियाटिकसोसाइटि-1905 A.D.
श्रीनिवासदीपिका –श्रीसदाशिवकेन्द्रीयसंस्कृतविद्यापीठपुस्तकालयः,पुरी
पारस्करगृह्यसूत्रम् पञ्चभाष्योपेतम्— ,,
गोभिलगृह्यसूत्रम्— ,,
भास्वती— ,,
पद्मपुराणम्—नागप्रकाशनम्
पद्मपुराणम्—आनन्दाश्रमप्रकाशनम्--1894 A.D.
वर्षक्रियाकौमुदी—एसियाटिकसोसाइटी-1902 A.D.
सिद्धान्तविवरणम् कामाभट्टकृतम्—अप्रकाशिततालपत्रमातृका
लीलावती—संस्कृतपुस्तकभण्डार, काशी
नरसिंहपुराणम्—नागप्रकाशनम्-1987 A.D.
बृहद्धर्मपुराणम्—चौखम्बा
भक्तिरसामृतसिन्धुः—वृजगौरवप्रकाशनम्, वृन्दावनम्-1981 A.D.
श्रीमद्भगवद्गीता शाङ्करभाष्योपेता—गीताप्रेस
बृह्मसंहिता—मायापुरीप्रकाशनम्
गीतगोविन्दम्—श्रीसदाशिवकेन्द्रीयसंस्कृतविद्यापीठपुस्तकालयः,पुरी
वराहपुराणम् - मेहरचान्दलछमनदासः, दिल्ली-1984 A.D.
भुशुण्डरामायणम्—विश्वविद्यालयप्रकाशनम्, वाराणसी-1975 A.D.
रामोत्तरतापन्युपनिषत्—चौखम्बा-1991 A.D.
भगवन्नामकौमुदी—लक्ष्मीधरगोस्वामिविरचिता, नवद्वीपः-1976 A.D.
अनेकार्थसङ्ग्रहकोशः –चौखम्बाविद्याभवनम्-1969
श्रीदेवयानः—श्रीसदाशिवकेन्द्रीयसंस्कृतविद्यापीठधर्मशास्त्रविभागमुखपत्रम्
History of Dharmashastra by P. V. Kane.
Dharmashastra in Mithila by Jayadev Ganguly.
A Descriptive Catalogue of Sans. Mss. of Orissa Vol-I.

—o—